॥ नमो नमः श्रीगुरुप्रेमसूरये ॥

श्रीमद् यशोदेवोपाध्यायनिर्मितवृत्तियुतं

श्रीमद् देवगुप्तसूरिवर्यनिर्मितं

# नवपदप्रकरणम् ॥

(प्रथमो विभागः)

-: प्रकाशक :-

श्री जिनशासन आराधना ट्रस्ट

७, श्रीजी भोईवाडो, मुलेश्वर,

मुंबई - ४०० ००२.

। नमो नमः श्रीगुरुप्रेमसूरये ।

सूच्चा ते जीवलोए। जिणवयणं जे नरा न याणंति ॥
सूच्चाण वि ते सूच्चा । जे नाउण नवि करेंति ॥

તેઓ શોચનીય (દયાપાત્ર) છે કે જેઓ જિનવચન જાણુતા જ નથી. પણુ જેઓ જાણુવા છતા પોતાની શક્તિ અનુસાર તેને અમલમાં મુકવાનો પ્રયત્ન કરતા નથી તેઓ તેના કરતા પણુ વધારે દયાપાત્ર છે. —ઉપદેશમાળા

શ્રી જિનશાસન આરાધના ટ્રસ્ટ
૭, ત્રીજો ભોઇવાડો, ભુલેશ્વર, મુંબઇ-૨.

॥ नमो नमः श्री गुरुप्रेमसूरये ॥

श्रीमद्यशोदेवोपाध्यायनिर्मितवृत्तियुतम्

श्रीमद्देवगुप्तसूरिवर्यनिर्मितम्

# ॥ श्रीमन्नवपदप्रकरणम् ॥

## प्रथमो विभाग :

-: प्रकाशक :-

श्री जिनशासन आराधना ट्रस्ट

७, त्रीजो भोईवाडो, भूलेश्वर, मुंबई-४०० ००२.

विक्रम संवत २०४९ वीर संवत २५१९ मूल्य रु. ७०

<u>અનુમોદના</u>

શ્રી મુલુંડ જૈન શ્વે.મૂ.સંઘની ભાવભરી વિનંતિથી પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજયભુવનભાનુસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન સમતાનિધાન સ્વ. પંન્યાસજી પદ્મવિજયજી ગણિવર્યના શિષ્યરત્ન પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજયહેમચંદ્રસૂરિ મહારાજ સાહેબનું સંવત ૨૦૪૪ ના મુલુંડ (વેસ્ટ) મુકામે અનેક આરાધનાઓથી પરિપૂર્ણ ચાતુર્માસ થયું. ત્યાર પછી સંવત ૨૦૪૫ ના માગશર સુદ ૩/૪ થી ઉપધાન તપની ભવ્ય આરાધના શરુ થઈ. ઉપધાન તપ દરમિયાન પૂજ્યશ્રીના વરદ હસ્તે પૂજ્યપાદ આચાર્યદેવશ્રી ધનપાલસૂરિ મહારાજના આજ્ઞાવર્તી સ્વ. પ્રવર્તિની રંજનશ્રીજીના શિષ્યા સાધ્વીજીશ્રી વિનયપ્રભાશ્રીજી મહારાજના શિષ્યા તરીકે ધંધુકાનિવાસી કુમારી સોનલબેનની દીક્ષા થઈ. સાધ્વીજીશ્રી શાસનરત્નાશ્રીજી બન્યા.

દીક્ષાના આ ભવ્ય પ્રસંગે થયેલ જ્ઞાનદ્રવ્યની આવકમાંથી આ નવપદપ્રકરણ ગ્રંથનું પ્રકાશન કરવામાં આવેલ છે.

આની અમે ભૂરિ ભૂરિ અનુમોદના કરીએ છીએ.

લી.

શ્રી જિનશાસન આરાધના ટ્રસ્ટ

# પ્રકાશકીય

શ્રી યશોદેવ ઉપાધ્યાય રચિત વિસ્તૃત વૃત્તિ સહિત શ્રી દેવગુપ્ત આચાર્ય રચિત નવપદપ્રકરણનું અમે સહર્ષ પ્રકાશન કરીએ છીએ.

પ્રસ્તુત નવપદપ્રકરણમાં અરિહંતાદિ નવપદનું વર્ણન નથી, પરંતુ મિથ્યાત્વ, સમ્યક્ત્વ, વ્રતો (શ્રાવકના બાર વ્રતો) અને સંલેખના (અંતકાલિન આરાધના), આ ચારે વસ્તુઓનું નવદ્વારથી વર્ણન કરવામાં આવેલ છે.

નવદ્વારો આ પ્રમાણે છે. (૧) સ્વરુપ (૨) ભેદ (૩) ઉત્પત્તિ પ્રકાર (૪) દોષ (૫) ગુણ (૬) જયણા (૭) અતિચાર (૮) ભંગ (૯) ભાવના.

૧૩૮ ગાથામય મૂળ પ્રાકૃત ગ્રંથ ઉપર વિશદ ટીકા રચનાર શ્રી યશોદેવ ઉપાધ્યાય મૂળ ગ્રંથકાર આચાર્ય ભગવંત શ્રી દેવગુપ્તસૂરિના જ શિષ્ય છે. ટીકામાં પદાર્થોને અનેક દૃષ્ટાંતો પૂર્વક સમજાવ્યા છે. અને આ રીતે વિશદ બનેલી ટીકાનું પ્રમાણ લગભગ ૯૫૦૦ શ્લોક પ્રમાણ છે. ટીકા રચનાનો કાળ વિક્રમ સંવત ૧૧૬૫ છે. ૮૮૦ પૂર્વે રચાયેલા આ ગ્રંથને દેવચંદ લાલભાઈ પુસ્તકોધ્ધાર સંસ્થાએ સંવત ૧૯૮૩ માં પ્રકાશિત કરેલ છે. બાસઠ વર્ષ પૂર્વે પ્રકાશિત પ્રસ્તુત ગ્રંથ અતિજીર્ણ થઈ ગયેલ હોવાથી તેનું પુનઃપ્રકાશન અમે કરી રહ્યા છીએ. આ સમયે સંસ્થા પ્રત્યે કૃતજ્ઞતાના ભાવને પ્રદર્શિત કરીએ છીએ.

૯૫૦૦ શ્લોક પ્રમાણ પ્રસ્તુત ગ્રંથ ૩૪૦ જેટલા પેજમાં છપાયેલો, અત્યંત મોટો થતો હોવાથી અમે તેને સુગમતા ખાતર બે ભાગમાં વિભાજન કરેલ છે. પ્રથમ ભાગમાં ૧ થી ૧૯૪ પેજ સુધી લીધેલ છે. જેમાં ૭ અણુવ્રત સુધીની ૭૪ ગાથાનું વિવેચન આવે છે. બીજા ભાગમાં ૧૯૫ પેજથી ૩૩૯ પેજ સુધીમાં બાકીનો ગ્રંથ પૂરો થાય છે.

પ્રસ્તુત નવપદપ્રકરણ પર મૂળ ગ્રંથકાર આચાર્ય ભગવંતે પણ નાની ટીકા રચી છે. લઘુવૃત્તિનું પ્રકાશન પણ અમે સત્વરેજ કરી રહ્યા છીએ.

પરમારાધ્યપાદ ચારિત્રચક્રવર્તી સિધ્ધાંતમહોદધિ સ્વ.આચાર્યદેવ શ્રીમદ્વિજયપ્રેમસૂરીશ્વરજી મહારાજાની દિવ્યકૃપાથી તથા તેઓશ્રીના પટ્ટાલંકાર વર્ધમાનતપોનિધિ ન્યાયવિશારદ આચાર્યદેવ શ્રીમદ્ વિજયભુવનભાનુસૂરીશ્વરજી મહારાજાના શુભાશીષથી તેઓશ્રીના શિષ્યરત્ન સમતાસાગર વૈરાગ્યનિધિ સ્વ.પંન્યાસજી શ્રી પદ્મવિજયજી ગણિવર્યશ્રીના શિષ્યરત્ન પ.પૂ.આચાર્યદેવ શ્રીમદ્ વિજય હેમચંદ્રસૂરિ મહારાજની પ્રેરણાથી ચાલતા શ્રુતભક્તિના કાર્યમાં સુંદર પ્રગતિ સધાય એજ એક માત્ર શુભાભિલાષા.

લી.


શ્રી જિનશાસન આરાધના ટ્રસ્ટ

ટ્રસ્ટીઓ

૧) ચંદ્રકુમાર બી. જરીવાલા ૨) લલિતભાઈ આર.કોઠારી.

૩) નવિનચંદ્ર બી. શાહ ૪) પુંડરીક એ. શાહ.

॥ अर्हं ॥

श्रीमद्देवगुप्तसूरिवर्यनिर्मितं

# श्रीमन्नवपदप्रकरणं ।

श्रीमद्यशोदेवोपाध्यायनिर्मितवृत्तियुतम् ॥

नमो जिनाय कल्याणकराय ॥

शुद्धध्यानधनप्राप्त्या, कर्मदारिद्र्यविद्रुतौ । निर्वृतिः साधिता येन, तं नमामि जिनप्रभुम् ॥ १ ॥

जयति जितकर्मशत्रुर्लब्धातुलमाहिमकेवलपताकः । त्रिदशासुरकृतपूजः स तत्त्वनिर्वादको वीरः ॥ २ ॥

यस्याः प्रसादयानेन, लीलया ज्ञेयसागरम् । तरन्ति विबुधाः सा मे, सन्निधत्तां सरस्वती ॥ ३ ॥
मम बुद्धिकुमुदिनीयं यत्सङ्गमशशधरोदये सद्यः । अलभत विकासमसमं तान् भक्त्या निजगुरून्नौमि ॥ ४ ॥
श्रीदेवगुप्तसूरिर्विरचितवान् नवपदप्रकरणं यत् । विवृतिं तस्य विधित्सुर्विज्ञपये सज्जनानेवम् ॥ ५ ॥
वृत्तिर्यद्यपि विद्यतेऽत्र विहिता तैरेव पूज्यैः स्वयं, सङ्क्षेपेण तथापि सा न सुगमा गम्भीरशब्दा यतः ।
विस्पष्टार्थपदप्रबन्धरुचिरा तेनेयमारभ्यते, किञ्चिद्विस्तरशालिनी तनुधियामिच्छानुवृत्त्या मया ॥ ६ ॥
यच्चासमञ्जसं किञ्चिज्जायतेऽत्र प्रमादतः । पुत्रापराधवत्सर्वं, तद्बुधैर्मम सह्यताम् ॥ ७ ॥

इह चादावेव प्रकरणकारोऽभीष्टदेवतास्तवमभिधेयादित्रयं च प्रतिपादयितुकामो गाथामाह—

**नमिऊण वद्धमाणं मिच्छं सम्मं वयाइं संलेहा । नवभेयाइं वोच्छं सड्ढाणमणुग्गहट्ठाए ॥ १ ॥**

न चैतद्वक्तव्यम्-अभीष्टदेवतानमस्कारस्यानर्थकत्वादप्रस्तुतत्वाच्च अभिधेयादीनां चानधिगतशास्त्रस्य प्रत्याययितुमशक्यत्वादयुक्तमादावेव तत्प्रतिपादनमिति, यतः शिष्टानामयमेव समयो यदुत तैरभीष्टे वस्तुनि प्रवर्त्तमानैरवश्यमिष्टदेवतास्तवपूर्वकं प्रवर्त्तितव्यं, यथोक्तम्-"शिष्टानामेष समयस्ते सर्वत्र शुभे किल । प्रवर्त्तन्ते सदेवेष्टदेवता- 

स्तवपूर्वकम् ॥ १ ॥" इति, तथा च शिष्टसमाचारपरिपालनमस्य प्रयोजनमतोऽनर्थकत्वादित्यसिद्धो हेतुः, अप्रस्तुतत्वादित्यप्यसिद्धं, श्रेयोभूतस्य शास्त्रस्य संभाव्यमानविघ्नोपशान्तिहेतुतया नमस्कारस्य प्रस्तुतत्वात्, तथा चोक्तम्—"बहुविग्घाइं सेयाइं तेण कयमंगलोवयारेहिं। सत्थे पयट्टियव्वं विज्जाएँ महानिहीएव्व ॥ १ ॥" अभिधेयादीनां चानवगतसकलशास्त्रस्याप्येतद्गणने निरस्तनिरभिधेयत्वाद्याशङ्कस्य प्रवृत्त्यङ्गत्वाद्युक्तमादावुपादानं, तथा चोक्तम्—"प्रेक्षावतां प्रवृत्त्यर्थं, फलादित्रितयं स्फुटम्। मङ्गलं चैव शास्त्रादौ, वाच्यमिष्टार्थसिद्धये ॥१॥" येऽपि शास्त्रे श्रोतृजनप्रवृत्त्यङ्गतया प्रयोजनं मुख्यमिच्छन्ति "अनिर्दिष्टफलं सर्वं, न प्रेक्षापूर्वकारिभिः। शास्त्रमाद्रियते तेन, वाच्यमग्रे प्रयोजनम् ॥१॥ सर्वस्यैव हि शास्त्रस्य, कर्मणो वाऽपि कस्यचित्। यावत्प्रयोजनं नोक्तं, तावत्तत्केन गृह्यताम्? ॥ २ ॥" इत्युक्तिप्रामाण्यात् तेऽप्यभिधेयादित्रयमेव परमार्थतः प्रवृत्तिकारणमङ्गीकृतवन्तः, तथाहि-शास्त्रमनिर्दिष्टप्रयोजनं प्रेक्षावद्भिर्नाद्रियत इति ब्रुवाणैरभिधेयमपि प्रयोजनाक्षिप्तत्वात् प्रवृत्त्यङ्गतयोपात्तमेव, नहि निरभिधेयस्य प्रयोजनं वक्तुं शक्यं, यदुक्तम्—"न चाप्यविषयस्येह, शक्यं वक्तुं प्रयोजनम्। काकदन्तपरीक्षादेस्तत्प्रयोगाप्रसिद्धितः ॥ १ ॥" इति, सम्बन्धस्त्वभिधेयप्रयोजनान्तर्गत एवेति पृथगनुक्तोऽपि सामर्थ्याद्गम्यते, यदुक्तम्—"शास्त्रं प्रयोजनं चेति, सम्बन्धस्याश्रयावुभौ। तदुक्त्य-

न्तर्गतस्तस्माद्भिन्नो नोक्तः प्रयोजनात् ॥ १ ॥" अतोऽभिधेयादिप्रतिपादनमपि शास्त्रादौ श्रोतृप्रवृत्त्यङ्गत्वादविरुद्धमेवेति। अस्याश्चाद्यपादेनेष्टदेवतानमस्कारः शेषपादत्रयेणाभिधेयप्रयोजने साक्षात् सम्बन्धस्त्वर्थादुक्त इति समुदायार्थो, व्यासार्थस्तूच्यते—'नमिऊण' नत्वा प्रणम्येत्यर्थः 'वद्धमाणं'ति वर्द्धतेऽचिन्त्यमाहात्म्यैः सम्यग्दर्शनज्ञानचारित्रादिभिर्गुणैः स्वयमेव अस्य वा जन्मनि ज्ञातकुलं कोशकोष्ठागारादिसम्पद्विशेषैर्वर्द्धत इति तद्वृद्धिहेतुत्वाद्वर्द्धमानः, इष्टदेवता चायं गुणप्रकर्षरूपत्वात्परमगत्यवाप्तेरिति, तं नत्वा किं ?-'वोच्छ' मिति वक्ष्यमाणक्रियाऽभिसम्बन्धः, एतावता चेष्टदेवतास्तवे प्रतिपादिते प्रेक्षापूर्वकारिणः श्रोतारो निरभिधेयमिदमनभिमताभिधेयं वा तथा निष्प्रयोजनमनभिमतप्रयोजनं वेति मन्यमाना न प्रकरणश्रवणे प्रवर्त्तेरन् अतो—"मिच्छं सम्मं वयाइं संलेहा नवभेयाइं" इत्याभिधेयं 'सद्धाणमणुग्गहट्ठाए' इति प्रयोजनं चोक्तं, तत्र पर्यन्तोपात्तं 'नवभेदानि' इति पदं सर्वपदैरभिसंबध्यते, तेन मिथ्यात्वम्—अर्हत्प्रणीततत्त्वार्थाश्रद्धानहेतुर्नवभेदं, सम्यक्त्वम्—अष्टादशदोषविहितशेषोऽर्हन् मे देवता अष्टादशसहस्रशीलाङ्गधारकाः साधवो गुरवो जिनोद्दिष्टा जीवादय एव तत्त्वानीतिश्रद्धानहेतुरात्मपरिणामः,तच्च नवभेदं, व्रतानीति—पञ्चाणुव्रतानि त्रीणि गुणव्रतानि चत्वारि शिक्षाव्रतानि विरतिरूपाणि प्रत्येकं नवभेदानि,संलेखनां—मारणान्तिकीं शरीरकषायादीनां झोषणां नवप्रकारां, सर्वाण्येतानि मिथ्यात्वादीनि

प्रत्येकं 'नवभेदानि' नवद्वाराणि 'वक्ष्ये' अभिधास्ये, भेदाश्च नव उत्तरगाथायामभिधास्यन्ते, एषां च मिथ्यात्वादीनामनेनैव क्रमेण भावात्प्रकरणकारेणैवमुपन्यासो विहितः, तथाहि-सर्व एवायं जीवो नारकतिर्यङ्नरामरगतिविविधविभीषिकारौद्रे शब्दादिपञ्चविधविषयसुखलम्पटप्राणिगणोपदर्शितनानाविधाधिव्याधिजीवमधुमक्षिकाकीर्णतुच्छतमकामसौख्यक्षौद्रे जन्ममरणप्रमुखदुःखश्वापदविभीषणे संसारारण्ये पूर्वमसुन्दराचरणकारणेन मिथ्यात्वकुटिलसहचरेणैव भ्राम्यते, न च तदा कश्चिदेवं जानाति—यदुतैष एव ममैवंविधभीषणस्थाननिवासजनितानन्तदुःखसम्पातहेतुः, केवलं तमेव बहु मन्यते, पश्चाच्च कस्यचिज्जीवस्यानाभोगानिर्वर्त्तितगिरिसरिदुपलघोलनाकल्पयथाप्रवृत्तकरणमित्रकथिततद्दोषस्यैव ताद्विभूतिमिवोत्कृष्टस्थितिं सप्ततिसागरोपमकोटीकोटीलक्षणामपहृतवतोऽतिचिरपरिचितोऽयं मे समस्तापहारेण माऽत्यन्तविलक्षो भूदितीव संचिन्त्य तस्य किञ्चिद्द्रविणशेषायमाणामेकां सागरोपमकोटीकोटीं किञ्चिदूनां तथैव धृतवतो निर्वृत्तिनगरीनिवासार्थिनस्तन्मार्गनिवेदकाप्तपुरुषयोगमभिलषतः प्राप्तावसरसमागतापूर्वकरणानिवृत्तिकरणसन्नरोपदर्शितोऽक्षेपतत्प्रापकः सम्यक्त्वसन्मार्गलाभो जायते, तदनन्तरं च पल्योपमपृथक्त्वमात्रे कालेऽतिक्रान्ते स्थूलप्राणातिपातादिदेशविरतिः संपद्यते, तथा चागमः—"संमत्तंमि उ लद्धे पलियपुहुत्तेण सावओ होइ। चरणोवसमखयाणं साग-

रसंखंतरा हुंति ॥ १ ॥" त्ति, प्राप्तसम्यक्त्वदेशविरतिश्च मरणान्तसंलेखनामाराधयत्यतो युक्त एवैवमुपन्यासः, 'मिथ्यात्वादीनि वक्ष्य' इत्येतावता च ग्रन्थान्तरोदितार्थानुवादकतया मा भूदनारम्भणीयत्वमस्येत्यभिप्रायवानाह—'नवभेदानी' ति, अयमर्थः—यद्यपि श्रावकप्रज्ञप्त्यादिप्रकरणेष्वपि मिथ्यात्वादयः पञ्चदश पदार्थाः कयाऽपि भङ्ग्या प्रतिपादितास्तथाऽपि नवनवद्वारनिरूपणेन न तत्राभिहिता इति विशेषाभिधानायेदमारभ्यते, एतेन च पादद्वयेन साक्षात्सप्रपञ्चमभिधेयमुक्तं, सम्बन्धस्तु सामर्थ्येन, तथाहि-मिथ्यात्वादीनि नवभेदानि वक्ष्य इति वदता मिथ्यात्वादयोऽस्याभिधेया इति दर्शितं, प्रकरणाभिधेययोश्चाभिधानाभिधेयसम्बन्धोऽर्थादुक्त इति । 'श्राद्धानामनुग्रहार्थ'मिति श्रद्धा विद्यते येषां ते श्राद्धाः-श्रावकास्तेषां श्राद्धानामिति, अनुग्रह-उपकारस्तदर्थमनुग्रहार्थं, कथं चासौ तेषां कृतो भवति ?, यदा शारीरमानसाद्यनेकक्लेशावासोषितानां चतुर्गतिनिबन्धनानन्तजननमरणपरिवर्त्तननिर्विण्णानां सकलसन्तापापनोददक्षं निरतिशयसुखस्वभावायापवर्गनगरमार्गप्रदर्शकं जिनवचनमुपदिश्यते, तथा चोक्तम्—"नृणामनन्तमृतिजन्मजरातुराणां, निःशेषदोषविगमाय समुद्यतानाम् । नान्यो यतस्त्रिभुवनेऽपि जिनोक्तधर्मशास्त्रोपदेशनसमः परमोपकारः ॥ १ ॥" इति, अनेन च गाथाचरमपादेन कर्त्तुरनन्तरं प्रयोजनमुक्तं, परम्पराप्रयोजनं तु मुक्तिलक्षणं, श्रोतुश्चानन्तरं मिथ्यात्वादि-

पदार्थपरिज्ञानं, "सम्यक्तत्त्वपरिज्ञानाद्धेयोपादेयवेदिनः । उपादेयमुपादाय, गच्छन्ति परमां गतिम् ॥ १ ॥" इति वचनात्परम्परया मुक्तिः, प्रयोजनप्रकरणयोः सम्बन्धश्च साध्यसाधनलक्षण इत्यादि सर्वं सामर्थ्यादुक्तमवसेयम् । ननु सम्यक्त्वादीनां निःश्रेयसहेतुत्वाद् युक्तं वचनं, मिथ्यात्वं तु निःश्रेयसपरिपन्थित्वात्किमर्थमुच्यते ?, सत्यं, हानार्थं, न खलु हेयहानमन्तरेणोपादेयमुपादातुं शक्यं, हेयं च मिथ्यात्वं सकलगुणविघातित्वात्, न च हेयमप्यज्ञातं हीयते, इतो नवभिः प्रकारैः सम्यग् ज्ञात्वा सर्वथेदं हेयम्, अस्यार्थस्य ज्ञापनाय कतिपयगुणविघात्त्यन्यहन्तव्योपलक्षणाय चेदमुदितम्, अथवा भेदद्वारे मिथ्यात्वमनेकधा वक्ष्यते, तत्राभिनिवेशरहितमिदं सम्यक्त्वहेतुरेव अतो यथा विरतिहेतुः सम्यक्त्वं वाच्यं तथा तद्धेतुर्मिथ्यात्वमपीति सम्यक्त्वादिवन्मिथ्यात्वमपि उपादेयमेवेत्यदोष इत्यलं प्रसङ्गेनेति गाथार्थः ॥

साम्प्रतं 'नवभेयाइं वोच्छ' मिति प्रतिज्ञासूत्रप्रतिपादिताः के ते नव भेदाः ? इत्याशङ्कापनोदार्थं नव भेदानाह—

**जारिसओ १ जइभेओ २ जह जायइ ३ जह व एत्थ दोस ४ गुणा ५ ।**
**जयणा ६ जह अइयारा ७ भंगो ८ तह भावणा ९ णेया ॥ २ ॥**

'यादृशः' यत्स्वरूपो मिथ्यात्वादिर्गुण इत्येको भेदः, 'यद्भेदः' ये भेदा यस्यासौ यद्भेदो—यावद्भेद इति द्वितीयो

भेदो, 'यथा जायते' येन प्रकारेणोत्पद्यते इति तृतीयो भेदः, यथा चात्र दोषाश्च गुणाश्च दोषगुणाः, यथा तद्विपक्षा दोषाः संभवन्तीति चतुर्थो भेदः, यथा च तदासेवने गुणाः संभवन्तीति पञ्चमो भेदः, 'यतने'ति गुरुलघ्वालोचनरूपा यतना यथैतेषु कर्त्तव्येति षष्ठो भेदः, यथाऽतिचाराः-तदतिचरणरूपास्तेषु संभवन्तीति सप्तमो भेदः, 'भङ्ग' इति यथा चैतेषां भङ्गो भवति—अभावः सर्वथा संपद्यत इत्यष्टमो भेदः, तथा भावना ज्ञेया, यथैतेषां गुणानां वृद्ध्यर्थं भावना भाव्या इति नवमो भेदः, एते नव भेदाः प्रत्येकं मिथ्यात्वादिषु ज्ञेयाः, भेदा—द्वाराणीति गाथार्थः ॥ २ ॥



व्याख्यातानि नामतो नव द्वाराणि, साम्प्रतं 'यथोद्देशं निर्देश' इति न्यायान्मिथ्यात्वमेवाद्यद्वारेण व्याचिख्यासुराह—

देवो धम्मो मग्गो साहू तत्ताणि चेव सम्मत्तं । तव्विवरीयं मिच्छत्तदरिसणं देसियं समए ॥ ३ ॥

देवो धर्मो मार्गः साधवस्तत्त्वानि चैव सम्यक्त्वं, जिनागमाभिहितरूपाणि सर्वाणीति विशेषणपदं चकारेणानुक्तसमुच्चयार्थेन सूचितम्, एवकारोऽवधारणार्थः, स च चकारसूचितविशेषणपदेन संबध्यते, ततोऽयमर्थः—यथाऽवस्थितस्वरूपाण्येव देवादीनि सम्यक्त्वं न विपरीतरूपाणीति, ननु चैतद्विषयो यो रुचिपरिणामः स सम्यक्त्वमुच्यते, कथमेतान्येव सम्यक्त्वमित्युक्तं ?, सत्यं, विषयविषयवतोरभेदोपचारवृत्त्या देवादिविषयो रुचिपरिणामो देवादिशब्दै-

र्विवक्षितोऽतो देवादीनि सम्यक्त्वमित्युक्तम्, एषां च स्वरूपमिदं—' यस्याष्टादश दोषाः क्षुधादयः क्षयमुपागताः सर्वे । मुक्तिप्रदः स देवो विज्ञेयः केवलज्ञानी ॥ १ ॥ यत्र प्राणिदया सत्यमदत्तपरिवर्जनम् । ब्रह्मचर्यं च सन्तोषो, धर्मोऽसावभिधीयते ॥ २ ॥ ज्ञानदर्शनचारित्रपरिपालनलक्षणः । अक्षेपमोक्षनगरप्रापको मार्ग इष्यते ॥ ३ ॥ दशविधयतिधर्मरताः समविगणितशत्रुमित्रतृणमणयः । जीवादितत्त्वविज्ञास्तीर्थकरैः साधवः कथिताः ॥ ४ ॥ तापच्छेदकषैः शुद्धः, सुवर्णमिव यद्भवेत् । युक्तिसिद्धान्तसिद्धत्वात्तत्तत्त्वमभिधीयते ॥ ५॥' अथवा 'सूचनात्सूत्र'मितिवचनाद्देवधर्ममार्गसाधुतत्त्वेषु देवाद्यध्यवसायस्यैव देवादिशब्दैर्विवक्षितत्वाद्देवो धर्मो मार्गः साधुस्तत्त्वानि चैव सम्यक्त्वमित्युक्तं, ननु च मिथ्यादर्शनस्वरूपमभिधित्सितं तत्किमर्थमप्रस्तुतं सम्यक्त्वस्वरूपमुक्तं?, सत्यं, सम्यक्त्वमिथ्यात्वयोः शीतोष्णस्पर्शयोरिव परस्परविरोधित्वात् सम्यक्त्वस्वरूपे ज्ञाते तद्विरोधिमिथ्यात्वस्वरूपं सुज्ञानं भवतीति ज्ञापनार्थम्, अत एवाह—'तव्विवरीयं मिच्छत्तदंसणं देसियं समये' त्ति तस्मात्—सम्यक्त्वस्वरूपे ज्ञाते देवधर्ममार्गसाधुतत्त्वेषु यथाऽवस्थितरुचिपरिणामरूपाद्विपरीतम्-अन्यथा, यथा रागादियुक्तोऽपि देवो, नास्ति वा देवः; तथा चोक्तम्—"पत्ती पत्ती पाणिउ पाणिओ, डूंगरु हूंता कक्करु आणिओ। कक्करु अग्गइ वज्जइ तूरा, देक्खु न माइ विगोया पूरा ॥१॥" इति, प्राणिव्यपरोपणादिनाऽपि धर्मो, नास्ति वा धर्मः, तदुक्तम्—"केण

दिट्ठु परलोओ जेण धम्मिण धणु दिज्जइ, काइं देवदाणविहिं अत्थसंचओ परिकिज्जइ। पियमूढओ जणु सव्वु पहु जो नवि धणु रक्खइ, धम्मट्ठाणकयतणओ साओ अज्जवि नवि चक्खइ ॥१॥ " इति, मोक्षस्याज्ञानादिकः, नास्ति वा कश्चिदिति, आरम्भपरिग्रहादिप्रवृत्ता मुत्कलचारिणो मुनयो, यदुक्तं—"खंतपियंतवि सुरओ रमंतवि, अलिओ मुहुलु चक्खु पूयंतवि। इमं वयंति सिद्धं सुरलोयह, मत्थइ पाओ दिवि पसु लोयह ॥ १ ॥" त्ति । न सन्ति वा केचन, यत उक्तम्—"स्त्रीमुद्रां झषकेतनस्य महतीं सर्वार्थसम्पत्करीं, ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलाकाङ्क्षिणः। ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः, केचित्पञ्चशिखीकृताश्च जटिनः कापालिकाश्चापरे ॥ १ ॥" इति, वैशेषिक साङ्ख्यादिप्रणीतान्यपि तत्त्वानि, न वा कानिचित्, इत्यादिरूपं मिथ्यात्वदर्शनं ' देशितं ' कथितं, क ?—' समये ' सिद्धान्ते, अत एव केनचित्सम्यग्दृष्टिना मूढमिथ्यादृष्टिचेष्टितान्यवलोक्य खेदः कृतो, यथा—" रागी देवो दोसी देवो मामिसुत्तंपि देवो, मज्जे धम्मो मंसे धम्मो जीवहिंसाएँ धम्मो । सत्ता मत्ता कंतासत्ता जे गुरू तेवि पुज्जा, हा हा कट्ठं नट्ठो लोओ अट्टमट्टं कुणंतो ॥ १ ॥" इति गाथार्थः ॥ २ ॥ व्याख्यातं प्रथमद्वारेण स्वरूपकथनरूपेण मिथ्यात्वमिदानीं द्वितीयद्वारेण भेदद्वारं व्याचिख्यासुराह—

आभिग्गहियमणाभिग्गहियं तह अभिनिवेसियं चेव । संसइयमणाभोगं मिच्छत्तं पंचहा होइ ॥ ४॥

आभिग्रहिकमनाभिग्रहिकं तथाऽऽभिनिवेशिकं चैव सांशयिकमनाभोगं मिथ्यात्वं पञ्चधा भवति। यद्यपि चान्यत्राभोगानाभोगभेदेन द्विविधं मिथ्यात्वमुक्तं, शेषभेदानामत्रैवान्तर्भावात्, तत्राभोगमिथ्यात्वं सदेवतानामिति, तथाऽप्यवान्तरभेदापेक्षया प्रकरणकारेण पञ्चधेत्युक्तं, तत्राभिग्रहिकं येन बोटिकादिकुदर्शनानामन्यतमदभिगृह्णाति, अभिग्रहः--आग्रहस्तस्माज्जातमाभिग्रहिकं, क्रीतादेराकृतिगणत्वादिकण्, एवमुत्तरत्रापि, तद्विपरीतमनाभिग्रहिकम्, आभीरादीनाम्, ईषन्माध्यस्थ्याद्वाऽनभिगृहीतदर्शनविशेषाणां सर्वदर्शनानि शोभनानीत्येवंरूपा या प्रतिपत्तिस्तदनाभिग्रहिकम्, 'आभिनिवेशिकम्'अभिनिवेशाद-असदाग्रहाज्जातं गोष्ठामाहिलादीनामिव, 'संसयियं'सांशयिकं संशयाज्जातं-यदिदमुक्तमर्हता तत्त्वं जीवादि तन्न जाने तथा स्यादुतान्यथेत्येवंरूपम्, 'अनाभोगम्' आभोगो विशिष्टज्ञानं स न विद्यते यत्र तदनाभोगं मिथ्यात्वं एकेन्द्रियादीनामिव, इत्येवं मिथ्यात्वं पञ्चधा भवति, क्वचित्त्वस्या गाथाया इत्थं पाठो दृश्यते–"अभिगहियमणभिगहियं मिच्छत्तं अभिनिवेसियं चेव। संसइयमणाभोगं तिविहं वा अहवऽणेगविहं ॥ ८ ॥" तत्र पादत्रयव्याख्या पूर्ववदेव, केवलं मिथ्यात्वशब्दो द्वितीयपादादिवर्त्त्यपि सर्वपदेषु संबध्यते–आभिग्रहिकं मिथ्यात्वमित्यादि, 'तिविहं व' त्ति

वाशब्दः पक्षान्तरसूचकः, 'त्रिविधं' त्रिविधप्रकारं वा सांशयिकाभिग्रहिकानाभिग्रहिकभेदात्, तदुक्तम्—"तं मिच्छत्तं जमसद्दहणं तच्चाण होइ भावाणं । संसइयमभिग्गहियं अणभिग्गहियं च तं तिविहं ॥ १ ॥" 'अहव अणेगविहं' ति अथवेति प्रकारान्तरद्योतकः, अनेका विधा नयमतभेदाद् यस्य तद् अनेकविधम्—अनेकप्रकारम्, अनेकधर्मात्मके वस्तुनीतरधर्मप्रतिक्षेपेणैकधर्माश्रिताध्यवसायस्य मिथ्यात्वरूपत्वात्, तस्य च सङ्ख्यातुमशक्यत्वात्, तदुक्तम्—"जावइया वयणपहा तावइया चेव हुंति नयवाया । जावइया नयवाया तावइया चेव परसमया ॥ १ ॥" इति ॥ इति गाथार्थः ॥ ४ ॥ व्याख्यातं द्वितीयेन भेदद्वारेण, अधुना तृतीयेनाभिधित्सुराह—

मइभेया पुव्वोग्गह संसग्गीए य आभिनिवेसेण । चउहा खलु मिच्छत्तं साहूणमदंसणेणऽहवा ॥५॥

जायत इति क्रियाऽध्याहाराच्चतुर्द्धा खलु मिथ्यात्वं जायत इति सम्बन्धः, कैश्चतुर्भिः प्रकारैः? इत्याह-'मतिभेदात्' मतिः—बुद्धिस्तस्या भेदो—विशेषो यथाऽवस्थितसमस्तवस्तुप्रतिपत्तावप्येकत्र कुत्रचिदर्थेऽन्यथा प्रतिपत्तिरूपस्तस्मान्मतिभेदादित्येकः प्रकारः, 'पुव्वोग्गह' त्ति सूत्रत्वाल्लुप्तपञ्चम्येकवचनो निर्देशः, ततः पूर्वव्युद्ग्रहादित्यर्थः, स च पूर्वं कुदर्शनवासनावासितान्तःकरणस्य जीवद्रव्यस्य युक्तिशतैर्भूयो भूयः प्रतिबोध्यमानस्यापि तत्संस्कारानुवृत्त्या ॥ ६ ॥

कदाग्रहस्तस्माच्च मिथ्यात्वं जायत इति द्वितीयः कारणप्रकारः, 'संसग्गीय' त्ति मिथ्यादृष्टिभिः सह यः सम्बन्धः स संसर्गोऽत्र विवक्षितस्तस्माच्चेति तृतीयः कारणविकल्पः, अयं च दोषहेतुत्वेन सुप्रतीत एव, यदुक्तम्—"अंबस्स य निंबस्स य दुण्हंपि समागयाइं मूलाइं। संसग्गीएँ विणट्ठो अंबो निंबत्तणं पत्तो ॥१॥" तथा—"तिलाश्चम्पक-सम्पर्कात्प्राप्नुवन्त्यधिवासनम्। रसोनभक्षस्तद्गन्धः, सर्वे साङ्क्रमिका गुणा ॥२॥" इति, 'अभिनिवेसेणं' ति अभिनिवेशो नामाहम्पुरुषिकयाऽन्यथाभूतस्यापि सतो वस्तुनोऽन्यथा प्ररूपणं तेनेति चतुर्थो हेतुभेदः, 'चउह' त्ति चतुर्भिः प्रकारैः, खलुशब्दो वाक्यालङ्कारे नतु अवधारणार्थस्तेनोक्तं—'साहूण अदंसणेणऽहवा' साधवो-यतयस्तेषामदर्शनम्-अनवलोकनम्, अथवाशब्दः समुच्चयार्थस्तेन साधूनामदर्शनेन चेत्यर्थः, एतच्चाऽऽबालगोपालाङ्गनाजनप्रसिद्धमेव प्रेमदृष्टान्तेन, यथा प्रेमात्यन्तवृद्धिमुपगतमपि कालवशेन भर्त्रादावभीष्टे देशान्तरादिगते निधनमुपयाति, यथोक्तम्—"अदंसणेण सुन्दरि! सुट्ठुवि नेहाण बन्धुजणियाइं। हत्थयलपाणियाइ व कालेण गलंति पेम्माइं ॥" ति, तथा कदाचित्सम्यक्त्वलाभेऽपि सर्वथा साध्वदर्शनेन मिथ्यात्वमुपजायते, अत एव श्रावकाणामेवं सामाचारी भणिता, यथा—"निवसेज्ज तत्थ सड्ढो, साहूणं जत्थ होइ संपाओ। चेइयघराइ जहियं तयण्णसाहम्मिया चेव ॥ १ ॥" त्ति, अन्यथा साधुसाधर्मिकचै-

त्याद्यभावे मिथ्यात्वमपि यायात्, तथा चोक्तं-"न सन्ति येषु देशेषु, साधवो धर्मदीपकाः। नामापि तत्र धर्मस्य, ज्ञायते न कुतः क्रिया ? ॥ १ ॥" इति। साधुदर्शने चैवं गुणाः, यथा-" साहूण दंसणेणं, नासइ पावं असंकिया भावा। फासुयदाणे निज्जर अणुग्गहो नाणमाईणं॥ १ ॥" अतोऽन्वयव्यतिरेकाभ्यां साध्वदर्शनेन मिथ्यात्वं सुप्रसिद्धमेव, मतिभेदादिकारणेभ्यश्च मिथ्यात्वोत्पत्तौ जमालिप्रभृतयो दृष्टान्ताः, तथा चोक्तम्-" मइभेएण जमाली पुव्वुग्गहियंमि हवइ गोविंदो। संसग्गि सागभिक्खू गोट्ठामहिलो अभिनिवेसे ॥ १ ॥" त्ति, एते च यद्यपि सूत्रकारेण मूत्रगाथायां नोपात्तास्तथाऽपि प्रपञ्चितज्ञविनेयानुग्रहाय वृत्तौ मया दर्श्यन्ते, तत्र मतिभेदे जमालिकथानकं तावत्कथ्यते—

इहैव जम्बूद्वीपे भरतवर्षालङ्कारभूतं धनधान्यहिरण्यादिसम्पदुपेतं क्षत्रियकुण्डग्रामाभिधानं नगरं, तत्र च तदा भगवतो महावीरस्वामिनो ज्येष्ठभगिन्याः प्रियदर्शनाभिधानायास्तनयो नयविनयसम्पन्नः सत्त्वेषु दयापरः परमनिजरूपोपहसितकामो जमालिनामा क्षत्रियकुमारः प्रतिवसति स्म, तस्य च वर्द्धमानस्वामिदुहिता स्वशरीररूपसौन्दर्यविजितामरसुन्दरीका प्राणेभ्योऽपि प्रियतरा सुदर्शनाऽभिधाना पत्नी बभूव, तया सह जीवलोकसारं पञ्चप्रकारं विषयसुखमनुभवतो व्यतिक्रान्तः कियानपि कालः, अन्यदा निजभवनवातायनस्थितस्त्रिकचतुष्कचत्वरादिप्रदे-

शेषु गृहीतोदारवेषालङ्कारं सारतरविविचित्रपरिवारं नानाविधयानवाहनाधिरूढं ब्राह्मणकुण्डग्रामनगराद्बहिर्बहुशालकचैत्ये विमुक्तराज्यपुरपरिजनबन्धुवर्गोऽङ्गीकृतसमस्तसावद्यविनिवृत्तिरूपापवर्गमार्गो विषोढगाढपरीषहोपसर्गोऽतिक्रम्य सार्द्धषण्मासाधिकद्वादशवर्षमात्रं छद्मस्थपर्यायं विधाय घातिकर्मक्षयं समुत्पाद्याखिललोकालोकप्रकाशनप्रत्यलं केवलं विहरन् ग्रामारामनगराकरविहारमण्डितां वसुमतीं श्रमणो भगवान् महावीरोऽद्य समवसृतस्तद्दर्शनवन्दनाद्यर्थमेत यात यास्यथ गता यास्याम इत्याद्यनेकप्रकारं परस्परमालापं कुर्वाणं सकलमेव तन्नगरनिवासिलोकमालोक्य समुत्पन्नकुतूहलः समासन्नवर्त्तिनमाहूय कञ्चुकिनं पप्रच्छ—अहो कोऽयमत्राद्योत्सवप्रकारो यत्र समस्त एव सान्तःपुरपरिजनो जन एष प्रयाति ?, तेन च लोकवाक्यात्पूर्वमेवावगतवृत्तान्तेनोक्तं—यथा ब्राह्मणकुण्डग्रामनगराद्बहिर्बहुशाल्कचैत्ये तवैव मातुलः श्वशुरश्च श्रमणो भगवान् महावीरः समवसृतस्तद्वन्दनाद्यर्थमेष लोक एवमुत्सुको व्रजति, एतदाकर्ण्य हर्षप्रकर्षोद्भिन्नरोमाञ्चो निजसेवकं पार्श्ववर्तिनमवादीद्—यथा गच्छ शीघ्रं यानशालायां चतुर्घण्टं रथं साश्वं प्रगुणीकृत्यात्रोपतिष्ठ येनाहमपि भगवद्वन्दनाय गच्छामि, स यथाऽऽज्ञापयति कुमार इत्यभिधाय त्वरितपदैर्भवनान्निश्चक्राम, कुमारस्तु ततः स्थानादुत्थाय मज्जनगृहं जगाम, तत्र स्नात्वा विहितकर्पूरकस्तूरिकामिश्रश्रीचन्दनविलेपनो गृहीतसारालङ्कारो यावदास्ते

तावदत्रान्तरे पूर्वप्रेषितः सेवकः सज्जीकृतचतुर्घण्टरथो व्यजिज्ञपत्, यथा कुमार! सम्पादितत्वदादेशोऽहमेष तिष्ठामि, कुमारस्तद्वचनमाकर्ण्य त्वरिततरचरणन्यासं गृहान्निष्क्रम्य तमेव रथमारुह्योपरि धार्यमाणप्रवरातपत्रो धनुष्काण्डखड्गफलकादिनानाविधायुधसहायैः पुरतः पृष्ठतो धावद्भिः पदातिनिवहैरनुगम्यमानः क्षत्रियकुण्डग्राममध्ये बहुशालकचैत्याभिमुखः कियन्तमपि भूभागमुल्लङ्घ्याग्रतो नातिदूरवर्त्तिसमवसरणमवलोक्य नियन्त्रिततुरगो रथादवतीर्य परित्यक्तपुष्पताम्बूलायुधोपानदादिपदार्थसार्थ एकसाटकमुत्तरासङ्गं विधाय ललाटतटघटितकरकुड्मलः समवसरणभुवमुपसृत्य भक्तिभरनिर्भरान्तःकरणो भगवन्तं त्रिः प्रदक्षिणीकृत्य नमस्कृत्य च यथोचितस्थानोपविष्टोऽमृतवृष्टिमिव समस्तशरीरानन्ददायिनीं भगवद्देशनामाकर्ण्य संसारभयोत्त्रस्तचेता विधिना स्वामिनोऽजिज्ञपत्, यथा-भगवन्! पितृभ्यां गृहिण्या चानुज्ञातो युष्मदन्तिके ग्रहीतुमिच्छामि प्रव्रज्यां, भगवता तु देवानुप्रिय! मा प्रतिबन्धं विधत्स्वेत्युक्तः पुनस्त्रिः प्रदक्षिणीकृत्य नमस्कृत्य च भगवन्तं समवसरणान्निष्क्रम्य तमेव रथमारुह्य तथैव स्वनगरमध्येन निजगृहं गत्वा पितरावपृच्छत्, ताभ्यां च कथंकथञ्चिदनुमतो गृहिणीसकाशं समागात्, तया च प्रतिपन्नदीक्षाऽभिलाषया सहैव स्नातविलिप्तगृहीतालङ्कारो जिनभवनेषु विरचितमहापूजो दीनानाथकृपणादिलोकेभ्यो यथेच्छं दानं ददत् पुरुषसह-

स्ववाह्यां शिबिकामारुह्य महाविभूत्या भगवन्तमुपतस्थौ, भगवता च जमालिकुमारः पञ्चशतराजपुत्रपरिवारो दीक्षितः, तत्पत्नी च सुदर्शना सहस्रपरिवारा प्रव्राजिता, द्वयोरपि सामायिकाद्येकादशाङ्गपर्यन्ता श्रुतसम्पत्सम्पन्ना, कालेन गीतार्थतायां जातायां जमालिराचार्यो विहितः, स च कदाचिद्भगवन्तं महावीरमभिवन्द्यैवमवोचत्-यथाऽहमभिलषामि भगवदनुज्ञया पञ्चभिरनगारशतैः परिवृतो ग्रामनगरादिषु विहर्त्तुं, ततो भगवानेतद्वचनमाकर्ण्य भाविदोषावलोकनेन तूष्णीं व्यवस्थितः, पुनर्भणिते च यावन्न किञ्चिदुत्तरमलभत ततो भगवन्तमभिवन्द्य बहुशालकचैत्यान्निर्गत्य पञ्चशतसाधुपरिवारो ग्रामानुग्रामं विहर्त्तुमारेभे, अन्यदा श्रावस्त्या नगर्या बहिस्तिन्दुकोद्यानवर्त्तिनि कोष्ठकचैत्ये समागतः, तत्र च तस्य प्रान्ताहारादिभिर्गाढतरो रोग उदपादि, ततः श्रमणानाहूय भणितवान्—यथा दाघज्वरेण विह्वलीकृतं मे शरीरं न शक्नोमि क्षणमप्युपविष्टः स्थातुमतो यदि यूयं मद्योग्यं शय्यासंस्तारकं कुरुथ तदा शयित्वा पीडायापनां करोमि, तैश्चेच्छामः कर्त्तुमेवमित्यभिधाय संस्तरीतुमारब्धं, स च गाढवेदनया दोदूयमानतनुः पुनरवादीद्—यथा भोः श्रमणाः ! संस्तीर्णं न वा ? इति, ते ऊचुः—संस्तीर्णं, ततोऽसौ यावदीक्षाञ्चक्रे तावदसंस्तीर्णमेव संस्तारकं विलोक्य बाढं कषायितचित्तोऽपि तदा साबाधत्वान्न किञ्चिदुक्तवान्, केवलं संस्तीर्णे

परिपूर्णसंस्तारके शायित्वा पीडाविगमं विधाय क्षणान्तरे स्वस्थशरीरस्तपोधनानाहूय पप्रच्छ—किं भो ! भवद्भिरर्द्धसंस्तीर्णोऽपि संस्तारकः संस्तीर्ण इति भणितः, तैरवाचि—"कज्जमाणे कडे चलमाणे चलिए उईरिज्जमाणे उईरिए निज्जरिज्जमाणे निज्जिण्णे" इत्यादिभगवद्वचनप्रामाण्यात्, एतदाकर्ण्य जमालिर्भवितव्यतावशेन तत्क्षणोपजातमिथ्यात्वकर्मोदयो भगवान् तत्र भ्रान्त इत्यवदत्, यतो न खलु संस्तीर्यमाणसंस्तीर्णयोरेककालत्वं, क्रियाकालनिष्ठाकालयोरत्यन्तभेदात्, अतो भगवद्वचनं मिथ्येति प्रतिजानीमः, प्रयोगश्चात्र—क्रियमाणं कृतमित्याद्यर्थप्रतिपादकं भगवद्वचनं मिथ्या, प्रत्यक्षविरुद्धार्थाभिधायित्वाद्, अश्रावणः शब्द इति प्रतिज्ञावचनवत्, न चायमासिद्धो हेतुः, अर्द्धसंस्तीर्णसंस्तारकस्यासंस्तीर्णत्वदर्शनेनान्यत्रापि क्रियमाणत्वादिधर्मेण प्रत्यक्षसिद्धेन कृतत्वादिधर्मस्य दूरतोऽपनीतत्वात्, नाप्यनैकान्तिकः सपक्ष एव भावात्, नापि विरुद्धो विपक्षात् सत्यलक्षणात्सर्वथा व्यावृत्तेः, अतः स्थितमेतत्-क्रियमाणं कृतमित्यादि भगवद्वचनं मिथ्येति, एवमुक्ताश्च ते साधवः केचिदेवमेवेति प्रतिपन्नाः, अपरे त्ववगतभगवद्वचनयथावस्थितार्थाः सम्यग्बोधवन्त एवमभिदधुर्यथा—जमालिसूरे ! नैतद् युक्तमुक्तं भवता, न खलु भगवानसमीक्ष्य किञ्चिद्वक्ति, समुत्पन्नकेवलत्वेन भगवतः सततोपयोगत्वात्, न च वयं भगवद्वचनं श्रुतमात्रग्राहितयाऽङ्गीकृतवन्तः किन्तु युक्त्या विचार्य,

न हि भगवद्वचनं "पुराणं मानवो धर्मः, साङ्गो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि, न हन्तव्यानि युक्तिभिः ॥ १ ॥" इत्यादितुल्यं, जात्यसुवर्णवत्तापादिशुद्धत्वात्, अन्यथा-अस्ति वक्तव्यता काचित्तेनेदं न विचार्यते। जात्यं तु काञ्चनं भूत्वा, तापादिभ्यो बिभेति किम् ? ॥१॥" इत्याद्युपालम्भभाजनं स्यात्, यच्चोक्तं 'संस्तीर्यमाणसंस्तीर्णयोर्नैकका-लत्वमित्यादि' तदपि बालप्रलपितप्रायं, क्रियाकालनिष्ठाकालयोः कथञ्चिदेकत्वाभ्युपगमात्, तथाहि-क्रियमाणक्षणे कृत-त्वमप्यस्ति, अन्यथा क्रियमाणाद्यक्षण इवान्त्यक्षणेऽपि कृतत्वस्याविद्यमानत्वात्कृतोऽयमिति प्रत्ययो नोत्पद्येत, अस्ति च प्रत्ययस्तथाऽनुभूयमानत्वाद्, योऽपि भगवद्वचनं मिथ्येत्याद्यनुमानप्रयोगोऽभिहितस्तत्रापि प्रतिज्ञापदयोर्विरोधः,तथाहि-भगवद्वचनं चेन्न मिथ्या मिथ्या चेन्न भगवद्वचनं, समग्रैश्वर्ययुक्तो हि न मिथ्या वक्तीति प्रतीतमेतत्, तत्कारणाभावाच्च, मि-थ्याभणने हि रागादयः कारणं,ते च तस्य न सन्ति,यदुक्तम्-"रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम्।यस्य तु नैते दो-षास्तस्यानृतकारणं किं स्यात् ? ॥१॥" इति, अत एवासिद्धोऽपि हेतुः प्रत्यक्षविरुद्धार्थाभिधायित्वेन भगवद्वचनस्य कदाऽप्य-प्रतीतेः, विरुद्धाव्यभिचारी चायं हेतुः, तथाहि—एतदपि शक्यते वक्तुं-क्रियमाणं कृतमित्यादि भगवद्वचनं सत्यं, सद्भू-तार्थप्रतिपादकत्वात्, सक जनप्रतीतपृथ्वीकाठिन्ये कठिना पृथ्वीत्यादिवाक्यवत्, यच्चोक्तं 'न चायमसिद्धो हेतु-

रित्यादि ' तदप्यसंबद्धम्, अर्द्धसंस्तीर्णेऽपि संस्तारके संस्तीर्णत्वस्य दर्शनात्, तथाहि—यद् यदा यत्राकाशदेशे वस्त्रमास्तीर्यते तत्तदा तत्रास्तीर्णमेव, अतो यदुक्तमन्यत्रापि क्रियमाणत्वादिधर्मेणेत्यादि तदपि दूरापास्तमेकयोगक्षेमत्वाद्, विशिष्टसमयापेक्षीणि च भगवद्वचनान्यतः सर्वत्रादोष इति मुञ्च कदाग्रहमभ्युपगच्छ क्रियमाणं कृतमित्यादि । एवमुक्तोऽपि यावन्न प्रतिबुध्यते तावत्तैश्चिन्तितं—क्लिष्टकर्मोदयतो मिथ्यात्वं गत एषः, तथा चोक्तम्—"सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः । मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥ १ ॥" इति, तदधुना न योग्य एवैष सेवाया इत्यवधार्य विमुच्य तदन्तिकं चम्पानगर्यां पूर्णभद्रचैत्यसमवसृतं महावीरस्वामिनमाशिश्रियुः । इतश्च सुदर्शना बहुसाध्वीपरिवारा जमालिवन्दनानिमित्तं तत्रैवागता ढङ्ककुम्भकारगृहेऽवग्रहमुपयाच्य स्थिता, सा च प्रतिदिवसं कृतमेव कृतं न क्रियमाणमित्यादिदेशनां जमालेः श्रुत्वा तरलितहृदया यथा जमालिर्भाषते तथैवाभ्युपगतवती, अथवा भवत्येव चैतत, यदुक्तम्-"कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः ? । क्षपणकतामपि धत्ते पिबति सुरां नरकपालेन॥१॥"इति, ततो ढङ्कगृहे समागतेत्थमेव तदग्रतः प्रतिपादितवती, तेनापि जमालिवृत्तान्ताभिज्ञेनोक्तम्—आर्ये ! नाहमेवंविधं विशेषान्तरं ज्ञातुं समर्थो यथा भगवान् सत्यो जमालिर्वा इत्यभिधाय तूष्णीं स्थितस्तावद् यावदन्यदा स्वाध्याय-

पौरुषीं कुर्वत्या एवापाकमस्तकस्थानि भाण्डान्यवतारयता झगित्येव ज्वलदङ्गारक एकस्तथा प्रक्षिप्तो यथा तत्सङ्घाटिकैकदेशे लग्नः, तया च दृष्ट्वा भणितम्—यथा भो भो श्रमणोपासक ! किं मदीया सङ्घाटी त्वयैनमङ्गारं प्रक्षिप्य दग्धा ?, तेनोक्तम्—किमित्यार्ये ! व्यलीकमभिदधासि ?, न हि दह्यमानं दग्धमुच्यते त्वन्मते, सङ्घाटी च त्वदीया दह्यमानैवेदानीं वर्त्तते, इत्याद्युक्ता सा प्रतिबुद्धाऽवदत्—यथा साधु कृतं श्रावक ! इच्छामि सम्यगनुशिष्टिमहम्, एवं च दत्तमिथ्यादुष्कृता भगवदाज्ञाविलोपिनमात्मानं निन्दन्ती गता जमालिपार्श्वे, स्वाभिप्रायं च सयुक्तिकं बहुश उक्तवती, तथाऽपि न प्रतिपन्नवानसौ, ततः सा परिशेषसाधवश्च स्वामिसकाशमेव गताः, इतरोऽप्येकाकी तस्माद्दुष्प्ररूपणादनालोचिताप्रतिक्रान्तो बहूनि वर्षाणि श्रामण्यपर्यायं परिपाल्यार्द्धमासिकसंलेखनयाऽऽत्मानं संलिख्य त्रिंशद्भक्तान्यनशनेनाविच्छिद्य कालमासे कालं कृत्वा लान्तककल्पे त्रयोदशसागरोपमस्थितिकः किल्बिषिको देवः समुत्पन्नः । मतिभेदकमिथ्यात्वे जमालिचरितं निवेदितं किञ्चित् । विस्तरतो विज्ञेयं प्रज्ञप्तेर्नवमशतकात्तु ॥ १ ॥

उक्तं जमालिचरितं, श्रुतदेवीप्रसादतः ।<br>
पूर्वव्युद्ग्रहमिथ्यात्वे, गोविन्दस्याधुनोच्यते ॥ १ ॥

भरुयच्छपुरे पवरे अवगयनीसेससुगयमयसारो । आसि वरवायलद्धीसमन्निओ भिक्खुगोविंदो ॥ २ ॥ सो य–अप्पं बहु मन्नंतो, पयडंतो नियय वायसामत्थं । रत्थामुहेसु हिंडइ भुवणंपि तणं व मण्णंतो ॥ ३ ॥ सो अन्नया कयाई नियसामत्थस्स पयडणनिमित्तं । पडहयदवावणेणं घोसावइ तियचउक्केसु ॥ ४ ॥ जो अत्थि इह समत्थो, कोई स कुणउ मए समं वायं । नरवइसहाएँ सब्भाइलोयपच्चक्खमक्खविओ ॥ ५ ॥ चिइवंदणकज्जेणं समागएहिं इमं च घोसणयं । सुणियं सियवायवियक्खणेहिं जिणदेवसूरीहिं ॥ ६ ॥ पडिसेहिओ पडहओ तओ य दुण्हंपि राउले वाओ । जाओ जिओ य सूरीहिं एस नरनाहपच्चक्खं ॥ ७ ॥ तो चिंतिउं पयत्तो विलक्खभावो जहा न एएसिं । सिद्धंते अणवगए, एए जिप्पंति कइयावि ॥ ८ ॥ परतित्थियस्स य इमे मह न कहिस्संति नियरगं पुत्थं ( गुज्झं ) । एएसिं चेव अहं ता दिक्खं संपवज्जामि ॥ ९ ॥ इय चिंतिऊण गंतूणुवस्सए भणइ सूरिणो एवं । अन्नाणविलसियं मह खमेह तह कुणह अणुकंपं ॥ १० ॥ देह मह पवरदिक्खं एस विलग्गोऽम्हि तुम्ह पामूलं । सिक्खवह ससिद्धंतं पमाणनयहेउपज्जंतं ॥ ११ ॥ ते तस्स दव्वविणओ वसंतयं पासिऊण हिट्ठमणा । छउमत्थपरिक्खाए परिक्खिउं दिंति पव्वज्जं ॥ १२ ॥ दव्वाणुट्ठाणपरो सामा-

पूर्वव्युद्ग्राहे गोविन्द वाचको-दाहरणं ७

इयमाइयं पढइ सुत्तं । पुव्वोग्गहमिच्छत्तं तहावि भावेण नो चयइ ॥ १३ ॥ एवं च तस्स केच्चिरादिणेसु जह जह मणंमि परिणमियं । अमयं व सुयं तह तह विसं व मिच्छत्त वोसरियं ॥ १४ ॥ भणियं च—"जह जह सुअमवगाहइ अइसयरसपसरसंजुयमउव्वं । तह तह पल्हाइ मुणी नवनवसंवेगसद्धाए ॥ १५॥ " मिच्छाभावंमि गए पच्छा गंतूण गुरुसयासंमि । पभणइ कयंजलिउडो नाह! मए एत्तियदिणाइं ॥ १६ ॥ विहलच्चिय पव्वज्जा मिच्छाभिणिवेसओ कया इण्हिं । सुयभावणाएँ सम्मं परिणाममुवागया अज्ज ॥ १७ ॥ कम्मगिरिदलणवज्जं ता अज्ज पयच्छ भावपव्वज्जं । काऊण मह पसायं सामिय ! निन्नासियविसायं ॥ १८ ॥ भणइ तओ तस्स गुरू तं धण्णो एत्तिएहिवि दिणेहिं । तित्थयराणा भावे परिणया जस्स हिययंमि ॥ १९ ॥ एवं उववूहेउं उच्चारावइ महव्वए पुणवि । पडियागयसंवेगो पडिवज्जइ सम्ममेसोऽवि ॥ २० ॥ विस्सोत्तियाविरहिओ वायंतो तह कमेण पुव्वगयं । गोविंदवायगो सो जाओ विक्खायवरकित्ती ॥ २१ ॥ पुव्वुग्गहमिच्छत्ते कहियं गोविंदवायगऽक्खाणं । संसग्गियंमि एत्तो वोच्छं सोरट्ठसड्ढस्स ॥ २२ ॥

सौराष्ट्रविषये कश्चिज्जीवाजीवादितत्त्ववित् । बभूव श्रावकः श्रेष्ठो जिनधर्मपरायणः ॥१॥ दुर्भिक्षोपद्रुते देशे, सोऽन्यदा भिक्षुभिः समम् । चचाल स्वल्पपाथेयः, पुरीमुज्जयिनीं प्रति ॥२॥ ततस्तथामतास्तस्मै, धर्मं सुगतदेशितम् । आदिश-

न्ति स्म मोक्षाय, स ऊचे तानिदं वचः ॥ ३ ॥ न बुद्धभाषितो धर्मो, भिक्षवो ! मोक्षसाधकः । अनाप्तेन प्रणीतत्वाद्, यथाऽलीकनरोदितः ॥ ४ ॥ अनाप्तत्वं च बुद्धस्य, क्षणिकैकान्तदेशनात् । एकान्तक्षणिको भावो, यतः प्रत्यक्षबाधितः ॥५॥ किञ्च–“एकान्तक्षणिकत्वे भावानामवगमोऽपि नो घटते । विस्मरणशासनाद्याः कुतः पुनस्त्रिभुवनख्याताः ? ॥ ६ ॥” इत्यादियुक्तिभिश्चक्रे, स तथा तान्निरुत्तरान् । न पुनर्द्धर्म्मविषयं, विचारं चक्रिरे यथा ॥ ७ ॥ अन्यदाऽर्द्धपथे तस्य, पाथेयं परिनिष्ठितम् । निरीक्ष्य भिक्षुभिः प्रोक्तं, यथाऽस्मत्संबलं वह ॥ ८ ॥ वयमेव प्रदास्यामो, भोजनं भवतः पथि । इत्युक्तः प्रतिपेदेऽसौ, तद्वचो निर्विचारकम् ॥ ९ ॥ प्राप्तोऽन्येद्युरुज्जयनीमसौ तैर्भिक्षुभिः समम् । तत्र चाहारदोषेण, जाता तस्य विसूचिका ॥ १० ॥ तया च स मृतः शीघ्रं, नमस्कारपरायणः । छादितं तच्छरीरं च, भिक्षुभिर्निजवाससा॥११॥देवेषु स च संजातश्चिन्तयामास तत्क्षणम् । सुरेषु यदुत्पन्नोऽहं, तत्फलं कस्य कर्मणः?॥१२॥एवं चिन्तयता दृष्टं, निजमेव शरीरकम् । उत्पन्नावधिना तेन, भिक्षुचीवरवेष्टितम् ॥ १३ ॥ तच्चथाऽऽलोक्य भूयोऽपि, परिभावितवानिदम् । भिक्षुसेवाप्रसादोऽयं, देवत्वं यदहं गतः ॥१४॥ एवं विभाव्य भिक्षुभ्यः, प्रच्छन्नतनुरेव सः । आहारं दातुमारब्धो, दिव्यहस्तेन भक्तितः॥ १५ ॥ जाता प्रभावना तेषां, श्रावकाश्चेतरैस्तदा । हस्यन्ते नो यथाऽमीषां, दर्शने देवसांनिधिः ॥१६॥ युगप्रधानसू-

रीणां, वार्ता तैश्च निवेदिता। तैरालोक्य ततः प्रोक्तं, यथाऽयं पूर्वजन्मनि ॥१७॥ श्रावको जिनधर्मज्ञः, आसीद्देवस्ततोऽजनि। भिक्षुसंसर्गदोषेण, मिथ्यात्वमधुना गतः ॥ १८ ॥ तदेतं ब्रूत भो ! गत्वा, नमस्कारपुरस्सरम् । भो ! भो ! बुद्ध्यस्व २, मोहं गुह्यक ! मा गमः ॥ १९ ॥ आचार्यादेशतः पश्चाच्छ्रावकैर्विहिते तथा । मोहमुत्सृज्य जातोऽसौ, ततः सम्यक्त्वभावितः ॥ २० ॥ संसर्गदोषतोऽप्येवं, मिथ्यात्वं जायते यतः । कुतीर्थिकैः समं सङ्गो, न कार्योऽतः सुबुद्धिभिः ॥ २१ ॥ शासनदेव्यनुभावात् सौराष्ट्रश्रावकस्य चरितमिदम् । कथितं गोष्ठामाहिलकथानकं साम्प्रतं ब्रूमः ॥ २२ ॥

तेणं कालेणं तेणं समएणं इहेव जंबुद्दीवे २ दाहिणभरहद्धमज्झिमखंडे अत्थि अवंती नाम जणवओ, जो य वइसेसियदंसणाहिप्पाउव्व दव्वसमवायसत्ताहिट्ठिओ गुणविसेससोहिओ य, ण उण बूसियपहाणपुरिसवाउत्ति, अविय-जो पढमं पढमजिणेणऽवंतिनामस्स नियतणयस्स। दिण्णो गओ पसिद्धिं पच्छा तस्सेव नामेण ॥१॥ तत्थ नंदणवणव्व विबुहजणवल्लहं दसपुराहिट्ठाणं, जं च ठाणट्ठाणदीसंताणंतसुंदररंभाभिरामं अपरिमियतिलोत्तममणुव्वसियमेक्कारं-
१ भातिलोत्तमोवसोहियस्स सयउव्वसियस्स कुणइ परिभवं सुरवइपुरस्स, तत्थ य अणवरयनमंताणंतसामंतमउलिमालापरिगलितसुरहिपरिमलुप्पीलकुसुमसमूहसमच्चियचलणकमलो कमलायरो व्व लच्छिनिवासो वासवो

व्व दलियदप्पिट्ठदुट्ठवइरिबलो लोणी(वलाण)उ व्व सव्वाणुरत्तहियओ हयसत्तू नाम नरवई, तस्स य सयलंतेउरप-हाणा अउव्वचंदमुत्ति व्व गयकलंका वक्कत्तमुक्करविदिवप्पसरंतविमललावण्णजोण्हाभरा अणवरयवियासियानियबंधुकइरवा धारिणी नाम महादेवी, इओ य तस्सेव रन्नो समग्गरज्जकज्जधुराधरणधवलो धवलगुणगणविढत्तकित्तिसंभारभरियभुवणंतरालो विरिंचो व्व कमलालओ वेयागमसंपन्नो य चउविहबुद्धिविहवविणिज्जियसुरगुरू आसि सोमएवाहिहाणो मंती, तस्स य सरस्सइव्व परिमुणियासेससत्थवित्थरा जिणसासणंमि अट्ठिमिंजपेम्माणुरायरत्ता रुद्दसोमा नाम भारिया, तीए य सद्धिं तस्स विसयसुहमणुहवंतस्स समइक्कंतो कोइ कालो, अण्णया जामिणीए चरिमजामे सुहपसुत्ता पडिपुण्णकलाकलावोवसोहियं ससहरं वयणेणोयरं पविसंतं पासिऊण पाहाइयमंगलतूररवेण सुहविउद्धा कयावस्सया जहाविहिं साहेइ सुमिणयं दइयस्स, तेण य समाइट्ठं जहा ते नियकुलनहयलामलमियंको नरामरिंदपणयपायजुयलो असेसविज्जाठाणपारगो पहाणपुत्तो भविस्सइ, तव्वयणायण्णणुप्पण्णपरमाणंदनिब्भरा य जावऽच्छइ ताव तीए चेव रयणीए सा आवण्णसत्ता संपन्ना, सुहंसुहेण पवड्ढमाणगब्भा संपाडियसयलदोहला उचियसमए पसत्थसमत्थलक्खणालंकियसरीरं सुरकुमारसरिसरूवं पसूया दारयं, वद्धाविओ

पियंकरियाभिहाणाए चेडीए समं नरिंदेण सोमदेवो, कयं महावद्धावणयं, समइक्कंतेसु कइवयदिणेसु कयं पिऊहिं से नामं रक्खिउत्ति, वड्ढिओ देहोवचएणं, अण्णया तस्सेव अणुओ जाओ फग्गुरक्खिओ, रक्खिएण य पिउसयासंमि जावइया सुयसंपया तावइयं घेत्तूण 'विज्जासु असंतुट्ठेण पुरिसेण होयव्वं' तिमन्नमाणेण विण्णत्तो पिया–जहा–तुज्झाएसेण पाडलिपुत्तं गंतूण सेसगंथे अहिज्जामि जइ विसज्जेहिसि, पिउणाऽवि जुत्तमिमंति भणमाणेणाणुण्णाओ, नरिंदनागरयसयणवग्गमणुजाणाविऊण गओ पाडलिपुत्तं, तत्थ तहाविहोवज्झायसमीवे थोवकालेणं चिय अहीयाणि चोद्दसवि विज्जाठाणाणि, ताणि पुण इमाणि–" वेया चउरो अंगाणि छच्च तह नायवित्थरो चेव। मीमांसा य पुराणं चोद्दसमं धम्मसत्थं च॥ १॥ रिउसामजजुअथव्वण वेया चत्तारि तेसिमंगाणि। सिक्खा कप्पो जोइस निरुत्तवायरणनिग्घंटा॥ २॥" जाओ समत्थगंथत्थपारओ, अण्णया य पिउनरिंदसमाएसेण बहुविहपूयासक्कारपुरस्सरं मोयाविऊण उवज्झाएहिंतो अत्ताणयं आगओ दसपुरं, पुव्वमेव विण्णायवइरेण राइणा कारावियं ऊसियपडायं नगरं, सयं च एरावणविब्भमं समारुहिऊण करिवरं चाउरंगबलसमेओ मंतिसामंतपमुहनागरयाणुगम्ममाणो समं सोमदेवेण गओ तयभिमुहं, कयसम्माणो य पिउनरिंदनागरयाईहिं महाविच्छड्डेणं हत्थिखंधारूढो उवरि धारिज्जमा-

णधवलायवत्तो अग्गओ वज्जंतेहिं बहलमंगलाउज्जेहिं आउरिज्जंतेहिं जमलसंखेहिं पगीइज्जंतेहिं मंगलगीएहिं नगरस्स मज्झंमज्झेणं पविसिउमाढत्तो, तओ—"अच्चिज्जंतो नयणुप्पलेहिं अनलियगुणेहि थुव्वंतो । नाणाविहलोएहिं, संपत्तो रायभवणंमि ॥ १ ॥ खणमेत्तं तत्थऽच्छिय णियपिउगेहंमि आगओ एत्थ । नमिऊण जणणिजणए उवविट्ठो पट्टसालाए ॥ २ ॥ तत्थ ट्ठियस्स सो कोऽवि नत्थि पुरिसो व महिलिया नयरे । जो तस्स दंसणत्थं न आगओ गहिय कोसल्लो ॥३॥ एत्थंतरंमि पणट्ठहरिसाविसाया गेहकज्जंमि संचरंती दिट्ठा नियजणणी चिंतियं चऽणेण—"मज्झागमणे तुट्ठो सव्वोऽवि जणो विसेसओ ताओ । सह मित्तबंधुपरियणनरिंदसामंतवग्गेण ॥ १ ॥ जणणी पुण मज्झत्था दीसइ ता किमिह कारणं होज्जा । इय चिंतंतो पच्छा समुट्ठिओ ताओ ठाणाओ ॥ २ ॥" कयण्हाणभोयणविलेवणाइवावारो अणवरयसमागच्छंतलोगनिवहमाभासित्ता अत्थमिए नालिणीदइए दिणयरे विहडंतेसु रहंगमिहुणेसु कयसंझाकायव्वो गओ जहारिहपरियणपरिवुडो अब्भिंतरसालाए जणणीय सयासं, पणमिया विणयसारं, संम्मं तट्ठाणवत्तिणा बंधुवग्गेण दिण्णासीसो य उवविसिऊण चलणंतिए भणिउमाढत्तो-अंब ! मह पढियनीसेससत्थवित्थरविढत्तकित्तिस्स । आगमणंमि नरिंदाइणोऽवि आणंदिया सव्वे ॥ ३ ॥ तं पुण न हट्ठतुट्ठा जाया ता किं हवेज्ज कज्जमिदं ? । इय भणिया भणइ तहिं जणणी

तं ईसि हसिऊण ॥ २ ॥ पुत्त ! कहं अहमिमिणा बहुपाणियघायकारणेण सव्वसत्ताण मिच्छत्तविवड्ढएण तुज्झ असेससत्थगहणेण विपरिओसमुव्वहामि ?, केवलं दुक्खमेव मज्झ इमिणा, जओ न इमेण पढिएणावि इट्ठफलसंपत्ती पाउणिज्जइ, भणियं च–"श्रुतं यन्न विरागाय, न धर्माय न शान्तये । सुबह्वपि तदभ्यस्तं, काकवासितसंनिभम् ॥ १ ॥" किञ्च–" पठितं श्रुतं च शास्त्रं गुरुपरिचरणं च गुरुतपश्चरणम् । घनगर्जितमिव विजलं विफलं सकलं दयाविकलम् ॥ २ ॥" वेयसत्थेसु य पढमं हिंसापरूवणमेव, जओ भणियं–"षड् शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनान्न्यूनानि पशुभिस्त्रिभिः ॥ १ ॥" इत्यादि, "ता जइ सच्चं हरिसं जणेसि मे तह य सव्वसत्ताणं । ता पढसु दिट्ठिवायं तेलोक्कसुहावहं वच्छ ! ॥ १ ॥ एवं जणणिवयणमायण्णिऊण चिंतिउं पयत्तो–भो कत्थ केत्तिओ वा पावेयव्वो य कस्स पासंमि ? । दिट्ठीण दंसणाणं जो वाओ भण्णए कोवि ॥ १ ॥ पढिऊण जेण सिग्घं जणणीएँ जणेमि परममाणंदं । इय चिंतिय पुण पुच्छइ विणएण कयंजली सीसे ॥ २ ॥ माऊए भणियं–वच्छ! इओ नाइदूरे अत्थि उच्छुघरमुज्जाणं, तत्थ तोसालिपुत्ता नाम आयरिया, तेहिंतो पाविहिसि दिट्ठिवायंति, तओ उट्ठिओ ताओ ठाणाओ, गओ नियसयणीयमंदिरं, तत्थ तहविहविणोएण कंचि वेलं गमिऊण

पसुत्तो, पहायप्पायाए रयणीए समुट्ठिओ सयणीयाओ कयपहाइयकायव्वो अभिवंदियजणणिजणओ जणाणि पुच्छिऊण निग्गओ गेहाओ, इओ य तस्सेव पिइमित्तो णयरग्गामवासी विण्णायरक्खियागमणवुत्तंतो कल्लं न दिट्ठो अज्ज पेच्छामित्ति चिंतयंतो गहियउच्छुलट्ठिपाहुडो समागच्छइ तद्दंसणत्थं, दिट्ठो य निग्गयमेत्तेण चेव तेण संमुहमागच्छंतो, पुच्छिओ य सो तेण-जहा होसि तुमं रक्खिओ ?, तेण भणियं-आमंति, तओ पहिट्ठचित्तेण सागयं २ ति भणमाणेण अवगूहिओ, समप्पियाओ य इक्खुलट्ठीओ, ताओ णव संपुण्णाओ एक्का य खंडमेत्ता, पहाण-सउणोत्तिकाऊण गहियाओ, तओ भणिओ-वच्च तुमं गेहं, लट्ठीओ य इमाओ मज्झ जणणीए समप्पेज्ज, एवं च भणेज्ज-निग्गयमेत्तेण चेव तुह पुत्तेण पढममहं दिट्ठोत्ति, अहं च सरीरचिंताए गमिस्सन्ति पेसिओ, पत्तो गेहं, कयजहोचियपडिवत्तिणा य समप्पियाओ रुद्दसोमाए इक्खुलट्ठीओ, साहियं च पुव्वुत्तं, परमाणंदनिब्भराए य चिंतियमणाए-मम पुत्तेण सुंदरं मंगलं दिट्ठं, होहिंति संपुण्णा नव पुव्वा दसमस्स खंडंति, अज्जरक्खिओ य मए दिट्ठिवायस्स नव पव्वाणि अज्झयणाणि वा घेत्तव्वाणि दसमस्स खंडं चत्ति चिंतयंतो पत्तो उच्छुघरं, तत्थ य एगप्पएसे ठाऊण चिंतियं-जहा कहमियरपुरिसोव्वऽविण्णायसाहुसमायारो सूरिसयासं वच्चामि ?, ता चिट्ठामि

जाव एएसिं चेव कोऽवि सावओ एइ जेण तेण समं पविसिऊण तद्दंसियविहिणा सूरिणो वंदामि, तत्थ एगो ढड्ढरसरो सावओ कयसरीरचिंतो दिट्ठो साहुसयासमिंतो, संपुण्णो मे मणोरहत्ति चिंतंतो लग्गो तस्स पट्ठीए, सावएणऽवि महया सद्देण साहुउवस्सयं पविसमाणेण कयाओ तिण्णि निसीहियाओ, तेणवि अणु कयाओ, ताहे तहेव ढड्ढरसरेण इरियावहियाए पडिक्कमणाइयं करेइ, सोऽवि अइमेहावित्तणओ सव्वमणुकरेइ ताव जाव साहूणं वंदणं दिन्नं, न वंदिओ सावओ, तओ आयरिएहिं नायं—एस नवल्लसड्ढोत्ति, पच्छा पुच्छिओ य—कइया सावग! पत्तो अचिंतचिंतामणी इमो धम्मो?। कत्तो? इयरेण भणियं अज्जमिमाओ सुसड्ढाओ" ॥१॥ जओ भणियं—"नेहाणुरागसब्भावविणयसत्तीहिं जे न गिण्हंति। गुरुणो ताण न सिज्झइ समीहियं पावकम्माणं ॥ १ ॥" एत्थंतरंमि पासट्ठियसाहूहिं साहियं सूरीण—जहा एस सो रुद्दसोमाए सावियाए पुत्तो—जो कल्लं नरवइणा नयरंमि पवेसिओ विभूईए। हत्थिक्खंधारूढो गिज्जंतो मंगलसएहिं ॥१॥ तओ सयं चेव आगमणकारणं साहियं चेव गुरूणं, आयरिएहिं भणियं—जइ पव्वज्जं गेण्हसि अम्ह सयासे दढव्वओ होउं। ता दिट्ठिवायलाभो पडिवाडीए तुहं होही ॥१॥ तेणवि भणियं सज्जो पव्वज्जाए अहं मुणिवरिंद!। किंतु नरिंदाईओ सव्वो लोगो ममणुरत्तो ॥१॥ मा पव्वज्जाविग्घं काही ता देसि गंतुमन्नत्थ। जइ तमहिज्जामि तओ

कमेणऽहं दिट्ठिवायंपि ॥२॥ जिणपवयणगयणससी होही एसोत्ति चिंतिउं गुरुणा । दिण्णा से पव्वज्जा विहिणा अन्नत्थ नेऊण ॥ ३ ॥ एसो य महावीरातित्थंमि साहूणं सीसचोरियाववहारो पढमो पवत्तो, तओ थोवकालेणं चिय गाहियदुविहसिक्खेण अहिज्जियाणि एक्कारस अंगाणि, जेत्तिओ य दिट्ठिवाओ तोसलिपुत्ताणं सोऽवि गहिओ, तंमि य काले जुगप्पहाणा अज्जवइरा, ताणं दिट्ठिवाओ बहुओ अत्थि, ते य तया पुरीए चिट्ठंति, तओ तत्थ पढणत्थं साहुसहिओ वइरस्सामिसगासं पेसिओ अज्जरक्खिओ गुरूहिं, कमेण य पत्तो उज्जेणिं, तत्थ दिट्ठा भद्दगुत्तथेरा, वंदिया सविणयं, साहिओ निययवुत्तंतो, तेहि य-"तं धन्नोऽसि महायस ! तए विढत्ता सुनिम्मला कित्ती । जो एवं जिणदिक्खं गहिउं उज्जमसि सव्वत्थ ॥ १ ॥" एवमाइ उववूहिऊण भणिओ-जहाऽहमियाणिं संलिहियसरीरो अणसणं काउकामो, न य मम कोइ निज्जामगो अत्थि, ता तुमं चेव मं निज्जामिऊण वच्चसु, तेणवि तहत्तिकाउमब्भुवगयं, कालं करंतेहि य तेहिं समाइट्ठं-अज्जवइरेहिं समं मा एगाए वसहीए चिट्ठेज्ज, वीसुं ठिओ तेहिं अच्छित्ता पढिज्ज, जओ तेसिं समं जो सोवक्कमाउओ एगंपि रयणिं वसइ सो तेहिं समं कालं करेइ, तए य पवयणाहारेण होयव्वंति, तओ तमट्ठं पडिसुणिऊण गएसु देवलोगं भद्दगुत्तेसु अज्जरक्खिओ गओ वइरसामिसयासं,

ठिओ भिण्णोवस्सए, इओ य अज्जवयरेहिं तीए चेव रयणीए चरिमजामे अम्हं खीरपडिपुण्णपडिग्गहो आगंतुएण केणावि परिपीओ, नवरं किंचिमित्तं ठियंति सुमिणं पासिऊण विउद्धेहिं साहियं साहूण, तेसिं च अण्णमण्णं वायरिंताणं भणियं सूरिणा—जहा कोऽवि मह सयासंमि साहू समागंतूण खीरसरिसं सुयमवगाहिस्सइ, किं तु न निरवसेसं, एत्थंतरंमि समागओ अज्जरक्खिओ, वंदिया सविणयं जहुत्तविहिणा भगवंतो अज्जवइरा, आभासिओ य तेहिं साहु-सागयंति भणमाणेहिं, पुच्छिओ य कत्तो समागओ ? केण वा कज्जेण ? कहिं वा ठिओसित्ति ?, तेण भणियं—तोसलिपुत्ता-यरियसयासाओ दिट्ठिवायपढणत्थं बाहिं च ठिओऽम्हि, सूरीहिं भणियं—किं तुमं न याणासि केरिसमज्झाइयव्वं होइ पुढो वसहिट्ठियस्स ?, ताहे सो भणइ—खमासमणेहिं भद्दगुत्तेहिं अहं वारिओ, अज्जवइरेहिं समं एक्कत्रसहीए न ठायव्वंति, तओ न निक्कारणा निवारणत्ति चिंतिऊण दिन्नो उवओगो नायं चत्ति, तओ भिण्णोवस्सयठिओ अणुमओ अज्झावेउं, थोवकालेण चेव अहियाणि नव पुव्वाणि, दसमं पढिउमाढत्तो, इओ य तस्स मायापिऊहिं संदिट्ठं, जहा—तुह पुत्तवि-रहकंतारदुक्खदावानलेण डज्झंता। दंसणसरंमि सुहजलसंपुण्णे मज्जिउं महिमो ॥ १ ॥ संदेसएण इमिणा न आगओ अज्जरक्खिओ जाव। तो फग्गुरक्खिओ से लहु भाया तत्थ पट्ठविओ ॥ २ ॥ आगंतूणऽभिवंदिय गुरुणो तो अज्ज-

क्खियं भणइ। आगच्छ तुह विओए दुक्खं चिट्ठंति जणयाई ॥३॥ एवं च तो रक्खिएण पुच्छिया अज्जवइरा, तेहिं भणियं पढसु ताव, पढिउमाढत्तो, फग्गुरक्खिएणवि न अन्नहा एहिंत्ति चिंतिऊण भणिओ—जइ एसि तुमं ता तुज्झ दंसणे जणणिजणयमाईया। सव्वेऽवि हु पव्वज्जं भाउय ! गिण्हंति भावेणं ॥१॥ अज्जरक्खिएण भणियं—जइ एवं तो पढमं तुमं चेव पव्वय, एवंति पडिवण्णे पव्वाविओ विहिणा सिक्खविओ दुविहसिक्खं, पुणोऽवि भाणियमणेण—इण्हिं पयट्टसु, तओ पुच्छिया गमणनिमित्तं पुणो गुरुणो, तेहिं भणियं—पढसु ताव, सो य तया जविए अवगाहइ, ताणि य अच्चंतसुहुमाणि चउवीसं गहियाणि, पच्छा तेहिं अईव घोलिओ, पुच्छइ—भयवं ! दसमपुव्वस्स केत्तियं गयं ? केत्तियं ठियन्ति ?; तओ अज्जवइरेहिं बिंदुसमुद्दसरिसवमंदरदिट्ठंतो दरिसिओ, तओ—सोऊण मंदरोदहिसरिसवजलबिंदुएहिं दिट्ठंतं। सविसायं भणइ गुरुं भयवं ! न तरामि पढिउमहं ॥ १ ॥ आसासिओ य गुरुणा, धीरो तं होहि मा कुण विसायं। सेसंपि गिण्हसि च्चिय, अविसन्नो थोवकालेणं ॥ २ ॥ पुणो पढिउमाढत्तो, पुच्छइ निच्चं-केत्तियं सेसंति, तओ चिंतियं—किं ममाओ चेव वोच्छिज्जिही एयं, जेणेसेवंविहबुद्धिनिहीवि एवं निव्विण्णो पढणाओ, तओ नायं—मे थोवमाउयं एसो य गओ न पुणो एही अओ मएहिंतो चेव वोच्छिज्जिही दसमपुव्वंति विसज्जिओ, तओ कमेण पत्तो दसपुरं, तोसलि-

पुत्तायरिएहिं ठाविओ निययपए, तओ तेण तत्थ पव्वाविओ सव्वोऽवि बंधुवग्गो, जणओऽवि तेसिमणुरागेण गिह-त्थलिंगो तेहिं समं चेव चिट्ठइ, भणइ य—वत्थजुयलं न मुयावेह कुंडलं छत्तियं उवाणहाओ जन्नोवइयं च तो पव्व-यामि, आयरिएहिं चरणकरणाइ पण्णवंतो सिक्खविस्सामोत्ति चिंतिऊण भणियं—एवं कुणसुत्ति, तहेव पव्वाविओ, गेण्हाविज्जइ दुविहंपि सिक्खं, अन्नया चेइयवंदणवडियाए गएहिं आयरिएहिं संकेइयाणि चेडरूवाणि जहा अम्हे वंदिमो सव्वे मोत्तूण छत्तइल्लंति अज्जसंमुहं भणेज्जह, तओ ताणि तहेव भणंति, पच्छा सो चिंतेइ—किं मज्झ इमिणा छत्तेण ? जेण गहिएण चेडरूवावि एवं पडिचोएन्ति, तओ गओ पुत्तसयासं, भणइ—मम छत्तेण ण क-ज्जंति, आयरिएहिं भणियं—जुत्तमिमं, जइ उण्हाभिभवो होही तो कप्पं सीसोवरिं करिज्जसु, एवं च उवाएणं कुंडिया-ईणिवि मोयाविओ जाव कडिपट्टयं न मुयइ, पच्छा ताणि तहेव भणंति—सव्वे वंदामो मोत्तूण कडिपट्टइल्लंति, सो रुट्ठो भणइ—मा वंदह अज्जयपज्जएहिं समं तुमे, अण्णो कोऽवि वंदिही, न मुयामि कडिपट्टयंति, अण्णया य एगो साहू विसुद्धसंलेहणाए संलिहियसरीरो पसत्थेसु दव्वखेत्तकालभावेसु भगवओ अज्जरक्खियसूरिस्स पासंमि दिण्णालोयणो समयं चिय पंचमहव्वएहिं पडिवज्जिऊण सामाइयं संथारंमि निसन्नो उच्चारियअणसणो विहिणा भावेंतो भावणाओ

खामंतो सव्वसत्तसंघायं पंचनमोक्कारपरो समाहितप्पा कालगओ, तओ अज्जरक्खियसूरीहिं पिउणो कडिपट्टयमोयावणत्थं भणिया तस्स समक्खं सव्वसाहुणो–जो वहइ मडयमेवं जायइ से निज्जरा अइमहंती। जम्हा जहुत्तविहिणा विमुक्कदेहस्स देहमिणं ॥ १ ॥ ते य पुव्वसंकेइयत्तणओ मे महई निज्जरा होउऽत्ति भणंता परोप्परं विवदिउं पयत्ता, तेणावि ते विवयंते दट्ठूण बहुनिज्जरत्थिणा भणियं–जाया ! जइ एवं तो अहंपि वहामि, तेण भणियं–जुत्तमेयं, केवलमेत्थ बहूवसग्गा, ते असहिज्जमाणा मज्झ अणत्थहेउणो हवंति, तो जइ ते सम्मं सहसि तो वहसु एयंति, सम्मं साहिस्सामित्तिभणिऊण वोढुमाढत्तो, तयणुमग्गेण साहुसाहुणिप्पमुहो चउव्विहोऽवि संघो लग्गो, पुव्वकयसंकेएहि य डिंभेहिं समागंतूण गहिओ से कडिपट्टयो दोरेण बद्धो चोलपट्टओ, सो य लज्जंतोऽवि सव्वं सहमाणो वोसिरिऊण मडयं समागओ वसहीए, आभासिओ गुरुणा–खन्त ! जाओ उवसग्गोत्ति ? तेण भणियं-जाओ, किंतु अहिआसिओ, पुणो गुरूहिं भणिओ–इण्हिं परिहेसु कडिपट्टयं, तेण भणियं-दिट्ठं जं दिट्ठव्वं अलं इमिणा, पुणो चिंतियं गुरुणा–उवाएण मोयाविओ छचाईणि एसो, इण्हिं भिक्खं भमाडेमि, जओ जइ कहवि एगागी होज्ज तो कहं भुजेज्ज ? निज्जरं वा कहं लहेज्ज ?, तओ साहूहिं समं संकेयं काऊण, भणियं

गुरुणा-जावम्हे गामंतरं गंतुं आगच्छामो ताव तुम्हेहिं तायस्स सव्वं लभेयव्वं, एवंति पडिवण्णे तेहिं पियरमाउच्छि-
ऊण गया गामंतरं गुरुणो, तेऽवि फग्गुरक्खियाइणो साहुणो भिक्खावेलाए हिंडिऊण सव्वे भुत्ता, न तस्स केणवि
चिंता कया, ताहे तेण चिंतियं—मे छक्क ( णिरसंक ) निरणुकंपा मुणिणो नामेण केवलं एए । मइ मुक्खिएवि
एवं जे जिमिउं जंति कज्जेसुं ॥ १ ॥ एवं रोसेण अट्टदुहट्टाइं चिंतंतस्स अइक्कंतो सरत्तिओ दिवसो, बीयदिवसे
समागया सूरिणो, साहियं सव्वं, अंबाडिऊण कवडेण साहुणो भणियं गुरूहिं-अम्हे चेव भिक्खिउमागच्छामो तुज्झ-
कएत्ति उट्ठिया गुरू, गहिओ पडिग्गहो, चिंतियं च से जणएणं-मज्झ पुत्तो असेसदिसाचक्कपयडमाहप्पो मज्झ कए
कहं भिक्खं भमिही?, ता सयं चेव वच्चामि, गहिओ गुरुहत्थाओ पडिग्गहो,निग्गओ अ भिक्खट्ठा,अयाणंतो य अवदारेण
पविट्ठो एक्कसेट्ठिस्स गेहं, सिट्ठिणा भणियं-किं अवदारेण अज्ज! पविससि ?, सिरीए इंतीए किं दारमवदारं वत्ति, [ ग्रन्थाग्रम्
५०० ] पडिभणिय सुपसत्थजंपओ साहुत्ति तुट्ठेण सेट्ठिणा दवाविया बत्तीसं विसिट्ठमोयगा, साहुणा य समागंतूण
वसहीए आलोइया गुरूण, तेहिं भणियं—बत्तीसं पहाणसीसा पारंपरेण आवलियाठावगा तुह होहिंति, केवलं
पढमा लद्धित्ति साहूण देसु, किंच—" आहारदाणओ इह, जईण पावंति मोक्खसोक्खंपि । पारपरेण सत्ता उवभुंजिय

नरसुरसुहाइं ॥ १ ॥" तओ दिण्णा सव्वे, पुणो अप्पणो निमित्तं गएण लद्धं घयमहुजुत्तं परमन्नं, आगंतूण भुत्तं, तद्दिवसाओ चेव जाओ विसिट्ठलद्धिसंपण्णो सयलगच्छोवयारी, तम्मि य गच्छे अन्नेऽवि परमलद्धिसंपन्ना तिण्णि मुणिणो, तंजहा—वत्थपूसमित्तो घयपूसमित्तो दुब्बलियपूसमित्तो, तत्थ वत्थपूसमित्तस्सेसा लद्धी—दव्वओ जत्तिएहिं वत्थेहिं गच्छस्स पओयणं तत्तियाइं आणेइ, खेत्तओ महुराए, कालओ सिसिरे वासारत्ते वा, भावओ जहा काएवि दुग्गयमहिलाए छुहाए मरंतीए गुरुकिलेसेण कत्तिऊण वुणाविया एक्का पोत्ती, कल्लं सुंदरे दिवसे परिहिस्सामित्ति धरिया, एत्थंतरे जइ सो पत्थेइ तो हट्ठतुट्ठा देइ १ घयपूसमित्तस्स उ दव्वओ जत्तिएण गच्छे सरइ तत्तियं घयमाणेइ, खित्तओ उज्जेणीए, कालओ जेट्ठासाढमासेसु, भावओ जहा—एगा बंभणी गुव्विणी नियभत्तारं जाइरोरं मज्झ पसवणकाले घएण कज्जं होही तं भिक्खिऊण मेलिहिहित्ति भणियाइया, तेणावि कहकहवि पलियं पलियमुग्गाहंतेण पइदिणं छहिं मासेहिं पूरिओ घयकुडओ, समप्पिओ भट्टिणीए, जाइओ घयपूसमित्तेण, सव्वं देइ हट्ठतुट्ठा २ दुब्बलियपूसमित्तो उण निच्चमेव सज्झायवावडो, तेण नव पुव्वा अहिया अहिज्जिया, सुत्तत्थगोयराए निरंतरं चिंताए जाओ दुब्बलो, जइ नाणुप्पेहेइ तो सव्वंपि सुयं पम्हुसइ, अओ चेव दुब्बलियपूसमित्तोत्ति पत्तो

पसिद्धिं, अण्णया तत्थेव दसपुरनयरे वत्थव्वा रत्तपडभत्ता से बंधुणो, आयरियं वयासि—मोत्तूण भिक्खुणो न अन्नपासंडीणं झाणपरिन्नाणमत्थि, आयरिएणं भणिअं—अजुत्तं मा वयह, जओ झाणनिरोहाओ चेव एस भे बंधू एवं दुब्बलो जाओ, तेहिं भणियं—एस सिणिद्धमहुराइं गिहत्थत्ते आहारिंतो तेण बलिओ हुंतो, अंतपंताहाराइणा य इण्हिं दुब्बलो जाओ, न उण झाणेण, गुरुणा भणियं—इण्हिंपि य इमस्स घयपूसमित्ताओ मणोऽणुकूलो सिणिद्धमहुराइगुणजुओ आहारो संपज्जइ चेव, जइ न पत्तियह तो तुज्झे चेव सिणिद्धमहुराहारेणुवयरिऊण बलियं करिऊणाणेहात्ति विसज्जिओ तेहिं सद्धिं, ताणिवि पवराहारेणुवयरिउमाढत्ताणि, सोऽवि खणमवि सज्झायममुंचमाणो आहारेइ, तओ रत्तिं दिया य परिवत्तंतस्स तस्सेसो वराहारो महोवयारोव्व खलयणे न नज्जइ कत्थवि वच्चइ, ताहे बंधुवग्गेण निव्विण्णेण साहियं गुरूण, गुरूहिं भणियं-इण्हिं जं वा तं वा देह, सोऽवि भणिओ—इण्हिं न सुट्ठु सुयपरिवत्तणायरो कायव्वो, तहाकए थोवदिवसेहिं चेव सो बलिट्ठो संपन्नो, तओ तेसिं भावेण परिणयं गुरुवयणं, कया विसेसेण धम्मदेसणा, जायाणि सावगाणि ३। तम्मि य गच्छे विसेसगुणिणो चत्तारि मुणिणो, एक्को सो चेव दुब्बलियपूसमित्तो, अण्णो पुव्वभणिओ फग्गुरक्खिओ, तइओ विंझो, चउत्थओ आयरियाण चेव मामगो गोट्ठामाहिलो, तत्थ य विंझो महामेहावित्तणओ

कमेण सुत्तपरिवाडीए सुत्तं लहंतो झूरेइ, तओ आयरिए विन्नवेइ—मज्झ कंचि वायणायरियं पयच्छह, तेहिंपि दुब्बलिय-पूसमित्तो से वायणायरिओ दिण्णो, कइवय दिणाणि विंझस्स वायणं दाऊण गुरुं भणइ—भयवं! मम वायणं दिंतस्स सेससुयमगुणिज्जमाणं न ठाइ, तओ-जं सन्नायगगेहे मुक्कं जं संपयं च न गुणेमि। तेण समत्तंपि सुयं गलिही मम करयलजलं व॥१॥ तओ चिंतियं गुरूहिं—सुरगुरुसमबुद्धिस्सवि निच्च झरंतस्स जइ सुयमिमस्स। हंत विणस्सइ (ऽसइ) ता का गणणा सेसपुरिसेसु?॥१॥ अइसयकओवओगेण य नायं, जहा-इओपभिइ सुयमेधाधारणाइपरिहीणे सीसे होहिंति, तओ तेसिं अणुग्गहट्ठं चउरोऽवि अणुओगे वीसुं कासी, भणियं च—"जावंति अज्जवइरा अपुहुत्तं कालियाणुओगस्स। तेणारेण पुहुत्तं कालियसुय दिट्ठिवाए य ॥ १ ॥ देविंदवंदिएहिं महाणुभावेहि रक्खियज्जेहिं । जुगमासज्ज विहत्तो अणुओगो तो कओ चउहा ॥ २ ॥ कालियसुयं च इसिभासियाइं तइया य सूरपण्णत्ती । सव्वोऽवि दिट्ठिवाओ चउ-त्थओ होइ अणुओगो ॥ ३ ॥" देविंदवंदियत्तं च जहा तेसिं तहा साहिज्जइ—"ते कइयवि संपत्ता विहरंता गाम-नगरमाईसु । महुराउरिं समिद्धं भूयगुहाचेइयं तत्थ ॥ १ ॥ तंमि ठिया भयवंतो इओ य सोहम्मसुरवई पत्तो। खेत्ते महाविदेहे, सीमंधरसामिपासंमि ॥ २ ॥ अभिवंदिऊण पुच्छइ तित्थयरं सामि! केरिसा एत्थ । हुंति निओया

जीवा वागरिया भयवया ते उ ॥ ३ ॥ ताहे पुणोऽवि पुच्छइ भरहे वासंमि अत्थि पुण कोई । एए निओयजीवे जो साहइ पुच्छिओ संतो ॥ ४ ॥ तित्थयरेणं भणियं संति तहिं अज्जरक्खिया सूरी । तो सो माहणरूवेण आगओ ताण पासंमि ॥ ५ ॥ गोयरचरियाएँ विणिग्गएसु साहूसु थेररूवेणं । अभिवंदिऊण पभणइ-महल्लवाही मह सरीरे ॥ ६ ॥ तो कत्तियं ममाउं कहेह काऊण अणसणं जेण । मुंचामि इमे पाणे निव्विण्णो जीवियव्वाओ ॥ ७ ॥ तं सोउं उवउत्ता जाया सूरी तओ य वाससयं । नाऊण समहियं से चिंतंति न भारहो एसो ॥ ८ ॥ खयरो व वंतरो वा, होही नाया तओ य तस्स ठिई । दो सागरोवमाई, भणंति तो होसि तं सक्को ॥ ९ ॥ सब्भावं तो साहइ इंदो संपुच्छए निओए य । कहिएसु सूरिणा तेसु पत्थिओ वंदिउं जाव ॥ १० ॥ भणिओ स ताव गुरुणा, चिट्ठ खणं जाव साहुणो इंति । तुह दंसणेण जेणं थिरयरया हुंति ते धम्मे ॥ ११ ॥ इंदो पभणइ ते अप्पसत्तभावेण चेव मं दट्ठुं । काहिंति नियाणमओ अदंसणं चेव मे सेयं ॥ १२ ॥ जइ एवं ता अण्णं चिण्हं काऊण किंपि वच्चाहि । तो अन्नत्तो दारं काउं वसहिं गओ सक्को ॥ १३ ॥ गोयरचरियनियत्ता साहू वसहीएँ दारमलहंता । वाहरिया सूरीहिं, इओमुहा एह भणिरेहिं ॥ १४ ॥ कहियं सक्कागमणं च ताण ता कीस दंसिओ नऽम्हं ? । इय भणिए आहट्ठं तं

चिय सक्केण जं भणियं ॥ १५ ॥ इओ य पुणरवि दसपुरं पइ विहरिएसु सूरिसु–सुरपुरिसंकासाए दीसंताणेयको-
उयसयाए। नाहियवाई एक्को समागओ महुरनयरीए ॥ १ ॥ तेण य अक्खित्तो सव्वो नयरलोओ, न कोऽवि तस्सुत्तरं दाउं
सक्कइ, तओ माहुरसंघेण पवयणपभावणा होउत्ति चिंतयंतेण दसपुरनयरे जुगप्पहाणाण अज्जरक्खियसूरीण सयासं पेसिओ
माहुरसंघाडओ, तेण य समागंतूण साहिओ संघवुत्तंतो ताणं, तेहिं च विद्धत्तणओ सयं गंतुमसमत्थेहिं पवरवायल-
द्धिसंपण्णो पेसिओ माउलो गोट्ठामाहिलो, कमेण संपत्तो महुराए, आगमणेणं तस्स य नागरया हरिसनिब्भरा जाया,
आणंदिओ य संघो, परितुट्ठा सयलपासंडी ॥१॥ अण्णदियहंमि तथाविहसाहुसंजुओ गओ गोट्ठामाहिलो नरिंदसइं, दिट्ठो
राया, कयप्पणामेण तेण दवावियमासणं, सांनिसन्नो तत्थ गोट्ठामाहिलो समं समाहूहिं, मिलिया समग्गपासंडिणो,
आपूरिया नरिंदसभा, उवविट्ठेहिं सिट्ठिसेणावइसत्थवाहदु (धि) ज्जाइपमुहेहिं लोएहिं-ससमयपरसमयण्णू कुलंमि जाया
खमाएँ विक्खाया ! । पक्खदुगसम्मया तह समागया सब्भविबुहा य ॥१॥ एत्थंतरंमि पुव्वागयनाहियवाइणा संलत्तं–
जमिहऽक्खगोयराइक्कंतं न तमत्थि खरविसाणं व । इंदियविसयाईया य जीवसव्वण्णुमाईया ॥ २ ॥ एस असिद्धो
हेऊ न य भणियव्वो जओ न जीवाई। पच्चक्खपमाणेणं घेप्पंति घडाइभावव्व ॥३॥ पच्चक्खपमाणाओ अत्थि पमाणंतरं

च नो अन्नं । इमिणच्चिय दायव्वो न य अणुमाणेण वभिचारो ॥ ४ ॥ नाहियवाईत्ति जओ परप्पसिद्धीएँ जंपए सव्वं । मिच्छो हु मिच्छभासाइ बोहियव्वोत्ति नाएणं ॥ ४ ॥ ता एएसिमभावा ववहारो चेव जुत्तिसंजुत्तो । अच्चंतपरोक्खेसु संवाओ दुक्करो जम्हा ॥ ६ ॥ भणियं च–"एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः । भद्रे ! वृकपदं पश्य, यद्वदन्ति बहुश्रुताः ॥ १ ॥" तव्वयणावसाणे य भणियं गोट्ठामाहिलेण–जमिहऽक्खगोयराइक्कंतं न तमत्थि खरविसाणव्व । जं संलत्तं तुमए, तत्थाणेगंतिओ हेऊ ॥ ७ ॥ देसाइविप्पकिट्ठा मंदरमगरागरादओ जम्हा । विज्जंति परोक्खावि हु तह जीवाईवि होहिंति ॥८॥ किञ्च-एएण हेउणा किं नियतेसुं देसकालपिंडेसुं । जीवाईणमभावो साहिज्जइ किं व सव्वत्थ? ॥ ९ ॥ जइ ताव पढमपक्खो ता सिद्धं चेव मज्झ साहेसि । नियर्यमि देसकाले मयपिंडे जेण न हु जीवो ॥ १० ॥ एवं सव्वन्नुमाईसुवि भावियव्वं ॥ अह सव्वत्थ निसेहो, एवं तुह पिउपियामहस्सावि । एइ अभावो सुंदर ! अहेउयं तुज्झ तो जम्मं ॥ ११ ॥ केवलिपच्चक्खेण य जीवाईया घडाइभावव्व । घेप्पंति जेण तम्हा कह हेउ असिद्धया नेव? ॥१२॥ भणियं च–"अणिंदियगुणं जीवं, दुन्नेयं मंसचक्खुसा । सिद्धा पासंति सव्वण्णू, नाणसिद्धा य साहुणो ॥ १ ॥ त्ति, जं च पलत्तं तुमए, परप्पसिद्धीएँ एयमणुमाणं । इमिणच्चिय वभिचारो तो दायव्वो न मज्झ तए ॥ १३ ॥

एत्थवि परप्पासिद्धी सा तुज्झ पमाणमप्पमाणं वा ? । जइ ताव पमाणं तो सिद्धा जीवाइयावि तहा ॥ १४ ॥ तथाहि-
जीवाईयावि जओ परप्पसिद्धा अओऽणुमाणं व । मन्नसु न हुंति दुन्निवि वीसासो गंठिमुद्दा य ॥ १५ ॥ अह
अपमाणं सा तुज्झ हंदि तो कह पमाणमणुमाणं ? । तदभावंमि निसेहो अपमाणो चेव सपन्नो ॥ १६ ॥ एतावा-
नेव लोकोऽयं, यावानिन्द्रियगोचरः । प्रतिज्ञैषाऽप्यनेनैव, निरस्तेत्यवगम्यताम् ॥ १७ ॥ एवमाइवयणेहिं
निरुत्तरीकओ नाहियवाई, आणत्तो निव्विसओ कओ राइणा, पूइओ समणसंघो, घोसावियं नयरे-
जयइ वद्धमाणजिणसासणं, एत्थंतरंमि-घणरवमुहलियगयणो संतावियरायहंससंघाओ । अंधारियदिसिचक्को
वासारत्तो समुत्थरिओ ॥ १८ ॥ तओ गोट्ठामाहिलो धरिओ तत्थेव सड्ढेहिं ।

इओ य अज्जरक्खियसूरीहिं थोवावसेसमप्पणो आउयं कलिऊण मेलिओ गच्छो, भणियं च-अम्ह थोवमाउयं
ता तुम्हं को सूरी ठवेज्जउ ?, तओ गच्छेण नियसयणपक्खवाएण भणियं-फग्गुरक्खिओ गोट्ठामाहिलो वा, तओ
सूरीहिं रागाइविरहिएहिं दुब्बलियपूसमित्तं बहुगुणं मन्नंतेहिं भणियं-भो भो समणा ! एगो निप्फावघडोऽवरो य तेल्लघडो । ॥ २१ ॥
होइ परो घयघडओ अहोमुहे तत्थ वल्लघडे ॥११॥ सव्वेऽवि णिंति वल्ला इयरंमि उ ठंति अवयवा केई । घयकुंभंमि य

चिट्ठइ सेसंपि विलग्गयं बहुकं ॥ २० ॥ दुब्बलियपूसमित्तं पडुच्च एवं अहंपि संजाओ। सुत्तत्थतदुभएहिं आइमकुंभेण सारिच्छो ॥ २१ ॥ जो फग्गुरक्खियमुणी तं पुण पइ तेल्लकुंभतुल्लोऽहं । गोट्ठामाहिलमंगीकाउं घयकुडयसरिसोत्ति ॥ २२ ॥ सुत्तत्थोभयजुत्तो तो तुज्झं एस होउ आयरिओ । दुब्बलियपूसमित्तो मह वयणेणं महाभागा ! ॥ २३ ॥ तओ गच्छेण होउत्ति पडिवन्ने ठविओ दुब्बलियपूसमित्तो आयरिओ, भणिओ सूरिणा—जहा फग्गुरक्खिओ गोट्ठामाहिलाइणो मए दिट्ठा तहा तएवि दट्ठव्वा, फग्गुरक्खियादओऽवि भणिया—तुब्भेहिवि मम सरिसो अहिओ वा एस नवरि दट्ठव्वो। न य पडिकूलेयव्वं गुणनिहिणो वयणमेयस्स ॥ २४ ॥ एवं दुन्निवि वग्गे, संठावेऊण अणसणं काउं। पंचनमोक्कारपरो, सूरी सग्गंमि संपत्तो ॥ २५ ॥

इओ य वासारत्ताणंतरं गोट्ठामाहिलेणं सावगाणं संबोहणत्थं पढियं गाहाजुयलं—उच्छू वोलंति वई, तुंबीओ जायपुत्तभंडाओ। वसभा जायत्थामा गामा पंथा यऽचिक्खल्ला॥ १॥ अप्पोदगा य मग्गा वसुहावि य पक्कमट्टिया जाया। अण्णोक्कंता मग्गा साहूणं विहरिउं कालो ॥ २॥ ” त्ति, एवं सोउं भणिओ सड्ढेहिं-एत्थेव निच्चं किन्न परिवसह ?, तेण भणियं—समणाणं सउणाणं भमरकुलाणं च गोउलाणं च । अनियत्ता वसहीओ सारइयाणं च मेहाणं ॥ १ ॥ तओ तेहिं अणु-

मओ चलिओ दसपुराभिमुहं, जणाओ य नाओ अज्जरक्खियसूरिपरलोयगमणवुत्तंतो, कमेण पत्तो दसपुरं, जाणिओ य वल्लकुडयदिट्ठंतेण दुब्बलियपूसमित्तो निवेसिओ सूरिपए, संजायमच्छरो ठिओ पुढो वसहीए, णायवुत्तंतेण सूरिणा पेसिया फग्गुरक्खियपमुहा साहुणो तयाणयणनिमित्तं, किंचि उत्तरं दाऊण तेसिं ठिओ तत्थेव, अण्णेहिवि साहु-सावयाइएहिं भण्णमाणोऽवि नागओ वसहीए, ताहे चिंतिऊण सूरिणा (भणियं) पेच्छ कसायमाहप्पं जेहिं एवंविहावि-उत्तमपुरिसा नायजिणवयणसारा एवं जगडिज्जंति, अहवा किमच्छरियं ?, जओ भाणियमागमे—उवसामं उवणीया गुणमहया जिणचरित्तसरिसंपि। पडिवायंति कसाया किं पुण सेसे सरागत्थे ?॥१॥ त्ति, तया य सूरिणो विंझपमुहसि-रसाणं अट्ठमं कम्मपवायपुव्वं वक्खाणेन्ति, गोट्ठामाहिलो य मच्छराओ सूरिसयासमागंतुमपारन्तो विंझस्सऽणुभा-संतस्स सयासे उवविसइ, अण्णया य—किंचिवि कम्मं जीवप्पएसबद्धं झडत्ति विहडेइ। कालंतरमप्पत्तंपि सुक्काकुड्डंमि चुण्णो व्व ॥ १ ॥ कालंतरेण विहडइ किंचिवि पुण बद्धपुट्ठमिह कम्मं। कुड्डंमि उल्ल-लित्ते खित्तो सासिणेहचुण्णो व्व ॥ २ ॥ जीवेण समं एगत्तमागयं खीरनीरनाएण। बहुकाल वेइयव्वं, अण्णं तु निकाइयं कम्मं ॥ ३ ॥ एवं परूवयंतं विंझं सुणिऊण माहिलो भणइ। मोक्खाभावो पावइ नणु एवं

सव्वजीवाणं ॥ ४ ॥ जं अण्णोण्णाणुगयं जेण समं तं विजुज्जइ न तम्हा । जह जीवाओ पएसे तहेव कम्मंपि तो विंझ ! ॥ ५ ॥ पुट्ठो जहा अबद्धो कंचुइणं कंचुओ समण्णेइ । एवं पुट्ठमबद्धं जीवं कम्मं समन्नेइ ॥ ६ ॥ विंझो पभणइ ताहे गुरुणा मह एवमेवमक्खायं । पडिभणिओ तो तेणं गुरूवि तुह किं वियाणेइ ? ॥ ७ ॥ ताहे संकइ सो नियमणंमि भा अन्नहा मए गहियं । होज्ज इमं ता गंतुं निययगुरुं चेव पुच्छामि ॥ ८ ॥ विणओणएण पुट्ठा गुरुणो तेहिवि तहत्ति से कहियं । भणियं च कीस अवगयभावस्सवि तुज्झिमा संका ? ॥ ९ ॥ तो माहिलवुत्तंतो कहिओ सूरीण तेहि तो भणियं । माहिलवुत्तं मिच्छा जहा तहा विंझ ! निसुणेसु ॥ १० ॥ अण्णोऽण्णाणुगयाणिवि उवायओ जेण खीरनीराणि । जायंति पुढो तम्हा हेउअणेगंतया ताव ॥ ११ ॥ जा उ पइण्णा साऽविहु पच्चक्खविरोहिणी जओ जीवो । मरणसमयंमि दीसइ आऊकम्मेण मुच्चंतो ॥ १२ ॥ दिट्ठंतोऽवि न साहणधम्माणुगओ जओ न कम्मव्व । जीवाउ सप्पएसो भिन्नो आगंतुओ होइ ॥ १३ ॥ जं च पलत्तं जीवो, पुट्ठो कम्मेण कंचुएणव्व । तंपि न जुत्तं जम्हा वेइज्जइ वेयणा मज्झे ॥ १४ ॥ सा य न पावइ तम्मि अभावओ तन्निमित्तकम्मस्स । सिद्धस्स व तो पयडो समागओ अणुभवविरोहो ॥ १५ ॥ इय एवमाइ दोसे सुणिउं विंझो य माहिलं भणइ । अवियारिय-

रमणीओ तुह पक्खो सव्वहा एसो ॥ १६ ॥ तो तुण्हिक्को थक्को चिंतंतो ताव हुज्ज उ समग्गं । पुव्वं नवमं पच्छा खोडीहामो पुणोवि इमं ॥ १७ ॥ अन्नया नवमपुव्वे साहूण पच्चक्खाणाहिगारे—पाणाइवायं पच्चक्खामि जावज्जीवाए इच्चाइ सोऊण गोट्ठामाहिलो भणइ-पच्चक्खाणं सेयं अप्परिमाणेण होइ कायव्वं । जेसिं तु परीमाणं तं दुट्ठं आससा होइ ॥ १८ ॥ एवं पण्णविन्तो य विंझेण भणिओ—न जुत्तमेयं जं तुमं भणसि, तओ तेण जं नवमपुव्वस्स अवसेसं तं सम्मत्तंति चिंतिऊण भणिओ विंझो—किं ताव तुमं भणसि ?, जो तुज्झ वक्खाणेइ पूसमित्तो सो चेव भणउ, एवं वोत्तुं उट्ठिओ तट्ठाणाओ, गओ आयरियसयासं, भणियं च तेण—जह अज्जरक्खिएहिं वक्खायं तह न किं परूवेसि ?। सुयमयमत्तो होउं मा सुत्तासायणं कुणसु ॥ १९ ॥ भणिओ य नियपक्खो सूरिसयासंमि सूरिणाऽवि तओ । भणिओ न जुत्तिजुत्तो तुह पक्खो जह तहा सुणसु ॥ २० ॥ जं ताव तए भणियं जावज्जीवंति सप्परीमाणं । पच्चक्खाणमजुत्तं आसंसादोसओ तं न ॥ २१ ॥ कयपच्चक्खाणाणं नासंसा तत्थ किं तु देवत्ते । मा होज्जा वयभंगो मुणीण कालावही तेणं ॥ २२ ॥ अप्परिमाणे उ कए हवंति वयभंगमाइया दोसा । ता अभिणिवेसमहुणा मुंचसु पडिवज्ज मह वयणं ॥ २३ ॥ एवं भणिओ मन्नइ न जाव ता अन्नगच्छथेरावि। पुट्ठा तत्तियमेत्तं वयंति तो भणइ

सो रुट्ठो ॥ २४ ॥ किं तुब्भे भो ! जाणह सव्वेऽविहु जेण भयवया एवं । तित्थयरेण पणीयं भणंति तो तेऽवि तस्समुहं ॥ २५ ॥ मा आसायसु माहिल ! तित्थयरं तहवि जाव नो ठाइ । ताहे संघेण कओ काउस्सग्गो समग्गेणं ॥ २६ ॥ आसणकंपुप्पिच्छा, समागया देवया भणइ संघं । संदिसह । किं करेमी ? संघो तो देवयं भणइ ॥ २७ ॥ वच्चसु महाविदेहं, तित्थयरं पुच्छिऊण एसु दुयं । किं सम्मवाइ संघो दुब्बलिया पूसमित्ताई ? ॥ २८ ॥ किं वा गोट्ठामहिलो सा जंपइ देहऽणुग्गहं मज्झ । काउस्सग्गं गमणापडिघायत्थं तओ संघो ॥२९॥ तह चेव ठिओ सव्वो काउस्सग्गेण सा उ तित्थयरं । संपुच्छिऊण पुणरवि समागया संघपासंमि ॥ ३० ॥ बेइ जह सम्मवाई संघो इयरो य अलियवाई य । भरहक्खेत्ते जम्हा सत्तमओ निण्हवो एस ॥ ३१ ॥ तो जंपइ सो रुट्ठो कत्तो कडपूयणाएँ एयाए । तित्थयरपायमूलं गंतुं सामत्थमत्थि अहो ? ॥ ३२ ॥ ताहे संघेण कओ सो बज्झो एवमभिनिवेसेणं । मिच्छत्तमेस पत्तो अपडिक्कंतो य कालगओ ॥ ३३ ॥ एवं गोट्ठामाहिलचरियं संखेवओ समक्खायं । सपसंगं वित्थरओ आवस्सयविवरणा नेयं ॥ ३४ ॥ एवं च दर्शितानि जमालिप्रभृतीनि "मइभेएण जमाली" त्यादिगाथोद्दिष्टान्युदाहरणानि, तत्प्रदर्शने च व्याख्याता प्रपञ्चेन तृतीयद्वारगता "मइभेया पुव्वोग्गहे" त्यादिगाथा ॥ अधुना चतुर्थेन दोषद्वारेणाभिधित्सुराह—

मिच्छत्तपरिणओ खलु, नारयतिरिएसु भमइ इह जीवो ।
जह नंदो मणियारो तिविक्कमो जह य भट्टो वा ॥ ६ ॥

मिथ्यात्वात्मना परिणतो मिथ्यात्वपरिणतः, खलुशब्दोऽवधारणार्थः, मिथ्यात्वपरिणत एव, किं ?–नारकतिर्यक्षु भ्रमति इह जीवः, नारकाश्च तिर्यञ्चश्च नारकतिर्यञ्चस्तेषु ' भ्रमति ' पर्यटति ' इह ' लोके ' जीवः ' आत्मा, न सम्यक्त्वपरिणतोऽपि, तस्य तदायुर्बन्धानुपपत्तेः, उक्तञ्च–" सम्मद्दिट्ठी जीवो विमाणवज्जं न बंधई आउं । जइवि न सम्मत्तजढो, अहव न बद्धाउओ पुव्विं ॥ १ ॥ " ति, धर्मदासगणिनाऽप्युक्तम्–" सम्मत्तंमि उ लद्धे, ठइयाइं नरयतिरियदाराइं । दिव्वाणि माणुसाणि य मुक्खसुहाइं सहीणाइं ॥ १ ॥ " ति, मिथ्यात्वपरिणत इत्यनेन च विशेषणेनैकान्ताविचलितैकस्वरूपस्यात्मनो निषेधमाह, तस्य तथापरिणामासंभवात्, एकस्वरूपत्वे चात्मनो बन्धमोक्षाद्यभावात् । नारकतिर्यक्षु भ्रमतीत्यनेनापि निष्क्रियसर्वगतात्मवादिमतं निराचष्टे, तथाभूतस्य नारकादिभ्रमणानुपपत्तेः स्वर्गनारकादिसाधकबाधकानुष्ठानवैयर्थ्याच्च, अत्र च बहु वाच्यं तत्तु ग्रन्थगौरवभयात्परिहृतमिति । प्रक्रान्तार्थसमर्थनार्थमेव दृष्टान्तद्वयमाह-यथा नन्दो मणिकारः त्रिविक्रमो यथा भट्टो भ्रान्तवान्, तत्राद्यः सादेर्द्वितीयस्त्वनादेर्मिथ्यात्वप-

रिणामस्य प्रतिपादनार्थो दृष्टान्तः, वाशब्दस्तदन्यैवंविधदृष्टान्तसूचनार्थो द्रष्टव्यः । ननु च सम्यक्त्वादिदोषद्वारेषु तद्विपक्षे दोषानभिधास्यते, इह तु किमर्थं स्वरूप एवोक्तः ?, सत्यं, सम्यक्त्वादीनां स्वरूपतो गुणरूपत्वात् तद्विपक्षे दोषाभिधानं, मिथ्यात्वस्य तु तद्विपर्ययत्वात्स्वरूपमेवेति न दोषः, अत एव सम्यक्त्वदोषद्वारे तद्विपक्षे मिथ्यात्वे दोषं "सम्मत्तपरिब्भट्ठो जीवो दुक्खाण भायणं होइ" इत्यादिना वक्ष्यति, कथितः सप्रपञ्चो गाथाऽक्षरार्थः, भावार्थस्तु कथानकाभ्यामवसेयः, तत्र च नन्दमणिकारकथानकं सम्यक्त्वदोषद्वारे वक्ष्यामः, त्रिविक्रमभट्टकथानकं त्वभिधीयते—

असङ्ख्यवलयाकारद्वीपसागरवेष्टितः । राजतस्थालसंस्थानो, लक्षयोजनविस्तृतः ॥ १ ॥ अनन्तवर्षस्थितिकः, सप्तवर्षाश्रयोऽपि सन् । मेरुमण्डितमध्योऽपि, नमेरुसहितः क्वचित् ॥ २ ॥ हिमवत्प्रमुखैर्युक्तः, षड्भिर्वर्षधराद्रिभिः । गङ्गादिमन्नदीरम्यो, जम्बूद्वीपोऽस्ति विश्रुतः ॥ ३ ॥ मेरोर्दक्षिणतस्तत्र, षट्खण्डप्रविराजितम् । विद्यते भारतक्षेत्रं, शशाङ्कशकलाकृति ॥ ४ ॥ विहारभवनारामवापीकूपादिशोभितम् । तस्य मध्यमखण्डेऽभूत्, पुरं क्षितिप्रतिष्ठितम् ॥ ५ ॥ प्रशास्ति तत्तदा नीत्या, वैरिवारणकेसरी । प्रतापाक्रान्तभूपीठो, जितशत्रुर्महीपतिः ॥ ६ ॥ शान्तिकर्माभिचारादिप्रयो-

जनपटुरिथरः । आन्वीक्षिक्यादिविद्यासु, परं प्रावीण्यमागतः ॥ ७ ॥ कुलक्रमसमायातवेदधर्मोपदेशकः । त्रिवि-
क्रमाभिधो भट्टः, आसीत्तस्य पुरोहितः ॥८॥ युग्मम् ॥ तेनान्यदा स्ववित्तस्य, साफल्यमभिवाञ्छता । नृपत्यनुज्ञयाऽकारि,
धर्मबुद्ध्या सरोवरम् ॥ ९ ॥ सत्त्वाश्रयमतिस्वच्छं, गम्भीरं लोकनन्दनम् । सत्पुरुषमनस्तुल्यं, जलं यत्रावभासते
॥ १० ॥ पाल्यां देवकुलं तस्य, कारितं चातिसुन्दरम् । तस्यैव सरलो (सो) लक्ष्म्या, विनोदायेव मन्दिरम् ॥ ११ ॥
परिवेषेण चारामो, रम्यस्तस्य विधापितः । बकुलाशोकपुन्नागनागचम्पकमण्डितः ॥ १२ ॥ प्रतिवर्षं च तेनात्र,
मोहान्धेन प्रवर्त्तितः । स यज्ञो यत्र बस्तानां, विनाशः प्रविधीयते ॥ १३ ॥ एवं व्रजति काले च,
तत्र मूर्छापरायणः । अन्यदाऽऽर्त्तवशो मृत्वा, छाग एवोदपादि सः ॥ १४ ॥ भवितव्यनियोगेन, तत्पुत्रैरेव
सोऽन्यदा । स्वीकृतो यागकर्मार्थं, मल्यदानात्कुतोऽप्यसौ ॥ १५ ॥ नीतः स्वमन्दिरं तत्र, बान्धवादीन् प्रपश्यतः ।
जातिस्मरणमुत्पन्नं, तस्येहापोहवर्त्तिनः ॥ १६ ॥ सरोऽभिमुखमन्येचुर्नीयमानः क्रतूत्सवे । बिब्बीतिकर्त्तुमारब्धो,
न याति पदमप्यसौ ॥ १७ ॥ अत्रान्तरे तपस्व्येको, ज्ञानातिशयसंयुतः । तं रटन्तं समालोक्य, कारुण्यादिदमब्रवीत्
॥ १८ ॥ स्वयं वृक्षान् समारोप्य, खातयित्वा सरः स्वयम् । स्वयमुपयाचितासो (?), बिब्बीति किमु वाससे ? ॥ १९ ॥

श्रुत्वा तद्वचनं साधोः, परिभाव्य स्वचेतसि । स्वदोषं मन्यमानोऽसौ, तूष्णीभावमुपेयिवान् ॥ २० ॥ ततः पुत्रादयस्तस्य, कौतुकाकुलमानसाः । साधुं वदन्ति वः पाठादजः किं मौनमाश्रितः ? ॥ २१ ॥ साधुनाऽवादि भो भद्राः !, सैष भट्टस्त्रिविक्रमः । यत्प्रवर्त्तितयज्ञेऽसौ, हन्तुं युष्माभिरिष्यते ॥ २२ ॥ तैरूचे प्रत्ययः कोऽत्र?, सोऽब्रवीत् मुच्यतामसौ । सम्पादयति येनायं, प्रतीतिं स्वयमेव वः ॥ २३ ॥ तथाकृते ततस्तैस्तु, यदनेन धृतं पुरा । निधानं स्वसुतैः सार्द्धं, गत्वा तद्देशमाश्रितः ॥ २४ ॥ जातिस्मरणतो ज्ञात्वा, गेहमध्ये व्यवस्थितम् । तत्तेषां दर्शयामास, खुराग्रैर्विलिखन् महीम् ॥ २५ ॥ संजातप्रत्ययास्ते च, गृहीत्वा तं समाययुः । उद्यानवर्तिनः साधोः, सकाशं शान्तचेतसः ॥ २६ ॥ प्रणिपत्य ततः प्रोचुर्भगवन्नेष नः पिता । आसीध्धर्मपरो नित्यं, वेदोदितविधानतः ॥ २७ ॥ तथाहि—तडागः खानितोऽनेन, यागाश्च विविधाः कृताः । तदयं किमजो जातोऽकृतकर्मा यथा नरः ? ॥ २८ ॥ इत्येवं तैरसौ पृष्टः, प्रोवाच मुनिपुङ्गवः । अज्ञानफलमेतेन, दुरन्तमुपभुज्यते ॥ २९ ॥ यदेव कुरुते जन्तुः, किञ्चित्कर्म शुभाशुभम् । तस्यैव फलमाप्नोति, नाकृतं तूपतिष्ठते ॥ ३० ॥ तथाहि—अधर्मो धर्मबुद्ध्या यः, पूर्वमज्ञानतः कृतः । तस्यार्त्तध्यानयुक्तस्य, फलमेतदुपस्थितम् ॥ ३१ ॥ गम्यागम्यं न जानाति, कृत्याकृत्यं न मन्यते । हिताहितं च नो वेत्ति, यस्मादज्ञानमोहितः ॥ ३२ ॥ उक्तञ्च-

भवपद-
त्रुत्तिःमू.देव.
वृ. यशो.

॥ २७ ॥

"अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः। अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ॥३३॥" संभाविनो गुणो यस्तु, तडागादिविधापने । नाशहेतुत्वतोऽनन्तसत्त्वानां सोऽपि नोचितः ॥ ३४ ॥ पशुमेधादियागाश्च, यैर्धर्माय प्रवर्त्तिताः । तेऽपि तत्त्वपथोत्तीर्णाः, परलोकविबाधकाः ॥३५॥ उक्तं च कृष्णद्वैपायनेन—"ध्रुवं प्राणिवधो यज्ञे, नास्ति यज्ञस्त्वहिंसकः । तस्मात् सत्यमहिंसा च, सदा यज्ञो युधिष्ठिर ! ॥३६॥ दया दानं तपो होमः, सत्ययूपो गुणाः पशुः । ब्रह्मचर्यमलोभाग्निरेष यज्ञः सनातनः ॥ ३७ ॥ पशूंश्च ये तु हिंसन्ति, लुब्धाः क्रव्येषु मानवाः । ते मृत्वा नरकं यान्ति, नृशंसाः पापकर्मिणः ॥ ३८ ॥" इत्यादि, एवमाकर्ण्य ते सर्वे, मुनेर्वाचो मनोहराः । संजातभववैराग्याः, श्रावकत्वं प्रपेदिरे ॥ ३९ ॥ अजः साधुसमीपे च, सद्विवेकमुपागतः । प्रपद्य देशविरतिं, गृहीत्वाऽनशनं तथा ॥ ४० ॥ समः समस्तसत्त्वेषु, नमस्कारपरायणः । मृत्वा भावस्व (स्वर) रूपोऽसौ, देवः समुदपद्यत ॥४१॥ मिथ्यात्वं दुर्गतेर्हेतुस्त्रिविक्रमकथानतः ( कात् ) । एवं विज्ञाय भो भव्याः !, युष्माभिस्त्यज्यतामदः ॥४२॥ श्रुतदेव्याः प्रसादेन, दोषद्वारे निरूपितम् । मिथ्यात्वमधुना तस्य, गुणद्वारं क्रमागतम् ॥ ४३ ॥ तदाह—

मिच्छत्तस्स गुणोऽयं, अणभिनिवेसेण लहइ संमत्तं । जह इंदनागमुणिणा गोयमपडिबोहिएणंति ॥ ७॥

मिथ्यात्व-
गुणः गा ७

॥ २७ ॥

व्याख्या—मिथ्यात्वं नाम विपरीतबोधस्वरूपम्, उक्तञ्च—"मिथ्यात्वस्य ह्युदये जीवो विपरीतदर्शनो भवति। न च तस्मै सद्धर्मः स्वदते पित्तोदये घृतवत् ॥ १ ॥" तस्य गुणोऽयम्—एषोऽनभिनिवेशरूपो, वर्त्तत इति शेषः, कुतः ? इति चेदाह—'**अनभिनिवेशेन लभते सम्यक्त्वं**' यत इत्यध्याहारात्, यस्मादभिनिवेशः—कदाग्रहस्तस्याभावोऽनभिनिवेशस्तेन हेतुना करणेन वा 'लभते' प्राप्नोति, अनभिनिविष्टमिथ्यादृष्टिरिति शेषः, किं ?—'सम्यक्त्वं' यथाऽवस्थितार्थप्रतिपत्तिरूपं, सम्भवापेक्षया चैतदुच्यते, न च नियमः, यदुक्तम्—"विवरीयसद्दहाणे मिच्छा भावा न सन्ति केइ गुणा। अणभिनिवेसाओ कयावि होइ सम्मत्तहेऊवि ॥ १ ॥" त्ति। ननु मिथ्यात्वस्य सर्वघातिप्रकृतिमध्यपठितत्वात्कथं गुणरूपता ?, सत्यं, गुणहेतुत्वात्, गुणहेतुत्वं च तस्यानेकभेदत्वेन विशुद्धितारतम्यस्य घटमानकत्वात्, "जात्तियाइं संकिलेसट्ठाणाइं तत्तियाइं विसोहिट्ठाणाइं" तिवचनाद्, व्यवहारनयापेक्षं चेदं, निश्चयतः सम्यग्दृष्टिरेव सम्यक्त्वं लभत इत्युक्तेः, प्रकृतानुरूपनिदर्शनप्रतिपिपादयिषयाऽऽह—'**यथेन्द्रनागमुनिना गौतमप्रतिबोधितेने**'ति. यथेत्युदाहरणोपदर्शनार्थः, 'इन्द्रनागमुनिना' इन्द्रनागश्चासौ बालतपस्वितया प्रसिद्धत्वान्मुनिश्च स तथा तेन, किंविधेन ?—गौतमः—चरमतीर्थकृतः प्रथमगणधरस्तेन प्रतिबोधितः—सन्मार्गं लम्भितस्तेन, लब्धमिति शेषः, 'इति-

शब्दः ' एवंप्रकारान्यज्ञातसूचनार्थ इति गाथाऽक्षरार्थः ॥ भावार्थस्तु कथानकगम्यः, तच्चेदम्—

जंबुद्दीवे दीवे, भारहखेत्तस्स मज्झिमे खंडे । अत्थि पुराणपसिद्धं नामेण वसन्तपुरनगरं ॥ १ ॥ उत्तुङ्ग-देवमन्दिरपायारट्टालहट्टसोहाए । दिट्ठबहुदेसपहियाण कुणइ जं मणचमक्कारं ॥ २ ॥ सयउच्छवंमि जंमि उ वज्जिरआउज्जगुहिरसद्देणं । मंगलरवमुहलेणं सुव्वइ न जणेण जणसद्दो ॥ ३ ॥ निवसइ जत्थ य लोओ दढप्पइण्णो सुसीलसंपुण्णो । पुव्वाभासी दक्खो कयण्णुओ धम्मकज्जपरो ॥ ४ ॥ एक्को चिय पर दोसो तंमि पुरे सयलपुरगुणड्ढंमि । जं दीसइ मुणिलोओऽवि निच्चपरलोयतत्तिपरो ॥ ५ ॥ तं पालइ महिवालो, जियसत्तू सत्तुसेणखयकालो । अज्जतरुआलवालो, आवज्जियसयलगुणजालो ॥ ६ ॥ तत्थ य एक्को सेट्ठी विसिट्ठवेसो कलासु पत्तट्ठो । इड्ढिगुणगोत्तजिट्ठो विहलुद्धरणंमि सुपसिद्धो ॥ ७ ॥ भवियव्वयानिओगेण तस्स गेहंपि अन्नया जाओ । मारीदोसो तह जह मरइ समग्गोऽवि गिहलोओ ॥ ८ ॥ तंमि मरंतंमि तहा गिहवइपुत्ताइएसु खीणेसु । सो कोऽवि नत्थि सज्जो मयाइं बारेऽवि जो खिवइ ॥ ९ ॥ लोएण य तह दट्ठुं मारीऍ उवद्दवं गिहे तंमि । संचरणभएणं कंटिआहिं आऊरियं दारं ॥ १० ॥ तंमि य एक्को बालो, उव्वरिओ इंदनागनामोत्ति । आउय-

कम्मस्स दढं अणुवक्कमणीयभावेणं ॥ ११ ॥ तण्हाछुहापरद्धो मग्गंतो पाणियं नियइ जाव । सव्वेऽवि मए ताहे भीओ दारं पलोएइ ॥ १२ ॥ एत्थंतरंमि दिट्ठो आमिसलोभेण आयओ सुणहो । दट्ठुं तं कंपंतो दीहसरं रोइउं लग्गो ॥ १३ ॥ तस्सद्दायण्णणओ, सुणहो वलिऊण निग्गओ भीओ । तस्सेव य विवरेणं, नीहरिओ सोऽवि गेहाओ ॥ १४ ॥ भणियं च–" भग्नाशस्य करण्डपिण्डिततनोर्ग्लानेन्द्रियस्य क्षुधा, कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः । तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा, स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये वाऽऽकुलम् ॥ १५ ॥" गेहे गेहे भिक्खं मग्गंतो गहियकप्परो भमइ । अणुकंपाए लोओ य देइ से असणमाईयं ॥ १६ ॥ अविय–तं दट्ठुं तयवत्थं तग्गेहसिरिं च सुमरिउं लोओ । झूरंतो नियचित्ते गाहामिमं सरइ सुपसिद्धं ॥ १७ ॥ कालंमि अणाईए जीवाणं विविहकम्मवसगाणं । तं नत्थि संविहाणं संसारे जं न संभवइ ॥ १८ ॥ एवं परिवड्ढंतस्स तस्स जा जंति वच्छरा कइवि । ता अण्णया कयाइ सिद्धत्थो नाम सत्थाहो ॥ १९ ॥ रायगिहं पइ चलिओ घोसावइ घोसणं इमं नयरे । रायगिहपुरगमत्थी जो इह समए समं एउ ॥ २० ॥ मग्गंमि तस्स तार्चिं थक्कवित्थक्करसऽहं करिस्सामि । इय सोऊणं बहवे, दीणाणाहादओ चलिया ॥ २१ ॥ ताणं च मज्झयारे स पत्थिओ इंदनागदमगो-

ऽवि । सत्थोऽवि ताव वच्चइ, समागया जाव गोवेला ॥ २२ ॥ तो आवासं गिण्हइ, सच्छायजलासए पएसंमि । सिद्धे भोयणजाए स इंदनागोऽवि भिक्खत्थं ॥ २३ ॥ सत्थंमि समोयरिओ, लद्धो भिक्खाएँ पवर घयकूरो । भुत्ता य रुक्खहेट्ठा सत्थेण समं पुणो चलिओ ॥ २४ ॥ अज्जिण्णदोसओ से बीयदिणे नासि तारिसी मुक्खा । तो न पविट्ठो सत्थे भिक्खत्थं सेट्ठिणा दिट्ठो ॥ २५ ॥ तरुहेट्ठा उवविट्ठो झाणोवगओ मुणिव्व तो सेट्ठी । चिंतेइ नियमणंमी अज्जं उववासिओ एसो ॥ २६ ॥ अव्वत्तलिंगियं तं, तइयदिणे सत्थमागयं दट्ठुं । सत्थवई से दावइ निद्धं पवरं च आहारं ॥ २७ ॥ तेणं च दो दिणाइं अज्जिण्णेणुवहया छुहा तस्स । सेट्ठीवि मुणइ एसो छट्ठाओ पारणं कुणइ ॥ २८ ॥ पत्तो चउत्थदियहे पुट्ठो किं नागओऽसि दुण्णि दिणे ? । सो तुण्हिक्को अच्छइ छट्ठतवोत्ती कलइ सेट्ठी ॥ २९ ॥ जओ भणियं–" छण्णो धम्मो पयडं च पोरुसं च परकलत्तपरिहरणं । गंजणरहिओ जम्मो राढाइत्ताण निव्वहइ ॥ ३० ॥ " एवं च तवगुणेणं स रंजिओ देइ तस्स आहारं । सुसिणिद्धाइगुणजुयं पारणगदिणंमि तुट्ठमणो ॥३१॥ तदुवट्ठंभवसेण य बहुबहुयरअउववासकरणाओ । जाओ मासुववासी कमेण सो इंदनागमुणी ॥३२॥ ॥ २९ ॥
भणइ य तं सिद्धत्थो न जाव नयरं मुणे ! तुमं पत्तो । ताव न पारणगट्ठा अन्नावासंमि गंतव्वं ॥ ३३ ॥ जं किंपि

तुज्झ जोयं ओसहभेसज्जखज्जपेज्जाइं। अम्हाणवि आवासे होही तं जेण अविगप्पं ॥ ३४ ॥ लोओऽवि तस्स पणओ तग्गुणरागेण रंजिओ य दढं। तं चिय गुणियं पेच्छइ, लेइ न नामंपि अन्नस्स ॥ ३५ ॥ अण्णे भण्णंति एसे गपिंडिओ तेण तं खु अट्ठपयं। लद्धं जेण निमंतितस्सवि गेण्हइ नऽन्नस्स ॥ ३६ ॥ पत्ता य कमेण पुरं सत्थाहेणावि नियगिहं चेव। काराविओ मढो से तेणवि मुंडावियं सीसं ॥ ३७ ॥ कासायचीवरधरो भिक्खाओ तंमि सो पुरे जाओ। दिज्जं-तंपि न इच्छइ आहारं सेट्ठिणा पच्छा ॥३८॥ पारणगादिणे लोगो नियनियगेहंमि कुणइ आढत्तिं। तस्सट्ठा एसो उण एगगिहे पारिउं वलइ ॥ ३९ ॥ जाणइ न सेसलोओ कस्सवि गेहंमि पारियं इमिणा। गहियाहारो चिट्ठइ पडिभालंतो नियगिहेसु ॥ ४० ॥ तो सेसजाणणट्ठा मिलिऊण परोप्परं नयरलोओ। कुणइ इमं संकेयं भत्तिपरो इंदणागंमि ॥ ४१ ॥ कस्सवि जस्स पडिच्छइ आहारो मुणिवरो इमो तेणं। लोयस्स जाणणट्ठा भेरी ताडावियव्वात्ति ॥ ४२ ॥ वित्ते पारणयंमी जेण जणो नियनियेसु कज्जेसु। लग्गइ एवं वच्चइ कालो अह अण्णया तत्थ ॥ ४३ ॥ विहरंतो पुरपट्टणगामागरनगरमंडियं वसुहं। सिरिवद्धमाणसामी समो-सढो गुणसिलुज्जाणे ॥ ४४ ॥ सुत्तत्थपोरिसिए उत्तरिं भिक्खाइ नीहरंतो य। गोयमसामी रुद्धो वीरेण अणेसणं

भणिउं ॥ ४५ ॥ पुट्ठो य गोयमेणं सामी ! किमणेसणानिमित्तंति ?। सामीवि भणइ गोयम ! पारणगं इंदनागस्स ॥ ४६ ॥ सव्वोऽवि जणो इण्हिं वट्टइ तक्कज्जआउलत्तेणं । जेण पमत्तो सो उण दितोऽवि अणेसणं कुणइ ॥ ४७ ॥ खणमेत्तंमि गयंमी पुणोऽवि भणियं समोयरह इण्हिं । भिक्खत्थं तं च मुणि, एवं दट्ठुं भणेज्जाहि ॥ ४८ ॥ भो ! भो ! अणेगपिंडिय ! इच्छइ तं एगपिंडिओ दट्ठुं । इच्छंति पभणिऊणं नीहरिओ गोयममुणीवि ॥ ४९ ॥ वच्चंतेण य इत्तो दिट्ठो भणिओवि तं तओ रुट्ठो । कहमहमणेगपिंडो एक्कगिहे चेव गिण्हंतो ॥ ५० ॥ एएव्व अहं नो खलु गिहे गिहे परियडामि भिक्खत्थं । उवसंतो य खणेणं चिंतइ हुं होमि जह भणिओ ॥ ५१ ॥ जम्हा मह पारणए लोगोऽणेगाइ कुणइ पिंडाइं । एए अकयमकारियपिंडं गिण्हंति वरमुणिणो ॥ ५२ ॥ ताऽणेगपिंडिओऽहं एए पुण एगपिंडिया सच्चं । एवं चिंतितस्स य जाईसरणं समुप्पन्नं ॥ ५३ ॥ पुव्वाहीयं च सुयं सरियं लिंगं च देवयादिन्नं । गहियं विक्खायजसो जाओ पत्तेयबुद्धो सो ॥ ५४ ॥ भासइ य इंदनागज्झयणं उप्पण्णकेवलन्नाणो । नीसेसकम्म-विगमं काउं मोक्खं च संपत्तो ॥ ५५ ॥ एवं मिच्छत्तगुणादणभिनिवेसाउ इंदनागेणं । पत्ता सम्मत्ताई जह तह अन्नेऽवि पाविंति ॥ ५६ ॥ सुयएविपसाएणं भणियं मिच्छस्स पंचमं दारं । जयणादारं इण्हिं, कमपत्तं तस्स तं भणिमो ॥ ५७ ॥

जयणा लहुयागरुई अम्मडसीसेहिऽदत्तभीएहिं ।
मरणब्भुवगमकरणं बंभे कप्पे समप्पण्णा ॥ ८ ॥

मिथ्यात्वस्य यतना प्रक्रान्ता तस्याश्च सामान्यलक्षणं निवेद्य मिथ्यात्वविषयतामाह-यतना लघुतागुरुते उच्यत इति शेषः, यत्यते-प्रयत्नः क्रियते कार्यं प्रत्यनयेति यतना, 'लघुतागुरुते' लघुतागुरुतालोचनं चात्र लघुतागुरुते इत्यनेन विवक्षितं, ततोऽयमत्र भावार्थः-शास्त्रानुसारिकुशाग्रीयबुद्ध्या गुरुलाघवाऽऽलोचनपूर्वं लघुलाभपरिहारेण गुरुलाभाङ्गीकरणं यतना, एतां च मिथ्यात्वविषयां दर्शयितुमुदाहरणमाह-'अम्मडसीसेहिऽदत्तभीएहिं मरणब्भुवगमकरणं' ति अम्मडो नाम परिव्राजकस्तस्य शिष्याः-अन्तेवासिनस्तैः, कीदृशैः ?-'अदत्तभीतैः' अदत्तादानविरतिभङ्गभीतैः, कर्त्तरि तृतीया, कृतमिति गम्यमानत्वात्, 'मरणाभ्युपगमकरणं' मरणं-प्राणत्यागस्तस्याभ्युपगमः-अङ्गीकारस्तस्य करणं-विधानं, मिथ्यात्वयतना यथेति शेषः, ननु चेयमदत्तादानविरतिविषया यतना न मिथ्यात्वविषया तत्किमिदमप्रस्तुताभिधानम् ?, उच्यते, यथा चारित्रवतश्चारित्रपरिणामानुरञ्जितं बाह्यमनुष्ठानं सर्वं चारित्रमित्यभिधीयते तथा मिथ्यादृष्टेर्मिथ्यात्वानुरञ्जितं सर्वमनुष्ठानं मिथ्यात्वमिति ततो

नामिध्यात्वविषयेयमितो नाप्रस्तुताभिधानं। अहो अम्मडशिष्याः सम्यग्दृष्टयो देशविरताश्च श्रूयन्ते तत्कथमियं मिथ्यात्वयतना ?, उच्यते, पारिव्राज्यं हि मिथ्यादृष्टयनुष्ठानमतः सम्यग्दृष्टयोऽपि देशविरता अपि मिथ्यादृश इव व्यवह्रियन्ते, न च व्यवहारो न प्रधानमिति वचनीयं, "जइ जिणमयं पवज्जह ता मा ववहारनिच्छए मुयह। ववहारनउच्छेए तित्थुच्छेओ जओऽवस्सं ॥ १ ॥" इतिवचनात्, एतदेव फलद्वारेणोपदर्शयन्नाह–'बंभे कप्पे समुप्पण्णा।' पदावयवेन पदसमुदायव्यपदेशाद्ब्रह्मणीत्यनेन ब्रह्मलोके इति लभ्यते, ब्रह्मलोके-पञ्चमे कल्पे ते मिथ्यात्वयतनानुभावादुत्पन्नाः, अन्यथा सम्यग्दृष्टित्वात् केचिदच्युतेऽप्युत्पद्येरन्, उक्तं हि–"उववाओ सावगाणं उक्कोसेणं तु अच्चुओ जाव। जावंति बंभलोओ चरगपरिव्वायउववाओ ॥ १ ॥" इति गाथाऽक्षरार्थः। भावार्थस्तु कथानकगम्यः, तच्चेदम्–

इह यदा भगवानुत्पन्नदिव्यविमलकेवलज्ञानः क्षायिकदर्शनचारित्रप्रमुखगुणरत्नराजितो जितजगत्त्रयमकरध्वजमहावैरी विजयावाप्तासीममहिमप्राग्भारो धरापतिश्रीसिद्धार्थतनयो विजहार महावीरः तदाऽष्टौ ब्राह्मणाः परिव्राजका बभूवुः, तद्यथा–"कृष्णो १ द्वीपायनः २ कण्डुः ३, करकण्डुः ४ पराशरः ५। अम्मडो ६ देवगुप्तश्च ७,

नारदाख्य ८ स्तथाऽष्टमः ॥ १ ॥ " ते च षष्टितन्त्रादिशास्त्रविशारदाः चतुर्दशविद्यास्थानपारगाः दानशौचतीर्थाभिषेकादिभिर्धर्ममाचक्षाणाः उदकमृत्तिकाक्षालनेन शौचाचारमुपवर्णयन्तः शौचपरिपालनपरा वयमभिषेकजलपूतात्मानोऽविघ्नेन स्वर्गं गमिष्याम इति प्ररूपयन्तो विहरन्ति स्म, न कल्पते चैतेषामवटतडागादिजलावगाहनं हस्त्यश्वरथादियानावरोहणं मुष्टिककुशीलवादिप्रेक्षावलोकनं स्त्रीकथादिविकथाकरणं हरितकायविघट्टनाद्यनर्थदण्डासेवनं बहुमूल्यविचित्रवस्त्राभरणोपकरणधारणं माल्यादिभोगाङ्गसंसर्गं वा कर्त्तुं केवलं धातुरक्तैकवस्त्रधारणं अनामिकया पवित्रिकास्वीकरणं श्रवणेन कर्णतूरपरिधानं गङ्गामृत्तिकया ललाटे तिलकविरचनं पानस्नानहस्तपादादिप्रक्षालनानिमित्तं च यथाक्रमं मागधप्रसिद्धप्रस्थकार्द्धाढकप्रमाणप्रमितप्रसन्नपरिपूतस्तिमितवहमानान्यदत्तोदकग्रहणं, एवंप्रकारमन्यदपि स्वशास्त्रविहितमनुष्ठानमासेवमानास्तिष्ठन्ति स्म, एवंविधक्रियापराश्च ये कालमासे कालं कृतवन्तस्ते उत्कर्षतो दशसागरोपमस्थितिका ब्रह्मलोककल्पे देवतयोदपद्यन्त, तन्मध्यवर्त्यम्मडपरिव्राजकश्च सप्तशतसङ्ख्यशिष्यपरिवृतोऽन्यदा भगवतो महावीरस्य देशनामाकर्ण्य प्रतिपन्नाणुव्रतगुणव्रतशिक्षाव्रतः समधिगतसकलजीवाजीवादितत्त्वः सर्वतोऽङ्गीकृतमैथुनविरतिव्रत आधाकर्मिकादिदोषदुष्टभक्तपानादिपरिहारसुस्थितः पूर्वोदितपरिव्राजकगुणोपेतश्च काम्पि-

ल्यपुरनिवासी परमश्रावको बभूव, तदन्तेवासिनश्च कदाचिदतिप्रवृद्धप्रबलतापदिवसे ज्येष्ठमासि प्रचण्डचण्डरश्मिकरनिकरसन्तापतापिते सकलजीवलोके विहारार्थं काम्पिल्यपुरात्पुरिमतालनगरं प्रति प्रस्थिताः, गच्छन्तश्च तावद्गता यावदेका महाटवी, या च महानरेन्द्रसेनेवेतस्ततो निरीक्ष्यमाणपुण्डरीकशतसंकुला विविधहरिपत्ररथविराजिता च रामरावणसङ्ग्रामभूमिरिव संचरन्निशाचरबिभीषणा नीलनलालङ्कृता च विजिगीषुनृपतिविजययात्रेव विसारिवाहिनीकाशा दक्षा च कचिदनवलोक्यमानमानवाऽपि बहुविधविटपिहिता शिवानुगताऽपि नापर्णा, तस्यां च निर्जनायां कियन्तमपि भूभागमतिक्रान्तानाममीषां पूर्वगृहीतमुदकं निष्ठितं, ततः पिपासयाऽभिभूयमाना अन्यमुदकदातारमपश्यन्तस्ते सर्वेऽप्येवमालोचितवन्तः, यथा निष्ठितमिदानीं तावदस्माकं पुरा संगृहीतं जलं, न च सुनिपुणं निरूपयद्भिरपि कश्चिदुदकदाताऽन्यो निरीक्षितः, स्वयं ग्रहीतुं च तन्न कल्पते, तदिदानीं मरणमेव नः श्रेयः, यत उक्तम्—" वरं प्रवेष्टुं ज्वलितं हुताशनं, न चापि भग्नं चिरसञ्चितं व्रतम् । वरं हि मृत्युः सुविशुद्धकर्मणो, न चापि शीलस्खलितस्य जीवितम् ॥ १ ॥" एवं च सर्वसंमतपर्यालोचनानन्तरं त्रिदण्डकुण्डिकाद्युपकरणजातमेकान्ते व्युत्सृज्य महानद्या गङ्गायाः पुलिनपरिसरे वालुकासंस्तारकान् संस्तीर्य तदारूढाः पूर्वाभिमुखाः संपर्यङ्कनिषण्णललाटतटघटिताञ्जलिपुटा भगवतोऽर्हतः शक्रस्तवेनाभिष्टूय विशेषेण वर्त्त-

मानतीर्थाधिपतिं वर्द्धमानस्वामिनं धर्माचार्यमम्मडपरिव्राजकं चाभिवन्द्य पूर्वप्रत्याख्यातयावज्जीविकस्थूलप्राणातिपातमृषावादादत्तादानसर्वमैथुनपरिग्रहान् संस्मृत्येदानीमपि वयं भूयः श्रमणस्य भगवतो महावीरस्यान्तिके सर्वं प्राणातिपातं प्रत्याचक्ष्महे इत्यादिक्रमेण सर्वव्रतान्युच्चार्याष्टादशपापस्थानविमुक्ताशया यावज्जीविकं चतुर्विधाहारपरिहारमाधाय शरीरमपि चरमोच्छ्वासनिःश्वासेषु व्युत्सृष्टमस्माभिरिति चेतसि कृत्वा पादपोपगमनं कृतवन्तः, ततश्च कतिचिद्दिवसान्यनशनेन स्थित्वाऽऽलोचितप्रतिक्रान्ताः समाधिना कालं कृत्वा पञ्चमे ब्रह्मलोककल्पे दशसागरोपमस्थितयो देवा उत्पन्नाः। एवं च ते लघुलाभमदत्तादानं परिहृत्य गुरुलाभं मरणं चाङ्गीकृत्य मिथ्यात्वयतनामासेवितवन्त इति प्रकृतमवसितं, प्रसङ्गागतं त्वम्मडपरिव्राजककथानकानुसन्धानं किञ्चित्क्रियते—तत्रासौ परिव्राजकपतिर्विविधकौतुकवशीकृताशेषलोकः काम्पिल्यपुरे प्रतिवसति स्म, अन्यदा च तद्गुणानुरागविरचितमनोरञ्जनात् जनात्तद्गुणान् भगवान् गौतमस्वामी समाकर्ण्य निःसंशयप्रतीतिकृते भगवन्तं महावीरस्वामिनं विधिवत पप्रच्छ—यथा भगवन्! अयं लोको यद्व्यपदिशति—एवमम्मडपरिव्राजकः काम्पिल्यपुरे गृहशतेष्वाहारमाहारयति, एवं वसतिमुपैतीत्यादि, तत्किं तथा ?, भगवानवादीत्-तथा, कथमेतदेवमिति पृष्टः पुनर्भगवान् ब्रूते स्म-गौतम! अम्मडपरिव्राजकस्य प्रकृतिभद्रताविनी-

यतनायां अम्मडशिष्यज्ञातं

ततादिगुणोपेतस्यानवरतं षष्ठाष्टमादिप्रकृष्टतपःशोषितशरीरस्य सूर्याभिमुखोर्ध्वबाह्वातापनादिकायक्लेशमनुभवत उत्तरोत्तरशुभपरिणामवशाद्विशुध्यमानलेश्यस्य तदावरणीयक्षयोपशमेन वैक्रियवीर्यावधिज्ञानादिलब्धयः समुत्पन्नाः, ततोऽसौ लोकविस्मायननिमित्तं सर्वमेवं विदधाति, एवमाकर्ण्य गौतमो विनयविरचिताञ्जलिपुटः पुनर्व्यजिज्ञपत्-स्वामिन् ! अयमेवंलब्धिसम्पन्नोऽम्मडपरिव्राजकः कदा सर्वविरतिपरिणाममनुभविष्यति?, कथं वा कालं करिष्यति ?, कालं कृत्वा कोत्पत्स्यते ?, कदा वाऽशेषकर्म्मक्षयं विधाय परमगतिं प्राप्स्यति ?, इत्यादि पृष्टः स्वामी पुनरवोचत् गौतम ! न तावदस्मिन् भवेऽसौ सर्वविरतिमवाप्स्यति, नापि देशविरतिपरिणामात् प्रतिपतिष्यति, केवलं पूर्ववर्णित-गुणकलापोपेतोऽनेकलोकोपकारं कुर्वाणो बहूनि वर्षाणि श्रमणोपासकपर्यायं पालयिष्यति, ततश्चावधिज्ञानेन विज्ञा-तासन्नमरणो मासिकसंलेखनया षष्टिं भक्तान्यनशनेनावच्छिद्यालोचितप्रतिक्रान्तः समाधिना कालं करिष्यति, कालं कृत्वा ब्रह्मलोककल्पे देवत्वेनोत्पत्स्यते, तत्र च दश सागरोपमाणि देवभवप्रत्ययं सुखमनुभूय स्वायुष्कक्षयेण च्युतो महाविदेहे समुत्पत्स्यते, गर्भस्थे च तस्मिन् पित्रोर्धर्मे दृढा प्रतिज्ञेतिकृत्वा निर्वर्त्तितेषु जातकर्मव्यवहारेषु संप्राप्ते ॥ ३१ ॥ द्वादशे दिवसे स्ववंशज्येष्ठा यथार्थं दृढप्रतिज्ञ इति नाम करिष्यन्ति, ततश्च शुक्लपक्षक्षपाकर इव प्रतिदिवसं प्रव-

र्द्धमानो यावत्सातिरेकाष्टवर्षो भविष्यति तावत्प्रशस्तेषु तिथिकरणयोगनक्षत्रदिवसमुहूर्त्तेषु कलाचार्यस्य तत्पितरस्त-मुपनेष्यंति, सोऽप्यचिरेणैव कालेन सकलकलाकलापकुशलः संपत्स्यते, केवलं नवयौवने वर्त्तमानोऽपि समस्तभोगाङ्ग प्राप्तावपि सांसारिकसुखस्य निःस्पृहो भविष्यति, अन्यदा तथाविधाचार्यसमीपे समाकर्ण्य धर्मदेशनां विज्ञाय संसा-रासारस्वभावतां परिभाव्यैकान्तिकात्यन्तिकपरमसुखरूपतामपवर्गस्य निर्विण्णो जातिजरामरणादिप्रवर्त्तनायास्त-दुच्छेददक्षां सर्वसावद्यनिवृत्तिरूपां भगवदर्हदुपदिष्टां दीक्षां महाविभूत्या प्रपत्स्यते, ततश्चाशेषातिचाररहितां काश्चित्कालं परिपाल्योत्तरोत्तरपरिणामविशुद्धिवशात्समारुह्य क्षपकश्रेणीं विधाय घातिकर्मक्षयमुत्पाद्य सकललोकालो-कप्रकाशनप्रत्यलं केवलज्ञानमनेकभव्यलोकोपकारं कुर्वाणो विहृत्य बहूनि वर्षाणि केवलिपर्यायेण संलिख्य मासि कसंलेखनयाऽऽत्मानं षष्टिं भक्तान्यनशनेनावच्छिद्यान्तर्मुहूर्त्तावशेषायुष्कोऽनुभूय पञ्चह्रस्वाक्षरोच्चारणतुल्यकालां योगनिरोधावस्थां परित्यज्य भवोपग्राहिकर्मचतुष्केण सह शरीरमविग्रहगत्या समयेनैकेन सेत्स्यति ॥ व्याख्यातं षष्ठ द्वारेण सोदाहरणेन मिथ्यात्वम्, अधुना सप्तमेनातिचारद्वारेणाभिधीयते—

अइयरणं जहजायं सिवमुग्गलमाइ दीवबंभेसु ।
परिवडियविहंगाणं संकियमाईहिं सुत्तेहिं ॥ ९ ॥

अतिचरणं नामातिचारः—शङ्काकाङ्क्षाविचिकित्सादिरूपः, नतु सर्वथा मिथ्यात्वपरित्यागरूपः, तथारूपत्वे भङ्गादविशेषप्राप्तेः, तद् यथा जातं—यथा सम्पन्नं मिथ्यात्वस्य तथा कथ्यत इति शेषः, केषां मिथ्यात्वातिचरणं जातमित्याह—' सिवमोग्गलमाइ'त्ति सूत्रत्वाल्लुप्तषष्ठीविभक्तिको निर्देशः, ततः शिवमुद्गलादीनामित्यर्थः, शिवो—राजर्षिः मुद्गलः—परिव्राजकः, सच स च तौ तावादी येषां ते तदादयस्तेषां, कीदृशानामित्याह—' प्रतिपतितविभङ्गानां ' विनष्टाज्ञानविशेषाणां, केषु विषये ? इत्याह—' दीवबंभेसु ' त्ति द्वीपब्रह्मसु विषये, द्वीपेत्यनेन सप्त द्वीपा व्याख्यानादवसेयाः, तदन्तर्गतत्वेन समुद्रा अपि सप्त लभ्यन्ते, ब्रह्मशब्देन च पञ्चमकल्पो ब्रह्मलोकाभिधोऽभिधीयते, तद्ग्रहणादनुक्ता अप्याद्याश्चत्वारो लभ्यन्ते, योजना तु यथासङ्ख्यं, तेनायमर्थः—सप्तद्वीपविषयप्रतिपतितविभङ्गस्य शिवराजर्षेः पञ्चकल्पविषयप्रतिपतितविभङ्गस्य मुद्गलपरिव्राजकस्य च मिथ्यात्वातिचरणं जातमिति संटङ्कः, कैः ? इत्याह—' संकियमाईहिं सुत्तेहिं ' ति, शङ्कितादिभिः सूत्रैरिति गाथाऽक्षरार्थः । भावार्थस्तु कथानकाभ्यामवसेयः, ते चेमे— ॥ ३४ ॥

अत्थि उत्तरुवरि निवसन्तगामपट्टणमडंबसंकिण्णो । किण्णरनरविज्जाहरपरियरियपएसरमणीओ ॥ १ ॥ रमणीयणमुहउवमिज्जमाणतामरसरुइरसरनियरो । सरनियरतीररेहिरकारण्डवहंसचक्कोहे ॥ २ ॥ कोहाइदोसवज्जियविहरंताणेयमुणिगणपवित्तो । वित्तोवहसियवेसमणनयरिरिद्धीगुणो देसो ॥ ३ ॥ (त्रिभिर्विशेषकम्) अविय–सिरिरिसिहनाहतणओ आसि पुरा तंमि कुरुनरिंदोत्ति । नामेण तस्स तो सो देसोऽवि कुरुत्ति विक्खाओ ॥ ४ ॥ अण्णं च–ठाणे२ दीसंति जत्थ नयराइं तह सराइं च । सवणाणि सकमलाणि य कुवलयआणंदजणगाइं ॥ ५ ॥ सग्गं व विविहमणहरमणेयसुरभवणपंतिरमणीयं । तत्थत्थि हत्थिणपुरं सईविलासेहि परियरियं ॥ ६ ॥ जं च–पडिहयपडिवक्खेहित्ति कलिकालपवेसवारणत्थं च । पुव्वनरिंदेहि कयं अलंघपायारपरिखित्तं ॥ ७ ॥ माणससरं व अइपउरवाणियं तह सरायहंसं च । सुतवस्सिमाणसं पिव नीसेसखमापहाणयरं । ८ ॥ अवि य दोसायरो ससंको सकलंको जत्थ केवलं चंदो । संतावयरो तिव्वो सहस्सरस्सी दुरालोओ ॥ ९ ॥ हंसगणो बिसभक्खी विहंगसत्थो विरूवसंजुत्तो । न उ तन्निवासिलोओ धम्माइतिवग्गसाररओ ॥ १० ॥ तत्थासि गरुयपडिवक्खकुंभिकुम्भयडविउडणमइंदो । इंदीवरदलनयणो नयणाणंदो य लोयाणं ॥ ११ ॥ आणामित्तव

नवपद- वृत्तिप्र. देव. वृ. यशो.



सीकयअणेयसामंतपणयपयकमलो । कमलानिलओ राया सिवोत्ति नामेण विक्खाओ ॥ १२ ॥ सीयव्व रामदइया गोरिव्व मणोहरा पिया तस्स । धारिणि नाम पसिद्धा सलक्खणा रामसेण व्व ॥ १३ ॥ लावण्णाइगुणेहिं तिजगप्पवरेहि जा विणिम्मविया । मयणस्स कए विहिणा भुवणत्तयजयपडायव्व ॥ १४ ॥ तीए सह तस्स सुकयाणुभावनिव्वत्तियं विसयसोक्खं । पंचविहमणुहवंतस्स कोइ कालो वइक्कंतो ॥ १५ ॥ अण्णया य–रयणीएँ चरिमजामे सुहसुत्ता धारिणी महादेवी । निययुच्छंगानिविट्ठं सीहं सुयणंमि सा नियइ ॥ १६ ॥ अविय–महुपिंगलकेसरभासुरयं, धवलत्तणनिज्जियहारसयं । सरयंबुधरं व साविज्जुलयं, पुलएइ मइंदयमेरिसयं ॥ १७ ॥ एत्थतरंमि–पाहाउयमंगलगेयसद्दसंवलियतूरनाएणं । पडिबुद्धा सा चिंतइ अदिट्ठपुव्वो इमो सुमिणो ॥ १८ ॥ दिट्ठो मएऽज्ज ताऽहं, गंतुं दइयस्स चेव साहेमि । इय चिंतिऊण कहिओ सुमिणो निवइस्स जह दिट्ठो ॥ १९ ॥ तेणावि सुमिणसत्थाणुसारओ भाविऊण भणियामिणं । सुंदरि ! तुह वरपुत्तो होही पडिवक्ख-गयसीहो ॥ २० ॥ तव्वयणायण्णणगुरुपमोयउब्भिन्नबहुलरोमंचा । देवी जाया नवपाउसंमि अंकुरियपुहइव्व ॥ २१ ॥ तओ–तइयच्चिय तीसे पुव्वसुकयसेसाणुभावओ जाओ । गब्भो सुहंसुहेणं परिवालइ साऽवि तं विहिणा ॥ २२ ॥

मिथ्यात्वातिचारे शिवार्षिज्ञातं

परिपूरिज्जंतमणोऽणुकूलदोहलयसुत्थिया सा य। अह अन्नया पसूया पुत्तं सुरकुमरसंकासं ॥ २३ ॥ वद्धाविओ य राया चेडीए पियंवयाभिहाणाए। दिण्णं च पारिओसियमंगविलग्गाभरणगाई ॥ २४ ॥ आढत्तं महावद्धावणयं, जं च केरिसं ? हियंतपुन्नवत्तयं विसंतअक्खवत्तयं पढंतभट्टचट्टयं विइण्णअस्सघट्टयं। मिलंतपउरवंदिणं लसंतकामिणीयणं विमुक्कगोत्तवंदयं रसंततूरसद्दयं ॥ २५ ॥ पयट्टलोयमाणयं निरंतरायदाणयं, निबद्धह-ट्टसोहयं जणोहचित्तमोहयं। वहंततेल्लवाहयं सरंतकुंकुमोहयं, तंबोलफुल्लसारयं वियट्टचित्तहारयं ॥ २६ ॥ अविय-गहिरवज्जंतपटुपडहघणमद्दलं, घुसिणछट्टणयमंडवयकयवद्दलं। तरुणरमणीहिं गिज्जंतबहुमंगलं, अत्थिदिज्जं-तकडओहधणसंकलं ॥ २७ ॥ हरिसवसवित्तसनच्चंततरुणीयणं, जयजयारावसंरुद्धनहयंगणं। सयलपुरलोयआ-णंदनच्चावणं, जायमेवंविहं तत्थ वद्धावणं ॥ २८ ॥ वत्ते वद्धावणए कएसु सयलेसु जायकम्मेसु। सिवभद्दोत्ति कुमारस्स नियसमए कयं नामं ॥ २९ ॥ देहोवचएणं तह कलाकलावेण वड्ढमाणो य। सयलजणसलाहणिज्जं संपत्तो जुव्वणं कुमरो ॥ ३० ॥ जो य—मयरद्धयब्भमाउव्व मयणसरसल्लविहुरदेहाहिं। अच्चिज्जइ नयरविलासिणीहिं नयणुप्पलदलेहिं ॥ ३१ ॥ अण्णया—रयणीय चरिमजामे सुत्तविउद्धस्स सिवनरिंदस्स। जाया मणंमि चिन्ता, रज्जधुरं

चिंतयंतस्स ॥ ३२ ॥ सव्वोऽवि जणो पावइ सुक्खं दुक्खं च एत्थ जम्मंमि । पुव्वकयकम्मपरिणइवसेण निक्कारणं न उणं ॥ ३३ ॥ ता अत्थि मएऽवि कयं पुन्निं कम्मं विसिट्ठसुहहेऊ । रज्जंतेउररट्ठाइएहिं वड्ढामि जेणाहं ॥ ३४ ॥ लोयपसिद्धो य इमो ववहारो जं विढप्पइ किलेऽज्ज । तं भुज्जइ अण्णदिणे एवं जम्मंतरेऽवि फुडं ॥ ३५ ॥ तहा—अइवड्ढिओवि रासी निच्चुवभोगेण अणुवचीयंतो । खिज्जइ जणस्स अइरा एवं पुण्णेऽवि णायव्वं ॥ ३६ ॥ ता जाव न गलइ मई, चलइ न दिट्ठी सुई न पम्हुसइ । सामंतमंतिमाईजणोऽवि आणं न लंघेइ ॥ ३७ ॥ पुव्वकयसुकय-सेसाणुभावओ ताव तस्स वुड्ढि कए । मज्झवि जुत्तं काउं परलोयहियं किमवि कज्जं ॥ ३८ ॥ तं च इमं—आपुच्छिऊण लोयं रज्जे संठाविऊण सिवभद्दं । विहरामि दिसापुंछियतावसदिक्खं गहेऊणं ॥ ३९ ॥ एत्थंतरंमि पढियं बंदिणा काल-निवेयणत्थं—उदयायलमारोहइ सूरो तह देव ! विविहकज्जेसु । किं किं सिद्धं किं व न सिद्धमिति जोयणत्थंव ॥ ४० ॥ आयण्णिऊण एयं, सयणीयाओ समुट्ठिऊण तओ । कयसयलगोसकिच्चो अत्थाणभुवं समणुपत्तो ॥ ४१ ॥ तत्थ य आहूय असेसमिलियसामंतमंतिमाईणं । भणइ नियाभिप्पायं पायं सीहासणनिविट्ठो ॥ ४२ ॥ बहुमन्निओ य तेहिं तयभिप्पाओ। तओ पुणो आह । जइ एवं ता सिग्घं दिज्जउ रज्जं कुमारस्स ॥ ४३ ॥ एत्थंतरंमि पत्तो

पडिहारनिवेइओ निवसयासे । सिद्धवई नामेणं जोइसिओ सत्थनिम्माओ ॥ ४४ ॥ आसीसदाणपुव्वं भणियमिमेणं-अज्ज तिही सुपसत्था वारो सारो वरं च नक्खत्तं। जोगेसु सिद्धजोगो नरिंद ! करणं च सुइकरणं॥ ४५ ॥ मंगलकज्जेसु दिणं सुपसत्थं मंगलाण आवासं । ता कुणसु समीहियकज्जमज्जणमणवज्जगुणसज्ज ! ॥ ४६॥ सिद्धवइवयणमायण्णि-ऊण राया मणंमि चिंतेइ । अणुकूलदेवजोगे नराण तं किं न जं घडइ ? ॥ ४७ ॥ जइ फुडइ अंबरं दलइ मेइणी चलइ ठाणओ जलही। तहवि हु सिज्झइ कज्जं मणिच्छियं पुण्णवंताणं ॥ ४८ ॥ अण्णह—कत्थ मई मह एसा कहिं च सामंतलोयबहुमाणो। सिद्धवइआगमो कत्थ कत्थ सुपसत्थदिणजोगो ॥ ४९ ॥ इय चिंतिऊण रन्ना सामंताईण जोइयं वयणं । तेहिंवि भणियं कुमरो बहिप्पउ देव ! जइ एवं ॥ ५० ॥ तो रन्ना पडिहारो आइट्ठो सोऽवि तं समाहूय । सिग्घं चिय संपत्तो अत्थाणभुवं कुमारो य ॥ ५१ ॥ जणयाइयाण तेसिं जहोचियं विहिय विणयपडिवत्ती । नरवइणा आइट्ठे उवविट्ठो आसणे पवरे ॥ ५२ ॥ तओ भणियं मंतिणा—परलोयहियं काउं, समुज्जओ एस वच्छ ! तुह जणओ । निव्विण्णकामभोगो तइ रज्जभरं निवेसेउं ॥ ५३ ॥ ता वच्छ ! तए इण्हिं अप्पा तह कहवि संठवेयव्वो । जह पवरपत्तभूओ रज्जसिरीए हवइ ठाणं ॥ ५४ ॥ जओ भणियं—" नोद-

न्वानर्थितामेति, न चाम्भोभिर्न पूर्यते । आत्मा तु पात्रतां नेयः, पात्रमायान्ति सम्पदः ॥ ५५ ॥" इय एवमाइ बहुयं सिक्खविऊणं ठियंमि मंतिंमि । नेमित्तिएण भणियं आसन्नं वट्टए लग्गं ॥ ५६ ॥ तो रन्ना कारविया सिग्घं रज्जाहिसेयसामग्गी । पत्तंमि लग्गसमए उच्छलिए तूरनिग्घोसे ॥ ५७ ॥ जयजयरवसंवलिए मंगलसद्दे पवित्थरंतम्मि । गुरुविच्छड्डेण कओ रज्जभिसेओ कुमारस्स ॥ ५८ ॥ कइहिवि दियहेहि तओ तणयं आपुच्छिऊण सुहदिवसे । रायावि दिसापुंखियतावसदिक्खं अह पवण्णो ॥ ५९ ॥ तो दिक्खासमए च्चिय गहिओ गुरुओ अभिग्गहो तेणं । मज्झं जावज्जीवं छट्ठंछट्ठेण पारणयं ॥ ६० ॥ उववासदिणे आयावणा य तह उड्ढबाहुणा निच्चं । सूराभिमुहेण मए कायव्वा पारणदिणे य ॥ ६१ ॥ कंदफलमूलमाई पुव्वाइदिसा कमेण गहियव्वं । एवमभिग्गहिओ सो पढमछट्ठस्स पारणए ॥ ६२ ॥ आयावणभूमीओ पच्चोरुहिऊण आगओ उडयं । कंदाइआणणत्थं किढिणस्संकाइउं गहिउं ॥ ६३ ॥ गंगानईएँ वच्चइ तत्थ य ण्हाणाइयं करेऊण । कुसजलकलसविहत्थो पुव्वदिसिं पसरिओ भणइ ॥ ६४ ॥ इह सोममहाराया सिवरायरिसिं सुधम्ममग्गठियं । अभिरक्खउ अणुजाणउ य कंदफलमूलसमिहाइ ॥ ६५ ॥ एवं भणिऊण तओ जलेण अब्भोक्खिऊण तिक्खुत्तो । कंदफलमूलमाईण

किढिणसंकाइगं भरिउं ॥ ६६ ॥ सामिहाओ य गहेउं पुणोवि उडयंमि आगओ खिप्पं । मोत्तूण तयं गिण्हइ अगणिं तो पाडए अग्गिं ॥ ६७ ॥ समिहमहुसप्पिणीवारगाइहोमं सवित्थरं काउं । निव्वत्तियवइसबली फलाइ आहारए पच्छा ॥ ६८ ॥ बीयंपि छट्ठखमणं तहेव आढवइ किं तु पारणए । दक्खिणादिसाइ गंतुं अणुजाणावेइ जमरायं ॥ ६९ ॥ तइयंमि पच्छिमाए वरुणं तुरियंमि उत्तरादिसाए । अणुजाणावइ धणयं एवं दिसचक्कवालेणं ॥ ७० ॥ छट्ठाओ छट्ठाओ से पारंतस्स कइहिवि दिणेहिं । तयवरणखओवसमओ विभंगनाणं समुप्पण्णं ॥ ७१ ॥ पासइ य सत्त दीवे सत्त समुद्दे य एत्थ लोयंमि । तेण परं वोच्छिण्णे मन्नइ दीवे समुद्दे य ॥ ७२ ॥ तो चिंतइ किं इमिणा उप्पण्णेणावि मज्झ नाणेणं ? । हत्थिणपुरंमि गंतुं जं न पयासेमि लोयस्स ॥ ७३ ॥ जओ भणियं–किं ताए सिरीए पीवराए ? जा होइ अन्नदेसंमि । जा य न मित्तेहि समं जं च अमित्ता न पेच्छंति ॥ ७४ ॥ ( ग्रन्थाग्रम् १००० । ) इय चिंतिऊण वच्चइ तत्तो हत्थिणपुरंमि नयरंमि । आइक्खइ लोयाणं दीवसमुद्दाण परिमाणं ॥ ७५ ॥ तइया य तंमि नयरे गामागरनगरपट्टणाए(ई)सु । विहरंतो संपत्तो सामी सिरिवद्धमाणजिणो ॥ ७६ ॥ जो य–सुराविसरपणयपाओ, निग्घाइयघाइकम्मसंघाओ । केवलनाणसहाओ वसीकयासेसगुणजाओ ॥ ७७ ॥ सहसंबवणुज्जाणे समोसढो गोयमाइ-

समणजुओ । नयरजणो य समग्गो समागओ वंदणनिमित्तं ॥ ७८ ॥ धम्मसवणत्थियाए सदेवमणुयासुराए परिसाए । एत्थंतरंमि भयवं ! धम्मं कहिउं समाढत्तो ॥ ७९ ॥ भो भो देवाणुपिया ! सव्वे सुक्खत्थिणो जणा एत्थं । तं पुण न अत्थि कत्थवि धम्मविहूणाण जंतूणं ॥ ८० ॥ नारयतिरियनरामरभेएण चउव्विहावि जेण जिया । दुक्खोवद्दुयदेहा सुकयविहूणा परियडंति ॥ ८१ ॥ तथाहि—अणवरयं पच्चंता तत्तकवल्लीसु तिव्वदुक्खत्ता । किं पाउणंति सत्ता सोक्खं नरयंमि संपत्ता ? ॥ ८२ ॥ तिरियावि छुहपिवासादहणंकणताडणाइदुहत्तासा । सुहिणो कत्थ हयासा अइभारारोवघणसासा ? ॥ ८३ ॥ जरमरणरोगानिट्ठप्पओगसोगाइदुक्खतविएहिं । मणुएहिवि सुहवत्ता दूरंदूरेण परिचत्ता ॥ ८४ ॥ ईसाविसायवय(चव)णाइमाणसुमहिड्डिवइरिविहियाणं । देवा णवि देवलोए दुक्खाणवि पाविआ अंतं ॥ ८५ ॥ ता भो महाणुभावा ! जइ सच्चं चिय सुहत्थिणो तुब्भे । ता सेविऊण धम्मं अइरा दुक्खक्खयं कुणह ॥ ८६ ॥ जओ—जो दुग्गइगमणाओ निवारओ धारओ य सुहठाणे । सो धम्मो नाणदंसणचरणआराहणारूवो ॥ ८७ ॥ दंसणनाणचरित्ते सुपवित्ते सयलदोसपरिचत्ते । भावेण जे निसेविंति जंति ते झत्ति परमपयं ॥ ८८ ॥ जत्थ न जरा न मच्चू न वाहिणो नेय परिभवो न भयं । तं भण्णइ परमपयं सासयसोक्खं

निराबाहं ॥ ८९ ॥ इय एवमाइधम्मं सोऊणं केऽवि भवविरत्तमणा । सव्वविरई पवन्ना अण्णे उण देसविरयंति ॥ ९० ॥ तइया य छट्ठखमणाउ पारणट्ठाएँ निग्गओ भिक्खं । नयरंमि परियडंतो गोयमसामी सुणइ वत्तं ॥ ९१ ॥ सिवरायरिसी एवं अइसयणाणेण पासिउं भणइ । अस्सिं लोए दीवा सत्त समुद्दा य सत्तेव ॥ ९२ ॥ तेण परं वोच्छिण्णा न संति दीवा व सागरा वावि । एवं सोउं गोयमसामी संकाउरो जाओ ॥ ९३ ॥ तो गहिय-भत्तपाणो आगंतूणं विहीएँ भुंजित्ता । परिसाए मज्झगयं सामिं विणओणओ भणइ ॥ ९४ ॥ जण्णं सिवरायरिसी दीवसमुद्दाण संखविसयंमि । लोयस्स पुरो जंपइ तं सच्चं अहव मिच्छन्ति ॥ ९५ ॥ सविसेसं उववुत्ता जाया एत्थं-तरंमि सा परिसा । चिंतइ य सुट्ठु पुट्ठं अम्हवि चित्तट्ठियं एयं ॥ ९६ ॥ एवं पुट्ठो सामी पभणइ गंभीरमहुरवायाए । सिव-रायरिसी गोयम ! विभंगनाणी भणइ मिच्छा ॥ ९७ ॥ जंबुद्दीवाइया दीवा लवणाइया समुद्दा य । होंति असंखा जम्हा दुगुणा दुगुणा । तिरियलोए ॥ ९८ ॥ तं सोउं परिसाए सिवरायरिसिस्स साहियं सव्वं । सोवि तहा कुणइ तहिं संकं कंखं विगिच्छं च ॥ ९९ ॥ मिच्छत्तस्सऽइयारे, वट्टंतस्स य विभंगणाणं तं । परिवडियं नवि पेच्छइ किंचित्ति दिट्ठि-प्पहाईयं ॥ १०० ॥ तो चिंतिउं पयत्तो पुव्वमहं सव्वमेव पासंतो । इण्हिं किंपि न पासामि कारणं किंचि ता होज्जा

॥ १०१ ॥ अहवा अइसयनाणिं, तमेव गंतूण वंदिऊण तहा। पुच्छामि सव्वमेयं इय चिंतिय जाइ जिणपासं ॥१०२॥ वंदित्ता आपुच्छइ जं जं सामीवि कहइ सेसं तं। तो पडिबुद्धो चिंतइ सव्वन्न णिच्छएणेसो ॥१०३॥ इय चिंतिऊण विणयावबद्धसीसंजली भणइ णाह!। काउं महापसायं नियादिक्खं मज्झ वियरेसु ॥ १०४ ॥ अण्णाणपासएणं छलिओऽहं णाह! एत्तियं कालं। तेण न नाओ तं सामि! सयलतेलोक्कपयडोऽवि ॥ १०५ ॥ इय एवं पभणेंतो स दिक्खिओ सामिणा नियकरेण। सिक्खाविओ य समयं सामायारिं च साहूणं ॥ १०६ ॥ अप्पेणवि कालेणं सुत्तत्थविसारओ य संपन्नो। परिपालिऊण बहवे वरिसे छउमत्थपरियायं ॥ १०७ ॥ अंतंमि खवगसेढिं आरुहिऊणं विसुद्धझाणेणं। णिद्दड्ढघायकम्मो उप्पाडइ केवलं नाणं ॥ १०८ ॥ केवलिपरियाएणवि कित्तियकालं इहऽच्छिउं पच्छा। सेलेसिं पडिवज्जिय सिद्धो नीसेसहयकम्मो ॥ १०९ ॥ एवं सुपसत्थमिणं सिवरायरिसिस्स साहियं चरियं। वित्थरओ जह दिट्ठं भगवइइक्कारससयंमि ॥ ११० ॥ एयाणुसारउच्चिय पायं मोग्गलकहावि दट्ठव्वा। किं तु विभंगो से उड्ढलोयविसओ समुप्पण्णो ॥ १११ ॥ अरिंत लोए उड्ढं सुरा य कप्पा य बंभलोयंता। तेण परं वोच्छिन्ने मन्नइ देवे य कप्पे य ॥ ११२ ॥ सेसं इहंपि तंचेव जाव पुच्छेइ गोयमो वीरं। सामीवि भणइ गोयम! देवा सव्वट्ठ-

सिद्धंता ॥ ११३ ॥ जम्हा सोहम्माई कप्पा उड्ढं दुवालस हवंति । तत्तो नव गेवेज्जा तदुवरि पंचुत्तरा पंच ॥ ११४ ॥ सेसं तहेव मोग्गलमुणीवि जावुत्तमं पयं पत्तो । संजायकेवलो सव्वकम्मविगमं करेऊणं ॥ ११५ ॥ मोग्गलरिसिस्स चरियं एवं संखेवओ समक्खायं । वित्थरओ विण्णेयं विवाहपन्नत्तिअंगाओ ॥ ११६ ॥ सुयएविपसाएणं सत्तममइयार-दारमक्खायं । भंगद्दारं एत्तो कमपत्तं तं निसामेह ॥ ११७ ॥

छट्ठेणं अ यावण विभंगनाणेण जीवजाणणया ।
ओही केवलनाणं, तो भंगो होइ मिच्छस्स ॥ १० ॥

' षष्ठेन ' उपवासद्वयलक्षणेन, अष्टमाद्युपलक्षणं चैतत्, तेन तपस्यत इति गम्यते, ' आयावण ' त्ति आतापनां–सूर्याभिमुखोर्ध्वबाहुस्थानावस्थानलक्षणां, कुर्वत इत्यध्याहारः, ' विहंगनाणेण ' त्ति विभङ्गो–मिथ्यात्वकलङ्कितो विपरीतो बोधः अवध्यज्ञानं, यतः–" सदसदविसेसणाओ भवहेउजहिच्छिओवलंभाओ । नाणफलाभावाओ मिच्छद्दिट्ठिस्स अन्नाणं ॥ १ ॥ " तेन कस्यापि ' जीवजाणणय ' त्ति जीवज्ञानं–प्राण्यवबोधनमुत्पन्नमिति गम्यते, ततः ' ओहि ' त्ति अवधिः–तदावरणीयकर्मक्षयोपशमेन रूपिद्रव्यविषयः सम्यग्बोधः संजायते, ' केवलणाणं '

ति केवलज्ञानं—घातिकर्मक्षयेण लोकालोकाविर्भावकं संपूर्णज्ञानं, तच्च भवतीति शेषः, एवं कदाचित् क्रमेण ' भङ्गः ' विनाशः ' भवति ' जायते मिथ्यात्वस्येति । ननु विभङ्गेन जीवान् जानतः कथमवधिर्भवति, ? अवधिविभङ्गयोर्ज्ञानाज्ञानरूपयोः परस्परपरिहारस्थितत्वात् ?, सत्यं, परिणामविशेषात्, यथा मिथ्यात्वोदयवत्त्यपि सम्यक्त्वं याति तथेहापीत्यदोषः, उक्तञ्च—" मिच्छाओ संकंती अविरुद्धा होइ सम्ममीसेसु । मीसाओ वा दोसुं सम्मा मिच्छं न उण मीसं ॥ १ ॥ " विभङ्गज्ञानी चावधिज्ञानी भवन्मतिश्रुतावधिसम्यक्त्वानि युगपल्लभते, यत उक्तम्—" विब्भंगाओ परिणमं सम्मत्तं लहइ मइसुओहीणि । तयभावंमि मइसुयं सुयलंभं केइ उभयंति ॥ १ ॥ " इति गाथाऽक्षरार्थः ॥ भावार्थस्तु दृष्टान्तबलेनावसेयः, स चायम्—

आसीद्बालतपस्वी शिवशर्म तपोधनो धननिरीहः । षष्ठाष्टमदशमादिषु तपोविशेषेषु बद्धरतिः ॥ १ ॥ तस्यान्यदोर्ध्वबाहोरातापनया स्थितस्य रविदृष्टेः । कर्मक्षयोपशमतो विभङ्गबोधः समुदपादि ॥ २ ॥ संक्लिश्यमानसुविशुद्ध्यमानजीवांश्च तेन विज्ञाय । उत्पादगमननित्यत्वयोगिनो जीवभावांश्च ॥ ३ ॥ चिन्तयितुमेष लग्नो रागद्वेषादिवशगता जीवाः । विपरीतबोधवन्तः संक्लिश्यन्तेऽत्र संसारे ॥ ४ ॥ रागादितिमिरनिकरं विवेकदीपेन ये तिरस्कृत्य ।

सद्दृष्टितत्त्ववेश्मानि विशन्ति ते झगिति शुद्धयन्ति ॥५॥ एवं च तस्य मार्गानुसारिचिन्ताक्रमेण संजाता । अवधिज्ञानप्राप्तिः सम्यक्त्वमतिश्रुतैः साकम् ॥ ६ ॥ उपपत्तिक्षममेतत्, येन जिनभद्रगणिभिरप्युक्तम् । " अणभिनिवेसा हु कयाइ होइ सम्मत्तहेऊवि " ॥ ७ ॥ तदनु शुभाध्यवसायस्य–निहतघनघातिकर्मनिचयस्य । अक्षयमनन्तमनुपममुत्पन्नं केवलज्ञानम् ॥ ८ ॥ एवं कादाचित्कक्रमेण कस्यापि सर्वथा भवति । मिथ्यात्वस्य विनाशः पुनरुत्पत्तेरभावेन ॥ ९ ॥ एवं भङ्गद्वारं श्रुतदेव्यनुभावतः समाख्यातम् । क्रमसंप्राप्तं वक्ष्ये, नवममितो भावनाद्वारम् ॥ १० ॥

**भावण जह तामलिणा इड्ढीविसया पुणो अणसणं च ।**
**पुणरवि खोहणकाले, लहुकम्माणं इमा मेरा ॥ ११ ॥**

भाव्यत इति भावना अनित्यत्वादिरूपा 'यथा' येन प्रकारेण 'तामलिना' तामलिश्रेष्ठिना गृहावस्थितेन भावितेति शेषः, ह्रस्वत्वं च भावनाशब्दस्य प्राकृतत्वात्, किंविषया ? इत्याह–'ऋद्धिविषया' ऋद्धिः सम्पत् सा विषयो यस्याः सा तथा, कथं भाविता ?, यथोक्तं केनचित्–" उद्भूताः प्रथयन्ति मोहमसमं नाशे महान्तं नृणां, सन्तापं जनयन्त्युपार्जनविधौ क्लेशं प्रयच्छन्ति च । एता नीलपयोदगर्भवि-

लसद्विद्युल्लताचञ्चलाः, काले कुत्र भवन्ति हन्त ! कथय क्षेमावहाः सम्पदः ? ॥ १ ॥ " 'पुनरनशनं चे' ति कर्तुकामेनेत्यभ्याहाराद् यथा भावना भावितेति संटङ्कः, पुनःशब्दो विशेषणार्थः, शरीरादिविषयेति विशिनष्टि, सा चैवम्—" अनुसमयमरणशरणो विविधाऽऽधिव्याधिबाधया व्यथितः । मलमूत्ररुधिरवसतिः कस्य न वैराग्यकृद्देहः ? ॥ १ ॥ " व्यासेनाप्युक्तम्—" यदि नामास्य कायस्य, यदन्तस्तद् बहिर्भवेत् । दण्डमादाय लोकोऽयं, शुनः काकांश्च वारयेत् ॥ १ ॥ " अत एव कैश्चिदुपदिष्टम्—" यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा, यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः । आत्मश्रेयसि तावदेव वपुषा कार्यः प्रयत्नो महान्, आदीप्ते भुवने तु कूपखननं प्रत्युद्यमः कीदृशः ? ॥ १ ॥ " 'पुनरपि क्षोभणकाले' इति अपिश्चार्थस्तस्य व्यवहितप्रयोगात् न केवलमनशनकाले क्षोभणकाले च—अनशनप्रतिपत्तिसमयसमायातबल्यसुरकुमारारब्धध्यानच्यावनसमये च पुनः—भूयो यथा भावना भाविततेति पूर्वपदानुवृत्तेर्योजना, यत्तदोर्नित्यसम्बन्धात् तथा, किं ?—भावयितव्येत्याहृतपदेन संटङ्कः, कुत एवम् ? इति चेद् यतो लघुकर्म्मणामेषा मर्यादेति गाथाऽक्षरार्थः, ॥ मिथ्यात्वभावना तु मिथ्यादृष्टिस्वामिकत्वादिति भावनीयं, भावार्थः कथानकगम्यस्तच्चेदम्—

अत्थि इहेव जंबुद्दीवे दीवे भारहे वासे असेसदेसावयंसभूओ भूयप्पेयजक्खरक्खसाइदुट्ठोवद्दवराहिओ हियाहियत्थविसयविन्नाणाइसयसमिद्धासियविसिट्ठलोयाहिट्ठिओ वंगो नाम जणवओ, जो य वयणिवहनि-रंतरोऽवि अवओ, खयप्पहाणगामनगराइट्ठाणोऽवि अक्खयप्पहाणगामनगराइट्ठाणो रम्मयाए परिहवइ सुरलोयं, तत्थ य ठाणठाणनिरिक्खिज्जमाणजिणभवणभवणाइविचित्तचित्तमंडवोवविट्ठविलासिलोयसच्चविज्जंतसारनट्टगी-यवाइयाइविलासवित्थरा तामलित्ती नाम नयरी, जा य परिसक्कंतविलासिणिमाणिनेउररावमुह-रियदियंता नियविहववित्थरं साहइ व्व देसागयनराण, तत्थ य धणधन्नदुपयचउप्पयाइसमिद्धिसमद्धा-सिओ सियकिरणकरनियरसरिसपसरंतकित्तिसंभारभरियभुयणंतरो तरणि व्व नियबंधुकमलाणं चंदो व्व कामिणीन-यणकुमुयाणं इंदो व्व विबुहजणमणाणं परमाणंददायी तामली नाम मोरियवंससंभवो गाहावई होत्था, जो य चंदो सूरो इंदो पुण्णयणपहू विहस्सई व भाइ सोमत्ततेयईसरियदाणमइपयरिसगुणेहिं, अण्णया य तस्स सुहसेज्जाए ठियस्स रयणीए पच्छिमजामे कुडुम्बजागरियं जागरमाणस्स एवं चिंता समुप्पण्णा, जहा—पुव्वोवज्जियसुक-यसंभारवसओ अत्थि मज्झ पुरिसपरंपरागयं अपरिमियं दविणजायं समं समसुहदुक्खसहपंसुकीलियवयंसेहिं

धणधन्नदुपयचउप्पयाइसामग्गी य सह विणीयपुत्तनत्तुयाइपरियणेण, पुव्वोवज्जियसुकयफलं च सव्वमेयं, यत उक्तम्—"धर्माज्जन्म कुले कलङ्कविकले जातिः सुधर्मोत्परा, धर्मादायुरखण्डितं गुरु बलं धर्माच्च नीरोगता। धर्माद्वित्तमनिन्दितं निरुपमा भोगाश्च धर्मात्सदा, धर्मादेव च देहिनां प्रभवतः स्वर्गापवर्गावपि ॥ १ ॥" अत एव व्यासेनैवमुपदिष्टम्—"कामार्थौ लिप्समानस्तु, धर्ममेवादितश्चरेत । न हि धर्मादृतेत्किञ्चिद्दुष्प्रापमिति मे मतिः ॥ १ ॥" इति । ता इयाणिंपि सुकओवचयं करेमि जेण परलोएवि सुही भवामित्ति चिंतिऊण पहायप्पायाए रयणीए समुट्ठिओ सयणीयाओ कयं गोसकरणिज्जं, हक्काराविओ सयणमित्ताइवग्गो साहिओ तप्पुरओ नियाहिप्पाओ अणुण्णाओ य तेण, कुडुंबभारं निक्खिविऊण जेट्ठपुत्ते दिंतो दीणाणाहाईण दाणं मन्नाविंतो माणणिज्जवग्गं संभासिंतो-सयणमित्तादि दिट्ठाभट्ठे पुव्वपरिचिए लोए, जे इमे गंगाकूलवत्थव्वा वाणप्पत्थतावसा, तेसिं अंतिए पाणा[या]मपव्वज्जाए पव्वइओ, तक्खणं च गहिओ तेण अभिग्गहो जहा—अज्जप्पभिइ चेव जावजीवं छट्ठेणं पारेयव्वं, तवोदिणे य आयावणभूमीए सूराभिमुहेण उड्ढबाहुणा आयावियव्वं, पारणगंमि तामलित्तीए नयरीए उच्चनीयमज्झिमकुलेहिंतो सुद्धोदणं पडिगाहिऊण जलथलणहयराण जंतूण एक्केक्क भागं दाऊण चउत्थभागावसेसं एक्कवीसं एक्कवीसं वेलाओ पाणिए

पक्खालिऊण भोत्तव्वं, एवंविहाभिग्गहेण य वट्टमाणस्स वोलीणा तस्स सट्ठिवाससहस्सा, तओ चिंतियमिमेण— " सट्ठिं वाससहस्सा, तवं चरंतस्स मज्झऽइक्कंता । सुसियप्पायं जायं, तयट्ठिसेसं सरीरंपि ॥ १ ॥ ता जावऽज्जऽवि न पडइ, परिपक्कफल व कत्थवि अनायं । एयमिह ताव जुत्तं विहिमरणाराहणं इमिणा ॥ २ ॥ इच्चाइ चिंतयंतो गओ तामलित्तिं नयरिं, तत्थ आउच्छिऊण खामिऊणं च नियनाइवग्गं अन्नं च पुव्वसंथुयपच्छासंथुयपासंडगिहत्थाइलोयं जहागयं पडिगंतूण कयाणसणो विवित्ते तहाविहप्पएसे पडिवण्णो पाओवगमं । इओ यं—रयणप्पहापुढवीए जोयण-सहस्समेत्ताओ उवरिभागाओ अहो अहोलोयवत्तिभवणवासिदेवाणं असुरकुमाराण उत्तरदिसावत्थव्वाण अत्थि बलिचंचाभिहाणरायहाणी,—" जीए य फलिहभित्तंतराओ ' देवीओ ' पासिउं असुरा । उक्कंठाए आलिंगणुट्ठिया जंति वेलक्खं ॥ १ ॥ अविय—पसरंतविविहमणिकिरणनियरपरिभग्गातिमिरनिऊरुंबा । चंदाइच्चपयासं विणा विरायंति पयवीओ ( वीही ) ॥ २ ॥ अन्नं च—सच्छमणिभित्तिसंकंतानिययबिंबे कयन्नसंकाओ । कहकहवि संठविज्जंति जत्थ दइयाओ असुरेहिं ॥ ३ ॥ " तया य सा इंदविहूणा जाया, तओ तन्निवासिणो देवा देवीओ य अम्हं को सामी होहिच्चि चिंतयंता तं बालतवस्सिं तामलिं तहट्ठियं पेच्छिऊण आगया तस्स समीवे, तओ—वज्जंतमहुरमद्दलहुडुक्कढक्कासुसद्द-

मिथ्यात्वभावनायां तामलिदृष्टान्तः

संवलियं । नच्चंतअसुररमणीमणिनेउररावरेहिल्लं ॥ १ ॥ विविहरसभावसंगयदइच्चागिज्जंतगेयरमणिज्जं । तच्चित्तरंजणत्थं
आढत्तं तेहि पेच्छणयं ॥ २ ॥ सोऽवि चिंतेइ—गीयं पलावमेत्तं नट्टंपि विडंबणा विसं विसया । अन्नं किमेत्थ सारं ?
जंमि मणो मज्झ गच्छेज्जा ॥ ३ ॥ ते य पेक्खणयावसाणे विण्णविउं पयत्ता—अम्हे असुरकुमारा बलिचंचाराय-
हाणिवत्थव्वा । दिव्वेण कयाऽणाहा, तुम्ह सयासं समणुपत्ता ॥ ४ ॥ परकज्जरया तुब्भे, तुब्भे पणइयणवच्छल्ला
नाह ! । अस्सामियाण अम्हं ता तुब्भे सामिणो होह ॥ ५ ॥ काउं नियाणमेत्थं उप्पण्णा अम्ह सामिणो ताहे ।
माणह असुरिंदसिरिं अणुहवह जहिच्छियसुहाइं ॥ ६ ॥ नाणाविहकीलाहि य कीलह समयं दइच्चरमणीहिं । आणवह
असुरजोहे हिययाहिप्पेयकज्जेसु ॥ ७ ॥ एसा असुरवरिद्धी एए असुरा इमाओ असुरीओ । तुम्हायत्तं सव्वं होही समुइण्ण-
पुण्णवसा ॥ ८ ॥ एवमाइविन्नत्तिं तेसिं सुणिऊण चिंतियं—एयं खु जए पयडं, सुकयं दुक्कयं व एत्थ जम्मंमि ।
जं उवचिणेइ जीवो अणुहवइ तयं परभवम्मि ॥ ९ ॥ तथा चोक्तम्—"शुभाशुभानि कर्माणि, स्वयं कुर्वन्ति
देहिनः । स्वयमेवोपभुज्यन्ते, दुःखानि च सुखानि च ॥ १ ॥ सुखदुःखानां कर्त्ता हर्त्ताऽपि न कोऽपि कस्य-
चिज्जन्तोः । इति चिन्तय सद्बुद्ध्या पुराकृतं भुज्यते कर्म ॥ २ ॥" एवं च मएवि कयं, जं कम्मं किंपि तस्स ॥ ४३ ॥

सयमेव । होही फलं नियाणं निरत्थयं किं करेमि तओ ? ॥ १० ॥ किं च-विसयसुहोवदंसणेणं इमे मम उवलो-भिंति, तं च परमत्थओ सुहमेव न होइ, जओ भणियं–" दुक्खाभावो न सुहं न ताइ सोक्खाइ जाइं सोक्खाइं। मोत्तूणऽसुहाइ सुहाइं जाइं ताइं चिय सुहाइं ॥ १ ॥ " अविय विसाओऽवि दारुणविवागा विसया, कहमेएसु सोक्खबुद्धी जणस्स ?, तथा चोक्तम्–" विषस्य विषयाणां च, दूरमत्यन्तमन्तरम् । उपभुक्तं विषं हन्ति, विषयाः स्मरणादपि ॥ १ ॥ " एवमाइभावणानिविट्ठचित्तेणं च तेण ते अणाढाइज्जमाणा जहागयं पडिगया । सोऽवि अत्तणा सट्ठिदिणाइं अणसणं पालिऊण मओ संतो ईसाणे कप्पे ईसाणवडिंसए विमाणे ईसाणिंदत्ताए उववण्णो, जओ य अट्ठावीसलक्खसंखाण विमाणाणं असीइसहस्सपरिमाणाणं इंदसामाणियाणं तेत्तीसण्हं तायतीसगाणं चउण्हं लोगपा-लाणं अट्ठण्हं अग्गमहिसीणं अन्नेसिं च बहूणं वेमाणियाणं देवाणं देवीणं च सामी । इओ य–ते बलिचंचारा-यहाणिवत्थव्वा असुरकुमारा तं अकयनियाणं ईसाणिंदत्ताए उववण्णं जाणिऊण कोवाइट्ठा तमेव पएसमागंतूण तामलिसरीरं वामपाए सुंबेण बंधिऊण तामलित्तीए नयरीए मज्झंमज्झेणाकड्ढंति, उग्घोसेंति य–एस णं तामली बालतवस्सी सयंगहियलिंगे पावकम्मकारी मएवि सिरिहिरिपरिवज्जिए संपन्ने, ता मा कोई इमस्स नामग्गहणंपि

करेज्ज, एत्थंतरंमि य ईसाणिंदेण—को अहं कुओ वा केण वा सुकएणं एत्थुववण्णोत्ति, एमाइउवउत्तेण ओहिणा णाओ पुव्वभवो, दिट्ठा य ते तहा आघोसणापुव्वं नियसरीरं कड्ढोयड्ढिं कारिंता, तओ आसुरुत्तेण कूरदिट्ठीए निज्झाइऊण तेसिमुवरिं मुक्का तेउलेसा, तीए डज्झमाणा महावेयणत्ता किमेयमयंडे अम्ह आवडियंति चिंतंता ओहिणा ईसाणिंदं कुवियं पासित्ता पुणो २ खामिंति, अवि य—“उवसंहर उवसंहर, कोवं सामी ! य पसीय अम्हाणं । न पुणो अविणयमेवं काहामो एत्थ जीवंता ॥ १ ॥ एक्कं अवराहमिमं खमेसु पणइयणवच्छला जेण । हुंति इहं सप्पुरिसा दुहिए करुणापहाणा य ॥ २ ॥ एमाइ मन्नावंते य ते दट्ठुं ववगयकोवेण ईसाणिंदेण साहरिया तेउलेसा, गया निव्वेयणा ते सट्ठाणं, सोऽवि पयट्टो तक्कालोचिएसु मज्जणसिद्धाययणगमणपोत्थयवायणाइवावारेसु, तओ य सिद्धाययणदंसणुप्पन्नसम्मत्तपरिणामो देवभवाणुरूवाइं अणुहविऊण नाणाविहसुहाइं अप्पडिहयसासणो होऊण सामाणियाइदेववग्गेसु कीलिऊण जहिच्छमच्छरसाहिं समं विविहविणोएहिं पालिऊण दो सागरोवमाइं साहियं नियमाउयं ततो चुओ महाविदेहे सिज्झिही । सुयएविपसाएणं चरियं तामलिरिसिस्स कहियमिणं । संखेवेणं नेयं वित्थरओ भगवईए उ ॥ १ ॥ व्याख्यातं मिथ्यात्वभावनाद्वारं नवमं, तद्व्याख्यानाच्च समर्थितं

मिथ्यात्वद्वारम्, अधुना तदनन्तरोदितद्वितीयसम्यक्त्वद्वारस्यावसरः, तदपि यादृशादिभिर्नवभिर्भेदैर्व्याख्येयम्, अतो 'यथोद्देशं निर्देश' इति न्यायात्प्रथमद्वारेण तावदाह—

जियरागदोसमोहेहिं भासियं जमिह जिणवरिंदेहिं ।
तं चेव होइ तत्तं इय बुद्धी होइ सम्मत्तं ॥ १२ ॥

'जियरागदोसमोहेहिं'ति रज्यते—शुद्धस्फटिकनिर्मलोऽप्यात्मा अन्यथात्वमापाद्यतेऽनेनेति रागः—मायालोभकषायरूपः स च द्वेष्टि-तांस्तान् प्राणिनः प्रत्यप्रीतो भवत्यनेनेति द्वेषः—क्रोधमानकषायलक्षणः, तथा च वाचकमुख्यः—"मायालोभकषायावित्येतद्रागसञ्ज्ञितं द्वन्द्वम्। क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः ॥ १ ॥" स च मुह्यति—हेयोपादेयार्थेषु विचित्तो भवत्यनेनेति मोहः—अज्ञानं मोहयतीति वा मोहः—मोहनीयमेव मिथ्यात्वादिस्वभावं स च ते जिताः—पराभूता निर्मूलोच्छेदकरणेन, नतु सतामेव निष्प्रभत्वमात्रापादनेन, सर्वथा घातिकर्मविनाशेन केवलोत्पादे भगवतां देशनासम्भवात्, रागद्वेषमोहा यैस्ते तथा तैः जितरागद्वेषमोहैः 'भाषित' प्रतिपादितं 'यत्' जीवादि 'इह' जगति जयन्ति रागादीनिति जिनाः—छद्मस्थवीतरागास्तेषां वराः—सामान्यकेवलिनस्तेषा-

मिन्द्राः—चतुस्त्रिंशदतिशयैश्वर्यवन्तस्तीर्थकरास्ते जिनवरेन्द्रास्तैः, एतच्च विशेष्यपदं जितरागद्वेषमोहैरिति च विशेषण, अनेन च सम्यक्त्वलक्षणभणने हेतुः सूचितः, तथा चोक्तम्—" वीतरागा हि सर्वज्ञाः, मिथ्या न ब्रुवते वचः । तस्मात्तेषां वचः सत्यं, तथ्यं भूतार्थदर्शनम् ॥ १ ॥ " इति, ' तं चेव ' त्ति तच्छब्दो यच्छब्दापेक्षया 'चः' पूरणे ' एवः ' अवधारणे स च भिन्नक्रमः ततस्तदेव ' भवति ' जायते ' तत्त्वं ' परमार्थसत्, नान्यद्रागादिदोषोपहतकपिलादिप्रणीतं, रागादिदोषवत्त्वा च कपिलादीनामसद्भूतैकान्तनित्यादिभावदेशनागम्येति भावनीयं, ' इति ' एवंविधा ' बुद्धिः ' मतिः ' भवति ' जायते ' सम्यक्त्वं ' सम्यग्दर्शनमिति । ननु बुद्धिर्नाम मतिः, सा च ज्ञानमेव, सम्यक्त्वं तु तत्त्वश्रद्धानं, यदाह वाचकः—' तत्त्वार्थश्रद्धान सम्यग्दर्शन ( तत्त्वा १-२ ) मिति, ततो यज्ज्ञानं न तद्दर्शनमिति कथमेतत् ?, अत्रोच्यते, बुद्धिजन्या तत्त्वरुचिरपि बुद्धिशब्देन विवक्षिता, कार्ये कारणोपचारात्, नच कार्यकारणभावोऽप्यनयोर्नास्तीति वाच्यं, तथा च पूज्याः—'नाणमवायधिईओ दंसणमिठं जहोग्गहेहाओ ।तह तत्तरुई सम्मं रोइज्जइ जेण तं नाणं ॥ १ ॥' अथवा सरससुन्दर आनन्दहेतुरयं मोदक इत्यादि गुणदर्शिका मतिर्लोके रुचिः प्रतीता तद्विपरीता दोषग्राहिणी त्वरुचिः, तथेहापि लोकरूढया रुचिरूपैव बुद्धिर्विवक्षितेति न कश्चिद्दोष इति गाथार्थः ॥ १२ ॥

सम्यक्त्वे याद्दशद्वारगाथेयमुपवर्णिता यथाबोधमितरतस्या भेदद्वारं प्रपञ्च्यते—

एगविहदुविहतिविहं चउहा पंचविह दसविहं सम्मं ।
दव्वाइकारगाइयउवसमभेएहिं वा सम्मं ॥ १३॥

'एगविहदुविहतिविहं' ति, अत्र "नीया लोवमभूया य आणिया दीहबिंदुदुब्भावा" (नीता लोपं आनीताश्चाभूता दीर्घत्वबिन्दुद्विर्भावाः) इत्यादिलक्षणेनानुस्वारलोपे 'सम्मं' ति वक्ष्यमाणपदसम्बन्धेनैकविधं सम्यक्त्वमित्यादि योजनीयं, 'चउह' त्ति चतुर्धा--चतुर्भिः प्रकारैः सम्यक्त्वं भवतीति शेषः, 'पंचविह दसविहं' ति पूर्ववद्योजनीयं, तत्रैकविधं एकप्रकारमुपाधिभेदाविवक्षया निर्भेदमित्यर्थः, तद्यथा—तत्त्वार्थश्रद्धानं सम्यक्त्वमिति, उक्तं च—"त्रिकालविद्भिस्त्रिजगच्छरण्यैर्जीवादयो येऽभिहिताः पदार्थाः। श्रद्धानमेषां परया विशुद्ध्या, तद्दर्शनं सम्यगुदाहरन्ति ॥ १ ॥ त्रैकाल्यं द्रव्यषट्कं नवपदसहितं जीवषट्कायलेश्याः, पञ्चान्ये चास्तिकाया व्रतसमितिगतिज्ञानचारित्रभेदाः । इत्येते मोक्षमूलं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः, प्रत्येति श्रद्दधाति स्पृशति च मतिमान् यः स वै शुद्धदृष्टिः ॥ २ ॥" एतच्चानुक्तमप्य-

वसीयत इति सूत्रकृता न विवृतं, द्विविधादि तु न ज्ञायत इत्युल्लेखमाह–' दव्वा ' इत्यादि, यथाक्रममेत्र सम्बन्धः, तेन द्विविध द्रव्यादि, त्रिविधं कारकादि, चतुर्धा पञ्चविधं चोपशमभेदैः, कृतैकशेषद्वन्द्वपदत्वाच्चास्योभयत्र सम्बन्ध इति भावनीयं, दशविधं च वाशब्दसूचितनिसर्गादिभेदैः, तत्र द्विविधं ' दव्व ' त्ति सूचामात्रत्वाद् द्रव्यतो भावतश्च, द्रव्यतः शुद्धमिथ्यात्वपुञ्जवर्तिनः पुद्गला एव, भावतस्तदुपष्टम्भजनितो जीवस्य तत्त्वरुचिपरिणामः, आदिशब्दः प्रकारान्तैररपि द्विविधत्वदर्शनार्थः, तेन निश्चयव्यवहारनैसर्गिकाधिगमिकपौद्गलिकापौद्गलिकादिभेदतोऽपि द्विविधमिति, निश्चयव्यवहाररूप च–" जं मोणं तं सम्मं जं सम्मं तमिह होइ मोणं तु। निच्छयओ इयरस्स उ, सम्मं सम्मत्तहेऊवि ॥ १ ॥ इति गाथातो भावनीय, निसर्गः–स्वभावस्तस्मादुपदेशाद्यनपेक्षं यत्सम्यक्त्वं जायते तन्नैसर्गिकम्, आधिगमिकं तु परोपदेशापेक्षं, पौद्गलिकं क्षायोपशमिकभावभावि, क्षायिकमौपशमिकं चापौद्गलिकमिति । त्रिविधं सम्यक्त्वं ' कारग ' त्ति पूर्वोक्तहेतोः कारकरोचकव्यञ्जकभेदाद्, आदिशब्दात्क्षायोपशमिकादिभेदतो वेति, उक्तञ्च " सम्मत्तंपि य तिविहं खओवसमियं तहोवसमियं च । खइयं च कारगाई पण्णत्तं वीयरागेहिं ॥ १ ॥ " चतुर्धा सम्यक्त्वं, कैर्भेदैः ? इत्याह–' उवसमभेएहिं ' ति बहुवचनस्य गणार्थत्वादौपशमिकक्षायिकक्षायोपशमिकसास्वा-

दनभेदैः, पञ्चविधमप्येतैरेव वेदकसहितैः, पदघटनादि तु पूर्ववत्, दशविधं वाशब्दसूचितप्रज्ञापनोपाङ्गदृष्टभेदैः, तथा च तत्रोक्तम्—" निसग्गुवएसरुई आणरुई सुत्तबीयरुइमेव । अहिगमवित्थाररुई किरिया संखेवधम्मरुई ॥ १ ॥" कथं द्विविधादिभेदं सम्यक्त्वमित्याह—सम्यग्—अवैपरीत्येन आगमोक्तप्रकारेण, न तु स्वमतिपरिकल्पितभेदैः, कारकादिस्वरूपं च—जं जह भणियं तं तह करेइ सइ जम्मि कारगं तं तु। रोयगसम्मत्तं पुण रुइमित्तकरं मुणेयव्वं ॥ १ ॥ सयमिह मिच्छदिट्ठी धम्मकहाईहि दीवइ परस्स । सम्मत्तमिणं दीवग कारणफलभावओ नेयं ॥ २ ॥ मिच्छत्तं जमुइण्णं तं खीणं अणुइयं च उवसंतं । मीसीभावपरिणयं वेइज्जंतं खओवसमं ॥ ३ ॥ उवसामगसेढिगयस्स होइ उवसामियं तु सम्मत्तं । जो वा अकयतिपुंजो अखवियमिच्छो लहइ सम्मं ॥ ४ ॥ खीणे दंसणमोहे तिविहंमिवि भवनियाणभूतम्मि । निप्पच्चवायमउलं सम्मत्तं खाइयं होई ॥ ५ ॥ उवसमसम्मत्ताओ चयओ मिच्छं अपावमाणस्स । सासायण सम्मत्तं तयंतरालंमि छावलियं ॥ ६ ॥ बावीससंतमोहस्स सुद्धदलियक्खयंमि आढत्ते । जीवस्स चरिमपोग्गलअणुहवणे वेययं होइ ॥ ७ ॥ जो जिणदिट्ठे भावे चउव्विहे सद्दहाइ सयमेव । एमेव नन्नहाचि य निस्सग्गरुइत्ति नायव्वा ॥ ८ ॥ एए चेव उ भावे उवइट्ठे जो परेण सद्दहइ । छउमत्थेण जिणेण व उवएसरु-

इत्ति नायव्वो ॥ ९ ॥ रागो दोसो मोहो अन्नाणं जस्स अवगयं होइ । आणाए रोयंतो सो खलु आणारुई नाम ॥ १० ॥ जो सुत्तमहिज्जंतो सुएण ओगाहई उ सम्मत्तं । अंगेण बाहिरेण व सो सुत्तरुइत्ति नायव्वो ॥ ११ ॥ एगपएऽणेगाइं पयाइं जो पयरई उ सम्मत्ते । उदएव्व तेल्लबिंदू सो बीयरुइत्ति नायव्वो ॥ १२ ॥ सो होइ अभिगमरुई सुयनाणं जेण अत्थओ दिट्ठं । एक्कारस अंगाइं पइन्नगा दिट्ठिवाओ य ॥ १३ ॥ दव्वाण सव्वभावा सव्वपमाणेहि जस्स उवलद्धा । सव्वाहिं नयविहीहिं वित्थाररुई मुणेयव्वो ॥ १४ ॥ दंसणनाणचरित्ते तवविणए सच्चसमिइगुत्तीसु । जो किरियाभावरुई सो खलु किरियारुई नाम ॥ १५ ॥ अणभिग्गहियकुदिट्ठी, संखेवरुइत्ति होइ नायव्वो । अविसारओ पवयणे अणभिग्गहिओ य सेसेसुं ॥ १६ ॥ जो अत्थिकायधम्मं सुयधम्मं खलु चरित्तधम्मं च । सद्दहइ जिणाभिहियं सो धम्मरुइत्ति नायव्वो ॥ १७ ॥ इत्यादि ग्रन्थान्तरतोऽवसेयमिति गाथार्थः ॥ १३ ॥

व्याख्यातं भेदद्वारमधुना 'यथा जायते' इत्युच्यते—

काऊण गंठिभेयं सहसम्मुइयाए पाणिणो केई ।
परवागरणा अन्ने लहंति सम्मत्तवररयणं ॥ १४ ॥

'कृत्वा' विधाय, कं ?–'ग्रन्थिभेदं' ग्रन्थिः–कर्मजनितो घनरागद्वेषपरिणामः, यथोक्तम्–"गंठित्ति सुदुब्भेओ कक्खडघणरूढगंठि व्व। जीवस्स कम्मजणिओ घणरागद्दोसपरिणामो ॥ १ ॥" तस्य भेदो–विदारणं ग्रन्थिभेदस्तं कृत्वा, किं ?–'लभन्ते' प्राप्नुवन्ति 'सम्यक्त्ववररत्नं' सम्यक्त्वमेव वरं-प्रधानं चिन्तामण्यादिरत्नापेक्षया तच्च तद्रत्नं च सम्यक्त्ववररत्नमिति तुर्यपादेन सम्बन्धः, तथा चोक्तम्–"सम्यक्त्वरत्नान्न परं हि रत्नं, सम्यक्त्वबन्धोर्न परोऽस्ति बन्धुः। सम्यक्त्वमित्रान्न परं हि मित्रं, सम्यक्त्वलाभान्न परोऽस्ति लाभः ॥ १ ॥" के ? इत्याह–'प्राणिनः' प्राणा–इन्द्रियादयः, यथोक्तम्–पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिःश्वासमथान्यदायुः। प्राणा दशैते भगवद्भिरिष्टाः," इति, ते विद्यन्ते येषां ते प्राणिनो-जीवाः, किं सर्वेऽपि ?, नेत्याह–'केचित्' स्तोकाः, न सर्वेऽपि, कथं ?–'सहसम्मुइयाइ' त्ति सोपस्कारत्वात्सूत्रत्वाच्च सहात्मना या सङ्गता मतिः सा सहसंमतिः, कोऽर्थः ?–परोपदेशनिरपेक्षतया जातिस्मरणप्रतिभादिरूपया, केचिदित्थं लभन्ते, अन्ये कथमित्याह–'परव्याकरणात्' परोपदेशाद् 'अन्ये' अपरे कृत्वा ग्रन्थिभेदं लभन्ते सम्यक्त्ववररत्नमिति पूर्वसम्बन्धः इति गाथाऽक्षरार्थः ॥ भावार्थस्तु सप्ततिकाबृहच्चूर्णितोऽवसेयः, स्थानाशून्यार्थं तु किञ्चिल्लिख्यते–इह कश्चिदनादिमि-

थ्यादृष्टिर्नरकगत्यादिगतिचतुष्टयान्यतरगतौ वर्तमानो ज्ञानावरणादिसप्तप्रकारकर्मराशेर्यथाप्रवृत्तकरणसंपादितान्तः-सागरोपमकोटाकोटिस्थितिकः सञ्ज्ञिपञ्चेन्द्रियपर्याप्तो मतिश्रुतविभंगानामन्यतरसाकारोपयोगे मनोवाक्काययोग-त्रिकान्यतरयोगे तेजःपद्मशुक्ललेश्यानां क्रमेण विवक्षितजघन्यमध्यमोत्कृष्टपरिणामानामेकतरलेश्यापरिणामे वर्त्तमानोऽशुभप्रकृतीनां चतुःस्थानकरसं द्विस्थानकं शुभप्रकृतीनां द्विस्थानकरसं चतुःस्थानकं कुर्वाणो ज्ञानावरणान्तरायदशकदर्शनावरणनवकमिथ्यात्वकषायषोडशकभयजुगुप्सातैजसकार्मणवर्णादिचतुष्कागुरुलघूपघात-निर्माणरूपाः सप्तचत्वारिंशद्ध्रुवबन्धिनीः सर्वा एव बध्नन् परावर्त्तमानास्तु संभवद्भवप्रायोग्या अविशुद्धत्वस्यायुर्ब-न्धाध्यवसानयोगादायुष्कवर्ज्या एव स्वीकुर्वाणः, तथाहि—यदि तिर्यङ् मनुष्यो वा प्रथमं सम्यक्त्वलाभमुपार्जयति तदा देवगतिप्रायोग्या एव सुरद्विकवैक्रियद्विकपराघातोच्छ्वसप्रशस्तविहायोगतिपञ्चेन्द्रियजातिसातोच्चैर्गोत्रसमच-तुरस्रत्रसादिदशकस्वभावा एकविंशतिप्रकृतीर्बध्नाति, सुरनारकौ तु मनुष्यगतिप्रायोग्या एव मनुष्यद्विकौदारिक-द्विकप्रथमसंहननपराघातादिद्वाविंशतिं स्वीकुरुतः, सप्तमपृथ्वीनारकास्तु तिर्यग्द्विकनीचैर्गोत्रसहिताः प्रागुक्तमनुष्यगति-प्रायोग्यद्वाविंशत्यन्तर्गता एवैकोनविंशतिप्रकृतीर्बन्धन्तीति । तथा पूर्वप्रकरणानिवृत्तिकरणसञ्ज्ञकविशुद्धिविशेषाभ्यां

प्रत्येकमन्तर्मुहूर्त्तमात्रकालमानाभ्यां विशुद्ध्यमानः स्थितिघातरसघातस्थितिबन्धगुणश्रेणीरपूर्वा (अ) पूर्वतराश्च प्रवर्त्त-यन्नन्तरकरणमारभते, तथा चोक्तम्–" ठिइकंडगाण एवं बहुइ सहस्सा अइच्छिया जाहे । संखेज्जइमे भागे सेसे अनियट्टियध्धाए ॥ १ ॥ आढवइ अंतरं सो अंतमुहुत्तं तु हेट्ठओ धरियं । तं पढमठिइं जाणसु आईए मिच्छद-लियस्स ॥ २ ॥ अंतमुहुत्ता उवरिं किंचणमुहुत्तगेण सरिसाउ । मिच्छत्तस्स ठिईउ उक्किरइ तमंतरं भणियं ॥ ३ ॥ " तत्र प्रथमस्थितौ मिथ्यात्वदलिकवेदनादसौ मिथ्यादृष्टिः, अन्तर्मुहूर्त्तेन तु तस्यामपगतायामन्तर-करणप्रथमसमय एव निसर्गतोऽधिगमतो वौपशामिकसम्यक्त्वमाप्नोति, यस्त्वन्तरकरणं न करोति स प्रथममेव यथाप्रवृत्तादिकरणत्रयेणैव विहितत्रिपुञ्जीकरणस्तथैव क्षायोपशमिकं सम्यक्त्वं लभते, तल्लाभे च सम्यग्ज्ञाना-दिलाभः, उक्तञ्च–" लंभेण तस्स लभति हु आयहियं णाणदंसणचरित्तं । तं संसारसमुद्दे जीवेण अलद्धपुव्वं तु ॥ १ ॥ " इति, कृतं प्रसङ्गेन, यद्यपि चात्र सूत्रे स्वसंमत्या परव्याकरणाच्च सम्यक्त्वोत्पत्तौ दृष्टान्तसूचा न कृता तथाऽप्याद्यपदे श्रेयांसो द्वितीयपदे चिलातीपुत्रो निदर्शनमवगन्तव्यं, तत्र श्रेयांसकथानकमिहैवाऽतिथिसंविभाग-व्रतभावनाद्वारे वक्ष्यति, चिलातीपुत्रकथा चेयम्–

नयरंमि खिइपइट्ठे जियसत्त नाम आसि नरनाहो । सयलंतेउरसारा धाराणिनामा य से देवी ॥ १ ॥ सो मंतिखित्तभारो तीऍ समं विसयसोक्खदुल्ललिओ । दोगुंदगुव्व देवो गयंपि कालं न याणेइ ॥ २ ॥ तइया य तंमि नयरे निवसइ पुत्तो दियस्स एक्कस्स । चोदसविज्जाठाणाण पारगो जन्नदेवो त्ति ॥ ३ ॥ पंडियमाणी थद्धो सुइवाई जाइगव्विओ सो य । दट्ठूण नयरमज्झे, साहुजणं खिंसई बहुहा ॥ ४ ॥ जिणसासणस्स गिण्हइ अवण्णवायं च विविहभंगीहिं । भणइ य जणस्स पुरओ, सुइभाववित्रज्जिया एए ॥ ५ ॥ अह अन्नया कयाई समोसढो तत्थ बाहिरुज्जाणे । सुट्ठियनामो सूरी, तस्सीसो सुव्वओ नामो ॥ ६ ॥ गोयरचरियपविट्ठो सुणिउं धिज्जाइयस्स तं वत्तं । आगंतु गुरुपासे आलोएउं इमं भणइ ॥ ७ ॥ जइ तुब्भे अणुजाणह तोऽहं सक्खं समग्गलोयस्स । गंतुं रायसहाएऽवणेमि पंडिच्चगव्वं से ॥ ८ ॥ तो भणइ गुरू अम्हं न जुत्तमेयं जओ इहऽम्हाणं । धम्मो खमापहाणो विरुज्झई सो वित्राएणं ॥ ९ ॥ न य परिभवोऽवि एसो अक्कोसपरीसहस्स सहणाओ । न य अत्थि तत्थ सिद्धी, वायाओ जेण भणियं च ॥ १० ॥ " वादांश्च प्रतिवादांश्च, वदन्तोऽनिश्चितांस्तथा । तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद्गतौ ॥ ११ ॥ " एवं गुरुणा भणिए, सीसोऽपडिभणइ सुव्वइ

सुयंमि । सइ सामत्थे तित्थप्पभावणाऽवस्स कायव्वा ॥ १२ ॥ भणियं च–"पावयणी धम्मकही वाई नेमित्तिओ तवस्सी य । विज्जा सिद्धो य कई, अट्ठेव य पभावगा भणिया ॥ १३ ॥" एवं भणिऊण तओ नीहरिओ वंदिऊण गुरुचलणे । गुरुणाऽवि गुणं पिच्छंतएण न निवारिओ पच्छा ॥ १४ ॥ भणिओ य तेण गंतूण जण्णदेवो जहा तुमं भद्द ! । जिणसासणस्स निंदं जं विरयसि मूढजणपुरओ ॥ १५ ॥ तं किं अन्नाणाओ किं वा नाणेण गव्विओ संतो ? । जइ तावऽण्णाणाओ तो विरमसु भद्द ! एयाओ ॥ १६ ॥ जओ–"जिणसासणस्स निंदं कुणंति अन्नाण ओऽवि जे जीवा । ते हुंति दुक्खभागी भवे २ नाणगुणहीणा ॥ १७ ॥" उक्तञ्च–"ज्ञानस्य ज्ञानिनां चैव, निन्दाप्रद्वेषमत्सरैः । उपघातैश्च विघ्नैश्च, ज्ञानघ्नं कर्म बध्यते ॥१८॥" अह जाणंतो तो निवसभाएँ बहुसब्भलोयपच्चक्खं ? । कुणसु मए सह वायं किं मूढजणं पयारेसि ? ॥ १९ ॥ जो तुम्हं अम्हं वा हारिस्सइ तेण तस्स सीसेणं । होयव्वन्ति पइण्णा इय भणिए तस्स सो कुविओ ॥२०॥ भणइ य–भो भो समणाहम !गव्वभरिय जइ वहसि वायकंडूयं । तो एज्ज पहाए निवसहाए अवणेमि जेण तयं ॥ २१ ॥ एवंति मन्निऊणं साहूवि समागओ निययवसहिं । उइयंसि दिवसनाहे उवट्ठिओ नरवइसहाए ॥ २२ ॥ पत्तो य जन्नदेवो, भणिओ समणेण भद्द ! एस अहं । तुह हिज्जोवयणेणं समागओ नर-

वइसगासं ॥ २३ ॥ इण्हिं च–राया सहाएँ सामी सब्भा एए विसिट्ठलोया य । ता इह पमाणभूमी पभणसु जं किंपि भणियव्वं ॥ २४ ॥ एत्थंतरंमि भणियं जन्नदेवेण–भो ! भो ! अहमा तुब्भे, वेयाणुट्ठाणविरहियत्ताओ । मायंग व्व असिद्धो, न य हेऊ एस भणियव्वो ॥२५॥ तयणुट्ठाणं सव्वं सोयविहिपुरस्सरं जओ भणियं । तुब्भे य असुइभूया, मलमइलियदेहवत्थाहिं ॥२६॥ तो मुणिणा संलत्तं, लोयागमबाहिया पइण्णा ते । जम्हा जई पसत्था लोइयसत्थे य गिज्जंति ॥ २७ ॥ तथा चोक्तम्–" साधूनां दर्शनं श्रेष्ठं, तीर्थभता हि साधवः । तीर्थं पुनाति कालेन, सद्यः साधुसमागमः ॥ २८ ॥ वेदानुसारिभिरप्युक्तम्—" शुचिर्भूमिगतं तोयं, शुचिर्नारी पतिव्रता । शुचिर्धर्मपरो राजा, ब्रह्मचारी सदा शुचिः ॥२९॥" हेऊवि ते असिद्धो जम्हा वेए विवज्जिया हिंसा । अम्हेवि तं न करिमो ता कह वेउत्तविहिरहिया ? ॥३०॥ उक्त च वेदे–' न हिंस्यात्सवभूतानीति ' तयणुट्ठाणाभावो सोयाभावेण साहिओ जो य । सोवि अजुत्तो जम्हा सोयं खु अणेगहा भणियं॥ ३१ ॥ तथा च वेदानुसारिणः–" सत्यं शौचं तपः शौचं, शौचमिन्द्रियनिग्रहः ।सर्वभूतदया शौचं, जलशौचं च पञ्चमम् ॥ ३२ ॥ " सच्चाइसेवणाओ तो कह असुइत्तणं भवे अम्ह ? । अह मइलदेहवत्थेहऽसुइत्तणं तंपिहु अजुत्तं ॥ ३३ ॥ जओ भणियं–" मलमइल पंकमइला धूलीमइला न ते नरा

मइला । जे पावकम्ममइला ते मइला जीवलोयंमि ॥ ३४ ॥" इय एवमाइवयणेहिं जाव स कओ निरुत्तरो तेणं। ताहे से सीसत्तं पडिवन्नो भावरहिओऽवि ॥ ३५ ॥ उवसंहरिऊण तओ वायं साहू समागओ वसहिं । अभिवंदिऊण सूरिं दिक्खं च दवावई तस्स ॥ ३६ ॥ पडिवन्नपालणं चिय महव्वयं होइ वीरपुरिसाणं । चिंतंतेणं तेणवि पडिवण्णा दव्वओ दिक्खा ॥ ३७ ॥ भणियं च-"छिज्जउ सीसं अह होउ बंधणं वयउ सव्वहा लच्छी । पडिवण्णपालणेसुं पुरिसाण जं होइ तं होउ ॥ ३८ ॥" अण्णया य-कत्थवि अत्थे संचोइयस्स से देवयाएँ परिणामो । भावेणवि संजाओ किंतु दुगुंछं न सो मुयइ ॥ ३९ ॥ सन्नायओऽवि सव्वे, उवसंता तस्स सावया जाया । नवरं भज्जाएँ कयं मूढाए कम्मणं तस्स ॥४०॥ दिन्नं च भत्तपाणाइदाणवेलाए कहवि पच्छण्णं । अण्णाणाओ भुत्ते तयंमि सो जाओ सवियारो ॥ ४१ ॥ तो वयलोवभयाओ गहियाणसणो मओ समाहीए । संपत्तो सुरलोयं, अपडिक्कंतो दुगुंछाए ॥ ४२ ॥ तेणं चिय वेरग्गेण सावि पडिवज्जिऊण पव्वज्जं । लज्जाएँ तमकहित्ता गुरूण कालेण कालगया ॥ ४३ ॥ पुव्वकयसुकयवसओ उववण्णा सावि देवलोयंमि । भुंजंति दिव्वलो(भो)ए दोवि तहिं देवभवजोग्गा ॥ ४४ ॥ इओ य-अत्थि इह भरहखेत्ते मगहानामेण जणवओ रम्मो । तंमि पुरं रायगिहं गिहदेउलहट्टसोहिल्लं ॥ ४५ ॥ तत्थ

धणसत्थवाहो वाहणधणधन्नसंपयाकलिओ । भद्दा यं तस्स भज्जा दासी य चिलाइया तेसिं ॥४६॥ अण्णया य–सो
जण्णदेवदेवा तत्तो चविऊण आउयक्खयंमि । चेडीएँ तीएँ पुत्तो दुगुंछदोसेण संजाओ ॥ ४७ ॥ कयवयदियहेहिं तओ
चिलाइपुत्तोत्ति से कयं नामं। संवड्ढिओ कमेणं इओ य भज्जावि से चविउं ॥ ४८ ॥ । पंचण्ह सुयाणुवरिं जाया
दुहियत्तणेण भद्दाए। उचियसमयंमि अह सुंसुमत्ति तीसे कयं नामं ॥ ४९ ॥ जुम्मं पच्छा बालग्गाहो चिलाइपुत्तो
पिऊहि आणत्तो । दिट्ठि दिलियाएविहु तीएँ समं कुणइ सोऽणालिं ॥ ५० ॥ अह अण्णया य दिट्ठो, पिउणा से
नीणिओ य गेहाओ। भमडंतो य कमेणं संपत्तो सीहगुहपल्लिं ॥ ५१ ॥ पल्लिवइसीहनायं समाल्लिऊणं ठिओ य
सो चंडो । कूरो दढप्पहारी, निर्त्तिसो सव्वकम्मेसु ॥ ५२ ॥ तव्विहगुणेहि पल्लीवइस्स कालेण बहुमओ जाओ ।
होइच्चिय अहव इमं, सरिसा सरिसेसु रज्जंति ॥ ५३ ॥ उक्तञ्च–" मृगा मृगैः सङ्गमनुव्रजन्ति, गावश्च गोभि-
स्तुरगास्तुरङ्गैः । मूर्खाश्च मूर्खैः सुधियः सुधीभिः, समानशीलव्यसनेषु सख्यम् ॥ ५४ ॥ " वच्चंतेसु दिणेसुं पल्लि-
वई अण्णया मओ तत्थ । नियाविक्कमेण सो चेव चोरसेणावई जाओ ॥ ५५ ॥ इओ य-आऊरियलायण्णा नीसेस
कलाकलावसंपुण्णा । सा सुंसुमाऽवि जाया रूवाइगुणेहि विक्खाया ॥ ५६ ॥ सिट्ठा य तस्स पुरओ, रायगिहागं

तुएण केणावि । तप्पडिबंधेण इमो चोरे सद्दाविउं भणइ ॥ ५७ ॥ भो भो रायगिहंमी गच्छामो तत्थ धणवई पयडो। अत्थि धणसत्थवाहो तस्स सुया सुंसुमा नाम॥ ५८ ॥ सा मह भज्जा होही, तुम्हाण धणं बहुप्पयारं च। एवं पलोभिया ते अब्भुवगंतूण संचलिया ॥५९॥ पत्ता रायगिहंमी रयणीए धणागिहे पविट्ठा य। अवसेवणीएँ सोविउ गिह-जणे हरियगिहसारा ॥ ६० ॥ नीहरिया गेहाओ पल्लीवइणा य सुंसुमा गहिया। नाऊण धणो तत्त इयरं च आरक्खिए भणइ ॥ ६१ ॥ चोरेहिं जं विलुत्तं तं दव्वं सव्वमेव तुम्हाणं। गंतूण नियत्तावह मह दुहियं सुंसुमं एक्कं॥ ६२ ॥ तो ते एवं भणिया, लग्गा चोराण मग्गओ सहसा। सोऽवि धणो सह पुत्तेहि निग्गओ तयणु-मग्गेणं ॥ ६३ ॥ एत्थंतरंमि य–धणसत्थवाहदुक्खं, सुयाएँ विरहंमि दारुणं नाउं। चोराण दंसणत्थत्व उग्गओ दिणयरो झत्ति ॥ ६४ ॥ वच्चंतेहि य दूरं सव्वेऽवि य पक्कणा गहियदव्वा । सह सुंसुमाएँ दिट्ठो, चिलाइपुत्तोऽवि दूरयरो ॥ ६५ ॥ सन्नद्धबद्धकवएहिं तेहिं संपाविऊण तं सिण्णं। हयविहयं काऊणं सव्वं उद्दालियं दव्वं ॥ ६६॥ तं वुत्तंतं दट्ठुं अग्गे काऊण सुंसुमं चलिओ। आयट्ठियकरवालो चिलाइपुत्तोऽवि तुरियपत्तो ॥ ६७.॥ एत्थंतरंमि आरक्खिएहिं भणिओ धणो जहा अम्हे। मुक्खियतिसिया संता दूरं च विमुक्कनियदेसा ॥ ६८ ॥ विसमा य इमा

अडवी एसोऽवि करालखग्गदुप्पेच्छो ! तो किं इमीएँ एक्काएँ कारणे संसए पडिमो ॥ ६९ ॥ नीतावप्युक्तम्—
" त्यजेदेकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे, आत्मार्थे पृथिवीं त्यजेत् ॥ ७० ॥ " वुत्तं
धणेण भो ! भो ! जइ एवं तो पयाह नियगेहं । अहयं पुण नियदुहियं घेत्तूणं आगमिस्सामि ॥ ७१ ॥ एवं
भणिऊण धणो, पुत्तेहि समं पयट्टिओ गंतुं । इयरेऽवि हु वाहुडिया, गहिउं रित्थं समत्थंपि ॥ ७२ ॥ वच्चंतो जाव
इमो नियडीहूओ चिलाइपुत्तस्स । ताव इमोऽविह तीसे सीसं खग्गेण गहिऊणं ॥ ७३ ॥ मा होउ मज्झ एसा मा
वा एयाण चिंतयंतो य । वच्चइ तहेव पुरओ तेऽवि हु पेच्छंति तं देहं ॥७४॥ सोयापूरियहियया पियपुत्ता सीसविरहियं
देहं । गाहिऊण पडिनियत्ता तिसाबुभुक्खाहि परितंता ॥ ७५ ॥ तरुछायाएँ निविट्ठा, भणिया पिउणा य वच्छ !
तुज्झेऽत्थ । गाढं छुहाभिभूया सक्कह न पयंपि गंतूणं ॥ ७६ ॥ ता एण्हिं-एक्कं जराएँ गहियं, अन्नं धूयाए मरण-
दुक्खत्तं । मं मारिऊण भक्खह तो सुहिया जाह नियगेहं ॥ ७७ ॥ पुत्तेहिं भणियं-हा हा अजुत्तमयं ताय ! तए
अम्ह साहियं वयणं । एवं काउं अम्हे कस्स मुहं दंसइस्सामो ? ॥ ७८ ॥ एमेव जेट्ठपुत्तेण भासियं तंपि वारियं तेहिं । एवं
कमेण सव्वेहिं भासिए तो पिया भणइ ॥ ७९ ॥ जइ एवं तो पच्छा एयं चिय मयकलेवरं खाह । भइणीएँ विगय-

रागा मुणिव्व वणपिंडिमिच्छंता ॥ ८० ॥ तो भक्खिऊण तं ते पत्ता गेहं चिलाइपुत्तोऽवि । तह वच्चंतो पासइ झाण-गयं मुणिवरं एक्कं ॥८१॥ तं भणइ अहो समणा !, संखेवेणं कहेसु मे धम्मं। अन्नह तुज्झवि सीसं छिन्दिस्सामी अह-मिमंव ॥८२॥ पडिबुज्झिहिन्ति उवओगपुव्वयं जाणिऊण मुणिणावि । उवसमविवेगसंवर पयत्तयं साहियं तस्स ॥ ८३॥ तं सोऊणुवसंतो गंतूण विवित्तभूमिभायंमि । सो चिंतिउं पयट्टो एयाण पयाण को अत्थो ? ॥ ८४ ॥ हुं नायमुव-समो ताव एत्थ कोहस्स जो परिच्चाओ। उइयस्स विहलकरणेण अणुइयस्सोदयनिरोहा॥८५॥जओ–"दुग्गइगमणे सउणो सिवसग्गपहेसु किण्हसप्पोव्व । अत्तपरोभयसंतावदायगो दारुणो कोहो ॥८६॥" जावज्जीवं इण्हिं होउ निवित्ती इमस्स ता मज्झ । इय चिंतिऊण मुक्कं करवालं दाहिणकराओ ॥९०॥ जोऽवि विवेओ मुणिणा, बीयट्ठाणंमि मज्झ आइट्ठो। तस्सवि भावत्थो दव्वसयणवत्थाइपरिहारो॥८८॥ जओ–"जत्तियमेत्ते जीवो संजोगे चित्तवल्लहे कुणइ। तत्तियमेत्ते सो सोयकीलए नियमणे निहइ ॥ ८९ ॥" एएऽवि परिच्चत्ता जावज्जीवाएँ ता मए इण्हिं । इय चिंतिऊण सीसंपि छड्डियं चत्तमोहेणं ॥ ९० ॥ इंदियनोइंदियपसरभंजणे संवरोऽवि किर होइ। सोऽवि मए पडिवन्नो विमुक्कदेहेण एत्ताहे ॥ ९१ ॥ काउ-स्सग्गेण ठिओ एवं परिचिंतिऊण स महप्पा। मुणिवइउवएसायत्तसत्तहियसारसंमत्तो ॥ ९२ ॥ एत्थंतरंमि–सोणिय-

गंधागयकीडियाहिं वज्जग्गधारतुंडाहिं । सो भक्खिउमारद्धो पायतलारब्भ जाव सिरं ॥ ९३ ॥ तहवि न चालओ झाणाओ किंपि जाओ य चालिणीसरिसो । अड्ढाहियदियहेहिं मओ य पत्तो य सुरलोयं ॥ ९४ ॥ भणियं च–" जो तिहिं पएहिं धम्मं समभिगओ संजमं समारूढो । उवसमविवेगसंवर चिलाइपुत्तं नमंसामि ॥ ९५ ॥ अहिसरिया पाएहिं सोणियगंधेण जस्स कीडीओ । खायंति उत्तमंगं, तं दुक्करकारगं वंदे ॥ ९६ ॥ धीरो चिलाइपुत्तो जो मुइंगलियाहि चालणिव्व कओ । सो तहवि खज्जमाणो पडिवन्नो उत्तमं अत्थं ॥ ९७ ॥ अड्ढाइज्जेहि राइंदिएहिं पत्तं चिलाइपुत्तेणं । देविंदामरभवणं अच्छरगुणसंकुलं रम्मं ॥ ९८ ॥ " एवं संखेवेणं चरियं कहियं चिलाइपुत्तस्स । वित्थरओ विवरणाओ नेयं उवएसमालाए ॥ ९९ ॥ श्रुतदेव्याः प्रसादेन, सम्यक्त्वं जायते यथा । इत्येतत्कथितं तस्य, दोषद्वारमथोच्यते ॥ १०० ॥–



सम्मत्तपरिब्भट्ठो जीवो दुक्खाण भायणं होइ ।
नंदमणियारसेट्ठी दिट्ठंतो एत्थ वत्थुम्मि ॥ १५ ॥



'सम्यक्त्वात्' अर्हच्छासनश्रद्धानलक्षणात 'परिभ्रष्टः' च्युतः सम्यक्त्वपरिभ्रष्टः, स तथाविधो 'जीवः'

प्राणी 'दुःखानां' शारीरमानसानामसातोदयरूपाणां, कुगतिगामितयेति शेषः, 'भाजनं' पात्रं 'भवति' जायते, ननु प्रतिज्ञामात्रमेतद्, दृष्टान्तः क ? इत्याशङ्कायामाह--नन्दमणिकारश्रेष्ठी 'दृष्टान्तो' निदर्शनं 'अत्र' वस्तुनि—सम्यक्त्वपरिभ्रंशाज्जीवस्य दुःखभाजनभवनलक्षणे, इति गाथाऽक्षरार्थः ॥ भावार्थस्तु कथानकादवसेयः, तच्चेदम्—

पुरा राजगृहपत्तने श्रेणिकराजकाले धनधान्यकनकरजतद्विपदचतुष्पदादिसम्पदुपेतो नन्दमणिकारो गृहपति-रासीत्, तत्र च तदा श्रीमन्महावीरस्वामी समवसृतः, कौतुकादिना च नन्दमणिकारस्तत्समीपं गतः, भगवता च प्रारब्धा धर्मदेशना, प्ररूपितो नारकतिर्यङ्नरामरभवेषु दुःखगहनः संसारः, व्याख्याता निःशरणता प्राणिगणस्य, दर्शितः साधुश्रावकभेदेन द्विविधः संसारसागरोत्तरणहेतुर्धर्मः, तं च समाकर्ण्य प्रतिबुद्धा अनेके प्राणिनः, सोऽपि नन्दोऽत्रान्तरेऽभ्युत्थाय भगवन्तमभिवन्द्य च श्रावकत्वं प्रपेदे । अन्यदा च त्रैलोक्यबान्धवे भगवति सिन्धुविषयमुदायनराजश्रावकस्य प्रव्राजनार्थं गतवति नन्दमणिकारश्रावको ग्रीष्मचतुर्दश्यां पौषधिको बभूव, अस्तंगते रवौ विहितः सायंतनावश्यकविधिः, धर्मध्यानरतस्य चास्य

कस्याञ्चिद्वेलायां पिपासावेदना प्रादुरभूत्, ततस्तया बाध्यमानश्चिन्तयामास-न किञ्चिदुदकं विना जन्तूनां, यतो जलमन्तरेण गाढतृड्वेदनादोदूयमानमानसा म्रियन्त एव प्राणिनः, अत एव लोका वापीकूपतडागादीन् जलाशयान् कारयन्ति, अतोऽहमपि यदि रजन्यां प्राणत्यागं न करिष्ये तदा कमपि जलाशयं कारयिष्ये, एवं च मिथ्यात्वोदयप्रतिपतितसम्यक्त्वरत्नस्यानुचिन्तयतः कथमपि विभाता रात्रिः, प्रभातसमये च तथैव प्रतिपतितभावस्तथाविधविशिष्टप्राभृतकहस्तो गतो राजकुलं, दृष्टो राजा, ढौकनीयार्पणपूर्वकं च याचितो जलाशयनिमित्तं भूमिखण्डं, दत्तं राज्ञा, कारयितुमारब्धस्तत्र वापी, कालेन निष्पन्ना सा, तस्याः कारितानि चत्वारि द्वाराणि, चतुर्ष्वपि द्वारेषु कारिताः सहकाराद्यारामाः, तदासन्न एव विधापितो वैदेशिकयोग्यः प्रतिश्रयः, प्रवर्त्तिता दानशाला, एवं च प्रभूतद्रविणजातं व्ययित्वा तत्रैवातिमूर्च्छितः कदाचिदनुपक्रमणीयव्याधिविद्धत्वपुरार्त्तध्यानोपगतो मृत्वा तस्यामेव वाप्यां गर्भजशालूरत्वेनोदपादि, लोकाश्च तत्र विश्रामादिनिमित्तमायाताः प्रतिपादयन्ति-यथा धन्यः स नन्दमणिकारो येनेयमेवंविधारण्यभूमिरिव विविधकमलोपशोभिता सीतेव सन्निहितसदारामा नवयौवनसुभगाङ्गनेव विशिष्टनरानन्ददायिनी वापी समुत्पादिता, इत्यादि श्लाघादिकं च लोकैर्विधीयमानमाकर्ण्य

तस्यान्यदा नन्दजीवस्य कश्चिदेवंविधं श्रुतपूर्वं वचनमितीहापोहादि कुर्वतो जातिस्मरणमभूत्, ज्ञातवांश्च पूर्वभवप्रतिपन्नदेशविरतिभङ्गवृत्तान्तं, तत्कृतं च कुयोनिपातं, गतो विषादं, ततश्च सैव देशविरतिः स्वीकृता, इतश्च प्रभृति प्रासुकजलं मे पानं शुष्कशेवालादिराहारः, एवं प्रतिपन्नव्रतस्यास्य व्यतिक्रान्तः कियानपि कालः, अन्यदा तत्रैव ग्रामनगरादिषु विहरन् पुनः समवसृतस्तत्र वर्द्धमानस्वामी, जातो लोकप्रवादः, जलाद्यानयनायातश्राविकासंलापश्रवणतस्तस्यापि शालूरस्य जाता भगवद्दर्शनवन्दनादीच्छा, निर्गतस्ततः, शुभाध्यवसायो गन्तुमारब्धः, अन्तराले च तुरङ्गखरखुरचूर्णितदेहो व्रताद्युच्चारयित्वा स्वयमेव परिहृत्याष्टादश पापस्थानानि मृतो देवलोकमुत्पन्न इति कथासङ्क्षेपः, विस्तरस्तु ज्ञाताधर्मकथातोऽवसेयः। उक्तं चतुर्थं दोषद्वारं सम्यक्त्वस्य, अधुना गुणद्वारं पञ्चममाह—

सम्मत्तस्स गुणोऽयं अचिंतचिंतामणिस्स जं लहइ।
सिवसग्गमणुयसुहसंगयाणि धणसत्थवाहोव्व ॥ १६ ॥

'सम्यक्त्वस्य' उक्तरूपस्य 'गुणः' लाभः 'अयं' एषः अचिन्त्यमाहात्म्यः चिन्तामणिरचिन्त्यचिन्तामणिरिति शाकपार्थिवादिदर्शनान्मध्यपदलोपी समासस्तस्येति, अचिन्त्यमाहात्म्यता चाचिन्तितमोक्षादिफल-

प्रापकत्वात्, चिन्तामण्युपमानं च विशिष्टभावरत्नत्वादस्येति भावनीयं, यतः किं ?–यत् 'लभते' प्राप्नोति सम्यक्त्वपरिणतो जीव इति शेषः, किमित्याह–शिवश्च–मोक्षः स्वर्गश्च–नाकः मनुजाश्च–मनुष्याः शिवस्वर्गमनुजास्तेषां सुखानि–शर्माणि तैः संगतानि–सङ्गमाः शिवस्वर्गमनुजसुखसङ्गतानि, तानि यल्लभते जीवः एष सम्यक्त्वगुण इति भावार्थः, क इव ? –'धनसार्थवाह इव' प्रथमतीर्थकरजीव इवेति गाथाऽक्षरार्थः ॥ भावार्थस्तु कथानकगम्यः, तच्चेदम्–

अस्मिन् जम्बूद्वीपे, द्वीपे पश्चिमविदेहसत्क्षेत्रे । अस्ति क्षितिप्रतिष्ठितनगरं सुरनगरसमविभवम् ॥ १ ॥ पालयति तत्तदानीं, प्रसन्नचन्द्रे नरेश्वरे नीत्या । तत्र धनसार्थवाहो बभूव निजविभवजितधनदः ॥ २ ॥ स वसन्तपुरं चलितः कदाऽपि तद्योग्यभाण्डमादाय । जनबोधनाय पटहेन घोषणां कारयामास ॥ ३ ॥ यथा–भो भो लोकाः ! सम्प्रति धनोऽमुतः प्रस्थितो वसन्तपुरम् । तद् यस्य तत्र गमने वाञ्छाऽस्ति स तेन सममेतु ॥ ४ ॥ पथ्यदनभाण्डमूल्यप्रवहणवस्त्रादि यस्य यन्नास्ति । तस्य स एव विधास्यति, तेनाक्षूणं समस्तेन ॥ ५ ॥ श्रुत्वा घोषणमेवं तस्य ततो विविधकार्यकृतचित्ताः । चेलुः सेवककृपणव्यवहारकप्रभृतयोऽनेके ॥ ६ ॥ अत्रान्तरे–श्रीधर्म-

घोषसूरिः, कुतोऽपि तद्घोषणां समाकर्ण्य । प्रेषयति स्म मुनियुगं, समीपमथ माणिभद्रस्य ॥ ७ ॥ सर्वाधिकारचिन्तन-
परायणस्य खलु सार्थवाहस्य । तस्य सकाशे प्रहितं यतियुगलं सूरिणा तेन ॥ ८ ॥ युग्मम् । निजगृहसमागतं तत्
साधुयुगं वीक्ष्य माणिभद्रोऽथ । अभिवन्द्य विनयसारं, पप्रच्छागमनहेतुमसौ ॥ ९ ॥ साधुभ्यामुक्तम्—भो ! धर्मघोषसूरि-
भिरावां प्रहितौ समागतावत्र । धनसार्थपतेः श्रुत्वा, वसन्तपुरसंमुखं गमनम् ॥ १० ॥ तेन समं जिगमिषवोऽ-
स्मत्पूज्या यदि च स बहुमतिं कुरुते । इत्युक्तः सोऽवादीदनुग्रहः सार्थवाहस्य ॥ ११ ॥ किन्तु—स्वयमेव गमन-
समये सूरिभिरागत्य सार्थवाहोऽपि । भणनीय इति गदित्वा नत्वा तौ प्रेषयामास ॥ १२ ॥ गत्वा तपस्वियुग्मेन
तेन सर्वं निवेदितं सूरेः । तेनाथ तदनुमन्य स्वधर्मनिरतेन संतस्थे ॥ १३ ॥ अन्यस्मिन्नहनि ततः
प्रशस्ततिथिकरणयोगनक्षत्रे । प्रस्थानमेष चक्रे नगरादविदूरभूभागे ॥ १४ ॥ तत्रस्थस्यायाता
आचार्यास्तस्य दर्शननिमित्तम् । बहुमुनिजनपरिवारा, दृष्टा धनसार्थवाहेन ॥ १५ ॥ उत्थायासनदाना-
द्युचितप्रतिपत्तिपूर्वमभिवन्द्य । किं यूयमपि समेष्यथ मया समं पृष्टवानेवम् ॥ १६ ॥ अनुमन्यते यदि भवानित्येवं
सूरयोऽपि तं बभणुः । आहूय सूपकारं तदनन्तरमुक्तवानेषः ॥ १७ ॥ भो भद्र ! यद् यदा वाऽमीषामशनादि कल्पते

किञ्चित् । मुनिपुङ्गवेभ्य एभ्यः तत्सर्वं देयमविकल्पम् ॥ १८ ॥ एवं श्रुत्वाऽऽचार्येण पुनरप्युक्तं यथा न सार्थपते ! ।
आहारादिकमित्थं विचिन्तितं कल्पतेऽस्माकम् ॥ १९ ॥ यन्न कृतं नानुमतं न कारितं किन्त्वचिन्तितं गृहिणा ।
आत्मार्थमेव रचितं प्रायोग्यं तद् यतो व्रतिनाम् ॥ २० ॥ अत्रान्तरे धनस्य प्राभृतिकं कश्चिदर्पयामास । परिपक्वसुर-
भिसहकारसत्फलैः स्थालमापूर्णम् ॥ २१ ॥ तद्वीक्ष्य सार्थपतिना हृष्टेनोचे यथाऽनुगृह्णीत । भगवन्तः ! संप्रति मामुचि-
तफलग्रहणतो यूयम् ॥ २२ ॥ आचार्यैरुक्तम्—सम्प्रत्येव निवेदितमेवं भवतो यथा गृहस्थैर्यत् । आहारादि कृतं स्यात्
स्वार्थं तत्कल्पतेऽस्माकम् ॥ २३ ॥ कन्दफलमूलकादि तु शस्त्रोपहतं न यत्तदस्माकम् । स्प्रष्टुमपि नोचितं स्यात् किं पुनरिह
खादितुं ? भद्र ! ॥ २४ ॥ तच्छ्रुत्वा तेन ततो, भणितमहो ! दुष्करं व्रतं भवताम् । शाश्वतसौख्यो मोक्षः सुखेन न प्राप्यते यद्वा
॥ २५ ॥ एवं यद्यपि भवतामस्माभिः स्तोकमेव किल कार्यम् । पथि गच्छतां तथाऽपि स्यादपि तदवश्यमादेश्यम् ॥ २६ ॥
इत्युक्त्वा प्रणिपत्य प्रशस्य च प्राहिणोदसौ सूरीन् । तेऽप्युक्तधर्मलाभाः स्थण्डिलमुत्तमागताः शुद्धम् ॥ २७ ॥
स्वाध्यायध्यानपरास्तत्र स्थित्वा विभावरीं सकलाम् । याताः प्रभातसमये [ ग्रं. १५०० ] साकं धनसार्थवाहेन ॥ २८ ॥ ॥ ५१ ॥
तदा च—तापयति महीपृष्ठं शोषयति जलाशयांस्तृषं तनुते । नाशयति सरसभावान्निदाघसमयो गतो वृद्धिम् ॥ २९ ॥

एवंविधे च काले गच्छन् सततप्रयाणकैः सार्थः । विविधश्वापदभीमां प्राप्तो विषमाटवीमेकाम् ॥ ३० ॥ सर्जार्जुन-सरलतमालतालहिंतालसल्लकैर्वृक्षैः । अवरुद्धकरप्रसरः सूरोऽपि न लक्ष्यते यत्र ॥ ३१ ॥ अत्रान्तरे—ग्रीष्मेण धरा-वलयं समस्तमुत्तापितं विलोक्यैव । तस्याश्वासनहेतोः पयोदसमयः समायातः ॥ ३२ ॥ ततः—तडिदुच्चलप्रतापो ग्रीष्मं गुरुगर्जितेन तर्जयति । धारासारप्रहरणविभीषणो वीर इव जलदः ॥ ३३ ॥ एवंविधे च समये विज्ञाय धनोऽति-मार्गदुर्गमताम् । आपृच्छ्य सार्थिकजनं तत्रैवावस्थितिं चक्रे ॥ ३४ ॥ भाण्डादिविनाशभयाद्विधाय किञ्चिच्च गुण-लयनिकादि । तस्थुः सार्थिकलोकाः वर्षानिर्वाहणनिमित्तम् ॥ ३५ ॥ तदा च—सार्थस्य बहुजनत्वात् पथस्य बहुदि-वसलङ्घनीयत्वात् । अभ्यधिकदानभावाद्धनस्य सार्थे समस्तेऽपि ॥ ३६ ॥ पाथेयादि क्षीणं पश्चात्तापं गतश्च तल्लोकः । लग्नश्च कन्दफलमूलभक्षणे पीडितः क्षुधया ॥ ३७ ॥ ततः—कथितं धनस्य रात्रौ पल्यङ्कगतस्य माणिभद्रेण । नाथ ! यथा संपन्नः सार्थजनः क्षीणपथ्यदनः ॥ ३८ ॥ कन्दफलमूलकाशी, तापसवृत्तिं समाश्रित इदानीम् । लज्जां विमुच्य परिहृत्य पौरुषं मुक्तमर्यादः ॥ ३९ ॥ यतः—मानं मुञ्चति गौरवं परिहरत्यायाति दैन्यात्मतां, लज्जामुत्सृजति श्रयत्यकरुणां नीचत्वमालम्बते । भार्याबन्धुसुहृत्सुतेष्वपकृतीर्नानाविधाश्चेष्टते, किं किं यन्न करोति निन्दित-

मपि प्राणी क्षुधापीडितः ? ॥ ४० ॥" एतच्चाकर्ण्य धनः क्षणमात्रं चिन्तया समाक्रान्तः । तामीर्ष्ययेव निद्रा,
नुनोद तदनन्तरं तस्य ॥ ४१ ॥ अत्रान्तरे रजन्याः, पश्चिमयामेऽश्वमन्दुरापालः । आर्यामेकामपठद्धनसार्थपतिं
समुद्दिश्य ॥ ४२ ॥ 'पालयति प्रतिपन्नान् विषमदशामागतोऽपि सन्नाथः। खण्डीभूतोऽपि शशी कुमुदानि विकाशय-
त्यथवा ॥ ४३ ॥' श्रुत्वैतां सार्थपतिः विमुच्य निद्रां विचिन्तयामास । स्तवनच्छलेन नन्वहमनेन संप्रत्युपालब्धः
॥ ४४ ॥ तत्कोऽत्र सार्थमध्ये, गाढं दुःखार्दितोऽस्ति ? चिन्तयतः । सूरिप्रमुखा मुनयः, सहसा तस्यागताश्चित्तम्
॥ ४५ ॥ हा हा नैतावन्तं, कालं तेषां मया महाव्रतिनाम् । नामापि सङ्गृहीतं, प्रतिजागरणादि दूरेऽस्तु ॥ ४६ ॥
कन्दफलादि तु तेषामभक्ष्यमिह तेन ते महामुनयः । अत्यन्तदुःखभाजो मच्चेतस्तर्कयत्येवम् ॥ ४७ ॥ अहह !
प्रमादमादिरादारुणता यत्सदा कुचिन्तासु । प्रेरयति जनं सद्विषयबुद्धिचैतन्यमपहरति ॥ ४८ ॥ तादिदानीमपि
गत्वा प्रतिजागरणं करोम्युषसि तेषाम् । चिन्तयतस्तस्यैवं पठितार्या यामपालेन ॥ ४९ ॥ 'संसारेऽत्र मनुष्यो घटनं
केनापि तेन सह लभते । दैवस्यानभिलषतोऽपि यद्वशात्पतति सुखराशौ ॥ ५० ॥' एतां च पठ्यमानामाकर्ण्य धनोऽपि
चेतसा तुष्टः । मुनिसङ्गमोऽनया मे सुखावहः सूचितो यस्मात् ॥ ५१ ॥ अत्रावसरे पठितं कालनिवेदकेन—' भूषित-

भुवनाभोगो दोषान्तकरः समुत्थितो भानुः। दर्शयितुमिव तवायं समगुणभावेन मित्रत्वम् ॥ ५२ ॥' उत्थाय ततः कृत्वा प्रभातकृत्यानि सार्थवाहोऽपि । अगमत् सूरिसमीपं बहुभिः परिवारितो लोकैः ॥ ५३ ॥ तत्र च गतेन तेन—कारुण्यस्य निवासो धृतेर्निधानं निकेतनं नीतेः। वेश्म चतुर्विधबुद्धेराधारः साधुधर्मस्य ॥ ५४ ॥ सन्तोषामृतजलधिः क्रोधोद्धतदहनसजलजलवाहः। श्रीधर्मघोषसूरिर्मुनिभिः परिवारितो दृष्टः ॥ ५५ ॥ अभिवन्दितश्च भक्त्या सह मुनिभिरसौ प्रहृष्टचित्तेन । सार्थप्रभुणाऽऽत्मानं कृतार्थमभिमन्यमानेन ॥ ५६ ॥ गुरुणाऽभिनन्दितोऽसौ सादरमथ धर्मलाभवचनेन। भवमूलकर्मकुलशैलदलनवज्रानलेनोच्चैः ॥ ५७ ॥ उपविश्य ततोऽवादीद्धनो यथा नाथ! पुण्यरहितस्य। रोहति न कल्पवृक्षो गृहे न वा पतति वसुधारा ॥ ५८ ॥ यतः—संसारजलधिपोतं समतृणमणिलेष्टुकनकरिपुसुहृदम्। संप्राप्यापि भवन्तं सद्धर्मनिवेदकं सुगुरुम् ॥ ५९ ॥ न श्रुतममृतसमानं वचनं न कृता जगत्प्रशस्या च। तव चरणकमलसेवा विहिता च न ते कचिच्चिन्ता ॥ ६० ॥ युग्मम्। तादिदं प्रमादकरणं सहनीयं नाथ! मामकं भवता। एतद्वचनावसितौ सूरिस्तमवोचदुचितज्ञः ॥ ६१ ॥ यथा—सार्थपते! सन्तापं मा गास्त्वं येन सर्वमेवेह! कृतमस्माकं भवता पालयता क्रूरसत्त्वेभ्यः ॥ ६२ ॥ आहारादि यथासंभवं च देशादियोग्यतासदृशम्। त्वत्सार्थिकलोकेभ्यः सर्वे

संपद्यतेऽस्माकम् ॥ ६३ ॥ ततो धनेनोक्तम्—संस्थापना वचोभिः किममीभिर्नाथ ! बहुभिरप्युक्तैः ?। लज्जे स्म सर्वथाऽहं प्रमादचरितेन खल्वमुना ॥ ६४ ॥ तस्मादनुग्रहं मे विधाय संप्रेषयस्व मुनियुग्मम् । तत्प्रायोग्यं किञ्चिद् येनाहं संप्रयच्छामि ॥ ६५ ॥ अप्रतिपात्यं भावं गुरुरपि विज्ञाय तस्य तमुवाच । एवं क्रियते सुन्दर ! किन्तु यतीनां यदिह कल्प्यम् ॥ ६६ ॥ तज्जानात्येव भवान् सोऽपि प्रतिवक्ति नाथ ! जानामि । यदनुचितं साधूनां तन्नैव विभो ! प्रदास्यामि ॥ ६७ ॥ तदनन्तरमाचार्यैस्तपस्विसङ्घाटकः समादिष्टः । गमनार्थं तत्र धनोऽप्यभिवन्द्य गतो निजावासम् ॥ ६८ ॥ क्षणमात्रेणायातं निजानुमार्गेण वीक्ष्य मुनियुग्मम् । अवलोकयति स्म धनस्तदा च तद्योग्यमशनादि ॥ ६९ ॥ भवितव्यतानियोगाद् न यावदन्यन्निरीक्षितं किञ्चित् । स्त्यानमुपादाय घृतं यतिपुरस्तावदुपतस्थौ ॥ ७० ॥ उक्तवांश्च—यदि कल्पनीयमेतत्तदाऽनुगृह्णीत कुरुत मत्तोषम् । कल्पत इत्युक्त्वा तैर्मुनिभिरुपस्थापितं पात्रम् ॥ ७१ ॥ ततश्च—परिवर्द्धमानशुभकण्डकेन तद्भावसारचित्तेन । निजजन्मजीवितधनं कृतार्थमभिमन्यमानेन ॥ ७२ ॥ दत्तं घृतं मुनिभ्यः परमानन्दोत्थपुलकिना तावत् । परिपूर्णमिति भण द्भिर्यावच्चैः संवृतं पात्रम् ॥ ७३ ॥ अभिवन्द्य भावसारं तदनु प्रस्थापिताश्च तेनैते । प्रवितीर्णधर्मलाभा यथासमायातमुप-

जग्मुः ॥ ७४ ॥ ततश्च सार्थवाहेन—तद्भावसारदानप्रभावतो बोधिबीजमुपाचित्य । भव्यत्वपाककारणमपारभवज-लधितीरापम् ॥ ७५ ॥ निर्वर्तितः सुखौघः सुरमनुजभवेषु शिवसुखसमानः । संसारमहाजलधेर्मुक्तितटी निकटमानीता ॥ ७६ ॥ युग्मम् । तदनूत्तरोत्तरगुणक्रमेण समुपार्ज्य तीर्थकृत्त्वं च । तस्मात्त्रयोदशभवेऽनुभूय सिद्धिं च संप्राप्तः ॥ ७७ ॥ तत्त्रयोदशभवसूचिका चेयं निर्युक्तिगाथा, यथा—"धण १ मिहुण २ सुर ३ महब्बल ४ ललियंगय ५ वइरजंघ ६ मिहुणे य ७ । सोहम्म ८ विज्ज ९ अच्चुय १० चक्की ११ सव्वट्ठ १२ उसभे १३ य ॥ ७८ ॥" एवं च तस्य—सम्यक्त्वबीजमात्रेऽप्यवाप्यते, यदि तथा फलाकलना । साक्षात्सम्यक्त्वाप्तौ तदेह तत्किं न यद्भवति ॥ ७९ ॥ तथाहि—अशमसुखनिधानं धाम संविग्नतायाः, भवसुखविमुखत्वोद्दीपने सद्विवेकः । नर-नरकपशुत्वोच्छेदहेतुर्नराणां, शिवसुखतरुमूलं शुद्धसम्यक्त्वलाभः ॥ ८० ॥ उक्तञ्च—"सम्यक्त्वमेकं मनुजस्य यस्य, हृदि स्थितं मेरुरिवाप्रकम्पम् । शङ्कादिदोषापहृतं विशुद्धं, न तस्य तिर्यङ्नरके भयं स्यात् ॥ ८१ ॥ प्रस्तुतार्थो-पयोग्येतत्किञ्चिदत्र निवेदितम् । वृषभाख्यानकाज्ज्ञेयः, शेषश्चरितविस्तरः ॥ ८२ ॥

व्याख्यातं सम्यक्त्वस्य पञ्चमं गुणद्वारमधुना क्रमप्राप्तं षष्ठं यतनाद्वारमुच्यते—

लोइयतित्थे उण ण्हाणदाणपेसवणपिंडहुणणाई ।
संकंतुवरागाइसु लोइयतवकरणमिचाई ॥ १७ ॥

'लोइयतित्थे' त्ति तीर्यतेऽनेनेति तीर्थं, तच्चेह द्रव्यतीर्थं नद्यादिसमभागरूपं, न भावतीर्थम्, अत एव लोके—जने साधु भवं वा लौकिकं तच्च तत्तीर्थं चेति तत्तथा तत्र, किमित्याह—स्नानदानप्रेषणपिण्डहवनादि, न कर्त्तव्यमिति शेषः, पुनःशब्दश्च विशेषणार्थः, तत एवं विशिनष्टि—'लौकिकतीर्थे' गङ्गाकुशावर्त्तकनकखलादिके धर्मार्थिना धर्मनिमित्तं स्नानादि न विधेयं, तत्र स्नानं—शरीरस्य शौचकरणं दानं—धिग्जातिभ्यो वितरणं प्रेषणं-अस्थ्यादेः प्रस्थापनं 'पिंड'त्ति अवयवमात्रेण समुदायस्य विवक्षितत्वात्पिण्डप्रदानं—मृतपित्रादिनिमित्तं पिण्डपातकरणं 'हुणणं' ति हवनं—वह्नौ घृतादिप्रक्षेपणं, आदिशब्दाद्विशिष्टयोगानुष्ठानतन्निवासादिग्रहः, कदा चेदं न कर्त्तव्यमित्याह—सङ्क्रान्तिश्च—उत्तरायणादि सं(उ)परागश्च—सूर्यचन्द्रमसोर्ग्रहणं तावादी येषां व्यतीपातादीनां ते तथा तेषु, अयमर्थः—लौकिकतीर्थे गत्वा सङ्क्रान्त्यादिषु स्नानादि न कर्त्तव्यं, यद्वा पृथगेव सम्बन्धः, लौकिकतीथ स्नानादि न कर्त्तव्यं, सङ्क्रान्त्यादिषु च यल्लौकिकैस्तिलदानादि क्रियते तन्न

कर्त्तव्यमिति शेषः, अयमेव चाभिप्रायो मूलवृत्तौ लक्ष्यते, 'हुणणाइ' त्ति आदिशब्देन सूतकादि-ग्रहणात्, तथा 'लौकिकतपःकरणं' वत्सद्वादश्यादिष्वनग्निपक्वभक्षणादि, न कर्त्तव्यमिति संबन्ध इति, आदि-शब्देन च-"पडिवन्नदंसणस्स य ण वंदिउं पणमिउं च कप्पंति। अन्नाइं चेइयाइं परतित्थियदेवयाइं च ॥ १ ॥ धम्मग्गिद्दिगवण्हिग अणाहसालातलायपत्तबंधे। पिप्पलअसंजयाणं पावारफलाइ गोदाणं ॥ २ ॥" इत्यादि यदुक्तं ग्रन्थान्तरे तदपि सर्वं गुरुलघ्वालोचने यथाऽन्येषां स्थिरीकरणप्रवृत्त्या मिथ्यात्वादिविषयं न भवति तथा पर्यालोच्य विधेयमिति सूचितम्, एवं च कुर्वता सम्यक्त्वयतनाऽऽराधिता भवतीति गाथाऽक्षरार्थः ॥ १७॥ व्याख्यातं यतनाद्वारं षष्ठं, सम्प्रत्यतिचारद्वारं सम्यक्त्वस्य सप्तममभिधीयते-

एत्थ य संका कंखा विइगिच्छा अन्नतित्थियपसंसा।
परतित्थिओवसेवा य पंच दूसंति सम्मत्तं ॥ १८ ॥

'अत्रे'ति सम्यक्त्वे चकारोऽनुक्तविशेषणसमुच्चये, ततो निश्चयतः प्रतिपतिते व्यवहारतो मलिनीकृते, किं ?-शङ्का काङ्क्षा विचिकित्साऽन्यतीर्थिकप्रशंसा परतीर्थिकोपसेवा च, एताः पञ्च भवन्तीतिशेषः, ज्ञाताश्च किं

कुर्वन्ति इत्याह–' दूषयन्ति ' विकृतिं नयन्त्यपनयन्ति वा सम्यक्त्वं, तत्र शङ्का–भगवदर्हत्प्रणीतात्यन्तगहनधर्मास्तिकायादिपदार्थेषु मतिदौर्बल्यात्सम्यगनवधार्यमाणेषु किमेवं स्यान्नैवमिति संशयकरणं, उक्तं हि–" संसयकरणं संका " सा तु देशसर्वभेदाद्द्विधा, देशशङ्का देशविषया, यथा किमयमात्माऽसङ्ख्येयप्रदेशोऽप्रदेशो वेति, सर्वशङ्का समस्तास्तिकायव्रात एव किमित्थं नेत्थं वेति, काङ्क्षा अन्यान्यसुगतादिप्रणीतदर्शनाभिलाषः, यथोक्तम्–" कंखा अन्नन्नदंसणग्गाहो " साऽपि तथैव द्विधा, देशकाङ्क्षा–एकदेशविषया, यथा शोभनं सौगतदर्शनमेकं, अत्र चित्तजयप्रतिपादनात्, तस्य च प्रधानमुक्त्युपायत्वादिति, सर्वकाङ्क्षा तु सर्वाण्येव कपिलकणभक्षाक्षपादादिमतान्यहिंसाप्रतिपादनपरत्वादिह लोके चात्यन्तिकक्लेशप्रतिपादकत्वात्सुन्दराणीत्यभिलाषः । ' विचिकित्सा ' युक्त्यागमोपपन्नेष्वर्थेषु सत्सु फलं प्रति संमोहो, यथा–किमस्य महतः सिकताकणकवलकल्पतपःक्लेशस्यायत्यां मम फलसम्पद्भविता न वेति, उभयथा हि कृषीबलादीनां क्रियाः दृश्यन्ते–फलवत्यो निष्फलाश्चेति, उक्तञ्च–"संतंमि विचिकिच्छा सिज्झेज्ज न मे अयं अट्ठो" न चेयं शङ्कैवेत्याशङ्कनीयं, सा हि सकलासकलपदार्थभाक्, तेन द्रव्यगुणविषया, इयं तु क्रियाविषयैव, अथवा ' विउगुच्छ ' त्ति विद्वज्जुगुप्सा, विद्वांसः–साधवो ज्ञातभवस्वरूपत्वेन

॥ ६० ॥

त्यक्तसर्वसङ्गास्तेषां जुगुप्सा–निन्दा, यथाऽस्नानतः प्रस्वेदजलोपचितबहुलमलगन्धवपुषोऽमी, को वा दोषः स्यादेतेषां यदि प्राशुकजलेनाङ्गक्षालनं कुर्युरिति । 'अन्यतीर्थिकप्रशंसे' ति अन्ये–परे सर्वज्ञप्रणीततीर्थवर्त्तिभ्यस्ते च ते तीर्थिकाश्च–शाक्यादयस्तेषां प्रशंसा–स्तुतिरिति विग्रहः, सा च यथा–पुण्यभाज एते शाक्यादयो दयालुत्वादित्यादि, उक्तञ्च–"परपासंडपसंसा सक्काइणमिह वण्णवाओ उ" । 'परतीर्थिकोपसेवा चे' ति परतीर्थिकाः–शाक्यादय एव तेषामुपसेवा–उपासना तत्पार्श्वगमनतद्वचनश्रवणतत्समीपावस्थानादिरूपा, तैः सह परिचय इति योऽर्थः, अत एव परपाषण्डसंस्तव इति संस्तवशब्देनान्यत्र परिचयो व्याख्यातः, यथोक्तम्–"तेहिं सह परिचयो जो स संथवो होइ नायव्वो ।" सम्यक्त्वातिचारत्वं च शङ्कादीनां चित्तमालिन्यजिनाविश्वासादिहेतुत्वतो भावनीयमिति गाथार्थः ॥ १८ ॥

अत्र च सूत्रानुपात्ता अपि शङ्कादिपदेषु मूलवृत्तौ प्रपञ्चितज्ञशिष्यानुग्रहाय दृष्टान्ताः सूचिताः, ते च सुखावगमाय सविस्तरा एव लिख्यन्ते, तत्र शङ्कायां तावज्ज्ञाताधर्मकथाप्रसिद्धगृहीतमयूराण्डकसार्थवाहपुत्रक-
११ थानकं कथ्यते—

इहैव जम्बूद्वीपे भारतक्षेत्रालङ्कारभूता चम्पा नगरी, तस्या उत्तरपूर्वस्यां दिशि सुरभिशीतलच्छायाविविधवनखण्डमण्डितं सर्वर्त्तुकप्रसवफलप्रचयकलितं सुभूमिभागाभिधानमुद्यानं, तदेकदेशवर्त्तिमालुकाकच्छनिवासिन्येका वनमयूरी बभूव, सा चान्यदा स्वकालक्रमोपचितं कललताधारमनुपहतमखण्डपाण्डुरमण्डकयुग्ममसूत, इतश्च तस्यामेव चम्पायां तदा जिनदत्तसागरदत्तपुत्रौ सहपांशुक्रीडितौ परस्परं मित्रत्वसंपन्नौ सार्थवाहसुतावभूतां, तौ च कदाचित् सुभूमिभागोद्यानमुद्यानश्रियमनुभवितुमशनपानखाद्यस्वाद्यधूपपुष्पगन्धादि समादाय गणिकया देवदत्तया परिगतौ समागतौ, तत्र च पुष्करिणीषु नानाविधभङ्गीभिर्जलक्रीडां विधाय देवदत्तया सार्द्धं कामभोगलालसौ चिरं स्थित्वा तस्यैवोद्यानस्य रम्यरम्यतरान् प्रदेशानवलोकयन्तौ तमेव मालुकाकक्षं प्रविविशतुः, ततश्च सा वनमयूरी तावालोक्य त्रस्तमानसा महतः केकारवान् कुर्वती ततो निष्क्रम्य तदनतिदूरवर्त्तिवृक्षशाखाधिरूढा सार्थवाहपुत्रौ मालुकाकक्षं चानिमेषया दृष्ट्याऽवलोकयन्ती तस्थौ, तौ तु तां वनमयूरीं तथा दृष्ट्वा परस्परं मन्त्रितवन्तौ—यथा भवितव्यमत्र केनचित्कारणेन येनागतमात्रावेवावां दृष्ट्वेयं वनशिखण्डिनी खण्डितेव महादुःखाभिभूता जाता, न चैतावतैव स्थिता, किन्तु त्रासवशविवशदृष्टिरितो

निर्गत्याऽऽवां कक्षां च निरीक्षयमाणाऽऽस्ते, तदलोकयावः कक्षान्तरं किमत्र कारणमित्यालोच्य सर्वतः कक्षान्तरं दृष्टवन्तौ तावद् यावदवलोकयांबभूवतुस्तदण्डकयुग्मं, गृहीत्वा च तत्त्वावागतौ निजवेश्म, समर्पितं च स्वस्वदासानामेकैकं तद्रक्षणार्थमनया बुद्ध्या, यथा निष्पन्नमेतन्मयूरयुग्ममावयोः क्रीडायै भविष्यति, तयोश्च सागरदत्तपुत्रः स्वगृहीतमयूराण्डके शङ्कां कृतवान् यथा किमिदं निष्पत्स्यते नवेति, शङ्कापरिगतश्च स नित्यमागत्यानेकाभिरुद्वर्त्तनादिभिस्तद्बाधिकाभिः प्रतिजागरणाभिः परिजागर्त्ति स्म, अन्तःसारपरीक्षणार्थं च तत्कर्णमूलमानीयानेकधा खलखलयति स्म, एवं च गच्छत्सु दिवसेषु तत्तथाऽननुकूलचेष्टाभिर्विशुष्कमालोक्य विषण्णः सागरदत्तपुत्रो गतश्च पश्चात्तापं, यथा—किमिदमित्थं मयोद्वर्त्तनादिभिः खेदितं ? । जिनदत्तपुत्रस्तु तत्र निःशङ्क एव नोद्वर्त्तनादि किञ्चित्कृतवान्, केवलं विधिना पालितवान्, अन्यदा च स्वकालक्रमेण निष्पन्नो मयूरपोतो दृष्टः तेन हृष्टमानसेनाकारितो मयूरपोषकः, सन्मानपुरस्सरं भणितश्च—यथाऽयं मयूरपोतो विशिष्टप्रायोग्यद्रव्यपरिपोषणाभिः शीघ्रमेव परिपुष्टो भवति नृत्तकलां च विशिष्टामभ्यस्यति तथा विधीयतां, तेनापि तद्वचनमनुमत्य गृहीतो मयूरपोतो नीतः स्वगृहं प्रारब्धः पोषयितुमनेकद्रव्योपचारैः शिक्षितश्च विविधभङ्गीभिर्लास्यलीलां तावद् यावदुन्मुक्तबालभावः परिपूर्णमानोन्मानप्रमाणो विचित्रगुरुकलाकलापोपेत

एकतालेनैवानेकप्रकारनृत्यकारी संपन्नः, दृष्ट्वा च तं तथोपात्तकलाकलापोपशोभितं कलापिनं स मयूरपोषको नीत्वा जिनदत्तपुत्रपार्श्वे समर्पितवानेनं, तेनापि तं तथाविधमालोक्य हर्षप्रकर्षोद्भिन्नरोमाञ्चकञ्चुकावच्छादितवपुषा दत्तं विपुलं तन्मनोमोददायि तस्मै पारितोषिकं, संगोपितश्च स्वमयूरः, तेन च स्थानस्थानप्रवर्त्तितापूर्वापूर्वलास्यलीलाविनोदेन हृतहृदयीकृतः समस्तश्चम्पानगरीलोको जिनदत्तसुतेनेति । शङ्काभावाभावाभ्यां दोषगुणौ परिभाव्य विषयशङ्का परिहार्येति, तथा चोक्तम्–"जिणवरभासियभावेसु भावसच्चेसु भावओ मइमं । नो कुज्जा संदेहं संदेहोऽणत्थहेउत्ति ॥ १ ॥ निस्संदेहत्तं पुण गुणहेऊ जं तहा य तं कज्जं । इत्थं दो सेट्ठिसुया अंडयगाही उयाहरणं ॥ २ ॥"

काङ्क्षायां–कुशस्थलाभिधाननगरे कुशध्वजो राजा, कुशाग्रबुद्धिस्तस्यामात्यः, अन्यदा च राज्ञः केनापि विपरीतशिक्षावश्वौ प्राभृतमानीतौ, न च कथितं यथा विपरीतशिक्षावेताविति, ततः कौतुकेन राजाऽमात्यौ तावारुह्याश्ववाहनिकायां निर्गतौ, ताभ्यामपहृत्यारण्यं प्रवेशितौ, निर्विण्णौ च नृपमन्त्रिणौ यावद्वल्गां तौ मुमुचतुस्तावत्स्थितावश्वौ, तत उत्तीर्णमात्राभ्यामेव ताभ्यामुच्छोटिते तत्पर्याणे पतितावेतौ तुरंगमौ, नरनाथमहत्तमौ च बुभुक्षापिपासापीड्यमानौ जलान्वेषणाय दिशोऽवलोकयन्तौ ददृशतुर्बलाकाः, तदनुसारप्रवृत्तौ च प्राप्तवन्तौ विमलजलापूर्णसरो-

वरं, तत्र कृतस्नानादिव्यापारौ विश्रम्य क्षणमात्रं समासन्नतरुवरेभ्यः फलान्यादाय भुक्त्वा च पत्रशय्यायां सुप्तौ, द्वितीयदिने च ततः स्थानादुत्थितौ स्वनगराभिमुखं व्रजन्तौ प्राप्तौ तुरगपदानुसारसमागतसैनिकलोकैः नीतौ कियद्भिरपि दिवसैः स्वनगरम् । ततो राज्ञा क्षुधा बाध्यमानेन कारयित्वा सर्वमाहारजातं प्रेक्षणकदृष्टान्तेन मनसिकृतेन भुक्तमाकण्ठं, तेन चोत्पादिता महती पिपासा जनितोऽन्तर्दाहः कृता शूलव्यथा, ततः समासन्नलोकेन तदुपशमनाय विधीयमानेऽप्यग्निखेदादौ निरुपक्रमणीयसंघटितदोषैः क्षपितमस्यायुः, अभाजनीबभूवैहलौकिकसुखानामेष आकाङ्क्षादोषेण, अमात्यस्तु वमनविरेकादिकरणरूपां सद्वैद्योपदेशेन विधाय कायशुद्धिं तत्कालानुरूपलब्धाहारादिक्रमेणोपबृंह्य शरीरमाकाङ्क्षाविमुक्ताशयः समस्तसुखपरम्परापात्रमभूत्, एवं धर्मविषयेऽपरापरदर्शनाकाङ्क्षां कुर्वाणः प्राणी तत्साध्यसुदेवत्वादिसुखानि नाप्नोति, प्रत्युत मिथ्यात्वमुपगतो नारकादिभवपरम्परामासादयति, अत इयमपि न कार्येति ।

विचिकित्सादिपदेषु यथादृष्टान्येवोदाहरणानि प्रदर्श्यन्ते, तत्र विचिकित्सायाम्—सावत्थीए नयरीए जिणदत्तो नाम सावओ अहिगयजीवाजीवो उवलद्धपुण्णपावो दुवालसविहसावयधम्मविहिसमुवेओ आगासचारी य, अण्णया णं-

दीसरवरदीवं जिणमहिमदंसणत्थं गओ तहिं, सो य देवपरिमलेन वासिओ जिणाण पूयं पेच्छंतो जत्तमहिमाव-
साणे सपुरं समागओ, तत्थ य तस्स महेसरदत्तो णाम मित्तो चिट्ठइ, तस्स मिलिओ तेण पुट्ठो ।—किमेरिसो अज्ज
तव परिमलो अपुव्वो देवलोयतुल्लो ?, तओ तेण परिकहियं—जहाऽहं नंदीसरवरचेइयपूयं दट्ठुं गओ, तत्थेस देव-
परिमलो मे लग्गो, महेसरदत्तो भणइ—कहं तत्थ गओऽसि ?, जिणदत्तो भणइ—आगासगामिणीए विज्जाए, महे-
सरो भणइ—मम देहि विज्जं, पसायं कुरु, जेणाहमवि आगासेण गच्छामि, सावएण भणियं—पयच्छामि, किं तु
दुरसाहा, तेण भणियं—साहिस्सामि, तओ साहणोवाओ कहिओ, जहा—किण्हपक्खचाउद्दसीए मसाणे गंतूण चउ-
प्पायं सिक्कगं काऊण उवरिं रुक्खे बज्झइ, हेट्ठाऽय अंगारखाइया कीरइ, पच्छा सिक्कगे आरुहिय मंतं अट्ठसय-
वारा परिजविय पाओ सिक्कगस्स छिज्जइ, एवं मंतं पढिउं सव्वे छिंदियव्वा, तओ आगासेण गम्मइ, मंतो य से
दिण्णो, पडिवण्णं च तेण, अण्णया किण्हचउद्दसीए सामग्गिं काऊण गओ मसाणभूमिं, तओ खाइरकट्ठचिचि(चिति)-
ओ उवरिं रुक्खे सिक्कगं बंधेऊण ठिओ, पढइ अट्ठसयवारं मंतं, चिंतेइ य,—एवं चत्तारि सिक्कगपाया छिंदियव्वा, तओ
ण याणिमो सिज्झिहिइ णवा ?, इय चिंतिऊण उत्तिण्णो, पुणोऽवि चिंतिउं पवत्तो—दत्तो मम सावएण उवरोहेण

मंतो, बहूणं च दिणाणं चाउद्दसी आगमिस्सइ, तओ पुणोऽवि आरुहिऊण सिक्कगं हेट्ठओ पेक्खइ खाइरअंगाराचिइं, तओ उत्तिण्णो, एवं जाव चडउत्तरं करेइ ताव इओ दक्खेण चोरेण राइणो अंतेउरे खत्तं दाऊण रयणकरंडिया पाविया, गेण्हिउं णिग्गओ, कुढिया पिट्ठओ लग्गा, तओ सो ताण भएण तंमि चेव उज्जाणे पविट्ठो, कुढिएहिं चिंतियं–सो एस णासिही मारेस्सइ वा, तओ उज्जाणं वेढिऊण चिट्ठामि, पुणो पच्चूसे गहिस्सामि, सोऽवि तं णाउं उज्जाणा परिसक्कइ जाव जलंतो दिट्ठो अग्गी मणुस्सो य उत्तरचडं करेमाणो, चिंतिउं पवत्तो–किमेयंति, तओ तस्स समीवे गओ, पुट्ठं च–कओ तुमं किमत्थं वाऽऽगओ ?, तेण भणियं–अहं एयाओ णयराओ विज्जासाहणजुओ विज्जं साहेउं, चोरेण भणियं–एगचित्ताणं णिप्पकंपाणं विज्जा सिज्झइ, ण उण उत्तरचडाए, तेण भणियं–सच्चमेयं, किन्तु आरूढो संतो बीहेमि किं विज्जा सिज्झिहिति नवत्ति, चोरेण भणियं–केण विज्जासाहणो मंतो दिण्णो ?, तेण भणियं–सावगेण, सो य मित्तो मज्झं, चिंतियं च तेण–सावगा कीडियाएवि पावं णेच्छंति, अओ सच्चमेव, एस साहेउं न सक्कइ, तओ तेण भणियं–अहं साहेमि, मम साहणोवायं मंतं च पयच्छ, अहं तुज्झ रयणकरंडियं देमि, तेण पडिवण्णं–एवं होउ, माहेसरो वितिगिच्छासमावण्णो चिंतेइ–इमा विज्जा सिज्झेज्ज ण वा ?, एसा उ पच्चक्खफलंति,

तओ समप्पिया रयणकरंडिया, तओ चोरेण दढचित्तेण विज्जा साहिया, साहेउं आगासेण उप्पइओ, इयरोऽवि रायपुरिसेहिं पभाए गहिओ सलोत्तो य पाविओ रण्णो निवेइओ, रण्णा वज्झो आणत्तो, सूलीए आरोविउं णीओ, तओ विज्जासिद्धेण उवओगो दिण्णो—किं मम गुरुणो वट्टइ ?, जाव पेच्छइ वज्झं णिज्जंतं, तओ णयरस्सुवरिं सिलं विउव्वइ, आगासत्थो लोयं भणइ—एस णिद्दोसो, पूएऊण मुक्को, दोऽवि सड्ढा जाया, एए वितिगिच्छाए दोसा तम्हा निव्वितिगिंछेण होयव्वं ।

अहवा विउगुच्छत्ति वक्खायं, तत्थोदाहरणं—पच्चंतविसए सालिग्गामो णाम गामो, तत्थ धणमित्तो णाम सावगो वसइ, धणसिरी णाम धूया, तीसे विवाहे साहुणो आगया, तओ तेण हरिसं गएण णिमंतिया, वेलाकाले आगयाण साहूणं सा धूया पिउणा भणिया—पुत्ति! तुमं चेव साहुणो पडिलाहेहि, तओ सा मंडिया विहूसिया पडिलाभेइ जाव जेट्ठासाढदिणेसु साहूणं जल्लपरसेवेण अहिओ गंधो जाओ, तओ सा अग्घाइऊण चिंतेइ—अहो अणवज्जो भट्टारएहिं धम्मो देसिओ, जइ पुण इमे साहुणो फासुएण पाणिएण ण्हाएज्जा तओ को दोसो होंतो ?, तओ सा इहलोए कामभोए भुंजिऊण तस्स ठाणस्स अणालोइयापडिक्कंता कालं काऊण राय-

गिहे णगरे गणिया पोट्टे उववण्णा, गब्भगयाए चेव तीए गणियाए अरई उप्पण्णा, तओ अणाए अणेगाणि गब्भ-पाडणाणि कारिया, तहावि आउयबलियत्तणेण ठिया जाव जाया, तओ तीए दासचेडीए समप्पिया जहा छड्डेऊण आगच्छ, जत्थ य सा तीए छड्डिया सो पएसो असुइगंधेण अईव वासिओ, तंमि णगरे तत्थ काले भगवं वीरो समोसरिओ, सेणिओ य तं णाउं सव्वबलेण वंदिउं गच्छइ, जाव अग्गिमसेण्णं तीए गंधमसहमाणं अण्णमग्गेण लग्गं, ताहे रण्णा पुट्ठं–किमेस लोओ अण्णपहेण गच्छइ ?, तओ एगेण भणियं–जहेत्थ दारिया अईगंधजुत्ता, तीए गन्धमसहंतो अण्णमग्गेण गच्छइ, तओ रण्णा कुतूहलेण गंतूण दिट्ठा, चिंतियं चऽणेणं–अहो एयाए रूवसंपया, गंधो पुण एरिसो, ता गंतूण भगवंतं पुच्छिस्सं–कस्स कम्मस्स एरिसं फलं ?, तओ गंतुं भगवंतं वंदइ परमेण विणएण, वंदिउं उवविट्ठो पुच्छइ--भयवं ! किं ताए पुव्वभवे कयं जेण रूवसंपओववेयावि दु-ग्गंधा ?, तओ तीए तिलोयणाहेण पुव्वभवो कहिओ, वेइयं च संपयं कम्मं, तओ तेण भणियं–तीसे का गई भविस्सइ ?, सावय ! सा तुज्झ पहाणभज्जा भविस्सइ अट्ठ संवच्छराणि, कहमहं जाणिज्जा ?, तओ वीरेण भणियं–जा तुमं पासएहिं जिणिउं पट्टीए वत्थं दाउं वाहिस्सइ तं जाणेज्जाहि

जहेसा सा, तओ धम्मं सोउं भगवंतं वंदित्ता नगरं पविट्ठो, साऽवि गयगंधा जाया, तओ सा आभीरेहिं कारणा- गएहिं गहिया, रायगिहं णेऊण भज्जाए समप्पिया, तीए धीयत्ताए पडिवण्णा, मयहरपुत्तेणं सुहेण परिपालिया जोव्वणत्था जाया, रायगिहे कत्तियपुन्निमाए कोमुइचारो णाडगणट्टियाहिं पेच्छणगाणि भवन्ति, तओ सा दारिया माउए समं पेच्छया आगया, तओ मयहरभज्जाए समं एक्कंमि पेच्छणए पेच्छंती चिट्ठइ, तओ सेणिओ राया अभएण समं पच्छण्णरूवो तत्थेवागओ, तओ तीए रूवाइसयं दट्ठुं अंगफासं च अणुहविय अज्झोववण्णो—कहं एसा मम भविस्सइत्ति, छलेण पत्थिओ कामो, तीसे उत्तरीए णामंकियं मुद्दं बंधेऊण भणइ—मम केणावि मुद्दिया हरिया, अओ अभयकुमारेण पच्चक्खेण होऊण मणुस्सा सद्दाविया, जहा केणइ राइणो मुद्दा गहिया, दारेसु चिट्ठह, एक्केक्कं माणुसं पासिऊण मेल्लह, तेहिं तहेव सव्वं कयं, जाव तीए दारियाए ओढणए दिट्ठा, राइणो कहियं—चोरित्ति गहिया, तेणावि अंतेउरे णेयाविया, विभूईए परिणीया य, अईव इट्ठा जाया, कालेण पासएहिं रमंति, जो य जिप्पइ सो पिट्ठीए वाहेयव्वो, तओ तीए राया जिओ, तओ सेसराणियाओ जइ रायाणं जिणंति तओ पिट्ठीए पोत्तं दाउं उवरिं हत्थं देंति, इयरी पुण पोत्तं दाऊण विलग्गा, रण्णा सामिवयणं सरिऊण हसियं, सा विलक्खि-

या पुच्छइ—किं तए हसियं ?, राइणा भणियं—न किंचि, तहावि सा णिब्बंधेण पुच्छिउं पवत्ता, तओ रण्णा सव्वं पुव्वभवाइयं जिणभणियं कहियं, तओ सा संवेगमावण्णा रायं विण्णवेइ—मुंचाहि दिक्खं पवज्जामि, तओ राइणा मुक्का पव्वइया य। अओ दुगुंछाए विवागं जाणिऊण ण कायव्वा दुगुंछत्ति।

परपाषण्डप्रशंसायां शकटालकथानकं यथा—पाडलिपुत्ते नयरे कप्पगवंसे णंदवंसेण सममणुवत्तमाणे नवमे नंदंमि रज्जधुरं धारयंते कप्पगवंसपसूओ चेव सयडालो नाम मंती, तस्स य पुव्वं सिरिवच्छोत्ति नामं आसि, पच्छा पुत्तसए समुप्पण्णे राइणा सयडालोत्ति नामं कयं, पसरियसयसाहोत्तिकाउं, तस्स य चायभोयदक्खिण्णला-वण्णाइगुणेहिं पुत्तसयस्सवि पहाणतमो थूलभद्दो नाम पुत्तो सिरिओ य सव्वकणिट्ठो, इओ य—तत्थेव नयरे वररुई नाम धिज्जाइओ, सो य नवनवेण अट्ठुत्तरसएण सिलोगाण नंदरायं ओलग्गइ, तुट्ठोऽवि राया न किंचि से देइ, केवलं सयडालमुहमालोएइ, सो य मिच्छत्तंति काउं न पसंसइ, तओ वररुइणा तमट्ठं जाणिऊण सयडालभज्जा ओलग्गिया, पुच्छिओ तीए, कहिओ तेण सब्भावो, ताहे तीए कहिंचि पत्थावे भणिओ भत्ता—कीस तुमं वररुइस्स कव्वं नरिंदपुरओ न पसंसासि ?, भणियं—कहं मिच्छत्तं पसंसेमि, ? तीए भणियं—उवरोहसीला खु महापुरिसा

हुंति, भावदोसो हु वज्जियव्वो, न य अणूवि सो तुज्झ अत्थित्ति पसंसेज्जसुत्ति, तहावि नेच्छइ पसंसिउं, तओ अण्णदियहंमि पुणो भणिओ, ताहे पुणो २ महिलाए भणिज्जमाणेण अण्णया राइणो पुरओ पढंतस्स वररुइणो भणियं मंतिणा—अहो सुभासियंति, तओ राइणा दीणाराण अट्ठसयं दिण्णं, एवं चेव दिणे २ दाउमाढत्तो राया, तओ मंतिणा चिंतियं—निट्ठिही रायकोसो एवंविहवएण, ता करेमि किंचि उवायं, तओ नंदं भणइ—भट्टारगा ! किं तुब्भे एयस्स देह ?, तेण भणियं—तुमे पसंसिओत्ति, सो भणइ—अहं पसंसामि लोइयकव्वाणि अविणट्ठाणि पढइ, राया भणइ—कहं लोइयकव्वाणि एस पढइ ?, सयंकयकव्वपाढगो खु एसो, सयडालेण भणियं—मम धूयाओऽवि जओ पढंति, किमंग पुण अण्णो लोओ ?, तस्स य मंतिणो सत्त धूयाओ, तंजहा—जक्खिणी १ जक्खदिण्णा २ भूइणी ३ भूयदिण्णा ४ सेणा ५ रेणा ६ वेणा ७, तासिं च पढमा एक्कसंधिया एक्कवाराए सुयं सिलोगसयंपि गिण्हइ-बीया दुसंधिया एवं जाव सत्तमा सत्तवाराहिं सुयं सिलोगसयंपि गेण्हइ, तओ राइणो पच्चायणत्थं अण्णदियहंमि कय, संकेयाओ अंतेउरे जवणियंतरियाओ धरियाओ सत्तवि कण्णगा, समागओ वररुई, पढियं सिलोगट्ठसयं, निसुयं ताहिं, भणियं मंतिणा—देव ! जइ तुब्भे आइसह तो नियधूयाओऽवि हक्कारिऊण एयं पढावेमि, राइणा भणियं—तुरियं

हक्कारेत्ता पढावेसु, तओ जहाऽऽणवेइ देवोत्ति भणिऊण मंतिणा आणत्तो अंतेउरमहल्लओ, जहा–भद्दमुह ! एत्थ कहिंपि जइ मह धूयाओ आगयाओ संति ता सिग्घं रायसमीवमाणेसु,एवं करेमित्ति भणिऊण गओ सो अंतेउरं,दिट्ठाओ तत्थ ताओ, गहिऊणं समागओ निवसमीवं, पायवडणुट्ठियाओ य नरवइस्स उवविट्ठा पिउसमीवे, भणिया जक्खिणी मंतिणा–वच्छे ! जमेवंविहवण्णत्थोववेयं सिलोगट्ठसयं अज्ज वररुइणा पढियं तं तुह एइ ?, तीए भणियं–आमं, तो खाइ सुणावेसु रायाणं, तओ अक्खलियललियवाणीए सुणाविओ राया, जक्खादिण्णाए दोण्णि परिवाडीओ जायाओ, तओ सावि तहेव भणिया अमच्चेण, तीएवि तहेव सुणाविओ ताव जाव सत्तहिंवात्ति, तओ रुट्ठेण राइणा वररुइस्स दाणं वारियं, पच्छा सो ते दीणारे रत्तीए गंगाए नईए जंतेण धरिउं पहाए सयललोयपच्चक्खं गंगं थोऊण पाएण जंतमक्कमिऊण उच्छलिए दीणारे गंगा देइत्ति भणिऊणं तो गेण्हइ, तहाविहपवंचेण कओ सयलोवि लोओ हयहियओ, कालंतरे य निसुयं राइणा, तओ भणिओ सयडालो–जइ लोइयकव्वाणि पढइ वररुई तो कहं गंगा तुट्ठा दीणारे से देइ ?, तओ पढियं मंतिणा–" आडंबरस्स पाओ, पाओ डंभस्स विज्जया पाओ । गलगज्जियस्स
११ पाओ, हिंडइ धुत्तो चउप्पाओ ॥ १ ॥ " राइणा भणियं–जइ एवं तो किमेस सव्वोऽपि जणो तग्गुणगहणवावडो

अणवरयं चिट्ठइ ?, मंतिणा भणियं—देव ! अविण्णायपरमत्थो जणो, जइ पुण न एवं तो तत्थेव गंतुं पेच्छामो कोउयंति, तओ तमत्थं पडिवज्जिऊण राइणा भणियं—पभाए चेव गमिस्सामो, एवं कीरउत्ति भणिऊण उट्ठिओ मंती, गओ नियगेहं, वियालवेलाए आइट्ठो पच्चइयपुरिसो, जहा—गंतूण गंगाए अलक्खिओ अच्छिऊण जं किंचि वररुई ठवेइ तं आणेज्जसुत्ति, तेणवि संपाडियं जहाइट्ठं मंतिणो, पहाया रयणी, कयगोसकायव्वो गओ मंती राउलं, रायवि समं मंतिणा गओ तद्दंसणत्थं, गंगं थुणंतो दिट्ठो वररुई, थए निव्वत्ते मग्गिउं पयट्टो जंतं पाएण हत्थेण य, णत्थि, तओ विलक्खो जाओ, एत्थंतरंमि सयडालेणं जइ गंगा न देइ तो अहं देमि गिण्हसुत्ति भणिऊण कड्ढिया दीणारपोत्ती, दंसिऊण राइणो समप्पिया तस्स, सोऽवि ओहामणाए नियमुहं दंसिउमपारयंतो नीहरिओ तट्ठाणाओ, पओसमावण्णो मंतिणो उवरिं, छिड्डाणि से मग्गइ, पयट्टो तस्स दासिं ओलग्गिउं, तीसे सयासे पुच्छइ निच्चमेव तग्गिहव-इयरं, सावि मुद्धयाए सव्वं कहेइ, अण्णया सिरियस्स विवाहूसवे रण्णो ढोइयव्वंति बुद्धीए तग्गेहे आओगो सज्जिज्जइ, तओ तीए साहियं वररुइणो, तेणवि लद्धं छिद्दंति चिंतियं, तेण चेडरूवाणे मोयगेहिं उवयारिऊणाढत्ताणि पढावेउं, "एहु लोउ नवि जाणई जं सयडालु करेसइ। राय नंदु मारेविउ सिरियउ रज्जि ठवेसइ ॥ १ ॥" तं च परंपराए सुयं राइणा,

परिक्खावियं पव्वइयपुरिसेण मंतिगिहं जाव दिट्ठाइं आओगाइं सज्जिज्जमाणाइं, तओ कुविओ राया, आगओ सयडालो, जत्तो २ सयडालो पाएसु पडइ तत्तो २ परम्मुहो ठाइ राया, ताहे गओ घरं मंती, तथा व सिरिओ नंदस्स पडिहारो, सो हक्कारिऊण भणिओ—वच्छ ! राया तेण विज्जाइएण वुग्गाहिओ अम्होवरिं, तो जाव कुलक्खयं न करेइ ताव कुलरक्खानिमित्तं तुमं रण्णो पायपडियं ममं मारेसु, सो नेच्छइ, सयडालो भणइ—अहं तालउडं विसं भक्खिहामि पायपडणसमए, तओ तुमं घायं करेज्जसुत्ति, तेण पडिस्सुयं, कयं च तहेव, एवं च सयडालेण अवि जीवियं परिच्चत्तं, न परतित्थियपसंसा कया, एवमण्णेणऽवि न कायव्वत्ति ।

परतीर्थिकोपसेवायां तु सौराष्ट्रश्रावकोपदर्शनं, तत्कथानकं च मिथ्यात्वोत्पत्तिद्वारे संसर्गजमिथ्यात्वेऽभिहितमिति नोच्यते । ननु अन्येऽप्यनुपबृंहणादयोऽतिचारभेदाः सन्त्येव, यदाह—" संथवमाई व नायव्वे " त्यादिशब्दं व्याख्यानयन्तः पूज्यपादाः—" अण्णेवि य अइयारा आईसद्देण सूइया एत्थ । साहम्मिअणुववूहणमाथिरीकरणाइया ते उ ॥ १ ॥ " तत्किमत्र सूत्रे नियतसङ्ख्याप्रतिपादकं पञ्चशब्दोपादानं ?, सत्यमुपलक्षणत्वाददोषः, किञ्च 'दूसंति सम्मत्त' मिति विशेषणेनेदं लक्ष्यते—सम्यक्त्वदूषकत्वेन शङ्कादयोऽतिचाराः, ततश्चान्येऽप्यनुपबृंहणादयो ये

परिणामविशेषाः सम्यक्त्वं दूषयन्ति तेऽनुक्ता अप्येतज्जातीयकत्वादाक्षिप्ताः, न चैते न सम्यक्त्वदूषकाः, यथाऽऽहुः पूज्यपादाः—" नो खलु अप्परिवाडिए निच्छयओऽमइलिए व सम्मत्ते । होइ तओ परिणामो जत्तो अणबूहणाईया ॥ १ ॥ " अत एषामप्युदाहरणानि श्रोतॄणां सुखावगमाय दर्शनीयानि, तानि च यद्यपि साधर्म्यवैधर्म्यभेदाद् द्विधा संभवन्ति तथाऽपि मूलवृत्तिकृता 'उपबृंहणायां श्रेणिकराजा स्थिरीकरणे आर्याषाढो वात्सल्ये वज्रस्वामी प्रभावनायां विष्णुकुमारादयो दृष्टान्ता यथायोगमभ्यूह्य वाच्या' इत्युक्तमतो मयाऽपि तान्येव प्रपञ्च्यन्ते, अत्र चानुपबृंहणं नामोपबृंहणाया अकरणस्वभावम्, उपबृंहणा च ज्ञानदर्शनादिगुणान्वितानां सुलब्धजन्मानो यूयं युक्तं च भवादृशामिदमित्यादिवचोभिस्तद्गुणोत्कीर्त्तनरूपा, तस्यां श्रेणिको निदर्शनं, यत उपबृंहितोऽसौ देवादिभिः सद्भूतगुणश्लाघया, अथवा श्रेणिकेनोपबृंहणा संजयसाधोर्या कृता सा दृष्टान्ततया वाच्या, यतस्तत्कथानकमेवम्—

पुरा मगधजनपदे राजगृहनगरस्वामी चतुरङ्गयूथिनीबलोद्दलितनिखिलारातिचक्रः श्रेणिकनामा नृपतिरासीत्, स चान्यदाऽश्ववाहनिकायां निर्गतो विकसितविविधकुसुमसमूहावच्छादितानेकद्रुमलतोपशोभिते समुत्पतन्निपतन्नानाविधविहगावलीविराजिते मण्डिकुक्षिनाम्न्युद्याने तरुमूलव्यवस्थितमसमशमसमाधिनिषण्णमानसं परित्य-

क्तनिखिलपापस्थानं तपस्विनमेकमद्राक्षीत्, दृष्ट्वा च तमसौ अहो ! अपूर्वा काचिदेतस्य रूपलक्ष्मीः अनन्यसमाना सौम्यता असाधारणा क्षान्तिः अनन्यतुल्या निःसङ्गतेत्यादि चिन्तयन् परं विस्मयमगात्, विस्मितचित्तश्च नृपतिस्तदन्तिकमागत्य प्रदक्षिणाकरणपूर्वमभिवन्द्यानतिदूरदेशविहितासनपरिग्रहो विनयविरचिताञ्जलिपुटस्तमवोचत, यथा-भगवन् ! भवान् किमिति तरुण एव विषयसौख्योपभोगकाले विशिष्टरूपविग्रहोऽप्यविग्रहः सकलभोगाङ्गपरित्यागसुस्थितं व्रतं कर्त्तुमारब्धवान् ? इति ज्ञातुमिच्छति सकौतुकं नश्चेतः, तत्कथ्यतां यदीह नातिबाधकं स्वाध्यायादियोगानामित्युक्तः स मुनिस्तमुवाच—महाराज ! श्रूयतां यदि कौतुकं, अहमनाथतादुःखदुःखितो नानाविधारातिभिः पराभूयमानस्तथाविधं कमपि माभीप्रदातारमपरमपश्यन्नत्यन्तनिर्विण्णो व्रतं कर्त्तुमारब्धवान्, एतच्चाकर्ण्य किञ्चित्सप्रहासवदनः श्रेणिकोऽवदत्—भगवन् ! एवंविधविशिष्टाऽऽकृत्युपलक्ष्यमाणगुणवत्त्ववशीकृताशेषसम्पदोऽपि तव कथमनाथत्वं ?, यतो "यत्राकृतिस्तत्र गुणा वसन्ती"ति लोकप्रवादः, तथा "सूरे त्यागिनि विदुषि च वसति जनः स च जनाद्गुणीभवति । गुणवति धनं धनाच्छ्रीः श्रीमत्याज्ञा ततो राज्यम् ॥ १ ॥" एवंविधश्चान्यजनस्यापि नाथो भवति, यदि चानाथतामात्रमेव प्रव्रज्या-

प्रतिपत्तिहेतुस्तदाऽहमेव नाथो भवामि भवतः, मयि च नाथे न कश्चित्तव पराभवविधाता, अतो निराकुल एव विषयसुखमनुभव, इत्युक्तवति राजनि मुनिरवादीत्—राजन्! शौर्यौदार्यादिगुणसूचकाकृतिमात्रेणैव न नाथैर्भूयते, नापि स्वयमेवानाथो भवान् मम नाथवत्तां कर्तुं शक्नोति, न च त्वयि समाश्रितेऽप्यमी अरातयो मम पृष्ठं मुञ्चन्ति, अतः कथं निराकुलो विषयसुखमनुभवामि?, इत्युक्ते मुनिना नृपतिराह—भदन्त! आस्तां तावदपरम्, एतावन्मात्रं पृच्छामि, अहमत्र चतुरङ्गबलकलितराज्यसम्पत्समध्यासितोऽपि प्रतापवानमितानेकसामन्तोऽप्यवदलितवैरिनिकरोऽप्यप्रतिहताज्ञोऽपि सम्पद्यमानमानसाभीष्टपञ्चविधविषयसौख्योऽपि कथमनाथः?, कथय, मुनिराह—नरनाथ! यथाऽनाथता मया विवक्षिता न तादृशी त्वया परिभाविता, मया हि स्वानुभूतानाथत्वविवक्षयेयमुपदर्श्यते, तथाहि—पुरा कौशाम्ब्यां प्रभूतधनसञ्चयः पिता मे बभूव, तत्पुत्रश्चाहं संजयाभिधानोऽतीव प्राणप्रियः पितुरभूवं, अन्यदा च ममाऽऽकस्मिको जनितसर्वाङ्गीणदाघवेदनोऽक्षिकुक्षिपर्शुकासु गाढशूलव्यथाप्रवर्त्तकस्तन्त्रमन्त्रमूलिकादिभिरपि सुदुर्वारो महाव्याधिरुदभूत्, तदभिभूतस्य च मम प्रगुणीकरणार्थमाहूताः पित्राऽनेके चिकित्साशास्त्रविशारदा वैद्या मन्त्रतन्त्रज्योतिष्कादिविदोऽन्ये च बहवो लोकाः, प्रारब्धास्तैरात्मीयात्मीयाश्चिकित्साः, न च स्वल्पोऽपि मे ताभिः प्रतीकारः संपन्नः, पिता च मे यः ॥ ६९ ॥

कश्चिदेनं प्रगुणीकरोति तस्य सकलमेव स्वहस्तेन स्वगृहसारं प्रयच्छामीति प्रतिपादयन् माता च मम दुःखदुःखिता हा वत्स! कदा प्रगुणो भविष्यसीत्यादि विलपन्ती भ्रातरश्च ज्येष्ठकनिष्ठा नानाविधान् अङ्गसंबाधनाद्युपचारान् विरचयन्तः भार्या च हा नाथ! प्राणेभ्योऽपि प्रियतम! किमेतत्ते जातमित्यादि प्रलापान् कुर्वन्ती अन्योऽपि च स्वजनमित्रदासीदासादिपरिकरो गाढं मद्दुःखदुःखितात्मा क्षणमात्रमपि मत्सकाशममुञ्चन् न तिलतुषमात्रमपि दुःखमुपहृतवान्, इत्थं चानाथतादुःखदुःखितस्य मे न कश्चित् किञ्चित्परित्राणं कृतवान्, ततोऽहं चिन्तयामास—तीव्रगाढव्याधिवेदनाभिभूतः खलु अहमिदानीं, न चेहैवेयं मे, किन्त्वन्यत्रापि नरकादिभवे विचित्रवेदना अनुभूतवान्, न चैतत्पीडितस्य माभीप्रदाता कश्चित्संभाव्यते, एतन्मूलं च मेऽमी दुर्वाराः कषायारातयो, न च ममैवैवं, किन्तु सकलस्यापि संसारिणो जीवराशेः, अतो यदि कथञ्चिदितो विमुच्येयं ततः परित्यक्तसकलसावद्यः स्वस्य परस्य च नाथताहेतुं व्रतं कषायारातिदर्पापहं चरिष्यामि, एवं च चिन्तयतः परिगलन्त्यां रात्रौ क्षयं गता मे वेदना, ततश्च प्रभातसमये विहिततदुचितकर्तव्य आपृच्छ्य पितृप्रमुखं बान्धवजनं परित्यक्तसकलपापस्थानोऽनगारतां प्रपन्नः, तद् भो राजन्! इदमत्र तात्पर्यं-संसारिणां जीवानामनेकभवपरिवर्तनमाखिन्नानां शारीरमानसानेकदुःखसम्पातपीडि-

तानां नाम न कश्चित्परित्राणहेतुः मुक्त्वा धर्मम्, अतो मयाऽयं समाश्रित इति, श्रुत्वा च श्रेणिकः प्रहृष्टचेतास्तमुपबृं- हितवान्-भदन्त ! सत्यमनाथत्वमुपदर्शितं भवता, सुलब्धं हि भवतो मानुषं जन्म, येनैवं सकलमपि जगदनाथं विज्ञाय परमनाथः कषायारातिदर्पोच्छेदकारी निःशेषशारीरमानसदुःखनिराकरणदक्षो धर्मः समाश्रितः, इत्याद्युपबृंह्याभिवन्द्य च यो मया प्रश्नविधानेन भवतां स्वाध्यायविघ्नः कृतः स क्षमणीय इत्यभिधाय स्वाश्रयं जगाम, यथा च श्रेणिकेन तस्योपबृंहणा कृता तथाऽन्येनापि कार्या, यो न करोति सोऽतिचरति सम्य- क्त्वमिति प्रस्तुतार्थयोजनेति । इयं चोत्तरत्रापि योजनीयेति, अस्थिरीकरणमपि स्थिरीकरणस्याकरणरूपं, स्थिरीकरणं चाभ्युपगतधर्मानुष्ठानं प्रति विषीदतां स्थैर्यापादानमभिधीयते, तत्र चार्याषाढसूरिः स्वशिष्यस्थिरीकृतो दृष्टान्तः, तत्कथा चोत्तराध्ययनबृहद्वृत्तितो यथादृष्टैव लिख्यते-

अत्थि वच्छाभूमीए अज्जासाढा नामायरिया बहुस्सुया बहुसीसपरिवारा य, तेसिं गच्छे जो कालं करेति तं णिज्जावंति ते भत्तपच्चक्खाणाइणा, तओ बहवे णिज्जामिया, अण्णया एगो अप्पणतो सीसो आयरतरेण भणितो- देवलोगाओ आगंतुं मम दरिसणं देज्जासु, ण य सो आगतो वक्खित्तचित्तत्तणओ, पच्छा सो चिंतेति-सुबहुं

कालं किलिट्ठोऽहं, सालिंगेण चेच ओहावइ, पच्छा तेण सीसेण देवलोगगएण आभोइतो, पेच्छति ओहावेंते, पच्छा तेण तस्स पहे गामो विउव्वितो, णडपेच्छाए सो तत्थ छम्मासे पेच्छंतो अच्छिओ, ण छुहं ण तण्हं कालं वा दिव्वप्पभावेण वेएति, पच्छा तं सहरिउं गामस्स बहिं विजणे उज्जाणे छद्दारए सव्वालंकारविभूसिए विउव्वति, संजमपरिक्खत्थं, दिट्ठा तेण ते, गिण्हामि एएसिमाहरगाणि, वरं सुहं जीवितोच्चि, सो एगं पुढविदारयं भणइ—आणेहि आभरणगाणि, सो भणति-भगवं ! एगं ताव मे अक्खाणयं सुणेहि, ततो पच्छा गेहिज्जासि, भणइ—सुणेमि, सो भणइ—एगो कुंभकारो, सो मट्टियं खणंतो तडीए अक्कंतो, सो भणति—'जेण भिक्खं बलिं देमि, जेण पोसेमि नायओ । सा मे मही अक्कमइ, जायं सरणओ भयं ॥ १ ॥' एत्थुवणओ-चोराइभयाओ अहं तुमं सरणमागओ, तुमं च एव विलुंपासि, अओ ममवि जायं सरणओ भयं, एवमण्णेसिवि उवणओ भाणियव्वो, तेण भण्णइ—अइपंडिओसि बालयत्ति, घेत्तूण आभरणगाणि पडिग्गहे छूढाणि, गओ पुढविकाइओ १। इयाणिं आउक्कायदारओ बीओ, सोऽवि अक्खाणयं कहेइ, जहा—एगो तालायरो कहाकहओ पाडलओ नाम, सो अण्णया गंगं उत्तरंतो उवरिवुट्ठोदएण हीरइ, तं पासिऊण जणो भणइ—बहुस्सुयं चित्तकहं, गंगा वहइ पाडलं ।

वुज्झमाणय भद्दं ते, लव किंचि सुभासियं ॥ १ ॥ तेण भणियं-जेण रोहंति बीयाणि, जेण जीवंति कासया। तस्स मज्झे विवज्जामि, जायं सरणओ भयं ॥ २ ॥ अईवियक्खणोऽसि दारयत्ति भणंतेण सोऽवि तहच्चिय मुसिओ, एस आउक्काओ बीओ २ ॥ इयाणिं तेउक्कायदारओ तइओ, तहेव अक्खाणयं कहेइ—एगस्स तावसस्स अग्गिणा उडओ दड्ढो, पच्छा सो भणइ—'जमहं दिया य राओ य, तप्पेमि महुसप्पिसा । तेण मे उडओ दड्ढो, जायं सरणओ भयं ॥ १ ॥ अहवा-वग्घस्स मए भीएण, पावओ सरणं कओ। तेण अंगं ममं दड्ढं, जायं सरणओ भयं ॥ २ ॥' अइसयाणोऽसि वच्छगत्ति भणंतेणं सोऽवि मुसिओ, एस तेउक्काओ३ ॥ इयाणिं वाउक्कायदारओ, सोऽवि तहेव अक्खाणयं कहेइ—जहा एगो जुवाणओ घणनिचियसरीरो आसि, सो पच्छा वाएण गहिओ, अण्णेण भणइ—' लंघणपवणसमत्थो, पुव्विं होऊण संपयं कीस?। दंडगहियग्गहत्थो, वयंस ! किंनामओ वाही? ॥ १ ॥' तेण भण्णइ—जेट्ठासाढेसु मासेसु, जो सुहो वाइ मारुओ। तेण मे भज्जए अंगं, जायं सरणओ भयं ॥ २ ॥ अहवा-जेण जीवंति सत्ताइं, निरोहंमि अणंतए । तेण मे भज्जए अंगं, जायं सरणओ भयं॥ ३ ॥ अइविसारओऽसि सुंदरत्ति भणंतो तस्सवि तहेव गेण्हइ, एस वाउक्काओ गओ । इयाणिं वणस्सइकायदारओ

पंचमो, तहेव अक्खाणयं कहेइ, जहा—एगंमि रुक्खे केसिंपि सउणाणं आवासो, तहिं च णं तेसिं पिल्लगाणि जायाणि, पच्छा रुक्खब्भासाओ वल्ली उट्ठिया, रुक्खं वेढंती उवरिं लग्गा, तयणुसारेण अण्णया सप्पेणारुहिऊण ते पिल्लगा खइया, पच्छा सेसगा भणंति—'जाव वुत्थं सुहं वुत्थं, पायवे निरुवद्दवे। मूलाओ उट्ठिया वल्ली, जायं सरणओ भयं ॥ १ ॥' अइमेहावंतोसि पुत्तयत्ति भणंतो तस्सवि तहेव गिण्हइ, एस वणस्सइकाओ५ ॥ इयाणिं तसकायदारओ छट्ठो, सोऽवि पारद्धो तहेव अक्खाणयाइं कहेइ, जहा एगं नयरं परचक्केण रोहियं, तत्थ बाहिरनिवासिणो मायंगा ते नगर-मज्झाओ नागरएहिं निच्छुब्भंति, बाहिं परचक्केण घेप्पंति, पच्छा केणइ भण्णइ'-अब्भितरया खुहिया, पेल्लंती बाहिरा जणा। दिसं वयह मायंगा!, जायं सरणओ भयं ॥ १ ॥' अहवा-एगत्थ नगरे सयमेव राया चोरो पुरोहिओ य भंडेइ, तओ दोवि हरंति, पच्छा लोओ तं वइयरं मुणिऊण अण्णमण्णं भणइ—'जत्थ राया सयं चोरो, भंडिओ य पुरोहिओ। दिसं वयह नागरया, जायं सरणओ भयं ॥१॥ अहवा एगंमि नयरे चोद्दसविज्जाठाणपारगतो छक्कम्मनिरओ सोमदेवो नाम दियवरो, सोमसिरी भारिया, तीए परितुलियरतिरूवजोव्वणलायन्नकलाकलावा सोमप्पभा णाम कण्णगा, संपत्तजोव्वणा य पलोइया जणएण, जायाणुराओ, तीए विरहे खिज्जंतं दट्ठूण निब्बंधे भारियाए पुट्ठेण साहिओ निययाभिप्पाओ,

अव्वो मा मयणसरगोयरावडिओ सयं वच्चउत्ति भावेंतीए भणिओ भत्तारो-धीरो हवसु, तहा करेमि जहा अनाओ च्चिय भुंजसि, अन्नयरदियहंमि भणिया धूया—वच्छे! एस अम्हाण कुलक्कमो-पढमं जक्खेण भुत्ता पच्छा भत्तारमणुगच्छंति, ता कल्लं कसिणचउद्दसीए तमंधयारे रतिहरे अणालवंती माणेज्जसु जक्खं, तक्कालाणुरूवणिव्वत्तियकायव्वा गया रइहरं, आलिंगणचुंबणाइपुव्वयं जहिच्छमणुहविऊण रइसुहं खेयकिलंतो समल्लासिओ भट्टो निद्दाए, केरिसो जक्खो ?, संजायकोउयाए पुव्वाणीयसरावसंपुडत्थपदीवुज्जोएण दिट्ठो जणओ, अलमेण्हि संकाएत्ति, 'सेविमि निठ्विसंकं इण्हि जणयं तु किं वियप्पेणं ?। रंगंमि णच्चियाए अलाहि अंगुट्ठिकरणेणं ॥ १॥' भावेंतीए समाढत्तं निव्विसंकं सयलजणमोहणं मोहणं, अच्चंतरइकिलंताणि उग्गएवि दिणयरे न बुज्झंति, ततो पइणो बोहणत्थं पढिया भट्टिणीए मागहिया—'अचिलुग्गयए य सूलिए चेइयथूभगते य वायसे । भित्तीगयए य आयवे, सहि! सुहिए हु जणे न बुज्झई ॥ १ ॥' ततो इमं निसामिऊण पढियं से धूयाए—'तुममेव य अंब ! हे लवे, मा हु विमाणय जक्खमागतं । जक्खाइडए हु तायए, अण्णं दाणि विमग्ग ताययं ॥ १ ॥' इमं सोऊण भणियं से जणणीए—नव मासा कुच्छि धारिया, पासवणे पुलिसे य मद्दिए। धूयाए मे गेहिए हडे, सलणे असलणए मे जायए ॥ १ ॥' पच्छा

गयसंको धूयाए सह भोगं भुंजिउं पयत्तो। एत्थ अण्णंपि तिविक्कमकहाणयं तेण कहियं, तं पुण मिच्छत्त-दोसदारंमि कहियं चेव, एत्थुवणओ जहा तीए भट्टिणीए भट्टस्स य तिविक्कमस्स सरणमसरणं जायं एव-मम्हाणंपि तुमं सरणं चिंतिओ जाव तुमं चिय मुससि, अतिवियड्ढोऽसित्ति भणंतेण मुद्धो तसकायदारओऽविद्द, पुणोऽवि वच्चंतेण दिट्ठा अलंकारभूसिया संजती, तेण भणिया—कडगा य ते कुंडला य ते, अंजियक्खि! तिलयए य ते कए। पवयणस्स उड्डाहकारिए, दुट्ठसेहि! कत्तोऽसि आगया? ॥१॥ तओ तीए भणियं—' राईसरसवमेत्ताणि, परछिद्दाणि पाससि। अप्पणो बिल्लमित्ताणि, पासंतोऽवि न पाससि ॥ १ ॥ ' तहा ' समणोऽसि संजओ असि, बंभयारि समले-ट्ठुकंचणो। वेहारुय वायओ य ते, जेट्ठज्जो! किं ते पडिग्गहे? ॥ २ ॥ एवं ताए उड्डाहिओ समाणो पुणोऽवि गच्छइ, नवरं पेच्छइ खंधावारमेंतं, तस्स कीर निवट्टमाणो दंडियस्सेव सवडहुत्तो गतो, तेण हत्थिखंधातो ओरु-हित्ता वंदितो भणितो य—भयवं! अहो मम परमं मंगलं णिमित्तं च, जं साधू मए अज्ज दिट्ठो, भयवं! साणुग्गहत्थं फासु-यएसणिज्जं इमं मोयगादिसंबलं घेप्पउ, सो णेच्छति, भायणे आभरणगाणि छूढाणि मा दीसिहित्ति, तेण दंडिएण

१३ बलामोडिए परिग्गहो गहितो जाव मोयगे छुहइ ताव पेच्छइ आभरणयाणि, तेण सो खरंडिओ, ताहे विलक्खीहूयं

तं दट्ठूण दावियं निययरूवं चेल्लयसुरेण, भणिओ य एसो—किमेयं तए समाढत्तं ?, न जुज्जइ खलु तुम्हाण सयलसुओयहिपारगयाणं एवं विबुहजणगरहणिज्जं इयरजणबहुमयं ववसिउंति, सूरिणा भणियं—किं करेमि ? न केणइ देवत्तं साहियं, तेण दूरं विप्पलद्धोऽम्हि मोहपिसाएणं, चेल्लयसुरेण भणियं—न संपयं बाहुल्लेण तियसावयारो, जओ भणियं—"संकंतदिव्वपेम्मा विसयपसत्ताऽसमत्तकत्तव्वा । अणहीणमणुयजम्मा ( कज्जा ) नरभवमसुहं न इंति सुरा ॥१॥" ता न कायव्वो चित्तब्भमो, सव्वहा दढचित्तेण होयव्वं, अओ भण्णइ—जहा तेण चेल्लयसुरेण आयरिओ धम्मे थिरीकओ तहा कायव्वं । अवात्सल्यमपि वात्सल्याकरणस्वभावं, वात्सल्यं च वात्सल्यभावेन साधर्मिकजनस्य भक्तपानादिनोचितप्रतिपत्तिकरणं, तत्र वज्रस्वामी दृष्टान्तः, तत्कथा च मूलावश्यकविवरणे विस्तरेणोक्ता, अत्र तु स्थानाशून्यार्थं तद्गतमेव किञ्चिदुच्यते, जहा—

तेणं कालेणं तेणं समएणं अवंतीजणवए तुंबवणसन्निवेसे धणगिरी नाम इब्भपुत्तो, सो य सड्ढो पव्वइउकामो, तस्स य मायापियरो जत्थ २ तज्जोग्गं कन्नं वरेंति तत्थ २ सो विप्परिणइं करेइ जहाऽहं पव्वइउकामोत्ति, इओ य—धणपालस्स दुहिया सुनंदा नाम, सा भणइ—ममं देह, ताहे सा तस्स दिन्ना, तीसे य

भाया अज्जसमिओ नाम पुव्वं पव्वइओ सीहगिरिसयासे, सा अन्नया आवन्नसत्ता संपन्ना, ताहे धणगिरी भणइ-एस ते गब्भो बिइज्जओ होही, अहं पव्वयामित्ति, तओ तीए अणुन्नाओ सीहगिरिसयासे गंतुं पव्वइओ, इमीएवि नवण्हं मासाणं साइरेगाणं दारओ जाओ, तत्थ य महिलाहिं आगयाहिं भण्णइ—जइ से पिया न पव्वइओ होंतो तो लट्ठं होंतं, सो सण्णी जाणइ—जहा मम पिया पव्वइओ, तस्स एवं चिंतंतस्स जाईसरणं समुप्पण्णं, ताहे रत्तिं दिवा य रोवइ जेण निव्विज्जंती अंबा ममं मुयइ,तओ सुहं पव्वयामि, एवं च छम्मासा वोलीणा,अण्णया आयरिया समोसढा, ताहे अज्जसमिओ धणगिरी य आयरियं आपुच्छंति जहा जइ तुब्भे संदिसह तो सन्नायगाणि पेच्छामोत्ति, एत्थंतरंमि सउणेण वाहितं, आयरिएहिं भणियं—महालाभो तुम्हं, अज्ज जं सचित्तं अचित्तं वा लहेह तं सव्वं लएह, इच्छंति भणिऊण गया ते सन्नायिगेहं, उवसग्गिज्जिउमाढत्ता, एत्थंतरंमि अण्णमहिलाहिं भणिया सुनंदा—हला ! एयं दारगं एयाण समप्पेसु, तो कहिं नेहिंति ?, पच्छा ताए भणिओ [ग्रन्थाग्रम—२०००] धणगिरी—मए एवइयं कालं संगोविओ एत्ताहे तुमं संगोवाहि, पच्छा तेण भणियं—मा ते पच्छायावो भविस्सइ, ताहे सक्खिं काऊण गहिओ छम्मासिओ चोलपट्टएण पत्ताबंधिउं, न रोवइ, जाणइ सन्नी, ताहे तेहिं आयरिएहिं

भाणं भरियंति हत्थो पसारिओ, दिन्नो, हत्थे भूमिं पत्ते भणति–अज्जो णज्जइ वइरंति, जाव पेच्छंति देवकुमारोवमं दारगंति, भणइ य–सारक्खह एयं, पवयणस्स आहारो भविस्सइ एस, तत्थ से वइरो चेव नामं कयं, ताहे संजतीण दिन्नो, ताहिं सेज्जायरकुले समप्पिओ, सेज्जायरगाणि जाहे अप्पणगाणि चेडरूवाणि ण्हाणेंति मंडेंति वा पीहगं वा देंति ताहे तस्स पुव्विं, जाहे उच्चाराती आयरइ ताहे आगारं दंसेति कुव्वति वा, एवं संवड्ढइ, फासुयपडोयारो तेसिं इट्ठो, साहूवि बाहिं विहरंति, ताहे सा नंदा पमग्गिया, ताओ य निक्खेवगोत्ति न देंति, सा आगंतूण थणं देइ, एवं सो जाव तिवरिसो जाओ, अन्नया साहू विहरंता आगया, तत्थ ववहारो राउले जाओ, सो भणति–मम एयाए दिण्णओ, नगरं सुनंदाए पक्खियं, ताहे बहूणि खेल्लणगाणि गहियाणि, रण्णो पासे ववहारच्छेदो, तत्थ पुव्वहुत्तो राया दाहिणतो संघो णंदा ससयणपरियणा वामपासे णरव-इस्स, तत्थ राया भणति–मम कएण तुब्भे जओ चेडो जाति तस्स भवतु, पडिस्सुयं, को पढमं वाहरउ ?, 'पुरिसादीयो धम्मो'त्ति पुरिसो वाहरउ, ततो नगरजणो आह–एएसिं संवयितो माया सद्दावेउ, अविय–माया दुक्करकारिया, पुणोऽवि पेलवपवत्ता, तम्हा एसा चेव वाहरउ, ताहे सा आसा हत्थी रहवसभे गहिय मणिकण-

गत्विविहचित्तेहिं बालभावलोभावएहिं पासधरिएहिं भणइ–एहि वइरसामी! एहि, ताहे पलोइंतो अच्छइ, जाणइ–जइ संघं अवमन्नामि दीहसंसारिओ भविरसामि, अविय–एसावि पव्वइस्सइ, एवं तिन्नि वारा सद्दावितो न एइ, ताहे से पिया भणति–जइ सुकयव्ववसाओ धम्मज्झयभूसियं इमं वइर!। गेण्ह लहुं रयहरणं कम्मरयपमज्जणं धीर! ॥ १ ॥ ताहेऽणेण तुरियं आगंतूण गहियं, लोगेण जयइ धम्मोत्ति उक्कुट्ठी सीहनाओ कओ, ताहे से माया चिंतेइ–मम भाया भत्ता पुत्तो य पव्वइओ, अहं किं अच्छामि ?, एवं साऽवि पव्वइया, सो वइरसामी पव्वाविऊण धणगिरिणा संजईणं चेव सयासे मुक्को, तेण तासिं पासे एक्कारस अंगाणि सुयाणि पढंतीणं, ताणि से उवगयाणि, पयाणुसारी सो भगवं, ताहे अट्ठवारिसओ संजइपडिस्सयाओ निक्कालिओ आयरिअसयासे अच्छइ, आयरिया उज्जेणिं गया, तत्थ वासं पडइ अहोधारं, से य पुव्वसंगइया जंभगा तेणंतेण वोलेंता तं पेच्छंति, ताहे ते परिक्खानिमित्तं उइण्णा वाणियरूवेणं, तत्थ बइल्ले उल्लदित्ता उवक्खडेंति, सिद्धे निमंतिंति, ताहे पट्ठिओ जाव फुसियमत्थि ताहे पडिनियत्तो, ताहे तंपि ठियं, पुणो सद्दावेंति, ताहे वइरो गंतूण उवउत्तो दव्वओ पुस्सफलादि खेत्तओ उज्जेणी कालओ पाउसो भावओ धरणिछिवणणयणनिमेसादिरहिया पहट्ठतुट्ठा य, ताहे देवत्ति काऊण

नवपद. बृह. सम्यक्त्वा- धि.

॥ ७५ ॥

णेच्छइ, देवा तुट्ठा भणंति–तुमं दट्ठुमागया, पच्छा वेउव्वियं विज्जं देंति, पुणरवि अन्नया जेट्ठमासे सन्नाभूमिं गयं घयपुण्णेहिं निमंतेन्ति, तत्थवि दव्वादिउवओगो, नेच्छितं, तत्थ से णहगामिणी विज्जा दिन्ना, एवं सो विहरइ, जाणि य ताणि पयाणुसारिलद्धीए गहिआणि एक्कारस अंगाणि ताणि से संजयमज्झे थिरयराणि जायाणि, तत्थ जो अज्झाइ पुव्वगयं तंपिऽणेण सव्वं गहियं, जाहे वुच्चति पढाहि ततो सो एंतगंपि कुट्टेंतो अच्छइ अण्णं सुणेंतो, अण्णया आयरिया मज्झण्हे साहूसु भिक्खं निग्गतेसु सन्नाभूमिं निग्गया, वयरसामीवि पडिस्सयवालो, सो तेसिं साहूणं विंटियाओ मंडलीए रएत्ता मज्झे अप्पणा ठाउं वायणं देति, ताहे परिवाडीए एक्कारसवि अंगाणि वाएति पुव्वगयं च, जाव आयरिया आगया चिंतेंति-लहु साहू आगया, सुणंति सद्दं मेघोघरसियमिव, बहिया सुणेंता अच्छंति, नायं जहा वइरोत्ति, पच्छा ओसरिऊण सद्दपडियं निसीहियं करेंति, मा से संका भविस्सइ, ताहे तेण तुरियं विंटियाओ सट्ठाणे ठवियाओ, निग्गंतूण दंडयं गेण्हइ, पाए पमज्जति, ताहे आयरिया चिंतेंति–मा णं साहू परिहविस्संति, ता जाणावेमि, ताहे रत्तिं आपुच्छइ–अमुगं गामं वच्चामि, तत्थ दो वा तिन्नि वा दिवसे अच्छिस्सामि, तत्थ जोगपडिवन्ना भणंति–अम्हं को वायणायरिओ ?, आयरिया भणंति–वइराचि, विणीया, तहत्ति पडिसुयं, आयरिया चेव जाणंति, भणियं च–"सीहगिरिसुसीसाणं भद्दं

वात्सल्ये वज्रस्वामी.

॥ ७५ ॥

गुरुवयण सद्दहंताणं । वइरो किर दाही वायणत्ति न विकोवियं वयणं ॥ १ ॥ (उप॰माला) ते गया, साहूवि पए पडिलेहित्ता वसहिकालनिवेयणादि वइरस्स करेंति, निसेज्जा य से रइया, सो तत्थ विनिविट्ठो, तेऽवि जहा आयरियस्स तहा विणयं पउंजंति, ताहे सो तेसिं करकरस्स सव्वेसिं अणुपरिवाडीए आलावए देइ, जेऽवि मंदमेहावी तेऽवि सिग्घं पढेउमारद्धा, ततो ते विम्हिया, जोऽवि एइ आलावगो पुव्वपढिओ तंपि विन्नासणत्थं पुच्छंति, सोऽवि सव्वं आइक्खइ, ताहे ते तुट्ठा भणंति—जइ आयरिया कइवयाणि दियहाणि अच्छेज्ज तो एस सुयक्खंधो लहु समप्पेज्ज, जं आयरियसगासे चिरेण परिवाडीए गेण्हंति तं इमो एक्काए पोरुसीए सारेइ, एवं सो तेसिं बहुमओ जाओ, आयरियावि जाणाविओत्तिकाऊण आगया, अवसेसं च वरं अज्झाविज्जउत्ति, पुच्छंति य—सरिओ सज्झाओ ?, ते भणंति—सरिओ, एस चेव अम्ह वायणायरिओ भवतु, आयरिया भणंति—होहिई मा तुब्भे परिभवेस्सह अतो जाणावणानिमित्तं अहं गओ, न उण एस कप्पो, जओ एतेण सुयं कण्णाहेडएण गहियं, अओ एयस्स उस्सारकप्पो करेयव्वो, सो सिग्घमुस्सारेइ, बितियपोरसीए अत्थं कहेइ, तदुभयजोगे कप्पोत्तिकाऊणं, जे य अत्था आयरियस्सऽवि संकिया तेऽवि तेण उग्घाडिया, जावइयं दिट्ठिवायं जाणंति तत्तिओ गहिओ, ते

विहरंता दसपुरं गया, उज्जेणीए भद्दगुत्ता णामायरिया थेरकप्पट्ठिया, तेसिं दिट्ठिवाओ अत्थि, संघाडओ से दिण्णो, गतो तस्स सगासं, भद्दगुत्ता य थेरा सुविणगं पासंति, जहा किर मम पडिग्गहओ खीरभरिओ आगंतुगेण आवीओ समासासिओ य, पभाए साहूणं साहेइ, ते अन्नमन्नाणि वागरेंति, गुरू भणंति—ण याणह तुब्भे, अज्ज मम पाडिच्छओ एहिइ, सो सव्वं सुत्तत्थं घेच्छिहिति, भगवंपि बाहिरियाए वुच्छे ताहे आगओ, दिट्ठो सुयपुव्वो एस सो वइरो, तुट्ठेहिं अवगूहिओ, ताहे तस्स सगासे दस पुव्वाणि पढियाणि, तो अणुण्णानिमित्त जहिं उद्दिट्ठो तहिं चेव अणुजाणियव्वोत्ति दसपुरमागया, तत्थ अणुण्णा आरद्धा ताव नवरं तेहिं जंभगेहिं अणुण्णा उवट्ठविया, दिव्वाणि पुप्फचुन्नाणि य से उवणीयाणित्ति, तया य सीहगिरी वइरस्स गणं दाऊण भत्तं पच्चक्खाइउं देवलोगं गया, वइरसामीवि पंचहिं अणगारसएहिं संपरिवुडो विहरइ, जत्थ२वच्चइ तत्थ२उरालवन्नकित्तिसद्दा परिभमंति—अहो भगवंति, एवं भगवं भवियजणविबोहणं करेंतो विहरइ। इओ य-पाडलिपुत्ते णगरे धणो सेट्ठी, तस्स धूया अतीव रूववती, तस्स य जाणसालाए साहुणीओ ठियाओ, ताओ पुण वइरस्स गुणसंथवं करेंति, स्वभावेण य लोगो कामियकामियओ, सेट्ठिधूया चिंतेति—जइ सो मम पती होज्ज तोऽहं भोगे भुंजिस्सं, इयरहा अलं भोगेहिं, वरगा एंति, सा पडिसेहावेइ, ताहे

साहेंति पव्वइयाओ–सो न परिणेइ, सा भणइ–जइ न परिणेइ अहंपि पव्वज्जं गेण्हिस्सं, भगवंपि विहरंतो पाडलिपुत्तमागओ, तत्थ से राया सपरियणो अम्मोगइयाए निग्गओ, ते पव्वइयगा फड्डगफड्डगेहिं एंति, तत्थ बहवे उरालसरीरा, राया पुच्छइ–इमो भगवं वइरसामी ?, ते भणंति–न हवइ, इमो ?, तस्स सीसो, जाव अपच्छिमं वंदं, तत्थ पविरलसाहुसहितो दिट्ठो राइणा, वंदिओ, ताहे उज्जाणे ठिओ, धम्मो यऽणेण कहिओ, खीरासवलद्धी भयवं, राया हयहियओ कओ, अंतेउरे साहइ, ताओ भणंति–अम्हेवि वच्चामो, सव्वं अंतेउरं निग्गयं, सा य सेट्ठिधूया लोगस्स पासे सुणेत्ता किह पेच्छज्जामित्ति चिंततंती अच्छति, बितियदिवसे पिया विन्नविओ–तस्स देहि, अह णवि अप्पाणं विवादेमि, ताहे सव्वालंकारविभूसियसरीरा कया, अणेगाहिं धणकोडीहिं सहिया णीणिया, धम्मो कहिओ, भगवं खीरासवलद्धीओ, लोओ भणति–अहो ! सुसरो भगवं सव्वगुणसंपन्नो, णवरि रूवविहूणो, जइ रूवं होंतं सव्वगुणसंपया होन्ता, भगवं तेसिं मणोगयं नाउं तत्थ सयसहस्सपत्तं पउमं विउव्वति, तस्स उवरि निविट्ठो रूवं विउव्वति अतीव सोमं, जारिसं परं देवाणं, लोगो आउट्टो भणति–एयं एयस्स साहावियं, मा पत्थणिज्जो होहामित्ति तो विरूवेण अच्छइ, सातिसओत्ति,

रायावि भणति—अहो भगवओ एयमवि अत्थि, ताहे अणगारगुणे वन्नेइ, पभूयसंखेज्जदीवसमुद्दे विउव्वेत्ता०, ताहे तेण रूवेण धम्मं कहेति । ताहे सेट्ठिणा निमंतिओ भगवं विसए निंदइ, जइ ममं इच्छइ तो पव्वयउ, ताहे पव्वातिया, तेण य भगवया पयाणुसारित्तणओ पम्हुट्ठा महापरिण्णाओ अज्झयणाओ आगासगामिणी विज्जा उद्धरिया, तीए य गयणलद्धिसंपन्नो भगवं जाओ. अण्णया य एवं गुणविज्जाजुत्तो विहरंतो पुव्वदेसाओ उत्तरावहं गओ, तत्थ दुब्भिक्खं जायं, पंथावि वोच्छिण्णा, ताहे संघो उवागओ, नित्थारेहित्ति, ताहे पडविज्जाए संघो चडिओ, तत्थ य सेज्जायरो चारीए गओ एइ, ते य उप्पतिते पासइ, ताहे सो असिएण सिहं छिंदित्ता भणति—अहं भगवं ! तुम्ह साहम्मिओ, ताहे सोवि लइओ इमं सुत्तं संरतेणं—“ साहम्मियवच्छल्लंमि उज्जया उज्जया य सज्झाए । चरणकरणंमि य तहा तित्थस्स पभावणाए य ॥ १ ॥” ततो पच्छा उप्पइओ भगवं, पत्तो पुरियं नयरिं, तत्थ सुभिक्खं, तत्थ य सावया बहुया, तत्थ य राया तच्चण्णियसड्ढओ, तत्थ अम्हच्चयाणं सड्ढयाणं तच्चण्णिओवासगाण य विरुद्धेण मल्लारुहणाणि वट्टंति, सव्वत्थ ते उवासगा पराइज्जंति, ताहे तेहिं राया पुप्फाणि वाराविओ पज्जोसवणाए, सड्ढा अद्दण्णा जाया, नत्थि पुप्फाणित्ति, ताहे सबालवुड्ढा वइरसामिं उवट्ठिया, तुब्भे जाणइ जइ

तुब्भेहिं नाहेहिं पवयणं ओहामिज्जइ, एवं भणिते बहुप्पगारं गया उप्पइऊण माहेसरिं, तत्थ हुयासणं नाम वाणमंतरं, तत्थ कुंभो पुप्फाण उट्ठेइ, तत्थ भगवतो पितिमित्तो तडितो, सो संभंतो भणइ—किमागमणपओयणं ?, ताहे भणंति-पुप्फेहिं पओयणं, सो भणइ—अणुग्गहो, भगवया भणितो—ताव तुब्भे गहेह जाव एमि, पच्छा चुल्लहिमवंते सिरिसगासं गओ, सिरिए य चेतियअच्चणियनिमित्तं पउमं छिण्णगं, ताहे वंदित्ता सिरीए निमंतिओ, तं गहाय एइ अग्गिघरं, तत्थऽणेणं विमाणं विउव्वियं, तत्थ कुंभं छोढुं पुप्फाणं ततो सो जंभगगणपरिवुडो दिव्वेणं गीयगंधव्वणिणाएणं आगासेण आगओ, तस्स पउमस्स वेंढे वइरसामी ठिओ, ततो ते तच्चण्णिया भणंति—अम्ह परं पाडिहेरं, अग्घं गहाय निग्गया, तं वोलित्ता विहारं अरहंतघरं गया, तत्थ देवेहिं महिमा कया, तत्थ लोगस्स अतीव बहुमाणो जाओ, रायावि आउट्टो समणोवासओ जाओ, सेसकहासंबंधो तत्तो चेव नायव्वो, पगयं च इमं, जहा तेण वइरसामिणा दुब्भिक्खे संघं नित्थारेंतेण साहम्मियवच्छल्लं कयं तहा कायव्वं, जइ न कुणइ तो अइयारोत्ति ।

अप्रभावनाऽपि प्रभावनाऽकरणस्वरूपा, प्रभावना तु [यथा २] तीर्थपराभवाद्यावुपस्थिते तदुन्नतिहेतुचेष्टाप्रवर्तनात्मिका, तस्यां विष्णुकुमारो निदर्सनं, तत्कथा चेयम्—

विश्वविश्वम्भरासारः, साराढ्यजनताकुलः। कुलकोटीसमाकीर्णपुरग्राममनोरमः ॥ १ ॥ रमानिवासराजीवराजीवर-सरोगणः । गणातीताकरोद्देशो, देशोऽस्ति कुरुनामकः ॥ २ ॥ त्रिदिवमिव तत्र सुरभुवनभूषितं हस्तिनागपुरमस्ति । विबुधजनानन्दकरं सदोप्सरोनिवहरमणीयम् ॥ ३ ॥ ( आर्या ) तस्मिन्नरातिभूपालमत्तमातङ्गकेशरी । शरणायातसामन्तसन्तापजलदोदयः ॥ ४ ॥ उदयप्रतापराजिष्णुर्जिष्णुर्विष्णुसमः श्रिया । निजान्वयसरःपद्मोऽभवत्पद्मोत्तरो नृपः ॥ ५ ॥ सकलान्तःपुरसारा तस्य ज्वालाभिधा प्रियतमाऽभूत् । निजरूपनिर्जितरतिलावण्यविलास-वासगृहम् ॥ ६ ॥ ( आर्या ) तया च सह तस्य नृपतेर्जन्मान्तरोपार्जितपुण्यसंभारसंपादितं बुधजनप्रशंसनीयं जीवलोकसारं पञ्चप्रकारं विषयसुखमनुभवतोऽतिक्रान्तः कियानपि कालः, अन्यदा च सुखशय्यायामनाकुल-निद्रानुविद्धनयनयुगला ज्वाला महादेवी यामिन्याश्चरमयामे स्वप्ने निरभ्ररजनीरजनिकरकरनिकरावदातदेहं स्कन्ध-देशविराजमानकपिलसटाकलापं शारदाभ्रमिव तडिद्वलयालङ्कृतमुपलक्ष्यमाणनिजोत्सङ्गमागतं सिंहपोतं ददर्श, दृष्ट्वा च प्राभातिकप्रहतानवद्यनादप्रतिबोधिता विधाय तत्कालोचितं सकलकरणीयं परमानन्दनिर्भरा भर्तृसकाशमागत्य कथितवती, तेनापि स्वप्नशास्त्रानुसारेण प्रधानपुत्रजन्मादेशसंजनितासमानमनःसम्मदा सा तत्काले समुद्भूतं सुखं-

सुखेन बभार गर्भं, संपाद्यमानयथासमयोपजायमानसकलदोहदा च परिपूर्णसमये प्रसूता देवकुमारोपमं दारकम्, अभिनन्दितो नृपतिः प्रियङ्करिकाभिधानया चेट्या, दत्तमिच्छातिक्रान्तं पारितोषिकं, तदनन्तरं च स्थानस्थानप्रारभ्यमाणवारविलासिनीसार्थनृत्यप्रबन्धं वाद्यमाननानाविधातोद्यनादबधिरिताखिलब्रह्माण्डं बन्दिनिवहविधीयमानविविधप्रस्तावपाठं सकललोकप्रमोदोत्पादकं प्रारब्धं राज्ञा वर्द्धापनकं—यत्र प्रदानमयमिव सम्मदमयमिव सदुत्सवमयं वा । समजनि नगरमशेषं गीतादिविलासमयमिव तत् ॥ १ ॥ समुचितसमये च प्रशस्तेषु तिथिनक्षत्रयोगकरणवारेषु शुभायां लग्नहोरायां प्रतिष्ठितं दारकस्य विष्णुकुमार इत्यभिधानं, वृद्धिं गतो देहोपचयेन कलाकलापेन च, संप्राप्तः सकलजनश्लाघनीयं यौवनं, तत्र च वर्त्तमानो मातापितृसमाराधनपरः परोपकारपरायणः कदाचिद्दिवस इव मित्रमण्डलसमन्वितः प्रश्नोत्तरादिविनोदेन अन्यदा च लक्ष्मण इव रामानुगतो नानाविधविलासनिर्वर्त्तनेन एकदा च समृद्धनृपतिरिव सम्पूर्णविषयग्रामोऽसमानसुखसन्दोहासेवनेन कियन्तमपि कालं निनाय, अन्यदा च पुनरपि ज्वाला चतुर्दशमहास्वप्नसूचितं सुरकुमाराकारं सुकुमारमसूत तनयं, तस्यापि जन्मनि निर्वर्त्तितो राज्ञा महानुत्सवः, कृतं चोचितसमये तस्य महापद्म इति नाम, शुक्लपक्षक्षपाकर इव सह कलाभिः प्रवृत्तो देहोप-

चयेन, क्रमेणाऽऽससाद सकलजनमनोहरं तारुण्यं, निवेशितश्च सजिगीष इति जनकेन यौवराज्ये। इतश्चास्त्युज्जयिन्यां नगर्यां श्रीधर्मनामा नृपतिस्तस्य च नमुचिर्मन्त्री, अन्यदा तत्र समवससार मुनिसुव्रतस्वामिनः शिष्योऽनेकमुनिनिवहपरिवृतः सुव्रताभिधानसूरिः, तद्वन्दनार्थं च निजरविभूत्या व्रजन्नालोकितः प्रसादोपर्यवस्थितेन नमुचिमन्त्रिसमन्वितेन राज्ञा नगरीलोकः, भणितं च यथा–क्वैष लोकोऽकालयात्रायां गच्छति ?, नमुचिनोक्तं–देव ! प्रातरश्ववाहनिकागतेन मया श्रुतं यथाऽत्रोद्याने श्रमणाः केचनागता विद्यन्ते, अतस्तद्भक्तो जनोऽयं तत्पार्श्वे गच्छति, राज्ञोक्तं–वयमपि व्रजामः, नमुचिनाऽभाणि–किंनिमित्तं तत्र युष्माकं गमनं ?, यदि धर्मशुश्रूषया तदा वयमेव वेदविहितं सर्वलोकसंमतं भणामो धर्मं, नृपतिनाऽवाचि–सत्यमेतद्, भवता कथ्यते धर्मः, केवलं तेऽपि द्रष्टव्या महात्मानः, तथाऽवगन्तव्यं च कीदृशं ते धर्मं प्ररूपयन्ति ?, तेनोक्तं–यद्येवं तर्हि गम्यतां, किन्तु तत्र गतैर्युष्माभिर्मध्यस्थैरासितव्यं येनाहं तान् वादेन जित्वा निरुत्तरान् करोमि, तत एवमस्त्विति प्रतिपन्ने नृपेण सामन्तादिलोकसमेता गतास्ते, तत्र च दृष्टः प्रथमागतनागरकजनस्य धर्मदेशनां कुर्वाणो मुनिमण्डलमध्यवर्त्ती शशीव तारानिकरपरिकरितः सुव्रताचार्यः, प्रणम्य तं यथास्थानमुपविष्टेषु नरेन्द्रादिष्वकस्मादेवोक्तं सूरिसम्मुखं नमु-

विमन्त्रिणा—यथा भो ! भो ! यावत्सम्यग्विभाव्यते तावदज्ञातपरमार्था यूयं, यतः प्रत्यक्षानुभूयमानानन्दस्वरूपं विषयसुखमुत्सृज्याङ्गीकृतः सर्वपाषण्डिभू(दू)षितो विशिष्टजनपरिहृतो जिनधर्मः, तथा निजश्रियं परित्यज्य स्वीकृता भिक्षा, यद्वा मलमलिनदेहानामशुचितया पिशाचोपमानानां मुण्डितमुण्डतुण्डानां कियदेतत् ? अपिच—यत्र त्रिपुरुषपूजा न समस्ति हविर्भुजो न वा हवनम् । न द्विजजनप्रदानं धर्मः स कथं भवति मूढ ? ॥ १ ॥ इत्याकर्ण्य अहो ! मूर्खशठोऽयमसमीक्षितवादी तत्किमस्योत्तरदानेनेति विचिन्त्य तूष्णीं स्थितः सूरिः, यत उक्तम्—"विद्वानृजुरभिगम्यो, विदुषि शठे चाप्रमादिना भाव्यम् । मूर्खार्जवोऽनुकम्प्यो मूर्खशठः सर्वथा त्याज्यः ॥ १ ॥" स च हतप्रतिभ एव मुण्डो न किञ्चिदुत्तरं दातुं शक्नोतीति चिन्तयंस्तदुत्प्रासनार्थं पुनः पुनस्तदेव भणितुमारेभे, ततो भणितः सूरिणाऽसौ —भो भोः किमेवमसम्बद्धमुल्लपसि ?, यदि जल्पसामर्थ्यमस्ति तदा कुरु पूर्वपक्षं पञ्चावयववाक्योपन्यासेन, अत्रान्तरे पादयोर्निपत्य विज्ञप्तं सविनयमेकेन विनेयेन, यथा—भगवन् ! कोऽयं ? यदस्योपरि एवं संरम्भः समारभ्यते भवद्भिः, यतः—"गण्डस्थलोल्लसदमन्दमदप्रवाहगन्धावबद्धमधुपोद्धुरवारणेन्द्राः । एकैकघातवशतोऽपि पतन्ति यस्य, तस्य क्रमः किमु चकास्ति हरेर्मृगेषु ? ॥ १ ॥" तदलमाक्षेपेण, दीयतामादेशो मह्यं येनापनयामि वादगर्वमेतस्य,

ततोऽनुज्ञातो गुरुणा स मन्त्रिणं भणितुमुपचक्रमे—भो यत्त्वयोक्तम्—आनन्दरूपं विषयसुखं, तदसम्बद्धं, यतः केषाञ्चिदसमसमुल्लसितसद्विवेकानां विषविकारसममेव विषयसुखमाभाति, तथाहि—त एवं चिन्तयन्ति, यथोक्तं व्यासेन—" एकैकशोऽपि निघ्नन्ति, विषया विषसंनिभाः । किं पुनर्न विवेकात्मा, यः समं पञ्च सेवते ॥ १ ॥" अन्येषां तु मोहावष्टब्धचेतसां यद्यप्यानन्दरूपं प्रतिभाति तथाऽपि तेषामपि विद्युल्लताविलसितमेव स्तोककालिकमेतद्, यत उक्तम्—" सुखास्वादलवो योऽपि, संसारे सत्समागमात् । सवियोगावसानत्वादापदां धुरि वर्त्तते ॥ १ ॥" किञ्च—" सुरतसुखं खलमैत्री सन्ध्यारागः सुरेन्द्रकोदण्डम् । कलिकालयौवनं जीवितं च सर्वाण्यनित्यानि ॥ १ ॥" यच्चोक्तं 'सर्वपाषण्डदूषितो जिनधर्मः,' तदप्ययुक्तं, यतः सकलपाषण्डिनामपि प्राणातिपातादिपरिहारात्मको धर्मः सम्मत एव, तथा चोक्तम्—" पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् । अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥ १ ॥" 'विशिष्टजनपरिहृत'मिति यदुक्तं तदप्यसङ्गतं, यतः सर्वस्यापि धर्मस्य दया मूलं, सा चाविकलाऽत्रैव, यथावज्जीवतत्त्वपरिज्ञानात्, नान्यथा, अतोऽयमेव विशिष्टजनैराद्रियते सम्पूर्णधर्म्मफलकाम्यया, यच्च निजश्रियं परित्यज्येत्याद्युक्तं तद्दूषणमेव न भवति, लक्ष्मीपरित्यागभिक्षाटनाङ्गीकारयोः सकलधार्मिकाभिप्रेतत्वात्, तथाहि—

लक्ष्मीः तावत्प्राणिना सकलव्यसनमूलमिति त्याज्या, तथा चोक्तम्–"या गम्याः सत्सहायानां, यासु खेदो महद्भयम् । तासां किं यन्न दुःखाय, विपदामिव सम्पदाम्? ॥ १ ॥" इति, भिक्षा तु विशिष्टगुणेत्युपादेया, तथा चार्षम्–" अवधूतां च पूतां च, मूर्खाद्यैः परिनिन्दिताम् । चरेन्माधुकरीं वृत्तिं, सर्वपापप्रणाशिनीम् ॥ १ ॥" तथा–" एकान्नं नैव भुञ्जीत । बृहस्पतिसमादपि । चरेन्माधुकरीं वृत्तिमपि म्लेच्छकुलादपि ॥ २ ॥" यद्वा (च्च) 'मलमलिने' त्याद्युक्तं तत्रापि मुनिजनस्य शास्त्रे स्नाननिषेधान्मलधारित्वं न दूषणं, यथोक्तं भवदार्षे–" स्नानं मददर्पकरं, कामाङ्गं प्रथमं स्मृतम् । तस्मात्कामं परित्यज्य, न स्नान्तीह दमे रताः ॥ ३ ॥" अशुचित्वं च ब्रह्मचारिणां भवदागम एव ' ब्रह्मचारी सदा शुचि ' रित्यादौ निषिद्धम् । शिरस्तुण्डमुण्डनमपि व्रतिनां शास्त्रोक्तमनुपालयतां भूषणं, न दूषणं, यच्च ' यत्र त्रिपुरुषपूजा न समस्ती ' त्याद्युक्तं तत्र विवक्षितत्रिपुरुषीपू(जा पू)जैव न भवति, रागाद्यनुगतत्वादितरपुरुषवद्, रागाद्यनुगतत्वं चाङ्गनादिपरिग्रहादिलिङ्गान्यथानुपपत्तेः, तथा चोक्तम्–" कश्चिद्रागी भवति हसितोद्गीतनृत्यप्रपञ्चः, प्रद्वेष्ट्यन्यः प्रहरणगणव्यग्रपाणिः पुमान् यः । बिभ्रन्मोही स्फटिकविमलामक्षमालां यतस्ते, तल्लिङ्गानामभवनमतः सर्ववित्त्वं विरागः ॥ १ ॥" हविर्भुजो हवनमपि प्राणातिपातकारणत्वान्न सुन्दरं, प्राणातिपातकारणत्वं चास्य

भवदागमे हविर्भुजः शूनापञ्चकमध्ये पठितत्वाद्, यथोक्तम्–“ कण्डनी पेषणी चुल्ली, उदकुम्भः प्रमार्जनी। पञ्च शूना गृहस्थस्य, तेन स्वर्गं न यात्यसौ ॥ १ ॥ ” न च हिंसानुगतमप्येतद्विहितानुष्ठानत्वात्स्वर्गायेति वचनीयं, यदाह व्यासः—“यूपं छित्त्वा पशून् हत्वा, कृत्वा रुधिरकर्दमम्। यद्येवं गम्यते स्वर्गे, नरके केन गम्यते ? ॥१॥” दानं च यन्मोक्षार्थिभिर्दीयते तत्पात्रमन्विष्य देयं, नैवमेव, पात्रं च विषयविरक्तत्वादिगुणोपेतं श्लाघ्यते, तस्यैव संसारसागरपतज्जनरक्षणक्षमत्वात्, तथा चोक्तम्–‘ विषयी विषयासक्तं, सधनः सधनं गृही गृहिणमेव। सारम्भः सारम्भं, न तुल्यदोषस्तु तारयति ॥ १ ॥ विषयी विषयविरक्तं, सधनोऽसधनं गृही गृहविमुक्तम्। सारम्भोऽनारम्भं, संचिन्त्य भवार्णवं तरति ॥ २ ॥ ” एते च विषयविषपूर्णमानसाः कथं पात्रभूता भवन्ति ? इत्याहतप्रत्याहत्या यावदसौ मध्येसभं निरुत्तरीकृतस्तावत्साधुजनस्योपरि महान्तं प्रद्वेषं गतः, ततो रात्रावाकृष्टखड्गः समागतो मुनिहननार्थं, स्तम्भितो देवतया, प्रभाते च तदाश्चर्यमालोक्य राजा लोकश्च मुनिसमीपसमाकर्णितधर्माधर्मफलः समुपशान्तोऽङ्गीकृतवान् जिनधर्मं, नमुचिस्तु तथाऽपमानितो विलक्षीभूतो गतो हस्तिनागपुरं, महापद्मस्य मन्त्री जातः, तस्य च तदा सिंहबलनामा दुष्टसामन्तो विषमदुर्गबलेन देशमुपद्रवति, ततो महापद्मेन पृष्टो नमुचिः,

॥ ८१ ॥

यथा—जानासि कमप्युपायं सिंहबलग्रहणे ?, नमुचिनोक्तं—सुष्ठु जानामि, ततो गत्वा तद्देशं निपुणोपायेन भङ्क्त्वा दुर्गं सिंहबलं च गृहीत्वा समागतो नमुचिः, अतितुष्टेन राज्ञा वरं वृणीष्वेत्युक्तोऽब्रवीन्मन्त्री—यदा याचिष्ये तदा दद्याः, एवं च यौवराज्यमनुपालयति महापद्मः, कदाचित्तदीयमात्रा ज्वालया कारितो जिनरथः, अन्यया च लक्ष्म्यभिधानया विमात्रा ब्रह्मरथः, तयोश्चान्योऽन्यं विवादे प्रथमरथभ्रमणविषये समुत्पन्ने पद्मोत्तरेण नरपतिना द्वयोरपि निवारितौ रथौ, ततो महापद्मकुमारस्तमेवापमानं मन्यमानो निजमातुर्गतोऽकथयन्नेव महाटवीं, तत्र स्थित्वा तापसाश्रमे कानिचिद्दिनानि जनमेजयनरपतेः पुत्रिकायां नागवतीकुक्ष्युत्पन्नायां मदनावल्यां कालनरेन्द्रेण सह युद्धे समापतिते निजपितुः पलायिते दिशो दिशमन्तःपुरादिपरिकरे भयेन तत्रैव तापसाश्रमे समागतायां प्रथमदर्शन एव दर्शितानुरागायां जातानुरागः कुलपतिना विसर्जितो गच्छन् प्राप्तः सिन्धुनन्दनपुरम्, तत्रोद्यानिकामहोत्सवे मदोन्मत्तमहाकरिणो विमोच्य क्रीडन्तं नगरनारीजनं समानिनायालानस्तम्भमेतं महाकरिणं, विज्ञातव्यतिकरोऽसौ राज्ञा तत्रत्येन परिणायितः कन्याशतं, मनसा च समुद्वहति सदैव मदनावलीं, तिष्ठंश्च विशिष्ट-सौख्येन अन्यदा रात्रौ सुप्तोऽपहृतो विद्याधराङ्गनया वेगवत्या, निद्रावसानावेदितापहारकारणयावत्तदा (च तया) नीतोऽसौ

वैताढ्यपर्वते सूरोदयं नगरं, समर्पित इन्द्रधनुर्नाम्नो विद्याधराधिपतेः, परिणायितस्तेन स्वभार्यायाः श्रीकान्तायाः सुतां जयकान्तां, तत्परिणयनोपजातकोपावागतौ च गङ्गाधरमहीधरौ तदीयमातुलभ्रातरौ प्रवरविद्याधरौ विजित्य सङ्गरे क्रमेण समुपार्जितसमस्तविद्याधराधिपत्यो वशीचकार वैताढ्यश्रेणिद्वयं, न च परितोषं कमप्युवाह मदनावलीविरहितः, अन्यदा च जगाम केनापि मिषेण तमेव तापसाश्रमं, तत्र तापसैः प्रवरपुष्पफलादिभिर्विहितोऽस्य सन्मानः, दत्ता च तत्रैवागतेनामुष्य मदनावली शतधनुःपुत्रेण जनमेजयेन, परिणीता च महाप्रमोदमुद्वहताऽनेन सा, ततो महाविभूत्या विद्याधरचक्रवर्त्तिसमृद्धिसमेतो गतो हस्तिनागपुरं, प्रविष्टो बन्दिजनस्तूयमानः, आनन्दितवांश्च प्रणामाद्युचितप्रतिपत्तिकरणेन चिरवियोगदूनमानसौ जननीजनकौ विष्णुकुमारं च, अत्रान्तरे समवसृतः स एव मुनिसुव्रतस्वामिशिष्यः सुव्रताचार्यो यः कुलगहं क्षमाङ्गनायाः नन्दनवनं मार्दवसुरतरोर्निधानमार्जवधनस्यालम्बनं मुक्तिवल्ल्याः क्रीडागृहं तपःश्रियः स्वामी संयमसेवकस्य सहायः सत्यबन्धोः पारिजातप्रसवः शौचकिंजल्कस्य पणितभूमिराकिञ्चन्यपण्यस्य यौवनं ब्रह्मचर्यमण्डनस्य, तस्य च निजोद्यानपालकादवगम्यागमनं नरपतिः सपरिवारः समं विष्णुकुमारमहापद्माभ्यां वन्दनार्थमाययौ, तत्स्थानप्राप्तेन च करकमलकलितया मुखवस्त्रिकया मकरध्वजविजयगृहीतजयपताकयेव ॥ ८१ ॥

मुखदेशविनिवेशितया विराजमानो दक्षिणपार्श्वभागस्थापितेन रजोहरणेन शोभमानो विरचितपद्मासनः सूरिरभिवन्दितास्त्रिः प्रदक्षिणीकृत्य सपरिवारेण नरपतिना, सूरिणाऽप्यानन्दितः पापमलपटलप्रक्षालनजलेन धर्मलाभेन, समुपविष्टो नृपतिर्यथोचितस्थाने, भणितं च भगवता—भो भव्याः! दुरन्तः खल्वेषः जन्मजरामरणरौद्रजलजन्तुभीषणः शारीरमानसानेकदुःखसङ्घातानर्वाक्परपारनीरपरिपूर्णश्चतुर्गतिमहावर्त्तभीमो मनोदुष्पवनप्रेरणाविषयावर्त्तघूर्णमानचटुलेन्द्रिययानपात्रः संसारसागरसमुद्रमध्यपतितरत्नमिव दुष्प्रापमत्र मानुषत्वं, विषमिव विपाककटुकं विषयसुखं, वीचय इव निरन्तराः प्रसरन्ति कमपरिणतयः, नक्रादिक्रूरजलचरा इव समुच्छलन्ति भयावहा रागद्वेषादयः, गम्भीरपातालमिवातीवदुःखबहुलं श्रूयते नरकजालं, वडवानल इव बहलदाहहेतुः प्रवर्द्धते कषायदहनः, विषकन्दल्य इव विवशं जनं विदधति स्त्रियः, तस्मादेतत्तरणवाञ्छया विधीयतां विविधव्रतफलकनिवहानिबद्धे ज्ञानकर्णधारविराजिते सम्यक्त्वकूपस्तम्भशोभिते प्रशस्ताध्यवसायवायुपरिपूर्णविविधतपोऽनुष्ठानसितपटकलिते परतीरवर्त्तिपरमगतिपुरीनिवासार्थिमुनिजनवणिक्सार्थपरिकरिते परमगुरुप्रणीते सद्धर्मयानपात्रे यत्नः, अपिच—अत्र चतुर्दशरज्ज्वात्मकेऽत्र लोके जनस्य संवसतः । अस्ति न कुत्रापि सुखं विमुच्य

निर्वाणपुरमेकम् ॥ १ ॥ द्विविधस्तस्य च पन्था यतिधर्मगृहस्थधर्मभेदेन । प्रथमः पञ्चमहाव्रतपालनरूपोऽतिदुर्गश्च ॥ २ ॥ परिषोढव्या यस्मादुपसर्गपरीषहा बहुविकल्पाः । गुरुपारतन्त्र्यमनिशं कर्त्तव्यमभग्नपरिणामैः ॥ ३ ॥ जेयो मोहपिशाचः पञ्चेन्द्रियनिग्रहो विधातव्यः । हन्तव्यो मदनगजः कषायदावः प्रशमनीयः ॥ ४ ॥ यद्यपि च कष्टरूपः, प्रतिभाति मनस्ययं गुरुः पन्थाः । निर्वाणपुरप्राप्तिं, तथाऽप्यविक्षेपतः कुरुते ॥ ५ ॥ इतरस्त्वणुव्रतादिद्वादशभेदो जिनैः समाख्यातः । सुकरो बहुभङ्गतया यथा तथा भङ्गकाश्रयणात् ॥ ६ ॥ किन्तु—प्रापयति न मोक्षपुरीमक्षेपेणैव तेन वीरनराः । तत्र द्रुतजिगमिषया समाश्रिताः प्रथमपथमेव ॥ ७ ॥ अत्रान्तरे विनयविरचिताञ्जलिपुटः पद्मोत्तरनृपतिर्जातिजरामरणादिपरिवर्त्तनात् निर्विण्णः समाकर्ण्य परमसुखावासं निर्वाणनिवासं तद्विषयजातश्रद्धातिशयः समुल्लसितजीववीर्यजनितसर्वविरतिपरिणतिर्व्यजिज्ञपत्—भगवन्! यावत् निजराज्ये कमपि विष्णुकुमारादिकं निवेशयामि तावद्भवदनुज्ञया युष्मदन्तिक एव सकलकर्ममलक्षालनदक्षां दीक्षां गृहीष्ये, भगवतोक्तं—देवानुप्रिय ! बहुविघ्नः कुशलानुष्ठानक्षणः प्राणिनां, कर्त्तव्यं चेदं भव्यसत्त्वानां, तन्मा प्रतिबन्धं व्यधासीरित्युक्तः प्रणम्य गुरुं पुनः प्रविष्टो नगरं, निजनिलयगतेन चाकारिता मन्त्रिणः सहप्रधानपरिजनेन विष्णुकुमारश्च, भणितं च राज्ञा—भो ! भो ! समाक-

र्णितमेव भवद्भिर्भगवता वर्ण्यमानं संसारासारत्वं, तदिदानीं सहृदयस्य नात्रावस्थानं युज्यते, किन्तूच्छेदनमेवास्य श्रेयः, अतो विष्णुकुमारं राज्येऽभिषिच्य करोमि प्रव्रज्याग्रहणेन सफलां मनुजत्वादिसामग्रीं, तत उक्तं कुमारेण—तात ! किमनिष्टोऽहं भवतो येन किम्पाकफलमिव मुखमधुरं परिणामदारुणं राज्यं मयि निधाय स्वयं परिणतिपेशलं सकलकर्मव्याधिनिर्मूलनदक्षं दीक्षामहौषधं प्रतिपत्स्यते ?, तदहमपि त्वरितमेवानुचरिष्यामि, ततो राज्ञा तस्यापि प्रव्रज्याग्रहणनिर्बन्धमवबुध्याह्वायितो महापद्मो भणितश्च—पुत्र ! प्रतिपद्यस्व राज्यं येनाहं त्यक्तनिःशेषसङ्गः प्रव्रज्यां पालयामि, तेनोक्तं—तात ! प्रतिपादय विष्णुकुमाराय येन तस्य भृत्यो भवामि, राज्ञोक्तं—वत्स ! नाङ्गीकुरुते विष्णुकुमारः, स हि मयैव सह प्रव्रजिष्यति, ततो यदाज्ञापयति देव इत्यभिधाय तूष्णीं स्थितवति महापद्मे पित्रा सर्वोपाधिविशुद्धे वासरे महाविमर्देन समस्तसामन्तचक्रसम्मत्या समागते सुविशुद्धलग्ने तस्यैव विरचितो राज्याभिषेकः, स्वयं च त्रिकचतुष्कचत्वरादिष्वाघोषणापूर्वं दापितं दीनानाथादिलोकेभ्यो महादानं, पूजितो महाराध्यस्य भगवतस्तीर्थङ्करस्यापि पूजनीयः श्रीश्रमणसङ्घः, कारितः सर्वजिनायतनेष्वष्टाह्निकामहोत्सवः, प्रशस्तवासरे चानुगम्यमानोऽनेकैर्नरेन्द्रादिभिः समं विष्णुकुमारेण गतः सूरिपादान्तिकं,

प्रव्राजितश्च भगवता यथोचितविधानेन, ततो वन्दितः पद्मोत्तरः सविष्णुकुमारो नरेन्द्रादिभिः, गुरुणा च धर्मदेशना प्रारब्धा, यथा—चत्वारि परमाङ्गानि दुर्लभानीह देहिनः। मानुषत्वं श्रुतिः श्रद्धा, संयमे [च] वीर्यमेव चेत्यादि, क्रमेण च तथाविधक्षयोपशमवशतः स्तोककालेनैव गृहीता द्विविधाः शिक्षाः, जातो विषयविरक्ततया परित्यक्तगीतार्थोऽपि प्रधानगीतार्थः, कालान्तरेण चोत्पादितं सकलघातिकर्मविगममाधायातीतानागतवर्त्तमाननिखिलपर्यायाध्यासितलोकालोकाविर्भावकं केवलज्ञानं, महापद्मराजस्याप्यायुधशालायामुदपादि चक्ररत्नं, कृतः सकलदिग्विजयः साधितं षट्खण्डं भरतक्षेत्रं जातो नवमश्चक्रवर्त्ती, यौ चैतावत्कालं स्थितौ रथौ तयोश्च प्रथमं जिनरथं नगर्यां पर्यटय्य विहिता समं जननीतोषेण जिनप्रवचनप्रभावना, तत्प्रभृति चानेको लोकः प्रपन्नो जिनशासनं, कारिता च तेन चक्रवर्त्तिनाऽनेकजिनभवनमण्डिता सकलभरतक्षेत्रभूमिः, पद्मोत्तरमुनिस्तु केवलिपर्यायेण विहृत्य कियन्तमपि कालं गतो निर्वाणं। विष्णुकुमारसाधोश्च विविधतपोविशेषविशोषितशरीरस्य ज्ञानदर्शनचारित्रपर्यायैः प्रवर्द्धमानस्योत्पन्ना नानाविधवैक्रियकरणगगनगमनादिलब्धयः, न चैतच्चित्रं यदनुकलमविकलं सकलधर्ममाराधयतां साधूनां लब्धयः समुत्पद्यते, तथा चोक्तं—" चरणरजसा प्रशमनं सर्वरुजां साधवः क्षणात्

कुर्युः । त्रिभुवनविस्मयजननान् दद्युः कामांस्तृणाग्राद्वा ॥ १ ॥ धर्माद्रत्नोन्मिश्रितकाञ्चनवर्षादिसर्ग सामर्थ्यम् । अद्भुतभीमोरुशिलासहस्रसम्पातशक्तिश्च ॥ २ ॥" इत्यादि । इतश्च—सुव्रताचार्यः स्वशिष्यपरिकरितो मासकल्पेन विहरन् संप्राप्तो वर्षासन्नदिनेषु हस्तिनागपुरं, समवसृतो बाह्योद्याने, समागता वन्दनार्थं नरेन्द्रादयः, प्रारब्धा धर्मकथा, निन्दिता मिथ्यात्वादयः पदार्थाः, प्रशंसिताः सम्यक्त्वादयः, ततश्च केचिदवगतयथाऽवस्थिततीर्थकरवचनाः प्रव्रजिता, अपरे च श्रावका जाताः, अत्रान्तरे पूर्ववैरसंस्मरणोपजातगाढकोपस्य नमुचिमन्त्रिणो मुनिच्छिद्रावलोकनपरस्य समागतो वर्षासमयः, यत्र—मार्गा दुर्गमतां गता विरहिणः शुष्यन्ति कामातुरा, निर्जित्येव निदाघमूर्जितरिपुं गर्जन्ति धाराधराः । आलोक्येव मलीमसोदयमितो हंसा गता मानसं, जाता मासविहारिणोऽपि हि पुरा स्थानस्थिताः साधवः ॥ १ ॥ एवंविधघनसमये, मुनिजनकोपेन याचितो राजा । पूर्वप्रतिपन्नवरो, दत्तश्च नृपेण भणितं च ॥ २ ॥ ब्रूहि तव यदभिलषितं स आह वेदोदितेन विधिनाऽहम् । इच्छामि यज्ञयजनं तन्मे तावन्ति दिवसानि ॥ ३ ॥ देहि स्वकीयराज्यं दत्तं राज्ञा च सत्यसन्धेन । अन्तःपुरं

१५ प्रविश्य स्वयं च तस्थौ मनुजनाथः ॥ ४ ॥ राज्यस्थिते च तस्मिन् वर्द्धापनकार्थमागतास्तस्य । सर्वे पाखण्डस्थाः

विमुच्य तं साधुजनमेकम् ॥ ५ ॥ अत्रान्तरे तदेव छिद्रं लब्ध्वा मुनीनाकार्योक्तवान्–भो ! भो ! समुत्सृजत मदीयं देशं विमुञ्चतेदानीं मे नगरं, अद्रष्टव्यमुखा हि यूयं ये सकलजनसम्मतमपि समुचितं लौकिकाचार-मुल्लङ्घयन्ति, नीतिशास्त्रप्रतिषिद्धश्च भवदाचारः, तथा चोक्तम्–"यद्यपि निपुणो योगी, छिद्रां पश्यति मेदि-नीम् । तथाऽपि लौकिकाचारान्, मनसाऽपि न लङ्घयेत् ॥ १ ॥" किञ्च–"लोकवत्प्रतिपत्तव्यो, लौकि-कोऽर्थः परीक्षकैः । लोकव्यवहारं प्रति, सदृशौ बालपण्डितौ ॥ २ ॥" न चान्यदर्शनिभ्यो भवन्तः प्रधानतराः, ते च सर्वेऽप्यभिनवराज्यलाभेऽस्मद्वर्द्धापनाय समायाताः, भवन्तस्तु गुरुदर्पाध्मातान्तःकरणा लोकव्यवहारबाह्या न समा-गता इत्याद्युक्तवति तस्मिन् सूरिरवोचत्–महाराज ! न वयं दर्पान्नागताः, किन्तु त्यक्तसकलसङ्गानां मुनीनां कल्प एषः, तथाहि भवदागमेऽप्युक्तम्–"तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना । अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥ १ ॥" लोकव्यवहारबाधाऽपि न काचिदस्माभिर्विहिता, राजविरुद्धाद्यनासेवनाद्, यच्चोक्तं देशत्यागं कुरुत यूयमिति, तच्चायुक्तं, यतः–"व्रतिनो जङ्गमं तीर्थं, सदाचारपरायणाः । न सन्ति येषु देशेषु कुतस्तेषां पवित्रता ? ॥१॥" किञ्च–"यमु-पार्जयन्ति धर्मं, कायक्लेशं विधाय मुनयोऽमी । साधयति तपःक्लेशेन, नरपतिः पालनात्तेषाम् ॥२॥" अपिच–परैरप्यनार्यैः

पराभूयमानानां तपस्विनां पार्थिव एव शरणं भवति, तथा च स्मृतिवाक्यम्—"दुर्बलानामनाथानां, बालवृद्धतपस्विनाम्। अनार्यैः परिभूतानां, सर्वेषां पार्थिवो गतिः ॥ १ ॥" किञ्च—मनुनाऽपि सामान्येनैवैवमुक्तम्—"प्रजानां धर्मषड्भागो, राज्ञो भवति रक्षतः। अधर्मादपि षड्भागो, भवत्यस्य ह्यरक्षणात् ॥ १ ॥" अतः किमिति निरपराधानेव साधून्निष्कासयसि देशात्?, अथैवमेव भवतो न प्रतिभान्त्यमी तथाऽपि वर्षाकालं यावन्न किञ्चिद्गणनीयं, तदूर्ध्वं निर्गमिष्याम इत्युदितवति सूरौ नमुचिरुवाच—भो! भो! किमत्र बहुना वाक्कलहेन? यदि जीवितेन कार्यं तदा दिनसप्तकादर्वागितो निर्गच्छत, तदुपरि तु बान्धवसममपि यदि विलोकयिष्यामि तदाऽवश्यं महानिग्रहेण निग्रहीष्यामि, एवं च तन्निर्बन्धमवबुध्य मुनयः स्वस्थानमाजग्मुः, समारब्धश्च सूरिणा साधुभिः सार्द्धं पर्यालोचः—भो! भो! किमधुना कर्त्तव्यं?, अयं हि वादकालविहितोत्तरदानप्रकोपितो मिथ्याभिनिवेशादेवमस्मान् खलीकरोति, अत्रान्तरे भणितमेकेन साधुना—विष्णुकुमारवचनादेष द्रुतमुपशमिष्यतीति संभाव्यते, ततो यद्यनेनोपशान्तेन प्रयोजनं तदाऽविलम्बेन मन्दरशैलादाहूय विष्णुकुमारमेतत्समीपं प्रेष्यतां, ततः सूरिणोक्तं—कस्तत्र गन्तुं शक्ष्यति? दूरदेशवर्त्ती नः स शैलो, यदि च कश्चिज्जङ्घाचरणो विद्याचारणो वा भवति स एव तत्र गन्तुं शक्नोति, नान्य इति, ततोऽन्येन मुनिनोदितं—यथाऽहमाकाशेन

गन्तुं समर्थो नागन्तुं, सूरिणोक्तं–यद्येवं गच्छ स एवानेष्यति, ततः (सः) समुत्पतितस्तमालदलश्यामलं गगनमण्डलं, क्षणमात्रेण प्राप्तस्तमुद्देशं, दृष्टो विष्णुकुमारेणागच्छन्, चिन्तितवांश्च, गुरुतरं किञ्चित्सङ्घादिकार्यं तेनायं वर्षाकाल एव समायातः, सोऽप्येवं चिन्तयन्तं तं विधिवत् प्रणम्य कथितवानागमनप्रयोजनं, स्तोकवेलायां च विष्णुकुमारोऽपि तमादायाऽऽकाशयानेन प्रवृत्तो गजपुराभिमुखं गन्तुं, गतः क्षणमात्रेण, वन्दिताः सूरयः, साधुद्वितीयो गतो नमुचिदर्शनार्थं, किञ्च–तं विमुच्य वन्दितः सर्वैरपि महानरेन्द्रादिभिः, सुखासनासीनेन च धर्मकथनादिपूर्वं भणितं विष्णुना–वर्षाकालं यावत्तिष्ठन्तु मुनयस्तदूर्ध्वं यद्भणिष्यथ तत्करिष्यामः, तस्य च महामत्सरभराक्रान्तान्तःकरणस्य न किञ्चित्प्रतिभातं तद्वचः, केवलं सलिलमिव कर्णप्रविष्टं शूलमुपजनितवत्, ततश्च तेनोक्तं–किमत्र पुनः पुनरुक्तेन ?, दिनपञ्चकमप्यवस्थानं नानुमन्यामहे, विष्णुनोक्तं–नगराद्बहिरुद्याने तिष्ठन्तु, ततः पुनरुदितोद्दीपितकोपेनोक्तं नमुचिना–तिष्ठन्तु तावदेतन्नगरोद्यानं, मम राज्येऽपि सर्वपाषण्डिनामधमैरभिर्न स्थातव्यं, तस्मात्त्वरितं मम राज्यं मुञ्चत यदि जीवितेन कार्यं, ततस्तदत्यन्तासहिष्णुताविलोकनेन्धनप्रज्वलितक्रोधवह्निना भणितं विष्णुना–तथाऽपि पदत्रयस्थानं मुञ्च, तेनोक्तं–यदि पदत्रयोपरि द्रक्ष्यामि तदा लूनशीर्षं करिष्यामि, ततः समुत्पन्न-

दारुणकोपो वर्द्धितुं प्रवृत्तः, विवर्द्धमानश्च योजनलक्षप्रमितदेहः संवृत्तः, तस्मिंश्च स्वर्गमर्त्यलोकयोरन्तरालमानमिव ग्रहीतुं तथा प्रवृद्धे कृते चानेन गाढमाक्रमेण क्रमदर्दरे–आकम्पिता सकाननशिलोच्चया वसुमतीयमखिलाऽपि । उच्छलिता जलनिधयस्तरलतरङ्गस्फुरच्छफराः ॥ १ ॥ उत्सृज्य मदं नष्टाः, भयविवशदृशो दिशो गजेन्द्राश्च । प्रतिपथगमनाः सरितः सर्वा अपि झगिति संपन्नाः ॥ २ ॥ त्रासवशीकृतचित्तं ज्योतिश्चक्रं च विघटितं सकलम् । व्यन्तरसुराश्च सह भवनवासिभिर्दूरमुत्त्रस्ताः ॥ ३ ॥ अत्रान्तरे विहितभुवनत्रयक्षोभं महामुनिं कुपितमालोक्य सौधर्माधिपतिः प्रेषयामास तत्सकाशं स्वकीयगीतविद्याकुशलं गाथकसुरसुन्दरीसमूहं, स च समागत्य मुनेः कर्णमूले कोपहन्तृभिर्वचोभिर्गातुं प्रवृत्तः, यथोक्तं–"क्रोधः परितापकरः सर्वस्योद्वेगकारकः क्रोधः । वैरानुषङ्गजनकः क्रोधः क्रोधः सुगतिहन्ता ॥१॥ क्रोधो नाम मनुष्यस्य, शरीराज्जायते रिपुः । येन त्यजन्ति मित्राणि, धर्माच्च परिहीयते ॥२॥" अपि च- " एकः श्रीखण्डलेपेन, लिम्पत्यागत्य भक्तितः । अन्यो वासी समादाय, संतक्षणोति क्षणं क्षणम् ॥ १ ॥ एको ददाति वन्दित्वा, भोजनाच्छादनादिकम् । ताडयित्वा कशैरन्यो, निष्काशयति गेहतः ॥ २ ॥ एकः संस्तौति सुश्लोकैर्हृदयाल्हाददायिभिः । निर्भर्त्सयति दुर्वाक्यैरन्यः कोपमुपागतः ॥ ३ ॥ इष्टानिष्टकरेष्वेवं, प्राणिषु प्राणवत्सलाः ।

रागद्वेषौ न कुर्वन्ति, समभावाः सुसाधवः ॥ ४ ॥" अन्यच्च–"देशोनपूर्वकोटीं, विहृत्य यदुपार्जयेन्नरश्चरणम् । हारयति तत्समस्तं मुहूर्त्तमात्रेण कोपगतः ॥ ५ ॥ एवं किंनरखचरादयोऽपि कोपापहारिभिर्वचनैः । गायन्ति भीतचित्तास्त्रैलोक्यक्षोभदर्शगताः ॥ ६ ॥ इतश्च–आरब्धा जिनपूजा निःशेषसुरालयेषु शान्तिकृते । कायोत्सर्गस्थोऽजनि चतुर्विधः श्रमणसङ्घोऽपि ॥ ७ ॥" अत्रान्तरे नमुचिस्तस्य क्षामणानिमित्तं यावदागत्य पादयोर्लग्नस्तावत्पादाग्रेणैवोत्पाट्य प्रक्षिप्तः पश्चिमसमुद्रे, विज्ञातवृत्तान्तेन तु भयवेपमानेन समागत्य महापद्मचक्रवर्त्तिना शान्तिनिमित्तसमायातसमस्तसङ्घसमन्वितेन प्रसाद्यमानः स्तूयमानश्च देवादीनामुपशमकस्तावकत्वाक्यगीतकाव्यादिबन्धैः कथञ्चिदुपशमितो विष्णुकुमारः पुनर्घोरतरं तपो विधाय कञ्चित् कालं घातिकर्मचतुष्टयक्षयाविर्भूतलोकालोकाविर्भावक केवलज्ञानो विनाशितभवोपग्राहिकर्मचतुष्टयः प्राप्तोऽनन्तैकान्तिकात्यन्तिकसुखं विगतजरामरणादिनिःशेषदुःखं लोकाग्रवर्त्तिपरमपदम्, तज्ज्ञातोऽपि महापद्मो विपाककटुकं चक्रवर्त्तिपदमालोच्य नरपतिसहस्रसहितो गृहीत्वा प्रव्रज्यां विहितदुष्टाष्टकर्मक्षयो मोक्षं गतः । उक्तं प्रभावनायां विष्णुकुमारचरितं, प्रस्तुतार्थोपसंहारस्तु यथा

विष्णुकुमारसाधुना प्रभावना कृता तथा सति सामर्थ्येऽन्येनापि करणीया, तदकरणे त्वतीचार इति ॥ उक्तं सप्रसङ्गोदाहरणं सप्तमं सम्यक्त्वातिचारद्वारमधुनाऽष्टमं भङ्गद्वारमभिधत्ते—

संमत्तं पत्तंपि हु रारेण निहाणगव अइदुलहं।
पावेहि अंतरिज्जइ पढमकसाएहि जीवस्स ॥ १९ ॥

'सम्यक्त्वं' व्याख्यातस्वरूपं 'प्राप्तमपि' लब्धमपि, हुशब्दः पूरणे, 'अंतरिज्जइ' त्ति सम्बन्धादपनीयते, कस्य ?– 'जीवस्य' प्राणिनः, किंविशिष्टम् ?–' अतिदुर्लभं' दुःखेन लभ्यते यत्तत्तथा, अतिशयेन दुर्लभमितिविग्रहः, भावार्थस्त्वयमस्य–अनादौ संसारे परिवर्त्तमान एष जीवोऽभिन्नकर्मग्रन्थिर्न कदाचिदवाप्तवानतोऽतिशयदुष्प्रापमिदमित्युक्तं, केन किमिव दुष्प्रापमित्याह–' रोरेण' रङ्केण निधानमेव निधानकं तदिव–निधानकमिव, कैः ?–' प्रथमकषायैः' अनन्तानुबन्ध्याख्यैः, प्रथमता चैषां प्रथमगुणघातित्वेन, प्रथमगुणश्च सम्यक्त्वं, तन्मूलकत्वाद्देशविरत्यादिगुणानां, कीदृशैस्तैः ?–' पापैः' पापहेतुत्वाद्, यद्वा पापप्रकृतिरूपैरिति गाथाऽक्षरार्थः। भावार्थस्त्व(यम)त्र–क्षायोपशमिकौपशमिकसम्यक्त्वापेक्षमेतद्गाथायां भङ्गद्वारं निर्दिष्टं, न क्षायिकापेक्षं, तस्य शुद्धाशुद्धभेदेन

द्विभेदत्वात्, तत्रापायसद्द्रव्यविकला भवस्थकेवलिनां मुक्तानां च या सम्यग्दृष्टिस्तच्छुद्धं क्षायिकं, तस्य च साद्यपर्यवसानत्वान्नास्त्येव भङ्गः, यदाह गन्धहस्ती—भवस्थकेवलिनो द्विविधस्य सयोगायोगभेदस्य सिद्धस्य वा दर्शनमोहनीयसप्तकक्षयाविर्भूता सम्यग्दृष्टिः सादिरपर्यवसाने " ति, या त्वपायसहचारिणी श्रेणिकादेरिव सम्यग्दृष्टिस्तदशुद्धं क्षायिक, तस्य च सादिपर्यवसानत्वादस्ति प्रतिपातः, यदुक्तं गन्धहस्तिना—" तत्र याऽपायसद्द्रव्यवर्त्तिनी, अपायो—मतिज्ञानांशः सद्द्रव्याणि—शुद्धसम्यक्त्वदलिकानि तद्वर्तिनी, श्रेणिकादीनां च सद्द्रव्यापगमे भवत्यपायसहचारिणी सा सादिसपर्यवसाने " ति, केवलज्ञानोत्पत्तावपायक्षये, अपायो—मतिज्ञानांशस्तत्क्षयेऽसौ भवति, न प्रथमकषायोदये, तत्काले तदुदयाभावात्, तत्क्षय एव तस्योत्पत्तेरित्यलं प्रसङ्गेन गमनिकामात्रफलत्वादारम्भस्येति, दृष्टान्ताश्चात्र कुरुडोत्कुरुडप्रभृतयः स्वमत्याऽभ्यूत्याः ॥ १९ ॥ गतमष्टमं भङ्गद्वारमधुना नवमं भावनाद्वारमुच्यते—

मिच्छत्तकारणाइं कुणंति नो कारणेऽवि ते धन्ना ।
इइ चिंतेज्जा मइमं, कत्तियसेट्ठी उयाहरणं ॥ २० ॥

मिथ्यात्वस्य--प्राग्व्यावर्णितस्य कारणानि—हेतवो मिथ्यात्वकारणानि—परतीर्थिकादिपरिचर्यापरिचयप्रभृतीनि 'कुर्वन्ति' विदधति यत्तदोर्नित्यसम्बन्धाद् ये 'नो' नैव 'कारणेऽपि' हेतावपि, राजादिजनिते जात इति शेषः, ते 'धन्याः' पुण्यभाजो, वर्त्तन्त इति शेषः, 'इति' एतत् 'चिन्तयेत्' भावयेत् 'मतिमान्' धीयुक्तः, अत्रार्थे को दृष्टान्तः ? इति चेद् ब्रूमः—कार्त्तिकाभिधानः श्रेष्ठी—वणिक्पतिः कार्त्तिकश्रेष्ठी 'उदाहरणं' दृष्टान्त इति गाथासमासार्थः ॥ २० ॥ व्यासार्थः कथानकगम्यस्तच्चेदम्—

हत्थिणपुरंमि नयरे जियसत्तू नाम आसि नरनाहो । तस्स य कित्तियसेट्ठी विसिट्ठचिट्ठासु पत्तट्ठो ॥ १ ॥ नेगमसहस्ससारो मणिरयणहिरण्णपुन्नभंडारो । दीणजणब्भुद्धारो पसिद्धसुविसुद्धववहारो ॥ २ ॥ अवगयजीवाजीवो नायासवसंवरो विऊ बंधे । निज्जरवियारनिउणो मुक्खपयत्थंमि उज्जुत्तो ॥ ३ ॥ निग्गंथे पावयणे अणुरत्तो दूरचत्तमिच्छत्तो । बारसविहेऽवि सम्म सावगधम्मंपि अपमत्तो ॥ ४ ॥ अन्नोऽवि गङ्गदत्तो तत्थेव सुसावओ तया सा य । मुणिसुव्वयजिणपासे पव्वइओ भवविरत्तमणो ॥ ५ ॥ तइया य तंमि नयरे बहुमासखमणकरणवि-क्खाओ । भागवयवयपहाणो वसइ परिव्वायगो एगो ॥ ६ ॥ सो य-पविसइ पुरस्स मज्झे जइयच्चिय पारणाए

कज्जेण । तइयच्चिय सव्वजणो अब्भुट्ठाणाइ से कुणइ ॥ ७ ॥ तहाहि—कोऽवि निमितंइ गेहे कोऽवि य पाएसु पडइ हिट्ठमणो । कोऽवि हु वंदइ सथुणइ कोवि परिपूयए कोऽवि ॥ ८ ॥ नवरं कत्तियसिट्ठी उववि्ट्ठो चेव चिट्ठइ तओ सो । नाढाइ मज्झ एसुत्तिचिंतिउं कोवमावण्णो ॥ ९ ॥ अण्णंमि दिणे मासस्स पारणे राइणा स सयमेव । सगिहंमि भोयणत्थं निमंतिओ नेच्छई कहवि ॥ १० ॥ भणइ य नियहत्थेणं जइ परिवेसेइ कत्तिओ सिढी । मज्झं तो तुज्झ गिहे पारेमि न अन्नहा राय ! ॥ ११ ॥ पडिवन्नं तं रन्ना सिट्ठिसयासं गओ सयं चेव । दिण्णासणोवविट्ठो हिट्ठो आभासितो सिट्ठी ॥ १२ ॥ तो तन्निमंतणाई कहइ परिव्वायगस्स वुत्तंतं । पाडिभणति कत्तिओ देव ! अम्ह एयं न जुत्तंति ॥१३॥ सब्भत्तमइलणा खलु, जायइ एवं ज़ओ तहावि तुहं । विसए वसामि नरवर ! करेमि जं भणसि तं तेण ॥ १४ ॥ एवं होउत्ति तओ भणियं राया गओ नियगेहं । भोयणवेलाए पुण सेट्ठीवि समागओ तत्थ ॥ १५ ॥ उववि्ट्ठो सो भयवं सिट्ठी परिवेसिउं समाढत्तो । तज्जइ तमंगुलीए परिवेसंतं अमरिसेणं ॥ १६ ॥ चिंतेइ तओ सिट्ठी धिरत्थु जीवाण भागसिद्धाणं । संवसणं गिहवासे एवंविहपरिभवावासो ॥ १७ ॥ धन्नो स गंगदत्तो जो चत्तकलत्तपुत्तगिहमित्तो । पत्तो संजमरज्जं मुणिसुव्वयसामिपासंमि ॥ १८ ॥ तइय च्चिय पव्वज्जं जइ गिण्हंतो अहंपि

॥ ८९ ॥

ता इण्हिं । सम्मत्तमइलणाईपराभवं नेव पाविंतो ॥ १९ ॥ एयं विचिंतयंतो भुंजावित्ता गओ निवसगासं ।
विन्नविओ नरनाहो पव्वज्जमहं पवज्जामि ॥ २० ॥ ताहे से निब्बंधं रन्ना नाउ विसज्जिओ संतो । आपुच्छिउं
कुडुंबं तयाहिवत्ते ठविय पुत्तं ॥ २१ ॥ आढत्ताओ जिणवरगेहेसु अट्ठाहियाओ पवराओ । दीणाणाहाईणं पयट्टियं
विविहदाणं च ॥ २२ ॥ पूइज्जइ सिरिसंघो एत्थंतरयंमि सुव्वयजिणिंदो । तत्थेव पुरे पत्तो समोसढो बाहिरुज्जाणे
॥ २३ ॥ नाऊण जिणागमणं वंदणवडियाए आगओ सिट्ठी । नेगमसहस्ससाहिओ धम्मं सोऊण पव्वइओ
॥ २४ ॥ थोवेणवि कालेणं जाओ सो बारसंगसुयधारी । संगहियविहियसिक्खो गीयत्थो परमसंविग्गो
॥ २५ ॥ संवच्छराइं बारस सामण्णं निक्कलंकमणुचरिउं । पच्छा विहियाणसणो काले काऊण
सुहज्झाणो ॥ २६ ॥ दोसागरोवमाऊ, बत्तीसविमाणसयसहस्सवई । इंदत्तेणुववण्णो सोहम्मव-
डिंसयविमाणे ॥ २७ ॥ आवज्जियाभिओगियकम्मो अह गेरुओऽवि मरिऊण । अभिओगिय
देवेसुं जाओ तव्वाहणत्ताए ॥ २८ ॥ भणिओ य तन्निओगियसुरेहि लीलाए विलसमाणो उ । एरावणकरिरूवं,
विउव्व आरुहइ जेणिंदो ॥ २९ ॥ ताहे विभंगनाणेग जाणिउं एस सिट्ठिजीवुत्ति । न विउव्वइ करिरूवं, हठेण

भणिओ विउव्वइ य ॥ ३० ॥ दो करिवररूवाइं, सक्केणवि जाणिऊण से भावं। दो रूवाइं काउं पुढो २ तेसु आरूढो ३१ ॥ एवं च जत्तियाइं करेइ सो तत्तियाइं सक्कोऽवि। रूवाइं विउव्वेउं, आरोहइ तेसु सव्वेसुं ॥ ३२ ॥ तप्पसरभंजणत्थं च किंचि रोसागएण सक्केणं। वज्जेण हओ पच्छा ठिओ य साहाविगईए ॥ ३३ ॥ एवं च—सम्मत्तभावणाए कत्तिथसिट्ठिस्स साहियं चरियं। सुयएविपसाएणं होउ सुणंतो थिरो धम्मे ॥ ३४ ॥ व्याख्यातं सम्यक्त्वभावनाद्वारं, तद्व्याख्यानाच्च समाप्तं नवधाऽपि द्वितीयं मूलद्वारं सम्यक्त्वं, एतच्च चित्रशुद्धौ भित्तिशुद्धिवत्प्रासादस्थिरत्वे गर्त्तापूरकबन्धवद्व्रताङ्गीकारे मूलकारणम्, एतदन्तरेण तदभावात्, तथा चोक्तम्—" मूलं द्वारं प्रतिष्ठानमाधारो भाजनं निधिः। द्विषट्कस्यास्य धर्मस्य, सम्यक्त्वं परिकीर्त्तितम् ॥ १ ॥ " अतस्तदनन्तरोद्दिष्टस्य व्रतानीत्यस्य तृतीयद्वारस्यावसरः, एतच्च सामान्योद्दिष्टमपि 'श्राद्धानामनुग्रहार्थं वक्ष्य' इति सम्बन्धाऽन्यथानुपपत्तेः श्रावकव्रतविषयं, श्रावकव्रतानि पञ्चाणुव्रतात्रिगुणव्रतचतुःशिक्षाव्रतभेदभिन्नत्वाद्द्वादश, एतानि च मलोत्तरगुणरूपाणि सर्वाण्यपि क्रमेणाभिधातुं प्रथमं प्रथमाणुव्रतमेत्र नवभिर्द्वारैर्यादृशादिभिर्विवरीषुः प्रथमद्वारं तावदाह—

**दुन्नि सया तेयाला पाणइवाए पमाउ अट्ठविहो। पाणा चउराईया परिणामेऽट्ठुत्तरसयं च ॥ २१ ॥**

प्रथमद्वारेण तावदाह–" दोन्नि सया तेयाला " द्वे शते त्रिचत्वारिंशदधिके, भेदानामिति गम्यते, 'पाण-इवाय' त्ति प्राणाः–वक्ष्यमाणरूपास्तद्योगात् प्राणिन एव प्राणाः, दण्डयोगाद्दण्डः पुरुषो यथा, तेषामतिपातो–विनाशः प्राणातिपातस्तस्मिन् प्राणातिपाते–प्राणातिपातविषये, स्वरूपमित्युपाहृतपदेन योजना, भणितसङ्ख्या चेत्थमानीयते–पृथ्वीकायिकादयो वनस्पतिकायिकान्ताः पञ्च ५ जीवभेदाः, द्वीन्द्रियादिपञ्चेन्द्रियावसानैश्चतुर्भिः ४ सह नव ९, ते च मनोवाक्कायलक्षणेन करणत्रिकेण गुणिताः सप्तविंशतिः २७, भूयः करणकारणानुमतिरूपयोगत्रयताडिता एकाशीतिः ८१, पुनरतीतानागतवर्त्तमानकालत्रयाभ्यस्ता द्वे शते त्रिचत्वारिंशदधिके भवतः २४३।
तथा '**पमाओ अट्ठविहो**' त्ति प्रमाद्यति—मोक्षमार्गं प्रति शिथिलोद्यमो भवत्यनेन प्राणीति प्रमादः, किंविशिष्टः ? '**अष्टविधः**' अष्टप्रकारः, तथा चोक्तम्––" अज्ञानं संशयश्चैव, मिथ्याज्ञानं तथैव च । रागद्वेषावनास्थानं, स्मृतो धर्मेष्वनादरः ॥ १ ॥ योगदुष्प्रणिधानं च, प्रमादोऽष्टविधः स्मृतः । तेन योगात्प्रमत्तः स्यादप्रमत्तस्ततोऽन्यथा ॥ २ ॥ " इति, अयमपि प्राणातिपाते स्वरूपमिति पूर्ववत्सम्बन्धः । ननु केऽमी
१६ प्राणा यदतिपातविषयमेतत्स्वरूपं प्ररूप्यते, ? उच्यते, '**पाणा चउराईय**' त्ति 'प्राणाः' इन्द्रियादयः '**चतुरादयः**'

चतुःप्रभृतयः, आदिशब्दात्षडादिपरिग्रहो, यथोक्तम्–" इंदियबलऊसासा पाणा चउ छच्च सत्त अट्ठेव । इगि विगलऽसण्णसण्णी नवदस [ ग्रन्थाग्रम् २५०० ] पाणा उ बोद्धव्वा ॥ १ ॥ " इति, परिणामे–चित्तादिपरिणातिविशेषे यदष्टोत्तरशतं, भङ्गकानामिति गम्यं, तच्च प्राणातिपाते स्वरूपमिति प्राग्वद्योगः, उद्दिष्टसङ्ख्या चैवं–संरम्भसमारम्भारम्भैस्त्रिभिर्मनोवाक्कायकरणकारणानुमतिनवकताडितैः सप्तविंशतिः २७, पुनः कषायगुणितैरष्टोत्तरं शतं, संरम्भादिस्वरूपं चैवं–प्राणातिपातादिसंकल्पः संरम्भः, तत्करणजनितः परितापः समारम्भः, तत्क्रियानिष्पत्तिश्चारम्भः, तदुक्तम्–" संकप्पो संरम्भो परितावकरो भवे समारंभो । आरम्भो उद्दवओ सुद्धनयाणं तु सव्वेसिं ॥ १ ॥ " स्यादेतद्–व्रतान्यत्र यादृशादिद्वारैर्व्याख्यातुमुपक्रान्तानि, तेषु च प्रथमव्रतं प्राणातिपातपरिहारः, ततो यादृशद्वारे तस्यैव स्वरूपं वक्तुमुचितं, न प्राणातिपातस्य, यतः प्राणातिपातः प्राणविनाशोऽभिधीयते, तत्परिहारस्तु तद्विरतिः, यदाह वाचकमुख्यः–" हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रत–( तत्त्वा० ७–१ ) "मिति, सत्यं, विषयविषयिणोरभेदोपचारादेतद्विषया निवृत्तिरप्येतच्छब्देनोपात्तेति न दोषः, एतच्चानपेक्षिताणुस्थूलविशेषस्य प्राणातिपातस्य स्वरूपाभिधानं

यतिश्रावकयोः सामान्येनैव स्वामित्वप्रदर्शनार्थं, निवृत्तिस्तु यथासम्भवं भाव्येति गाथार्थः ॥ २१ ॥ व्याख्यातं यादृशद्वारमधुना भेदद्वारस्यावसरस्तत्प्रतिपादनायाह—

थूला सुहुमा जीवा संकप्पारंभजो य सो दुविहो।
सवराह निरवराहो, साविक्खो तह य निरविक्खो ॥ २२ ॥

'स्थूलाः' द्वीन्द्रियादयश्चक्षुरिन्द्रियग्राह्याः 'सूक्ष्माः' तद्विपरीता एकेंद्रियाः 'जीवाः' प्राणिनो, द्विविधा भवन्तीतिशेषः, सूक्ष्मत्वं च सूक्ष्मदृष्टिगम्यतया न तु सूक्ष्मनामकर्मोदयेन, तद्गतामतिपातनासम्भवात्, स्वायुःक्षयेणैव तन्मरणाभ्युपगमात्, अनेन जीवद्वैविध्येनाश्रयाश्रयिणोरभेदोपचारात् प्राणातिपातो द्विविधः स्थूलः सूक्ष्मश्चेत्येतदुक्तं भवति, तेन प्राणातिपातभेदद्वारेऽपि जीवभेदाभिधानमदुष्टमेवेति सूत्रार्थः सूक्ष्मधिया भाव्यः, अन्यथापि प्राणातिपातद्वैविध्यमाह—'संकप्पारंभओ य सो दुविहो'त्ति सङ्कल्पश्च—मारयाम्येनं कुलिङ्गिनमित्येवं विकल्पः आरम्भश्च-कृष्यादिरूपः सङ्कल्पारम्भौ ताभ्यां जातः सङ्कल्पारम्भजः, चशब्दः पूर्वापेक्षया समुच्चये, 'सः' पूर्वोक्तः स्थूलसूक्ष्मभेदेन द्विविधोऽपि प्रत्येकं द्विविध इति सम्बन्धः, यः सङ्कल्पजः सोऽपि द्विभेद इत्याह—सापराधो निरपराधः, 'सवराह'त्ति

सूत्रत्वाल्लुप्तविभक्तिकं पदं, ततः सहापराधेन वर्त्तत इति सापराधः—प्रतिकूलकारी जीवस्तद्विषयो वधोऽपि सापराधः, पूर्वोक्तादेव हेतोर्निर्गतोऽपराधान्निरपराधः, शेषं प्राग्वत्, एष च सर्वोऽपि सापेक्षस्य कर्त्तुर्यदा भवति तदा सापेक्षो, निरपेक्षस्य तु निरपेक्षः, अत्र च श्रावकेण स्थूलप्राणातिपातस्य निवृत्तिं कुर्वता संकल्पजान्निरपराधान्निवर्त्तितव्यं, सापराधे तु गुरुलघ्वालोचनया सापेक्षक्रियया प्रवर्त्तितव्यं, न तु निरपेक्षता कार्या, आरम्भजे तु न नियमः, किन्तु तत्रापि यतनया प्रवर्त्तितव्यमिति गाथार्थः ॥ २१ ॥ गतं द्वितीयद्वारमिदानीं यथा जायते स्थूलप्राणातिपातविरतिरित्येतद्द्वारमुच्यते—

सम्मत्तंमिवि पत्ते बीयकसायाण उवसमखएणं ।
तव्विरईपरिणामो एवं सव्वाणवि वयाणं ॥ २३ ॥

'**सम्यक्त्वे**' सम्यग्दर्शने, अपिशब्दस्य भिन्नक्रमः सम्बन्धः, स च '**प्राप्तेऽपि**' लब्धेऽपि, अयमभिप्रायः—अप्राप्तसम्यग्दर्शनस्य विरतिपरिणामो न जायत एव, अतः प्राप्तेऽपीत्युक्तं, '**द्वितीयकषायाणाम्**' अप्रत्याख्यानाभिधेयानां '**उवसमखएणं**' ति प्राकृतत्वात्परनिपातः ततः क्षयोपशमेनेत्यर्थः, '**तद्विरतिपरिणामः**' प्राणा- ॥ ९१ ॥

तिपातविरतेः परिणामो, जायत इति शेषः, 'एवं सव्वाणवि वयाणं'ति एवं उक्तरूपेण द्वितीयकषाय-क्षयोपशमलक्षणेन सर्वेषामपि—समस्तानामप्युक्तशेषाणां—मृषावादविरत्यादीनां, प्राप्तिरित्यध्याहृतपदेन सम्बन्ध इति गाथार्थः ॥ २३ ॥ उक्तं तृतीयद्वारमधुना चतुर्थमुच्यते—

पाणाइवायअनियत्तणंमि इहलोय परभवे दोसा ।
पइमारिया य इत्थं जत्तादमगो य दिट्ठंता ॥ २४ ॥

प्राणातिपातो—हिंसा तस्या अनिवर्त्तनमनिवृत्तिस्तस्मिन् प्राणातिपातानिवर्त्तने, इहलोकश्च परभवश्च इहलोकपरभवं, समाहारत्वादेकवचनं, तस्मिन् इहलोकपरभवे, यद्वा प्राकृतत्वाद्वचनव्यत्ययः—इहलोकपरभवयोः 'दोषा' दूषणानि, भवन्तीति शेषः, अत्र च को दृष्टान्तः ? इति चेत् आह—पतिमारिका च 'अत्र' प्राणातिपातनिवर्त्तने यात्राद्रमकश्च 'दृष्टान्तौ' उदाहरणे, चशब्दौ परस्परापेक्षया समुच्चये, इति गाथार्थः ॥ २५ ॥ भावार्थः कथानकगम्यः, तयोश्चाद्यं तावत्कथ्यते—

लाटदेशे भृगुकच्छपत्तने गङ्गाभिध एक उपाध्यायो बहुच्छात्रपाठको बभूव, भार्या तस्य नर्मदाभिधा तरुणी,

नव. बृह. १ प्राणाति०

॥ ९१ ॥

सा चान्यदा तमुक्तवती, यथा—वैश्वदेवपूजाकाले बलिप्रक्षेपं कुर्वन्तीं मां काका उपद्रवन्ति तत् मां तेभ्यो रक्षय, सोऽपि तस्याः कुटिलस्वभावतामजानानः छात्रान् अभाणीत्, यथा—प्रत्येकं भवद्भिर्भट्टिनी बलिविधानकाले काकेभ्यो वारकेण रक्षणीया येनैषा सुखेन तत्करोति, तथेति प्रतिपन्ने तैस्तथा गच्छत्सु दिवसेष्वन्यदा विदग्धच्छात्रस्य वारको जातः, तेन चिन्तितं—नेयमतिमुग्धा, किन्तु वैशिकमेतदस्याः, तदहमद्यतनमहोरात्रमस्या गत्यागती विलोकयामीति विचिन्त्य तयाऽलक्षित एव तद्व्यापारं निरीक्षितुमारेभे, यावद्विकालवेलायां घटं गृहीत्वोदकानयनाय नर्मदां प्रति प्रस्थिता, सोऽपि पृष्ठतो लग्नस्तच्चेष्टां विलोकयितुं, साऽपि तत्तीरमासाद्य कक्षाबन्धं विधाय घटमवाङ्मुखं गृहीत्वा तरीतुमारब्धा, सोऽपि तयाऽविज्ञात एव तीर्त्वा परं तीरमापत् क्षणमात्रेण, साऽपि परतीरमागत्य तद्देशवर्त्तिन एकस्य तरुणगोपालस्य समीपं गत्वा चिरं रन्त्वा तथैवाऽऽयातुमारब्धा, अत्रान्तरे चौराः कुतोऽपि कुतीर्थादविभागमनवगच्छन्तो नदीमवतीर्णाः सुंसुमारेण गृहीताः, ततस्तं नानाविधताडनाभिस्ताडयतोऽपि तेन तानविमुच्यमानानवलोक्य तयोक्तं—यथा भो भद्राः ! भवन्तः कुतीर्थावतीर्णाः सुंसुमारेण गृहीताः, न चायमेवंविध पृष्ठहननादिभिर्दूरमवसर्पति, किं न श्रुतः सुंसुमारग्रहो युष्माभिः ?, तदेनमक्ष्णोः कुञ्चत, ततस्तैस्तथा कृते दूरं

हिंसायां दोषाः पतिमारिकाज्ञात

॥ ९१ ॥

पलायितोऽसौ, तच्च छात्रेण रात्रिविलसितं सर्वं विज्ञाय काकरक्षगवेलायां विजने जाते——दिवा बिभेषि काकेभ्यो, रात्रौ तरासि नर्मदाम् । कुतीर्थानि च जानासि, नेत्रकुञ्चनकानि च ॥ १ ॥ इति पठता ज्ञापितं तस्याः, ततस्तया विज्ञाताऽहमनेनेति विचिन्त्योक्तं——भवादृशविदग्धाप्राप्त्येदमनुष्ठीयते, किं करोमि ? यथा तथा कालयापनां विदधामि, इतः प्रभृति तु त्वमेव मम प्राणनाथ इति गदितः, तेनोदितं—आः ! पापे ! किमुपाध्यायस्यापि न लज्जसे ?, तया चिन्तितं—अस्यैवं वदतोऽयमाशयः—उपाध्यायः कण्टकप्राय आवयोस्तदेनं व्यापादयेति स्वमत्या परिभाव्य रात्रौ सुखप्रसुप्तो व्यापादितः क्षुरिकया, बहूनि खण्डानि कृत्वा क्षिप्तो जरत्पिटिकायां, परिस्थापनार्थं च विभातप्रायायां रजन्यां पिटिकां मस्तके कृत्वा गताऽटव्यां, परिस्थापनवेलायां च कुलदेवतया मस्तक एव स्तम्भिता पिटिका, ततो लज्जावशान्नगरमागन्तुमशक्नुवती कतिचिद्दिनानि तत्रैव निनाय. अन्यदा तु बाढं गाढबुभुक्षया दोदूयमाना लज्जां विहाय पत्तनं प्रविष्टा, भिक्षार्थं च गृहे २ ददत भिक्षां पतिमरिकाया इति प्रलपन्ती रुदती च पर्यटितुमारब्धा, लज्जादयश्च गुणास्तावदेव प्राणिनां, प्रसर्पन्ति यावद्बुभुक्षा पिशाचीव नोच्छलति, तथा चोक्तम्—

"रूवं सिरि सोहग्गं, नाणं माणं परक्कमं सच्चं । लज्जा इंदियविसओ, नवरि य एक्का छुहा हणइ ॥ १ ॥"

कियताऽपि च कालेन तस्मिन् कर्मणि क्षयोपशमं गते साध्वीः संमुखीर्दृष्ट्वा चिन्तितमनया—धन्याः खल्वेता विरक्त-कामभोगा याः सर्वसावद्यनिवृत्तिं गृहीत्वा प्रकृष्टसन्तोषसुखतृप्तास्तिष्ठन्ति, मया पुनः पापिष्ठया इहपरलोकविरुद्धमी-दृशमनुष्ठितं यन्न त्यक्तुं न वा ग्रहीतुं शक्यते, पादयोः पतितुकामायाश्च पिटिका भूमौ निपतितेति ॥

द्वितीयकथानकम्—राजगृहनगरे कश्चिद्द्रमकः प्रतिवसति स्म, अन्यदा च तत्र कस्मिंश्चिदुत्सवे लोको वैभारगिरिवरनितम्बवर्तिनि विविधवनखण्डमण्डिते सर्वर्त्तुकोद्याने क्रीडानिमित्तमुद्यानिकायां निर्गतः, स च द्रमकः प्रहरद्वयप्रमाणे दिवसे भिक्षार्थं नगरमेत्र प्रविष्टः, उद्यानिकागमनव्यतिकरं लोकस्याजानानः प्रतिगृहं पर्यटितुमारेभे, न कश्चिद्भिक्षां प्रयच्छति, वक्ति च गृहरक्षपालादिः—यथोद्यानं गतः सर्वोऽपि लोकः खाद्यपेयचूष्य-लेह्यादि गृहीत्वा अद्य, ततस्तत्रैव गत्वा याचस्वेत्युक्तो गत उद्यानं यावत्तावत्तत्र सकलोऽपि लोको भुक्त्वा प्रेक्षण-कादिव्यग्रस्तिष्ठति स्म, न तस्य कश्चिदुत्तरमपि ददाति, ततोऽसौ बुभुक्षितत्वादतिक्रुद्धः पर्वतस्योत्तुङ्गशृङ्गमारुह्य लोकस्य हननार्थमेकस्याः शिलाया अधः खनित्वा कोपाद्विस्मृतात्मा तदधःस्थित एव तां पातयितुमारब्धः, तया च पतन्त्या स एव चूर्णितः, लोकश्च प्रलयकालघटितघटनावनघण्टाघोरघोषानुकारितदीयखटखटारवत्रासित

इतस्ततो नष्टः, स च रौद्रध्यानो मृत्वा नरके दुःखभाजनं संवृत्तः ॥ एवं च यथाऽसौ पतिमारिका द्रमकश्च प्राणातिपातस्यानिवृत्तौ दुःखभाजनतां गतौ इहपरलोकयोः एवमन्येऽपीति ॥ अधुना पञ्चमं गुणद्वारमुच्यते—

जे पुण वहविरइजुया उभओ लोगेऽवि तेसि कल्लाणं ।
जह सूवगहियदारग दामन्नगमाइयाणं च ॥ २५ ॥

ये पुनः प्राणिनो 'वधविरतियुताः' प्राणातिपातनिवृत्तिसमन्विताः, उभयोरपि लोकयोस्तेषां कल्याणमिति सम्बन्धः 'लोगेऽवीति' अपिशब्दस्य भिन्नक्रमत्वात् प्राकृतत्वेन वचनव्यत्ययाच्च, यथाशब्द उपप्रदर्शने, 'सूव'त्ति पदावयवेन पदसमुदायापेक्षणात्सूपकारगृहीतदारकस्य, सूत्रत्वाल्लुप्तषष्ठीकं पदं, न केवलममुस्य दामन्नकादीनां च, मकारोऽलाक्षणिकश्चकारः समुच्चये, आदिशब्दात्क्षेमादीनां चेति गाथासङ्क्षेपार्थः । विस्तरार्थस्तु कथानकेभ्योऽवसेयः, तानि चामूनि क्रमेणोच्यन्ते—

पुरा धान्यपुरग्रामे महासमृद्धिमतो माणिभद्रश्रावकस्य प्रशमादिगुणगणालङ्कृतो निष्कलङ्कसम्यक्त्वो गृहीताणुव्रतः स्वभ्यस्तसमयो यथार्थाभिधानो धर्मरुचिस्तनयः, असौ कदाचिन्निजवयस्यपरिवृतो ग्रामाद्बहिर्निर्गतः, स

च कुतोऽपि समागतैश्चौरैरपहृत्योज्जयनीं नीतः, विक्रीतो राजसूपकारपार्श्वे, नीतः स्वशालां, भणितश्च—लावकादी-नुच्छासय, तेनापि ते मुक्ताः, ततोऽसौ सूपकारेण बहु विरूपं भाणितः पुनर्नैतत्करणीयमित्युक्त्वा धृतश्च, यावद्द्वितीयदिने तित्तिरादीन् मारयेत्युक्तो बभाण—नाहं मारयिष्यामि, ततो दुर्वचनैरपि भणितो यावन्नेच्छति मारयितुं तावत्कोपावेशविवशेन सूपकारेण ताडितो गाढं, ताड्यमानश्चारटितुमारेभे, निकटगवाक्षवर्त्तिना च राज्ञा तमारटन्तमाकर्ण्य पृष्टं—किमेष रारटीति ?, तत एकेन पुरुषेण कथितं—यथाऽसौ सूपकारेण क्रयक्रीतोऽपि तित्तिरादीन् हन्तुमाज्ञापितोऽपि न हन्तुमिच्छति, राज्ञोक्तं—पश्याम्येनमानयत, आनीतश्च राजसमीपं, पातितः पादयोः, भणितो राज्ञा—किमिति भो ! लावकादीन्न मारयसि ?, तेनोक्तं—देव ! जीववधः प्रत्याख्यातो मया, राज्ञोक्तं—स्वायत्तस्य प्रत्याख्यानं भवति, त्वं तु परायत्तः, तेनोक्तं—किं परः करिष्यति मे ?, ततो राज्ञा तत्साहसपरीक्षार्थमलीकभृकुटिभीषणं ललाटपट्टमाधायोक्ताः सन्निहितपुरुषाः—अरे रे ! कसाप्रहारैस्ताडयतैनमलीकप्रत्याख्यानावलेपवाहिनं, तथाऽपि नेच्छति, ततो राज्ञाऽऽनायितो दुष्टगजः, तेन भापयितुमारब्धः, ततोऽसौ वक्ति—वरमहमेको मृतो, न पुनरनेके मारिताः, यत एवं श्रूयते—" एक्कस्स कए नियजीवियस्स बहुयाओ जीवकोडीओ । दुक्खे

ठवंति जे केइ ताणं किं सासयं जीयं ? ॥ १ ॥" ततो राज्ञोक्तम्–भो भो ! सूपकार ! ममैवैष समर्प्यतां, ततस्तेन यदादिशति देव इत्युक्त्वा मुक्तो नृपसमीपेऽसौ, राज्ञापि–एवंविधाभिग्रहाग्रहवानेष योग्योऽङ्गरक्षाकर्मणीति विभाव्य लक्षपाकतैलेनाभ्यज्य स्नापयित्वा अग्रासने च भोजयित्वा शरीररक्षाकर्मणि नियुक्तः, समृद्धदेशाधिपतिश्च विहितोऽसौ, प्रभूतकालं पञ्चप्रकारं जीवलोकसारं विषयसुखमनुभूय तथाविधाचार्यसमीपेऽन्यदा धर्ममाकर्ण्य प्रव्रजितः । प्राणिवधनिवृत्तावेवं गुणोऽस्य दर्शितः ।

दामनककथानकं च–कश्चिन्मत्स्यबन्धो जालेन मत्स्यानादाय तथाविधजलाशयान्माघमासविकालवेलायामुत्तीर्णो निकटवर्त्तिनं श्रमणकमेकमप्रावरणमातापनां कुर्वाणमवलोक्यानुकम्पापरीतान्तःकरणो जालेनावेष्ट्य गतः स्वगृहं, रजन्यां च पलालसंस्तारकसंनिविष्टोऽन्तिकोपविष्टाभीष्टविशिष्टभार्यया परिष्वक्तो ज्वलज्ज्वालाजालजटिलज्वलने निकटवर्त्तिन्यपि तुहिनकरनिकरवाहिनि वहति गन्धवाहे गाढं शीतवेदनाव्यथ्यमानकाययष्टिः कथं तथाविधनिरावरणस्थानवर्त्तिना महानुभावेन तेन तपस्विनेयमतिदुःसहा शीतपीडा विषोढव्येति पुनः पुनश्चिन्तयामास, कथञ्चिच्च प्रभातप्रायायां रात्रौ समुत्थाय गतः साधुसमीपं यावद् दृष्टस्तथैवोर्ध्वस्था-

नस्थो मुनिः, भक्तिभरनिर्भरमनाः पतितः पादयोरुत्सारितं जालं, अत्रान्तरे विदधानः कमलवनविकाशमसमप्रभा-प्राग्भारेण प्रसृततिमिररिपुविनाशं चाहिमरश्मिरुदयगिरिशिखरमारुरोह, साधुरपि समुत्सारयामास कायोत्सर्गं, धर्मलाभयित्वा च प्रारब्धा तस्य धर्मदेशना, प्रतिबुद्धस्तथाविधक्षयोपशमवशेन, परिणता मनस्यङ्गाङ्गीभावेन जीव-दया, प्रकाशितं धीवरेण धीवरत्वं, ग्रहीतुं प्रवृत्तः प्राणिवधनिवृत्तिं, साधुनोक्तो–यथा सौम्य ! सुपर्यालोचितं कृत्वा गृह्यतां, न खल्वेवमेव गृहीतोऽभिग्रहः पालयितुं शक्यते, तेनोक्तं–पर्यालोचितमेवैतत्, न खल्वत्र स्ववशीकृतचेतसां किञ्चिद्दुष्करमस्ति, ततस्तन्निर्बन्धं साधुनाऽवबुध्य दत्तो जीववधनिवृत्त्यभिग्रहः, छित्त्वा जालं गतः स्वगृहं, अवगतवृत्तान्ता च ततस्तदुपरि रटितुमारब्धा तत्पत्नी, पुनः २ प्रेर्यमाणश्चावोचत्–भद्रे ! किमित्येवं पुनः पुना रारटीषि ?, न मया जीवता मत्स्यग्रहणजीविका विधेया, यत उक्तम्–" गच्छद्भिरपि प्राणैर्बु-द्धिमता तन्न युज्यते कर्त्तुम् । उभयत्र यद्विरुद्धं दीर्घं भवभ्रमणकृदपथ्यम् ॥ १ ॥ " अत्रान्तरे तदीयमहेलाकल-कलाकर्णनान्मत्स्यपाटकवर्ती लोकः समस्तोऽपि मिलितः, तेनोक्तं–भो भो अस्मदीयकुलोत्पन्नोऽप्यतीव दयालुर्वर्त्तसे?, न खलु जीवरक्षयाऽस्माकं धात्रा निर्वाहश्चिन्तितः, तत्प्रवर्त्तस्व जालमादायास्माभिः सह स्वयं नदीतटाभिमुखं

मत्स्यग्रहणाय, अन्यथा गले गृहीत्वाऽपि त्वां नेष्यामः, ततस्तदीयकर्कशवचनताडितो गतो नदीतटं, समर्पितं तैर्जालं, प्रक्षिप्तं जलमध्ये, मत्स्यपरिपूर्णमालोक्य सशूकमनसा जातानुतापेन पुनर्मुक्तं, निःसृताः सर्वेऽपि ततो मत्स्याः, केवलमेकस्य पक्षो भग्नः, ततः पुनरपि तैर्बलात्कारेण प्रेर्यमाणो द्वितीयवारां प्रक्षिप्तवान्, तथैव दृष्ट्वा पुनर्मुक्तवाँश्च, एवं तृतीयवारामपि, ततो निरपेक्षीभूय तेनोक्तं—भो ! भो ! स्वजनाः ! मयैतन्निर्घृणं कर्म प्राणात्ययेऽपि न कर्त्तव्यं, यत्किमपि भवद्भ्यो रोचते तत्कुरुत, ततस्तेऽपि तन्निर्बन्धमवबुध्य तूष्णीं स्थिताः, असावपि तां प्राणातिपातविरतिप्रतिज्ञां कियन्तमपि कालमनुपाल्यानुकम्पागुणेन निवर्त्तितमनुष्यायुष्को मृत्वा राजगृहे नगरे श्रेष्ठिपुत्रः संजातः, भवितव्यतानियोगेन च तत्कुलं मारिदोषेणोच्छादितं,लोकेन च मारिसञ्चारभीतेन तद्गृहं सर्वतो वृत्या वेष्टितं, असौ च बालकः पूर्वजन्मपरिपालितजीवदयाव्रतानुभावान्न मृतः, तथा चोक्तम्—" रणे वने शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥ १ ॥ " अन्यदा च गृहपरिसरे परिसरन् सारमेयच्छिद्रमवलोक्य निर्गतः, तस्मिन्नेव पत्तने गृहे २ भिक्षाटनं कुर्वाणो वृद्धिं गतः, हट्टैकदेशेषु च रात्रौ स्वापं विधत्ते, अन्यदा च

१७

समुद्रदत्तवणिजा स्वकीयहट्टस्थितेन शीतकाले तथाविधप्रावरणविकलस्तेनैव पथा शीताभिभूतदेहो व्रजन्

वीक्षितः, ततोऽनुकम्पापरीतचेतसा स्वगृहं नीतः, कर्मकरवृत्त्या धृतश्च, अपरेद्युः साधुसङ्घाटकस्तद्गृहं भिक्षार्थमागतः, तत्रैकेन साधुना द्वितीयस्य कथितं—यथाऽयं द्रमकोऽस्य गृहस्य स्वामी भविष्यति, तच्च वचः समुद्रदत्तश्रेष्ठिना कटकान्तारितेनाकर्णितं, चिन्तितं च—कथं मम पुत्रादयो न स्वामिनो भविष्यन्ति ?, अयं मम गृहस्य नायको भविता ?, तद् यावदद्यापि मुनिवचनं नावितथं संपद्यते तावद्व्यापादयामि केनचिदुपायेनैनमिति विचिन्त्याकारितः पूर्वपरिचितश्चण्डाल एको, दानसन्मानादिनाऽऽगृह्यैवैनमाज्ञापितवांस्तद्व्यापादनं प्रति, अभ्युपगतमनेन, अन्यदा हट्टमार्गे मायया याचितो द्रम्मानसौ चण्डालः श्रेष्ठिना, तेनोक्तम्—इदानीं मम पार्श्वे न सन्ति द्रम्माः, यदि कञ्चिन्मदीयस्थानं प्रेषयसि तदा प्रयच्छामि, ततः श्रेष्ठिना दामन्नक एव पार्श्ववर्त्ती प्रहितः, गतस्तेन सहितः, अनेन चान्तावसायिना चण्डालपाटकाद्दूरतरं नीत्वा तत्पुण्यानुभावसंजनितकरुणेन श्रेष्ठ्यादिष्टमारणव्यतिकरं बोधयित्वा भणितः—यदि त्वमितो दूरमपक्रामसि तदा भवतोऽङ्गुलीं छित्त्वा श्रेष्ठिनः साभिज्ञानदर्शनार्थं त्वां जीवन्तं मुञ्चामि, अन्यथाऽवश्यं मारयामीत्युक्तो भीतभीतोऽसौ जजल्प—मुञ्च मां यदादिशसि तत्करोमि, प्रतिपन्ने गृहीत्वाऽङ्गुलीं मुक्तोऽसौ, गतो मरणभयभीतोऽज्ञातचर्यया तस्यैव श्रेष्ठिनो

गोकुलं, स्थितस्तत्र तद्गेह एव वत्सपालकवृत्त्या, चण्डालेनापि दर्शिता तदङ्गुली श्रेष्ठिनः, निराकुलचित्तः संवृत्तः श्रेष्ठी, गतोऽन्यदा गोकुलं विकालवेलायामश्वादिचतुष्पदानवलोकयन् वत्सरूपैः सहागच्छन्तं ददर्श दामन्नकम्, अचिन्तयच्च—कथमेष दामन्नको दृश्यते ?, अनुकूलवचनैराभाषितः प्रत्यायितश्च—यथा द्रम्मलोभेन तेनैतत्कृतं न मदीयं मनोऽपीदृशकर्मसु प्रवर्त्तते, तत्कथय निःशङ्कं तदीयवृत्तान्तं, ततः कथितोऽनेन, चिन्तयामास श्रेष्ठी—गाढबद्धपक्षपातो विधिर्दामनके, कथमन्यथैवं मारितोऽपि जीवतीति, तत्किं सत्यमेव मुनिवचनं भविष्यति ?, अथवा भवतु किञ्चित्, 'अनिर्वेदः श्रियो मूल'मिति जनवादः, तदन्यमेव मारणोपायमधुना विरचयामीति विचिन्त्य लिखितो निजपुत्रस्य सागरदत्तस्य नाम्ना लेखः, विभातप्रायायां रजन्यां लेखमर्पयित्वा प्रहितो दामनको राजगृहाभिमुखं, प्राप्तोऽसौ प्रहरद्वयसमये तदासन्नवर्त्त्युद्यानं, मार्गश्रमखिन्नश्च गले लेखं बद्ध्वा तत्रैव बहलतरच्छायपादपस्याधः प्रसुप्तः, अत्रान्तरे भवितव्यतानियोगेन तस्यैव श्रेष्ठिनो दुहिता सखीजनसहिता तदैव क्रीडानिमित्तमुद्यानमागता, दृष्टः पादपतलप्रसुप्तः स्वर्ग इव सलेखो दामनकः प्रत्यभिज्ञातश्च, तथैवाजाग्रतो ग्रन्थिमुन्मोच्य शनैर्गृहीतो लेखः सागरदत्तनाम तद्बहिर्विलोक्य, अतिचपलतयोद्वेष्टय वाचितश्च, यावत्तत्र

लिखितम् 'अधौतपादस्यास्य विषं दातव्य'मिति, ततोऽसौ तमेवानुकम्पापरेण चेतसा निर्निमेषया दृशा विलोकयितुमारब्धा, चिन्तितवती च—ननु किमनेन वराकेणातिदारुणं वैरकारणमनुष्ठितं येन तातेन विषं दापितमस्य, एवं च तं पुनः पुनर्निर्वर्णयन्त्या तदीयाङ्गप्रत्यङ्गनिरीक्षणादुपजातगाढानुरागया समादाय नयनकज्जलं नखशुक्त्या विषा दातव्येति विधाय भूयः संवर्त्तितो लेखस्तथैव गले संबद्धश्च, क्षणमात्रं तत्र च क्रीडित्वा सा गता गृहं, सोऽपि क्षणान्तरे प्रतिबुद्धः समुत्थाय ततो गतः सागरदत्तसमीपं, समर्पितो लेखः, पितुर्बहुमानेन तेनापि सप्रश्रयमादाय निवेशितः शिरसि, उन्मोच्य वाचितश्च, यावदधौतपादस्य विषा दातव्येति, विषेति तस्या एव कन्याया नाम, ततोऽसाववधारितलेखाभिप्रायो 'गुर्वादिष्टं न विकल्पये' दिति वचनार्थमनुस्मरन् गत उपाध्यायपार्श्वे, पृष्टो विवाहलग्नशुद्धिं, असावप्यचिरात्परिभाव्य अद्यैवार्द्धरात्रेऽनयोर्लग्नशुद्धिरन्यदा तु वर्षद्वयेनेत्यवादीत्, ततः सागरदत्तोऽचिन्तयत्—इतः प्राप्तवरा विषा इतश्चातिनिकटमेतल्लग्नमन्यच्च दूरे तत्किमुचितमिदानीम् ?, अथवा यद्भवति तद् भवतु आराध्यते तावल्लग्नमिति विचिन्त्य गतः स्वगृहं, प्राप्तेऽर्द्धरात्रे लग्नवेलायां निर्वर्त्तितो गन्धर्वविवाहः, प्रभाते च समुद्गते मयूखमालिनि समागतः श्रेष्ठी गोकुलतो यावत्पश्यति

दामनकं नवीनानुपहतनिर्मोकधवलदुकूलपरिधानम्, अभ्युत्थितोऽनेनाभिवन्दितश्च, पृष्टः श्रेष्ठिना तनूजस्तद्व्यतिकरः, कथितस्तेन स लेखादिवृत्तान्तः, ततश्चेतसा सखेदोऽप्यदर्शितमुखविकारः साधु पुत्र ! कृतमिति प्रतिपाद्य चित्रशालिकावार्त्तिनि पर्यङ्कैकदेशे समुपविश्याचिन्तयत्–अहो ! विजयी कर्मव्यवहारः, प्राणिनां यस्मिन्ननुकूलेऽपाया अप्युपाया भवन्ति, विपदोऽपि सम्पदः संपद्यन्ते, तदिदं सत्यमेव संजातं यदुक्तं केनचित्–" अन्यथैव विधीयन्ते, पुरुषेण मनोरथाः । दैवेन प्राप्तिसद्भावात, कार्याणां गतिरन्यथा ॥ १ ॥ " तदिदानीं नान्यथा मुनिभाषितमिति संभाव्यते, भवतु, तथाऽपि प्रारब्धाभिलषितार्थविषये पुरुषेण तदसिद्धावपि न विषादवता भाव्यं, प्रत्युत प्रयत्नः करणीयः, यदुक्तम्–" प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्नविहता विरमन्ति मध्याः । विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः, प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ १॥ " इत्यालोच्य समाहूता पत्नी, कथितं तदग्रे–यथा मया कुलदेवताया उपयाचितमेवं प्रतिपन्नमास्ते, यथा–यो मदीयां दुहितरं परिणेष्यति स एकाकी समागत्य गृहीत-बलिपुष्पपटलकस्त्वां पूजयिष्यति, तदद्यापि कालवेलायां भगवत्याः पूजानिमित्तं जामाता यास्यति, ततो भवत्या सकलं तद्योग्यबलिपुष्पादिकं प्रगुणीकृत्य धरणीयमित्यभिधाय स्वयं गतः श्रेष्ठी पूर्वपरिचितस्यान्यस्य चण्डालस्य

पार्श्वे, विधाय महान्तमुपचारं कारितस्तद्वधाभ्युपगमं, समागतो गृहं, अस्तगिरिशिखराभिमुखं प्रस्थिते च चक्रवाकबन्धौ दिनकरे बलिपटलकहस्तः प्रेषितो देवतार्चनव्याजेन नगरदूरवर्त्ति चण्डिकायतनं, गच्छंश्च हट्टपथेन दृष्टः सागरदत्तेन हट्टव्यवस्थितेन, आभाषितश्च—क्वोच्चलित एकक एव अस्यामवेलायां ?, तेनोक्तं—चण्डिकापूजनार्थं श्वशुरेण प्रहितः, ततः किञ्चित्कोपमादर्श्योक्तम्—अहो ! शोभना वेला देवतार्चनस्य, अहो तातस्य बुद्धिकौशल-मित्यभिधाय तमेव विपणावुपवेश्य स्वयं गृहीतबलिपटलको यावद्देवतार्चनं विधाय गच्छामि तावत्क्षणमात्रमत्रैव प्रतीक्षणीयमित्यभिधाय जगाम यममुखमिव चण्डिकायतनाभिमुखं, ततस्तत्प्रदेशवर्त्तिना सव्यवधानदेशानुपलक्ष्य-माणेन लक्ष्यवेधिना चण्डालेनाऽऽकर्णाकृष्टधनुषा शरेण विद्धः, आः ! केन पापेनाकारणवैरिणेदमनुष्ठितमिति ब्रुवाणः पतितो भूमौ, मिलितस्तदासन्नवर्त्ती लोकः, पारम्पर्येण समाकर्णितं समुद्रदत्तवणिजा तदीयं मरणं, अकरुणहृदयस्तुष्टश्चित्तेन, तथाऽपि लोकापवादभयात् हा ! किमेतज्जातमिति ब्रुवाणो निर्गतो गेहात्, गच्छता च दृष्टो हट्टोपविष्टो दामन्नकः, पृष्टश्च—क्व गतः सागरदत्तः ?, कथं च त्वमत्र स्थितः ?, तेनोदितं—मम (स) बलात्कारेण गतश्चण्डिकापूजनार्थमहं चात्रैव धृतः, ततस्तद्वचः श्रवणविदारणमाकर्ण्य हा हतो मन्दभाग्यो

यन्निमित्तो मयैष दामन्नकवधश्चिन्तितः स एव मम पुत्रो विधात्रा प्रतिकूलकारिणा हतः, अहो ! तदेतदाख्यानकं जातं—" यच्चिन्त्यते परस्य तदुपैति स्वस्ये " त्येवं चिन्ताकुलो झगिति समागतहृदयसंघट्टः पतितो भूमौ, पापकर्मा खल्वेषोऽपापे पापं चिन्तयतीत्येवं संजातरोषैः परित्यक्तः प्राणैः, सपुत्रः श्रेष्ठी मृतो, न च तदन्वयेऽन्योऽस्तीति श्रुतं राज्ञा, ततो जामाता दामनक एव भवत्वस्य गृहसारस्य स्वामीति परिभाव्य स्थापितः स एव श्रेष्ठिपदे, गच्छत्सु दिवसेषु कियत्स्वपि स्वभावानुरक्तया पत्न्या कस्मिँश्चिदवसरे कथितो लेखादिव्यतिकरः, ततः शेषं स्वमत्यैव त्रितर्कितं यथा सर्वमेतन्मद्वधावबद्धबुद्धिना श्रेष्ठिना कृतमिति । अन्यदा तु समुद्रदत्तवणिजा यानि पूर्वं पारेसमुद्रं प्रेषितान्यभूवन् प्रवहणानि तानि तदीयपुण्योदयाकृष्टानि विशिष्टभाण्डपरिपूर्णानि समागतानि, वर्द्धापितः समागत्यैकपुरुषेण, दत्तं पारितोषिकं, चलितस्तद्दर्शननिमित्तं, अर्द्धपथे नटप्रेक्षणकमद्राक्षीत्, तत्र च प्रस्तावे गीता नवगीतगीतिका, यथा—" अणुपुंखमावहंतावि अणत्था तस्स बहुगुणा हुंति । सुहदुक्खकच्छपुडओ, जस्स कयंतो वहइ पक्खं ॥ १ ॥ " तत् श्रुत्वा तेन सुवर्णलक्षेण प्रसादं भाणयित्वा भणितो नटः—पुनः पठ, पाठावसाने द्वितीयलक्षं प्रसादीकृतं, एवं यावत् तृतीयमपि, अत्रान्तरे वणिग्जनासंभाव्यमानमहादानप्रवृत्तिं जनपरम्परया विज्ञाय राज्ञा द्विती-

यद्दिवसे समाहूय पृष्टो दामन्नकः—किमर्थं लक्षत्रयदानं ?, किं परोपार्जितं वित्तं सुदेयं भवतीति हेतोः ?, किं वा प्रेक्षापूर्वकारितयेति, तेनोक्तं—देव ! विज्ञापयामि, प्रेक्षापूर्वकारितयेति मम मतिः, यतो यथा कथञ्चिदपि निजप्रस्तावागतां पठता गाथां नटेन स्मृतिपथमानीतो मे स्वयमनुभूतो व्यतिकर इत्यभिधाय सविस्तरं चण्डालघातप्रभृतिवृत्तान्तवर्णनं गाथाश्रवणावसानं कृतं नरपतेः पुरतः, ततः सन्मानितो राज्ञा विसर्जितश्च गतः स्वगृहं विशिष्टभोगभागी संवृत्त इति, एवं च प्राणातिपातविरतानामिह परत्र च दृष्टान्तद्वयानुसारेण गुणगणं परिभाव्य तन्निवृत्तौ भव्यजनैर्यत्न आस्थेय इति गाथागर्भार्थः ॥ २४ ॥ आदिशब्दोपात्तं तु क्षेमकथानकं कथ्यते—

पाटलिपुत्रे नगरे जितशत्रू राजा, तस्य क्षेमो नामामात्यः प्रधानश्रावकः, स च राज्ञोऽतिप्रिय इति कृत्वाऽन्येषां सामन्तादीनामप्रियः, ते च तस्य विनाशमिच्छन्तोऽन्यदा क्षेमपुरुषान् दानसन्मानादिभिर्वशीकृत्य राज्ञोऽभिमरत्वेन व्यापारितवन्तो, राजपुरुषैश्च प्राप्ता वयं क्षेमामात्यप्रयुक्ता इति ते भणितवन्तः, ततः समानायितः क्षेमो राज्ञा, भणितश्च—यथा त्वमप्येवमक्षेमंकरः ?, तेनोदितं—देव ! कीटिकाया अप्यहं नाक्षेमावहः, किं पुनर्भवतः ?, तथाऽपि राज्ञा वध्य आज्ञापितो, यश्च तत्रान्योऽपि वध्य आज्ञाप्यते स तस्यैव

राज्ञोऽशोकवनिकायामनेकपद्मिनीपत्रसंछन्ना विचित्रकमलकुवलयकुमुदकह्लारोपशोभिता मकरादिरौद्रजलचरदुरवगाहा वापी समस्ति ततः पद्मान्यानाय्यते, तत्र प्रविष्टश्च मकरग्रहादिभिर्ग्रस्यते इति क्षेमोऽपि तदेवादिष्टः, ततो गतोऽसावनेककौतुकार्थिजनपरिवृतस्तत्र, पठित्वा पञ्चपरमेष्ठिनमस्कारं भावसारमवदत् सकलजनप्रत्यक्षं—यथा यद्यहं राज्ञो द्रोहकारी घातकान् व्यापारयामास तदा मामेते मकरादयो भक्षयन्तु, नो चेद्देवता मे सान्निध्यं विधायैतेभ्यो रक्षतु, ततः साकारमनशनं गृहीत्वा प्रविष्टोऽगाधजलमध्यं, देवतासान्निध्येन च महान्तं मकरमेकमादाय तत्पृष्ठमारूढो बहूनि फलानि गृहीत्वोत्तीर्णः, समर्पितवांश्च राज्ञः, तुष्टेन चानुतापवता तेन क्षमित आलिङ्गितश्च, प्रतिपक्षनिग्रहपुरस्सरं प्रवेशितश्च महाविभूत्या नगरं, भणितश्च—कं ते वरं ददामि ?, क्षेमेणापि संवेगाद्यागतमानसेन निवार्यमाणेनापि वृता प्रव्रज्या, देवपूजादिपूर्वकं तथाविधाचार्य समीपे प्रव्रजितश्चेति प्रथमव्रतपालने गुणः ॥ उक्तं गुणद्वारमधुना यतनोच्यते—

पाणाइवाएँ जयणा दारुयधन्नाइउदगविसयाओ ।
तसजीवे रक्खंतो विहिणा गमणाइयं कुज्जा ॥ २६ ॥

'पाणाइवाए'त्ति सप्तम्येकवचनान्तत्वेऽपि लघुत्वं 'एओयारा बिंदू पयनिहणे हुन्ति लहुयाइं' इति प्राकृतलक्षणेन, प्राणातिपाते–वधनिवृत्तौ, कृतायामिति गम्यते, यतना–रागद्वेषरहितोऽशठव्यापारः, तदुक्तम्–" रागदोसविउत्तो जोगो असढस्स होइ जयणा उ। रागदोसाणुगओ, जो जोगो सा अजयणा उ ॥१॥ " सा कर्त्तव्या भवतीति शेषः, किंविषया ? इत्याह–'दारुये'त्यादि, दारूण्येव दारुकाणि–काष्ठानि धान्यं–शाल्यादि आदिर्येषां त्रपुषादिफलशाकपत्रादीनां तानि धान्यादीनि उदकं–जलमेषां द्वन्द्वे विषयशब्देन बहुव्रीहावेतद्विषयेत्यर्थः, तत्र दारुविषया तावदियमित्थं–शुषिरादिकाष्ठपरिहारेण कुठारादिविपाटितस्य दारुणश्चक्षुषा निरीक्ष्य भूमौ प्रस्फोटय च रन्धनादिनिमित्तमग्नौ प्रक्षेपणं, धान्यादिजलविषया तु कीटसंसक्तादित्यागतः परिमितवस्त्रपूतजलादानादितश्च यथाक्रममवगन्तव्या, एतदेवोपदेशद्वारेणाह–'तसे'त्यादि, त्रस्यन्तीति त्रसाः–त्रसनामकर्मोदयवर्तिनो द्वीन्द्रियादयस्ते च ते जीवास्त्रसजीवास्तान् 'रक्षन्' पालयन् 'विधिना' सिद्धान्तनिर्दिष्टविधानेन गमनं–चङ्क्रमणं तदादिर्यस्यावस्थानादेः तत् 'कुर्यात्' विदध्यात्, उपलक्षणं चैतत्स्थावराणामपि यथासंभवं रक्षां कुर्वंश्चरेद्, यतो यतनाफलम्–" जयणा उ धम्मजणणी, जयणा धम्मस्स पालणी चेव। तव्वुड्ढिकरी जयणा, एगंतसुहावहा जयणा ॥ १ ॥ जयणाए वट्ट- 

माणो जीवो सम्मत्तनाणचरणाणं। सद्धाबोहासेवणभावेणाराहगो भणिओ ॥ २ ॥ " इति गाथार्थः ॥ २५ ॥ व्याख्यातं यतनाद्वारमिदानीमतिचारद्वारमुच्यते—

बंधवहछविच्छेयं अइभार णिरोह भत्तपाणेसु ।
पढमवयस्सऽइयारे, कोहाईहिं ण उ करेज्जा ॥ २७ ॥

बन्धश्च—रज्जुदामकादिभिः संयमनं वधश्च—कसादिभिर्हननं छविः—त्वक् तद्योगाच्छरीरमपि छविस्तस्याश्छेदः- असिपुत्रिकादिभिः पाटनं छविच्छेदश्च बन्धवधच्छविच्छेदमिति समाहारद्वन्द्वः, तन्नैव कुर्यादिति सम्बन्धः, 'बह' त्ति बाधमित्यन्ये, तथा भरणं भारोऽतीव भारोऽतिभारः, अनुस्वारस्य पूर्वलक्षणेन लोपे तं गवादिपृष्ठादौ प्रभूतस्य पूगफलादेर्न कुर्यात्, तथा '**निरोह**' त्ति प्राग्वदनुस्वाराभावः, निरोधनं निरोधः—अदानं तं '**भत्तपाणेसु**'त्ति 'बहुवयणेण दुवयण-' मिति प्राकृतलक्षणेन द्विवचनं, ततो 'भक्तपानयोः' भोजनोदकयोर्विषये निरोधं न विदध्यादित्यर्थः, एतान् पञ्च 'प्रथमव्रतस्य' स्थूलप्राणातिपातविरतिरूपस्यातिचारान् अतिक्रमान्—वधविरतिमालिन्यानि, प्राकृतत्वाद्विभक्तिव्यत्ययः, एवं बन्धादीनां सामान्येनाकरणीयत्वोपदेशे सति मा भूत् प्रियपुत्रादेर्विनयग्राहणरोगचिकित्साद्यर्थमप्येतेषामकरणं व्रतमालिन्यभ-

येनेत्याह–' क्रोधादिभिः ' क्रोधः–कोपः स आदिर्येषां लोभादीनां तैः क्रोधादिभिर्न कुर्यादित्यपवादः, अन्यथा करणे तु न प्रतिषेध इति भावः, अत्र चायमावश्यकचूर्ण्याद्युक्तो विधिः–बन्धो द्विपदानां चतुष्पदानां वा स्यात्, सोऽप्यर्थायानर्थाय वा, तत्रानर्थाय तावदसावविधेय एव, अर्थाय त्वसौ द्विविधः–सापेक्षोऽनपेक्षश्च, तत्रानपेक्षो नाम यन्निश्चलमतीव बध्यते, सापेक्षस्तु दामग्रन्थिना, यश्च प्रदीपनकादिषु विमोचयितुं छेत्तुं वा शक्यते, एवं तावच्चतुष्पदानां बन्धः, द्विपदानां तु दासो वा दासी वा चौरो वा पाठादिप्रमत्तपुत्रादिर्वा यदि बध्यते तदाऽनागाढं बन्धनीयो, रक्षणीयश्च प्रदीपनादितः, तथा ते किल द्विपदचतुष्पदाः श्रावकेण संग्राह्या येऽबद्धा एवासत इति, वधोऽपि तथैव, नवरं निरपेक्षवधो–निर्दयताडना, सापेक्षः पुनरेवं–प्रथममेव भीतपर्षदा श्रावकेण भवितव्यं, यदि पुनर्न करोति कोऽप्याज्ञां तदा मर्म मुक्त्वा लतया दवरकेण वा सकृद्विर्वा ताडयेदिति, छविच्छेदोऽप्येवं, नवरं निरपेक्षो हस्तपादकर्णादि यन्निर्दयं छिनत्ति, सापेक्षः पुनर्यद्गण्डादिकं छिन्द्याद्दहेद्वेति, तथाऽतिभारो नारोपयितव्यः, पूर्वमेव हि या द्विपदादिवाहनेन जीविका सा श्राद्धेन मोक्तव्या, अथान्याऽसौ न स्यात्तदा द्विपदो यं भारं स्वयमुत्क्षिपति उत्तारयति च तं वाह्यते, चतुष्पदस्य तु यथोचितभारात्किञ्चिदूनः क्रियते, हलशकटादिषु पुनरुचितवेलायामसौ मुच्यत इति, तथा भक्तपाननिरोधो

इति, तथा भक्तपाननिरोधोऽप्यर्थानर्थादिभेदो बन्धवद्द्रष्टव्यः, निरपेक्षो निर्दयं भक्तपाननिरोधो न कस्यचिद्विधेयो, मा भूत्तीक्ष्णबुभुक्षितस्य मरणमिति, सापेक्षस्तु रोगचिकित्सार्थं स्याद्, वाचा वा वदेद्—अद्य ते भोजनादि न दास्यामि, शान्तिनिमित्तं चोपवासं कारयेत्, किं बहुना ?, यथा स्थूलप्राणातिपातविरमणस्यातिचारो न भवति तथा सर्वत्र यतनया प्रवर्त्तितव्यं, बन्धादीनां चोपलक्षणत्वान्मन्त्रतन्त्रप्रयोगादयोऽन्येऽप्यत्रातिचारा दृश्या इति गाथार्थः ॥ २६ ॥

उक्तमतिचारद्वारमधुना भङ्गद्वारमभिधीयते—

बंधाईणि (उ) आउट्टियाइणा जइ करेज्ज तो भंगो ।
बीयकसायाणुदए तिव्वाणं होइ सङ्घस्स ॥ २७ ॥

बन्ध आदिर्येषां वधादीनां तानि ' तुः ' अवधारणे भिन्नक्रमश्च आकुट्टिका—उपेत्य करणमादिशब्दान्निरपेक्षस्य दर्पादिग्रहस्तेन विरत्यनपेक्षप्रवृत्तिभावेनेतियावत् यदि ' कुर्यात् ' विदध्यात् तदा ' भङ्ग एव ' विनाश एवेति वक्ष्यमाणेन सम्बन्धः, प्राणातिपातविरतेरिति शेषः, द्वितीयाः—सूत्रोक्तक्रमापेक्षया अप्रत्याख्यानावरणास्ते च ते कषायाश्च, कष्यते-हिंस्यते येन यस्मिन् वा प्राणी स कषः—कर्म भवो वा तस्यायो—लाभो येभ्यस्ते कषायाः, तथा

चोक्तम्–" कम्मं कसं भवो वा कसमाओ सिं जओ कसाया ते । " तेषामुदये–विपाके 'तीव्राणां' उत्कटानां 'भवति' जायते 'श्राद्धस्य' श्रावकस्य देशविरतिभाजः, ननु बन्धादीनामप्रत्याख्यातत्वात्कथं तत्करणे भङ्गः ?, अथ तेऽपि प्रत्याख्यातास्तर्हि सूत्रोक्तव्रतद्वादशसङ्ख्याविरोधः, एतेषामपि पृथक् प्रत्याख्यातत्वेन भिन्नव्रतरूपतापत्तेः, सत्यं, प्राणातिपाते प्रत्याख्याते बन्धादयोऽपि प्रत्याख्याताः, तदुपायत्वात्तेषां, न हि कारणनिर्वृत्तिमन्तरेण कार्यनिरोधः कर्तुं शक्यः, अत आकुट्टिकया बन्धादिविधानेऽपि भङ्ग इति, यच्चोक्तम् 'अथ तेऽपि प्रत्याख्याता' इत्यादि, तच्चायुक्तमेव, विशुद्धाहिंसाविरतिसद्भावे तत्संभवस्यैवाभावात्, यद्येवं कथं प्राक्तनद्वारेऽमीषामतिचारत्वमुक्तं ?, सत्यमुक्तं, किन्तु विवक्षया, तथाहि–यदा मारयामीति सङ्कल्पाभावेऽपि कोपादिविवशः परप्राणप्रहाणमवगणयन् बन्धाद्यारभते तदा निष्करुणतया व्रतानपेक्षस्य देशेन विरतिभङ्गो, न सर्वात्मना, तथा प्रवृत्तस्याप्यग्रे प्राणातिपातासिद्धेरतो भङ्गाभङ्गरूपाविवक्षयाऽतिचारत्वममीषामुक्तं, तदुक्तं–" न मारयामीति कृतव्रतस्य, विनैव मृत्युं क इहातिचारः ? । निगद्यते यः कुपितो वधादीन्, करोत्यसौ स्यान्नियमेऽनपेक्षः ॥ १ ॥ मृत्योरभावान्नियमोऽस्ति तस्य, कोपाद्दयाहीनतया तु भग्नः । देशस्य भङ्गादनुपालनाच्च, पूज्या अतीचारमुदाहरन्ति ॥२॥" इति गाथार्थः ॥२७॥

॥ १०१ ॥

उक्तं भङ्गद्वारमधुना भावनाद्वारं निगद्यते—

पणमामि अहं निच्चं आरंभविवज्जिआण विमलाणं ।
सवजगजीवरक्खणसमुज्जयाणं मुणिगणाणं ॥ २८ ॥

इह प्रतिपन्नप्रथमाणुव्रतेन श्रावकेण त्रिकालमप्येवं चिन्तनीयं, यथा 'प्रणमामि' प्रणिपतामि नमस्करोमीतियावत् अहमित्यात्मनिर्देशे 'नित्यं' सदा 'मुनिगणेभ्यः' साधुवृन्देभ्य इत्युत्तरेण सम्बन्धः, षष्ठ्याश्चतुर्थ्यर्थत्वाद्, यदुक्तं—' छट्ठी विभत्तीएँ भन्नइ चउत्थी ' सा च प्रणमामीति क्रियायोगे, यथा—" तस्मै तत्त्वविदां वराय जगतः शास्त्रे प्रणम्ये " ति, कीदृशेभ्यः ? इत्याह—आरम्भविवर्जितेभ्यः, प्राकृतत्वात् क्तान्तस्य परनिपातः, विवर्जितः—त्यक्त आरम्भः—पृथिव्याद्युपमर्दो यैस्ते तथा तेभ्यः, अत एव विगतो मलो—भावतः क्रोधादिरूपो येभ्यस्ते विमलास्तेभ्यः, विवर्जितारम्भत्वस्यैव विशेषणद्वारेण हेतुमाह—' जगति ' लोके ' जीवाः ' सूक्ष्मबादरादिभेदभिन्ना एकेन्द्रियादिपञ्चेन्द्रियान्ताश्चतुर्दश, यदुक्तम्—" एगिंदिय सुहुमियरा सन्नियर पणिंदिया य सबितिचऊ । पज्जत्तापज्जत्ता भेएणं चोद्दसग्गामा ॥ १७ ॥ " जगज्जीवाः सर्वे च

ते जगज्जीवाश्च सर्वजगज्जीवास्तेषां रक्षणं—पालनं तत्र सम्यक्—सिद्धान्तोक्तविधिना उद्यता—उद्युक्तोः सर्वजगज्जीवरक्षणसमुद्यतास्तेभ्यः, विशेषणसाफल्यं च हेतुहेतुमद्भावेन भावनीयं, तथाहि—रक्षायामनुद्युक्ता नारम्भं त्यजन्ति न चात्यक्तारम्भा निर्मला भवन्तीति गाथार्थः ॥ १८ ॥

उक्तं नवभेदमपि प्रथमाणुव्रतमिदानीं द्वितीयस्यावसरस्तदपि नवभेदमतः प्रथमभेदेन तावदाह——

अणभूयं उब्भावइ, हूयं निण्हवइ तह य विवरीयं ।
गरिहा सावज्जं वा अलियं एमाइरूवं तु ॥ २९ ॥

'अणहूयं' ति प्राकृतत्वाद् 'अभूतं' असत्यं तद् 'उद्भावयति' प्रकाशयति यदिति गम्यं, यथा श्यामाकतन्दुलमात्र आत्मा ललाटस्थो हृदयस्थः सर्वव्यापी वेत्यादि, असत्यत्वं चैतद्वचसामनुभवबाधितत्वात्, तथाहि—एतावन्मात्रत्वे आत्मनः सकलशरीराधारसुखदुःखाद्यनुभवो न भवेदिति सूक्ष्मधिया भावनीयं, सर्वव्यापित्वे शरीराद्बहिरपि चैतन्यमनुभूयेतेत्यादि दोषजातं ग्रन्थान्तरतः परिभाव्यम्, एवं—" एक एव हि भूतात्मा, देहे देहे व्यवस्थितः । एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥१॥ " इत्याद्यप्यभूतम्, एकात्मत्वे ह्येकस्य सुखदुःखबन्धमोक्षादिसङ्गाते

॥ १०४ ॥

सर्वस्य तत्प्रसङ्गादिति, तथा 'भूतं' सत्यं तन्निह्नुवते यदिति दृश्यं, यथा नास्त्यात्मा नास्ति परलोक इत्यादि, तथा विपरीतम्—अन्यथा यद्ब्रवीतीति शेषः, यथा बलीवर्दोऽश्वादिरिति, अथवा यथा बौद्धाः प्राहुः—क्षणक्षयि ज्ञानमेवात्मा, साङ्ख्या वा नित्यैकस्वरूप इति, 'गरिहं'ति गर्हा—निन्दां यत्करोतीति गम्यं, यथा काणः कुब्जो दासस्त्वमित्यादि, 'सावद्यं' सपापं यद्वदतीत्यध्याहारः, यथा दम्यन्तां गोरथका इत्यादि, वाशब्दः समुच्चये, 'अलीकं' अनृतमेवमादिरूपं तद्भवतीत्यध्याहृतक्रियया सम्बन्धः, उक्तञ्च—" यद् भावदोषवद् वाक्यं, तत्त्वादन्यत्र वर्त्तते । सावद्यं वाऽपि यद्वाक्यं, तत्सर्वमनृतं विदुः ॥ १ ॥" तथा आदिशब्दाद्यदात्मपरोभयेषां सङ्क्लेशोपघातादिहेतुरतदनृतमिति गाथार्थः ॥ २९ ॥

उक्तं यादृशद्वारं, भेदद्वारमधुनोच्यते—

कण्णागोभूमालियनासवहारं च कूडसक्खेज्जं ।
भेया य तस्स पंच उ हवंति एए जिणुद्दिट्ठा ॥ ३० ॥

कन्या च—कुमारी गौश्च—बहुला भूमिश्च—भूरिति द्वन्द्वस्तासु विषयेऽलीकम्—अनृतं कन्यागोभूम्यलीकं,

इहालीकशब्दस्य ह्रस्वत्वश्रुतिः प्राकृतशैल्या, तच्च तथा न्यस्यते—निक्षिप्यते रक्षणायान्यपार्श्वे ध्रियत इति न्यासो—निक्षेपकस्तस्यापहरणमपहारश्च—अपलपनमिति पुनः समाहारद्वन्द्वः, एते चत्वारो भेदाः, 'चः' समुच्चये भिन्नक्रमः तेन 'कूटसाक्ष्यं' च व्यंसकसभ्यत्वमिति पञ्चमः, अत एवाह—'भेदाः' प्रकाराः चः पूरणे 'तस्य' मृषावादस्य 'पञ्च' इति पञ्चसङ्ख्याः तुशब्दैवकारार्थत्वात्पञ्चैव 'भवन्ति' स्युः 'एते' कन्यालीकादयः 'जिनोद्दिष्टाः' जिनैः—वीतरागैरुद्दिष्टाः—कथिता इति । तत्र कन्यालीकमभिन्नकन्यां भिन्नकन्यां वक्ति विपर्ययं वा, इदं च सर्वकुमारादिद्विपदविषयालीकोपलक्षणं, गवालीकं स्वल्पक्षीरां गां बहुक्षीरां विपर्ययं वा वदति, इदमपि सर्वचतुष्पदविषयालीकोपलक्षणं, भूम्यलीकं परसत्कामप्यात्मादिसत्कां भुवं ब्रूते विपर्ययं वा, एतच्च शेषापद-द्रव्यविषयालीकोपलक्षणं, यद्येवं द्विपदचतुष्पदापदग्रहणमेव कस्मान्न कृतम् ?, अत्रोच्यते, कन्यालीकादीनामति-गर्हितत्वेन रूढत्वात्, न्यासापहारस्य च स्तेयस्वरूपस्याप्यपलापरूपतया मृषावादत्वादिहोपादानं पूर्वादिकेभ्यो भेदश्च, कूटसाक्ष्यं तत् क्रोधमत्सराद्यभिभूतः प्रमाणीकृतः सन् कूटं वक्ति—यथाऽस्याहमत्र साक्षी, अस्य चान्यपाप-समर्थकत्वलक्षणं विशेषमाश्रित्य पूर्वेभ्यो भेद इति गाथार्थः ॥ ३० ॥

व्याख्यातं भेदद्वारमधुना यथा जायत इत्येतदुच्यते—

**दुगतिग दुग दुग दुग एक्कगेण एगेण होइ तिविहं तु ।**
**इग दुग इग एक्केणं वयाण एसेव गहणविही ॥ ३१ ॥**

अस्या भावार्थः—इह व्रतं प्रतिपित्सुः कोऽपि किञ्चित्प्रतिपद्यते, श्रावकव्रतप्रतिपत्तेर्बहुभङ्गत्वात्, तत् त दुल्लेखदर्शनार्थमियं गाथा, तत्र '**दुगतिग** 'त्ति द्विविधात्रिविधेन—करणकारणमनोवाक्कायस्वरूपेणैको भङ्गः सूचितः, श्रावकस्य सर्वत्रानुमतेरप्रतिषेधात्, यश्च भगवत्यां त्रिविधंत्रिविधेनेत्ययमपि भङ्गो भाणितः स विषयविभागेन कस्यचिच्छ्रावकस्य कस्याञ्चिदवस्थायां क्वचिद्वस्तुनि कस्मिंश्चित्क्षेत्रादौ विज्ञेयो न सर्वत्र, भङ्गाभिलापश्चैवं-न करोमि न कारयामि मनसा वाचा कायेनेति, '**दुगदुग**' त्ति द्विविधं द्विविधेन भङ्गत्रयं सूचितं, पूर्वोक्तादेव हेतोः, एवमुत्तरत्रापि हेतुर्भाव्यः, उच्चारणं चेत्थं—न करोमि न कारयामि मनसा वाचा १ मनसा कायेन २ वाचा कायेन ३। '**दुगएक्कगेणं**' ति अनेनापि त्रयो भङ्गाः, तदुक्तिश्चैवं—न करोमि न कारयामि मनसा १ वाचा २ कायेन ३। '**एक्केण होइ तिविहं**' तीत्यनेन द्वौ, तौ चेमौ—न करोमि मनोवाक्कायैः १ न कारयामि मनोवाक्कायैः २।

'इगदुगे' त्यनेन तु षड् भङ्गाः, ते चेमे—न करोमि मनसा वाचा १ न करोमि मनसा कायेन २ न करोमि वाचा कायेन त्रयः ३, एवं न कारयामीत्यनेनापि त्रयः ३, सर्वे षट् 'एग इक्केण मित्यनेनापि षट्, ते च न करोमि मनसा १ वाचा २ कायेन ३, एवं न कारयामीत्यनेनापि त्रयः सर्वे षट्, पण्णामपि पदानां सर्वसङ्ख्या २१, तथा चोक्तं-" दुविहतिविहाइ छच्च उ, तेसिं भेया कमेणिमे हुंति। पढमेक्के दुन्नि तिया दुगेग दो छच्च इगवीसा ॥ १ ॥ " एषां च स्थापना—

| | | | | | |
|---|---|---|---|---|---|
| २ | २ | २ | १ | १ | १ |
| ३ | २ | १ | ३ | २ | १ |
| १ | ३ | ३ | २ | ६ | ६ |

एते चोत्तरगुणाविरतसहिता अष्ट, तथा च निर्युक्तिकारः—" दुविहतिविहेण पढमो दुविहं दुविहेण बीयओ होइ। दुविहं एगविहेणं, एगविहं चेव तिविहेणं ॥ १ ॥ एगविहं दुविहेणं एक्केक्क-विहेण छट्ठओ होइ। उत्तरगुण सत्तमओ अविरओ चेव अट्ठमओ ॥ २ ॥ " अस्यैव च षट्कस्याणुव्रतपञ्चकैकादि-संयोगापेक्षया षोडश सहस्राणि अष्टौ शतानि षडुत्तराणि भङ्गानां भवन्ति, तदानयनोपायश्च " एगवए छब्भंगा निद्दिट्ठा सावयाण जे सुत्ते। ते च्चिय पयवुड्ढीए सत्तगुणा छज्जुया कमसो ॥ १ ॥ " त्ति गाथातो बोद्धव्यः, तथाहि—प्राणातिपाताख्ये एकस्मिन् व्रते ये द्विविधत्रिविधादयः षड् भङ्गास्ते च सप्तकेन ताडिताः

षड्युताश्चोक्तसङ्ख्यां पूरयन्ति, यतः—षट् सप्तगुणाः षड्युताश्चाष्टचत्वारिंशद्भवन्ति ४८, इयं च सप्तगुणा षड्युता त्रीणि शतानि द्विचत्वारिंशदधिकानि ३४२, एतानि च सप्तगुणानि षड्युतानि चतुर्विंशतिशतानि २४००, एतान्यपि सप्तगुणानि षडधिकानि षोडश सहस्राण्यष्टौ शतानि षडुत्तराणि १६८०६। अथवा प्रकारान्तरं कथ्यते· प्राणातिपातादीनां पञ्चानां पदानामेकसंयोगेन पञ्च ५ द्विकसंयोगेन दश १० त्रिकसंयोगेन दश १० चतुष्कसंयोगेन पञ्च ५ पञ्चकयोगेनैकः १, तथा चोक्तम्—" पंचण्हऽणुव्वयाणं एक्कगदुगतिगचउक्कपणगेहिं। पंच य दस दस पणगेक्कगो य संयोग नायव्वा ॥ १ ॥" संयोगानयनोपायश्चायम्—" उभयमुहं रासिदुगं हेट्ठिल्लानंतरेण भय पढमं। लद्धहरासिविहत्ते, तस्सुवरि गुणं तु संजोगा ॥ १ ॥" अस्या भावार्थः—उभयमुखम्—उपर्यधोभावेन राशिद्वयं, द्वितीयपङ्क्ताविस्थं स्थापयित्वाऽधस्त्यराशेर- १२३४५/५४३२१ न्त्यानन्तरो योऽङ्को द्विकस्तेनोपरितनराशेरन्तस्य पञ्चकस्य भागे हृते जातं सार्द्धद्वयं २॥ लब्धं च पुनरुपरितनाङ्केन चतुष्केन गुणितं जातं दश १०, द्विकसंयोगसङ्ख्येयं, एवमन्येऽपि संयोगा आनेतव्याः, नवरमुपरितनराशावागतदशाद्यङ्कस्यैवाधस्त्यराशित्रिकादिना भागहारादि कर्तव्यं, अथवा पञ्चानां पदानामेकसंयोगे प्रत्येकं पञ्च ५, द्विकसंयोगे दश, ते चैवं—प्रथमद्वितीयप्रथमतृतीयप्रथमचतुर्थ-

प्रथमपञ्चमचारणया चत्वारः ४ द्वितीयतृतीयद्वितीयचतुर्थद्वितीयपञ्चमचारणया त्रयः ३ तृतीयचतुर्थतृतीयपञ्चमचारणया द्वौ२चतुर्थपञ्चमचारणया त्वेकः, सर्वे दश १० । एवं त्रिकादिसंयोगचारणाऽपि कर्तव्या, तथा चोक्तम्—"अहवा पयाणि ठविउं, अक्खे घेत्तूण चारणं कुज्जा । एक्कगदुगाइजोगे, भंगाणं संख कायव्वा ॥१॥" ततश्च प्राणातिपातादिपदानि द्विविधत्रिविधादिभिः षड्भिः पदैर्यान् भङ्गान् लभन्ते ते प्रत्येकं संयोगसंख्यया गुणिता मीलिताश्चोक्तसङ्ख्यां पूरयन्ति, तथाहि—यथा प्राणातिपातः षट् भङ्गानाप्नोति, तथा मृषावादादयोऽपि, इत्येकसंयोगसङ्ख्यया पञ्चलक्षणया षड् गुणितास्त्रिंशत् ३०, तथा प्राणातिपातमृषावादद्विकयोगे यथा षट्त्रिंशत् तथा शेषद्विकयोगेऽपि, अतः षट्त्रिंशत् द्विकसंयोगैर्दशभिर्गुणितास्त्रीणि शतानि षष्ट्यधिकानि ३६०तथा प्राणातिपातमृषावादादत्तादानात्रिकयोगे यथा द्वे शते षोडशोत्तरे २१६ तथा शेषत्रिकयोगेऽप्यतो द्वे शते षोडशोत्तरे त्रिकसंयोगैर्दशभिर्गुणिते एकविंशतिः शतानि षष्ट्यधिकानि २१६०, तथा प्राणातिपातादिचतुष्कयोगे यथा द्वादश शतानि षण्णवत्याधिकानि १२९६ एवं शेषचतुष्कयोगेऽपि, अतो द्वादश शतानि षण्णवत्यधिकानि चतुष्कसंयोगैः पञ्चभिर्गुणितानि चतुःषष्टिशतान्यशीत्यधिकानि भवन्ति ६४८०, पञ्चकसंयोगस्य त्वेकत्वात्तद्गुणराशेः क्षयवृद्ध्यभावात्सप्तसप्ततिः शतानि

षट्सप्तत्यधिकानीत्यवस्थितैव सङ्ख्या, ७७७६ स्थापना चेयम्—

| | | |
|---|---|---|
| ६ | ५ | ३० |
| ३६ | १० | ३६० |
| २१६ | १० | २१६० |
| १२९६ | ५ | ६४८० |
| ७७७६ | १ | ७७७६ |

व्रतयन्त्रस्थापना चेयम्—,

| प्रा | | मृ | | अद | | मै | | प | |
|---|---|---|---|---|---|---|---|---|---|
| २ | ३ | २ | ३ | २ | ३ | २ | ३ | २ | ३ |
| २ | २ | २ | २ | २ | २ | २ | २ | २ | २ |
| २ | १ | २ | १ | २ | १ | २ | १ | २ | १ |
| १ | ३ | १ | ३ | १ | ३ | १ | ३ | १ | ३ |
| १ | २ | १ | २ | १ | २ | १ | २ | १ | २ |
| १ | १ | १ | १ | १ | १ | १ | १ | १ | १ |

भङ्गाभिलापश्चैवं-प्राणातिपातं प्रत्याचक्षे द्विविधं त्रिविधेनेत्याद्येकसंयोगो, द्विकयोगे प्राणातिपातं प्रत्याचक्षे मृषावादं च द्विविधत्रिविधेन, प्राणातिपातं द्विविधत्रिविधेन मृषावादं द्विविधद्विविधेनेत्यादि यावत् प्राणातिपातेन मूलपदस्थेन मृषावादात् सर्वपदगामिनो लब्धा भङ्गाः षट् ६, पुनः प्राणातिपातेन क्रमशः सर्वपदगामिना प्राप्ताः षट्त्रिंशद् ३६ भङ्गाः, एवं शेषद्विकसंयोगेष्वप्यूह्यं, त्रिकयोगे प्राणातिपातं मृषावादमदत्तादानं च प्रत्याचक्षे द्विविधत्रिविधेन, प्राणातिपातं मृषावादं द्विविधत्रिविधेनादत्तादानं द्विविधद्विविधेनेत्यादि यावत्प्राणातिपातमृषावादाभ्यां स्वस्थानादचलिताभ्यामदत्तादानात्सर्वचारिणो लब्धा भङ्गाः षट् ६ ततो मृषावादचारणया षट्त्रिंशत् ३६ प्राणातिपातचारणया तु द्वे शते षोडशोत्तरे २१६, एवं शेषत्रिकयोगेष्वपि, चतुष्कयोगे त्रीणि पदानि तान्येव तुर्यपदं मैथुनं द्विविधत्रिविधेन प्रत्याचक्षे, पुनः पदत्रयं तथैव मैथुनं तु द्विविधं

द्विविधेनेत्यादि यावत्षट् ६ पुनः तृतीयपदस्य चारणया षट्त्रिंशत् ३६ द्वितीयपदस्य द्वे शते षोडशोत्तरे २१६, प्रथमपदस्य द्वादश शतानि षण्णवत्यधिकानि १२९६, एवं शेषचतुष्कयोगेऽपि, पञ्चकयोगे तु चत्वारि तान्येव पञ्चमं च परिग्रहपदं द्विविधत्रिविधेन प्रत्याचक्षे, पुनः पदचतुष्टयं तथैव, परिग्रहपदं तु द्विविधंद्विविधादिना यावद्भङ्गाः षट्, ततस्तुर्यपदचारणया षट्त्रिंशत् ३६ तृतीयचारणया द्वे शते षोडशोत्तरे २१६ द्वितीयचारणया द्वादश शतानि षण्णवत्यधिकानि १२९६ प्रथमचारणया तु सप्तसप्ततिः शतानि षट्सप्तत्य-धिकानि ७७७६, एवं द्वादशव्रतभङ्गा अप्यूह्यास्तत्संख्या च–" तेरसकोडिसयाइं, चुलसीजुयाइं बारस य लक्खा। सत्तासीइ सहस्सा, दो य सता तह दुरग्गा य ॥ १ ॥ " आनयनोपायश्चोह्याव्यः, तथा येऽपि द्विविधत्रिधादिपदेषु षट्सु चारणा क्रमेणैकविंशतिभङ्गा लब्धास्तेऽपि पञ्चव्रतचारणया द्वादशव्रतचारणया वाऽन्यान्यां भङ्गसङ्ख्यामुप-जनयन्ति, तदानयनोपायश्च " इगवीसं खलु भंगा निद्दिट्ठा सावयाण जे सुत्ते। ते च्चिय बावीसगुणा इगवीसं पक्खिवेयव्वा ॥ १ ॥ " अनेन च लब्धं पञ्चव्रतभङ्गपरिमाणं यथा एकपञ्चाशल्लक्षाः त्रिपञ्चाशत्सहस्राणि षट् शतान्येकत्रिंशदधिकानि ५१५३६३१, प्रागुक्तसंयोगादिवक्तव्यतया चेदं लभ्यते, तस्य च मूलसंयोगगुण्य-

गुणकारागतक्रमेण यादृशी स्थापना भवति तादृश्युपदर्श्यते,

| | | |
|---|---|---|
| २१ | ५ | १०५ |
| ४४१ | १० | ४४१० |
| ९२६१ | १० | ९२६१० |
| १९४४८१ | ५ | ९७२४०५ |
| ४०८४१०१ | १ | ४०८४१०१ |

अत्र चागतपदैकीकरणे उक्तसङ्ख्यापूर्त्तिर्भवति, द्वादशव्रतभङ्गसङ्ख्या त्वनेनैव क्रमेण स्वयमभ्यूह्येति, एवं तावदावश्यकनिर्युक्त्यभिप्रायेण भङ्गप्ररूपणा कृता, साम्प्रतं भगवत्यभिप्रायेणोपदर्श्यते—“ तिन्नि तिया तिन्नि दुया तिन्निक्केक्का य होंति जोएसु । तिदुएक्कं तिदुएक्कं तिदुएक्कं चेव करणाइं ॥ १ ॥ ” अस्य स्थापना

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ३ | ३ | ३ | २ | २ | २ | १ | १ | १ |
| ३ | २ | १ | ३ | २ | १ | ३ | २ | १ |
| १ | ३ | ३ | ३ | ९ | ९ | ३ | ९ | ९ |

अत्र चैकद्विकात्रिकसंयोगचिन्तनया एकोनपञ्चाशद् भङ्गा भवन्ति, तथा चोक्तम्—“ मणवइकाइयजोगे करणे कारावणे अणुमईण । एक्कगदुगतियजोए सत्ता सत्तेव इगुवन्ना ॥ १ ॥ ” एतेषां चायमभिलापः—न करोमि न कारयामि कुर्वन्तं नानुजानामि मनसा वाचा कायेनेति त्रिविधत्रिविधेनैको भङ्गः १ त्रिविधद्विविधे त्रयो भङ्गाः, ते चैवं—न करोमि न कारयामि कुर्वन्तं नानुजानामि मनसा वाचेत्येकः १ मनसा कायेनेति द्वितीयः २ वाचा कायेनेति तृतीयः ३ त्रिविधैकविधेऽपि त्रयो, यथा—न करोमि न कारयामि कुर्वन्तं नानुजानामि मनसेत्येकः १ वाचेति
१९ द्वितीयः २, कायेनेति तृतीयः ३, द्विविधत्रिविधे च त्रयो, यथा—न करोमि न कारयामि मनसा वाचा कायेनैकः, न करोमि कुर्वन्तं नानुजानामि तैरेव द्वितीयः, न कारयामि कुर्वन्तं नानुजानामि तैरेव तृतीयः ३, द्विविधद्विविधे

तु नव, यथा न करोमि न कारयामि मनसा वाचैकः १ मनसा कायेन द्वितीयः २ वाचा कायेन तृतीयः ३ न करोमि नानुजानामि मनसा वाचेत्यादयस्त्रयः ३, न कारयामि नानुजानामि मनसा वाचेत्यादयोऽपि त्रयः ३, सर्वे नव, द्विविधैकविधेऽपि नव, तद्यथा—न करोमि न कारयामि मनसैकः १ वाचा द्वितीयः २ कायेन तृतीयः ३, न करोमि नानुजानामि मनसेत्यादयस्त्रयः ३, न कारयामि नानुजानामि इत्यादयोऽपि त्रयः ३, सर्वे नव ९, एकविधत्रिविधे तु त्रयो, यथा—न करोमि मनोवाक्कायैरेकः १, न कारयामीत्येतैरेव द्वितीयः २ नानुजानामीत्येतैरेव तृतीयकः ३, एकविधद्विविधे तु नव, तद्यथा—न करोमि मनसा वाचैकः १ मनसा कायेन द्वितीयः २ वाचा कायेन तृतीयः ३, एवं न कारयामि नानुजानामीत्येतयोरपि त्रयस्त्रयः ३, सर्वे नव ९, एकविधैकविधेऽपि नव ९, तद्यथा—न करोमि मनसैकः१वाचा द्वितीयः २ कायेन तृतीयः३, एवं न कारयामि नानुजानाम्यनयोरपि त्रयस्त्रयः ३, सर्वे नव, सर्वे संयोगागतमीलने चैकोनपञ्चाशद्भवन्ति ४९, कालत्रयगुणने च सप्तचत्वारिंशदधिकं शतमिति १४७, तथा चोक्तं—"पढमेक्को तिन्नितिया, दोन्निनवा तिण्णि दोनवा चेव। कालतिएण य गुणियं सीयालं होइ भंगसयं ॥ १ ॥" एते च ये नव मूलभेदाः [ ग्रन्थाग्रम् ३००० ] संयोगभेदाश्चैकोनपञ्चाशदत्र प्रतिपादितास्ते व्रतपञ्चकेन व्रतद्वादशकेन वा

चिन्त्यमाना बहुतरां सङ्ख्यामापूरयन्ति, तदानयनोपायश्च-"एगवए नव भंगा निद्दिट्ठा सावयाण जे सुत्ते । ते च्चिय दसगुण काउं नव पक्खेवंमि कायव्वा ॥ १ ॥ इगुवन्नं खलु भंगा, निद्दिट्ठा सावयाण जे सुत्ते । तेच्चिय पन्नासगुणा एगुवन्नं पक्खिवेयव्वा ॥ २ ॥" इति गाथाद्वयाद्बोद्धव्यः, भावना तु पूर्वोक्तैव, भङ्गसङ्ख्या तु पञ्चानां व्रतानां नवभिः पदैरियं-नवनवतिः सहस्राणि नव शतानि नवनवत्याधिकानि ९९९९९, एकोनपञ्चाशता त्वियं-एकत्रिंशत्कोट्यश्चतुर्विंशतिलक्षाः नवनवतिः सहस्राणि नव शतानि नवनवत्याधिकानि ३१२४९९९९९, यद्वा प्रागुक्तसंयोगादिक्रमेणेमे सङ्ख्ये समानेये, तत्स्थापनाक्रमश्च द्वयोरपि यथाक्रमेणायं द्रष्टव्यः-

| | | |
|---|---|---|
| ९ | ५ | ४५ |
| ८१ | १० | ८१० |
| ७२९ | १० | ७२९० |
| ६५६१ | ५ | ३२८०५ |
| ५९०४९ | १ | ५९०४९ |

एवं द्वादशव्रत-

| | | |
|---|---|---|
| ४९ | ५ | २४५ |
| २४०१ | १० | २४०१० |
| ११७६४९ | १० | ११७६४९० |
| ५७६४८०१ | ५ | २८८२४००५ |
| २८२४७५२४९ | १ | २८२४७५२४९ |

भङ्गसङ्ख्याऽप्यानेया, एषां च द्वादशादय एव गुणकाराः, यथोक्तम्-"बारस १२ छावट्ठीविय ६६ वीसहिया दो य २२० पंच नव चउरो ४९५ । दो नव सत्त य ७९२ चउ दोन्नि नव य ९२४ दो नव य सत्तेव ७२९ ॥ १ ॥ पण नव चउरो ४९५ वीसा य दोन्नि २२० छावट्ठि ६६ बारसे १२ क्को १ य । सावगभंगाण इमे सव्वाणं हुंति गुणयारा ॥ २ ॥ "इत्यादिक्रमेण भङ्गकस्वरूपं परिज्ञाय मृषावादविरतिः स्वस्वभावाद्यालोचनपूर्वकं स्वीकर्त्तव्येत्यध्याहृतपदसंटङ्कः, इत्थमेवासौ

जायत इतिकृत्वा, कुत एवमिति चेद्ब्रूमः यत इत्यध्याहाराद् यस्माद् व्रतानां प्राणातिपातविरत्यादीनामेषः—एवं उक्तरूपो 'ग्रहणविधिः' उपादानाम्नायो 'ज्ञात्वाऽभ्युपगम्य पालनं विरति'रिति वचनात्, तथा च निर्युक्तिकारः—" सीयालं भंगसयं जस्स विसोहीएँ होइ उवलद्धं । सो खलु पच्चक्खाणे कुसलो सेसा अकुसला उ ॥ १ ॥" इति गाथार्थः ॥ ३१ ॥

उक्तं यथा जायत इति द्वारम्, अधुना दोषद्वारमुच्यते—

अलियं च जंपमाणो मूगत्ताईणि लहइ दुक्खाणि ।
जायइ तहा (तह तस्स) निहणं वसुराया एत्थुदाहरणं ॥ ३२ ॥

'अलीकं' अनृतं 'चः' पादपूरणे 'जल्पन्' ब्रुवन् 'मूकत्वादीनि' वाग्विकलत्वादीनि 'लभते' प्राप्नोति 'दुःखानि' असातोदयरूपाणि, परलोक इति गम्यते, तदुक्तम्—" मूका जडाश्च विकलाः, वाग्घीना वाग्जुगुप्सिताः । पूतिगन्धिमुखाश्चैव, [ नरा ] जायन्तेऽनृतभाषकाः ॥ १ ॥" नन्वयं परलोके दोषः, इहलोके तस्य किं भवति ? इत्याह—'जायते' भवति च तथा तस्येह लोक इति शेषः 'निधनं' क्षयः, वसुराजा 'अत्र' अनृते 'उदाहरणं' दृष्टान्त इति गाथाऽक्षरार्थः ॥ भावार्थस्तु कथानकगम्यस्तच्चेदम्— 

इहैव जम्बूद्वीपे भारतवर्षालङ्कारभूतः सूरसेनाभिधो देशः, तत्र मूर्त्तिमती नगरी, तस्यां हरिवंशगगनमण्डल-

मण्डनं सौम्यत्वकान्तिमत्त्वादिगुणसमुदयसमुपहसितचन्द्रोऽभिचन्द्रो राजा, तस्य पुत्रो वसुकुमारः, स चान्यदा विद्याग्रहणयोग्य इति मत्वा तन्नगरीवास्तव्यस्यैव क्षीरकदम्बकाभिधानोपाध्यायस्य सत्कारपूर्वकं समर्पितः, इतश्च तत्पुत्रः पर्वतको नारदश्च छात्रस्तदैव तत्पार्श्वे पठितुमुपस्थितौ, ततस्तांस्त्रीनप्यसौ वेदमध्यापयितुं प्रवृत्तः, अन्यदा चाकाशचारिणौ साधू गच्छन्तौ तान् पठतः समालोक्यैकेन साधुना द्वितीयस्य कथितं—यथा य इमे वेदमधीयन्ते एतेषां द्वावधोगामिनावेक ऊर्ध्वगामीति, एतच्च क्षीरकदम्बकोपाध्यायेन श्रुतं, साधू च तद्वदन्तावेवादर्शनीभूतौ, उपाध्यायस्त्वधृत्या महत्या गृहीतः, चिन्तयति च—यथा मयैते वेदार्थज्ञाः कृताः, अन्यसकलशास्त्रविदश्च, अनेनाभिसन्धिना यथाऽमी अवगताशेषशास्त्ररहस्याः शास्त्रोदितानुष्ठानासेवनपूर्वकं परमपदमाराधयिष्यन्ति, यावदास्तां तत, प्रत्युताधोगामिनौ द्वावेतेषां भविष्यतः, न च साधुवचनं मृषा, तदहो पश्यान्यथैव चिन्त्यन्ते पुरुषार्थाः पुरुषेण अन्यथा च भवन्ति, तदहमपि यावज्जराजर्जरितवपुः सकलपुरुषार्थनिर्वर्त्तनापटिष्ठो न भवामि तावत्स्वहितमाचरामीति विचिन्त्य संसारविरक्तचित्तस्तथाविधाचार्यसमीपे प्रव्रज्यां प्रतिपेदे, उग्रतपश्चरणरतश्च कञ्चित्कालं भूत्वा लोकालोकप्रकाशनप्रत्यलं दिव्यं केवलज्ञानमुत्पाद्य निःशेषकर्मकलङ्कविकलो मोक्षं प्राप्तः। वसुश्चाभिचन्द्रेण

राज्ञा स्वराज्येऽभिषिक्तः, स्वयं च निष्क्रान्तः। ततो वसुराजा स्तोककालेनैवाप्रतिहतशासनो जातः। इतश्च अन्यदा मृगयागतेन लुब्धकेन केनचिन्नातिदूरवर्त्तिनं मृगमालोक्य कर्णान्ताकृष्टकोदण्डेन मुक्तो बाणो यावदसावग्रतः प्रतिस्खलितः सम्मुखमेव समायातः, ततस्तेन चिन्तितं–किमेतदिति, यावदग्रे गत्वाऽवलोकयति तावदवगतं स्फाटिकशिलेति, ततोऽद्भुतं रत्नमेषा खलु शिला, एतदन्तरितमृगाविप्रलब्धबुद्धिना हि मया बाणप्रेरणप्रयासो विहितः, ईदृशरत्नानां च नृपतिरेव योग्य इत्यतो राज्ञो निवेदयामि येन विशिष्टरत्नदर्शनतुष्टो महाप्रसादं विदधातीति विचिन्त्याभिज्ञानं स किञ्चिद्विधाय गतो वसुराजसमीपं, कथितः शिलावृत्तान्तः, ततोऽसौ तामानाय्य प्रच्छन्नं प्रधानवैज्ञानिकैः सिंहासनं कारयित्वाऽऽस्थानमण्डपे न्यवीविशत्, तांश्च वैज्ञानिकान् सह तेन लुब्धकेन जनप्रसिद्धिपरिहारेच्छया प्रच्छन्नमेव व्यापादितवान्, तस्मिंश्च प्रदेशे न केचन प्रवेशं लभन्ते, ततो राजा सिंहासनोपविष्ट आकाशस्थ इव ज्ञायते, ततो राज्यान्तरेष्वप्येवं प्रसिद्धिरभूद्, यथा वसुराज आस्थानमाकाशगतो विदधाति सत्यप्रभावेन, नारदोऽपि तस्य सहाध्यायी स्वगृहं गतोऽनेकेषां छात्राणां व्याख्यानं करोति श्रावकधर्मं चानुपालयति, पर्वतकस्तु तत्रैव स्वशिष्येभ्योऽनेकेभ्यो वेदान् व्याख्यानयति, अन्यदा च नारदः स्वशिष्यप-

रविरो गुरुभ्रातृस्नेहेन पर्वतकं द्रष्टुं तत्रैव समायातः, हर्षवशोद्भिन्नबहुलरोमाञ्चश्च प्रविष्टस्तद्गृहं, दृष्टः पर्वतकेन, कृता आसनदानादिका प्रतिपत्तिः, पृष्टा परस्परं सुखदुःखवार्त्ता, स्थित्वा च कियन्तमपि कालमुक्तं नारदेन—भ्रातः! क्रियतां व्याख्यानं, मा विमुखीक्रियन्तामिमे शिष्याः, न ह्यनध्यायायाहमायातः, ततः पर्वतको यद् वेदेषु यागविधानेऽर्द्धव्याख्यानमुक्तवान् तद्व्याख्यातुमारब्धः, तत्र चेदं सूत्रम्—"अजैर्यष्टव्यं" अस्य व्याख्या—अजाः—छागास्तैर्यष्टव्यं—यागः करणीय इति, अत्रान्तरे नारदेन भणितं—मैवं वोचः, यागविधाने हि वर्षत्रयपर्युषिता व्रीह्यादयो न जायन्ते—न रोहन्तीतिकृत्वाऽजा भण्यन्ते, तैर्यष्टव्यं, न तु छागैः, ततश्च तयोरुत्तरप्रत्युत्तरेण महान् विवादो जातः, तस्मिंश्च सति ताभ्यामुक्तं—यथाऽस्माकं वसुराजस्तृतीयः सहाध्यायी बभूव सोऽत्रार्थे प्रमाणं, केवलं यो जेतव्यस्तस्य जिह्वाछेदो विधातव्यः, एवं प्रतिज्ञायां विहितायां नारदः समुत्थाय स्वच्छात्रपरिवारः स्वावासं गतः, पर्वतकोऽपि स्वकीयश्रोतॄन् विसृज्य मातृसमीपं गत्वा नारदवृत्तान्तं निवेदितवान्, ततस्तयाऽवादि—यथा नारदेन व्याख्यातं तथा तव पित्राऽपि, एवं मम स्मृतिः, ततस्तेनोदितं—यद्येवं भवतु मम जिह्वाच्छेदः, तयोक्तं—वत्स! मोत्सुको भूः, त्वया हि राजा प्रमाणमादृत आस्ते, अतस्तमेवोपसर्पामः, मा कदाचि-

दुपरोधवशीकृतो नृपतिस्त्वत्पक्षमपि पूरयति, एवमुक्त्वा गता सा सपुत्रा नृपसमीपं, प्राप्ता दौवारिकभूमिं, निवेदितं द्वारपालेन राज्ञः, यथा—देव! उपाध्यायी पर्वतकश्च त्वां द्रष्टुमिच्छतः, राज्ञोक्तं—प्रवेशय शीघ्रं, असावपि यथाऽऽज्ञापयति देव इत्यभिधाय प्रवेशितवान्, ततो राज्ञा उपाध्यायीं पर्वतकं च प्रति कृतमभिवादनं, ताभ्यामप्युक्त आशीर्वादः, राज्ञाऽपि दापिते उपवेशनके भाणितं—प्रभूतकालादस्माकं स्मृतं, किमम्बायाः प्रयोजनं मया?, दीयतामादेशः, ततस्तयोक्तं—व्याक्षेपबहुलतयैतावन्ति दिनानि भवद्भिः सह दर्शनं न कृतं, यच्च कार्यं पृष्टं वत्सेन तत्पुनरेकान्ते भणनीयं, ततो राज्ञा तद्वचनानन्तरमेव शीघ्रमुत्सारितः सकलो लोकः, साऽपि पर्वतकं समीप एव विधाय कथितवती नारदवृत्तान्तं जिह्वाच्छेदप्रतिज्ञावसानं, तदिदानीं कृत्यमकृत्यं च यदहं भणामि तदवश्यं त्वयाऽभ्युपगन्तव्यमिति, किं बहुना?, यथा मम पुत्रो न जीयते तथा कर्त्तव्यं, ततस्तदुपरोधेन प्रतिपन्नं राज्ञा, अथवा कर्णविषं महाविषमेतत्, अपरिणतसत्तत्त्वामृतस्य कां न विडम्बनामुपजनयति?, तदुक्तम्—"कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः। क्षपणकतामपि धत्ते पिबति सुरां नरकपालेन ॥ १ ॥" ततो हृष्टा पर्वतकमाता, समं पुत्रेण निर्गता भवनात्, जातः सर्वनगर्यां जनप्रवादो यथा नारदपर्वतकयोर्महावादो राज्ञोऽग्रे प्रातर्भविष्यति, ततो राजा द्वितीयदिवसे संपूर्णमास्थानं दत्त्वा नारद-

पर्वतकावाकारितवान्, तावपि सपरिवारौ समायातौ, उपविष्टौ च दत्तोपवेशनकौ उचितस्थाने, मिलिताश्च मन्त्रिमहामन्त्रिसामन्तप्रमुखा राजलोकाः, आयाताश्चानेके वेदविचक्षणाः, ततस्तेषु निजनिजस्थानोपविष्टेषु दिक्पालानां देवतानां चाघोपणां कृत्वा भणितं मध्यस्थपुरुषैर्नृपसम्मुखं—देव! नारदपर्वतकाभ्यां व्यवहारे त्वं प्रमाणीकृतस्तदिदानीं भवद्भिस्तत्सत्यं वक्तव्यं येन न प्रभवन्ति नदीवेगाः न ज्वलन्ति शाकिनीभूतादयः वशीभवन्ति देवाः न दहति वैश्वानरः, सर्वथा यथा क्षीरकदम्बोपाध्यायेन व्याख्यातं तथा कथयन्तु भवन्तः, वसुराजेन भणितं—नाहमलीकं भणामि, यतः सत्यवादित्वेनैवास्थानावसरमाकाशे करोमि, तस्मान्माऽत्र शङ्का कदाचित्कुथाः, यदुत वसुराजोऽसत्यवादीत्यभिधाय अजाः छागा यागविधाने क्षीरकदम्बोपाध्यायेन व्याख्याता इत्येवं मम स्मृतिः, ततोऽत्रान्तरे तस्य कुलदेवता कोपमुपगता सती चिन्तयामास—अहह! कथमनेन पापेन असत्यसन्धिना व्यलीकप्रतिपादनकलङ्केन कलङ्कितो निर्मलोऽपि निजवंशः, तद्दर्शयाम्येतस्येदानीं पापफलमिति विचिन्त्य तथा हतो यथा सिंहासनान्निपतितमात्र एव निधनमुपगतः, ततो लोकेन वसुराजस्य तथाविधामवस्थामवलोक्य पर्वतकोऽपि धिक्कारितः, नारदश्च सुरासुरगन्धर्वादिभिः संपूजितो, लोकसकाशात्परां श्लाघां प्राप्त इत्येवमनृतभाषणे दोषः, सत्यप्रतिपादने गुणः, इत्येकेनाप्याख्यानकेन दोष-

गुणलक्षणद्वारद्वयं व्याख्यातमवगन्तव्यं, तथाहि–गुणद्वारेऽपि सूत्रकृता नारद एव दृष्टान्तीकृतः, तथा च सूत्रम्–

जे मिउ सच्चं जंपंति निउणयं सव्वसत्तहियजणयं ।
ते इह पुज्जा रिसिनारयव्व सुगइं पुणो जंति ॥ ३३ ॥

'ये' प्राणिनः 'मृदु' कोमलं 'सत्यं' अवितथं जनपदादिभेदवत् 'जल्पन्ति' भाषन्ते 'निपुणं' सुपर्यालोचितं 'सर्वसत्त्वहितजनकं' समस्तप्राणिसुखप्रापकं 'ते' प्राणिनः 'इह' मनुष्यजन्मनि 'पूज्याः' अर्च्या ऋषिनारदवत् 'सुगतिं' स्वर्गादिलक्षणां, पुनःशब्दो विशेषणार्थः, स च परलोक इति विशिनष्टि, 'यान्ति' गच्छन्तीत्यक्षरार्थः ॥ भावार्थस्तु कथानकेनैवोक्त इति ॥ अधुना षष्ठं यतनाद्वारमुच्यते–

बुद्धिं पुव्वं काऊण भासए अंधगोविव सचक्खुं ।
अप्पाणम्मि परम्मि य वज्जंतो पीडमुभओवि ॥ ३४ ॥

'बुद्धिं' मतिं 'पूर्वं' अग्रे 'कृत्वा' विधाय 'भाषते' वक्ति, गृहीतस्थूलमृषावादविरतिः श्रावक इति गम्यते, 'अन्धक इव' चक्षुर्विकल इव 'सचक्षुषं' विद्यमाननेत्रं, सशब्दस्य विद्यमानार्थस्य ग्रहणं, यथा

सलोमको, विद्यमानलोमक इत्यर्थः, ततोऽप्ययमत्र भावार्थः—यथाऽन्धश्चक्षुष्मन्तं पुरतो विधाय गमनादि करोति, एवं श्राद्धो बुद्धिं पूर्वं कृत्वा भाषते, कोऽर्थः?—प्रेक्षापूर्वकारी मत्या पर्यालोच्य भाषत इत्यर्थः, किं कुर्वन् भाषते? इत्याह—'आत्मनि' स्वस्मिन् 'परस्मिन्' अन्यत्र, चशब्दः पूर्वापेक्षया समुच्चये, 'वर्जयन्' परिहरन् 'पीडां' बाधां, न केवलं स्वपरयोः प्रत्येकं, किन्तु 'उभओऽवि'त्ति उभयोरपि समुदितयोरितियावत्, तत्र स्वपीडाजनकं यथा पिङ्गलस्थपतेः खानितसरःसलिलस्थैर्यार्थिनृपतिप्रश्नानन्तरकथितात्मसदृशपुरुषबलिदानप्रतिवचनं, तद्धि तथाविधान्यपुरुषाप्राप्तौ स्ववधाय तस्य जातमिति स्वपीडाजनकं, परपीडाजनकं कस्यचिच्चौरोऽयं यातीति वचनं, तद्धि नगरारक्षकादिना श्रुतं तद्वधाय भवतीति परपीडाहेतुः, उभयपीडाजनकमप्येतदेव, यतस्तद्वचनश्रवणसमुपजातकोपात् कदाचित्तं हन्यादपि, नगरारक्षकादिश्च चौरादिकमित्युभयपीडाजनकमिति गाथार्थः ॥ उक्तं यतनाद्वारमधुनाऽतीचारद्वारमभिधीयते—

सहसा अब्भक्खाणं रहसं च सदारमंतभेयं च ।
मोसुवएसं तह कूडलेहकरणं च वज्जेज्जा ॥ २५ ॥

इह गृहीतस्थूलमृषावादविरतिः श्रावकः 'सहसा' अनालोच्य 'अभ्याख्यानं' असद्दोषाध्यारोपणं, यथा चौरस्त्वं पारदारिको वेत्यादि, सहसाऽभ्याख्यानं, तद्वर्जयेदिति तुर्यपादान्तेन संबन्धः, तथा 'रहसं च' त्ति चशब्देन अभ्याख्यानशब्दस्य सम्बन्धाद्रहोऽभ्याख्यानं च, तत्र रहः—एकान्तस्तत्र तेन वा अभ्याख्यानं रहोऽभ्याख्यानं, एतदुक्तं भवति—रहसि मन्त्रयमाणानभिधत्ते—एते हीदं चेदं च राजविरुद्धादिकं मन्त्रयन्ते, तथा 'स्वदारमन्त्रभेदं च' स्वकलत्रविश्रब्धभाषितान्यकथनं, दारग्रहणं चेह मित्राद्युपलक्षणार्थं, 'चः' समुच्चये, तथा 'मोसुवएसं' ति मृषा—अलीकं तद्विषय उपदेशो मृषोपदेशः, त्वमिदमेवं च ब्रूहीत्याद्यसत्याभिधानशिक्षणं, तथा 'कूटलेखानां' असद्भूतार्थसूचकाक्षरलेखनानां करणं—विधानं कूटलेखकरणं तच्च 'वर्जयेत्' परिहरेद्, यत एतानि समाचरन्नतिचरति द्वितीयाणुव्रतमिति। नन्वाद्यातिचार एवैक आस्तां द्वितीयाभिधानमनर्थकम्, अभ्याख्यानस्योभयत्राप्यविशेषात्, सत्यं, किन्तु रहोऽभ्याख्यानमेकान्तानिमित्तवितर्कमात्रपूर्वकं संभाव्यमानाभ्याख्येयार्थाभिधानम्, इतरत्त्ववितर्कपूर्वमेवेति विशेषः, नन्वभ्याख्यानमसद्दोषाभिधानरूपत्वेन प्रत्याख्यातत्वाद्भङ्ग एव, न त्वतिचारः इति, सत्यं, किन्तु यदा परोपघातकमनाभोगादिनाऽभिधत्ते तदा सङ्क्लेशाभावेन व्रतानपेक्षत्वाभावान्न व्रतभङ्गः, परोपघात-

हेतुत्वाच्च भङ्ग इति भङ्गाभङ्गरूपतयाऽतिचारः, यदा पुनस्तीव्रसङ्क्लेशादभ्याख्याति तदा भङ्ग एव, व्रतनिरपेक्षत्वात्, आह च—"सहसब्भक्खाणाईं जाणंतो जइ करेज्ज तो भंगो। जइ पुणऽणाभोगाईहिं सो तो होइ अइयारो ॥ १ ॥" स्वदारमन्त्रभेदः पुनरनुवादरूपत्वेन सत्यत्वाद् यद्यपि नातिचारो घटते तथाऽपि मन्त्रितार्थप्रकाशनजनितलज्जादितः स्वदारादेर्मरणादिसंभवेन परमार्थतस्तस्यासत्यत्वात् कथञ्चिद्भङ्गरूपत्वादतिचार एव, तथा मृषोपदेशो यद्यपि मृषा न वादयामीत्यत्र न वदामि न वादयामीत्यत्र वा व्रते भङ्ग एव, न वदामीति व्रतान्तरे तु न किञ्चन, तथाऽपि सहसाकारानाभोगाभ्यामतिक्रमव्यतिक्रमातिचारैर्वा मृषावादे परप्रवर्त्तनं व्रतस्यातिचारोऽयं, अथवा व्रतसंरक्षणबुद्ध्या परवृत्तान्तकथनद्वारेण मृषोपदेशं यच्छतोऽतिचारोऽयं, व्रतसव्यपेक्षत्वान्मृषावादे परप्रवर्त्तनाच्च भग्नाभग्नरूपत्वाद्व्रतस्येति, कूटलेखकरणं तु यद्यपि कायेन मृषावादं न करोमीत्यस्य न करोमि न कारयामीत्यस्य वा व्रतस्य भङ्ग एव, व्रतान्तरे तु न किञ्चन, तथाऽपि सहसाकारादिनाऽतिक्रमादिना वाऽतिचारः, अथवा 'मृषावाद' इति मृषाभाषणं मया प्रत्याख्यातं इदं पुनर्लेखनमिति भावनया मुग्धबुद्धेर्व्रतसव्यपेक्षस्यातिचार इति गाथार्थः ॥ ३४ ॥ गतमतिचारद्वारमधुना भङ्गद्वारं प्रतिपाद्यते—

अब्भक्खाणाईणि उ जाणंतो जइ करेज्ज तस्स भवे ।
भंगो पावस्सुदए मूलं सो सव्वदुक्खाणं ॥ ३६ ॥

'अभ्याख्यानं' प्रागुक्तस्वरूपं तदादिर्येषां स्वदारमन्त्रभेदाद्यतिचारपदानां तान्यभ्याख्यानादीनि 'जानन्' अवबुध्यमान आकुट्टयेतियावत् 'यदि कुर्यात्' चेद्विदध्यात्तदा 'तस्य' मृषावादव्रतिनो 'भवेद्भङ्गः' संपद्येत विनाशः, अलीकविरतेरिति शेषः, 'पापस्योदये' पातकस्य विपाकानुभवे, द्वितीयकषायप्रादुर्भाव इति तात्पर्यं, 'मूलं' कारणं 'स तु' स पुनः विनाशः 'सर्वदुःखानां' समस्तासातानामिहपरलोकभाविशरीरमानसानां, तुशब्दः प्रथमपादान्तवर्त्त्यप्यत्रार्थवशात्सशब्देन योजित इति गाथार्थः ॥३६॥ गतं भङ्गद्वारं, सम्प्रति भावनाद्वारमुच्यते—

तेसिं नमामि पयओ साहूणं गुणसहस्सकलियाणं ।
जेसिं मुहाउ निच्चं सच्चं अमयं व पज्झरइ ॥ ३७ ॥

इह गृहीतासत्यविरतिना गृहस्थेन सदैवैवमभिध्यानं कार्यं, यथा—तेभ्यो 'नमामि'—प्रणिपतामि, क्रियायोगे चतुर्थी पूर्ववत, सूत्रे च षष्ठी चतुर्थीस्थाने, यत उक्तं—"छट्ठिविहत्तीएँ भण्णइ चउत्थी"ति 'प्रयतः' प्रयत्नवान्

'साहूणं' ति साधयन्ति पौरुषेयीभिः क्रियाभिर्मोक्षमिति साधवस्तेभ्यः, कीदृशेभ्यः ? इत्याह—'गुणसहस्रकलितेभ्यः' गुणाः—मूलोत्तरगुणलक्षणास्तेषां सहस्राणि अष्टादशशीलाङ्गसहस्ररूपाणि तैः कलिता—युक्तास्तेभ्यः, अनेन नामादिसाधुव्यवच्छेदेन भावसाधुभ्य इत्युक्तं भवति, तेभ्यो नमामि, येषां किमित्याह—येषां 'मुखात्' वदनात् 'नित्यं' सदा 'सत्यं' ऋतं चतुर्विधं कायमनोवागजिह्मताऽविसंवादनरूपं जिनमतप्रसिद्धमेव, तथा च वाचकमुख्यः—"अविसंवादनयोगः, कायमनोवागजिह्मता चैव । सत्यं चतुर्विधं तच्च जिनवरमतेऽस्ति नान्यत्र ॥ १ ॥" अथवा दशविधं सत्यं दशवैकालिकनिर्युक्तिप्रसिद्धं, तदुक्तम्—"जणवय सम्मय ठवणा, नामे रूवे पडुच्चसच्चे य । ववहार भाव जोगे दसमे ओवम्मसच्चे य ॥ १ ॥" 'अमृतमिव' पीयूषमिव आह्लादकत्वात् 'पज्झरइ' त्ति प्रक्षरति प्रसरति निर्गच्छतीतियावदिति गाथार्थः ॥ ३६ ॥ उक्तं मृषावादभावनाद्वारं, तद्वचनाच्च समाप्तं नवप्रकारमपि मृषावादव्रतम्, अधुनाऽदत्तादानाख्यं तृतीयाणुव्रतं नवभेदमभिधित्सुः क्रमागतं प्रथमद्वारमाह—

सामीजीवादत्तं तित्थयरेणं तहेव य गुरूहिं ।
एयस्स उ जा विरती होइ अदत्ते सरूवं तु ॥ ३८ ॥

स्वामी च–प्रभुर्जीवस्तु–आत्मा स्वामिजीवौ ताभ्यामदत्तम्–अवितीर्णं स्वामिजीवादत्तं, 'द्वन्द्वात्परं पदं प्रत्येकमभिसम्बध्यते' इति न्यायाददत्तशब्दस्य प्रत्येकं सम्बन्धः, स्वाम्यदत्तं जीवादत्तं च, तत्र यद्वस्तु हिरण्यादिकं स्वामिना स्वयं न वितीर्णं तत्स्वाम्यदत्तं, यत्तु पश्वादिजीवरूपं स्वपरिग्रहवर्त्तिं कश्चिद्विनाशयति तत्तस्य जीवादत्तं, यतस्तेन पश्वादिना न खल्वात्मप्राणास्तस्य हननायानुमताः, सर्वस्य जीवराशेर्जीवितकाम्यत्वात्, तदुक्तम्–"सव्वे जीवावि इच्छन्ति, जीविउं न मरिज्जिउं"। तथा 'तित्थयरेणं' ति तीर्यतेऽनेन संसारसमुद्र इति तीर्थं–सम्यग्दर्शनादिपरिणामस्तदनन्यत्वात् सङ्घश्च तीर्थं, तत्करणशीलस्तीर्थकरस्तेन तीर्थकरेण, अदत्तमिति प्रथमपदसमस्तमपि पदमिष्टत्वात् सर्वत्र योज्यं, ततो यद्गृहस्वामिना आधाकर्मिकादि दत्तमप्यर्हताऽननुज्ञातमादीयते तत्तीर्थकरेणादत्तमिति, 'तहेव य गुरूहिं' ति यथा स्वाम्यदत्ताद्यदत्तं तथैव 'गुरुभिः' आचार्यादिभिरदत्तं यद् द्विचत्वारिंशद्दोषनिर्मुक्तमपि गुरूणामननुमत्या भुज्यते तद्गुर्वदत्तमिति, यदुक्तम्–"सत्तविहालोगविवज्जिए भुंजमाणस्स तेणियं होइ" त्ति, सप्तविधालोकश्च–"ठाण दिसि पगासणया भायण पक्खेवणा य गुरु भावे। सत्तविहो आलोओ सयावि जयणा सुविहियाणं ॥१॥" इति गाथातोऽवगन्तव्यः, एतस्य चतूरूपस्यादत्तस्य या विरतिः–निवृत्तिः, ग्रहणं

प्रतीति शेषः, 'भवति' जायते 'अदत्ते' अदत्तादानव्रते 'स्वरूपं' स्वभावः 'तु' छन्दःपूरणे इति गाथार्थः ॥ ३७ ॥ कथितं यादृशद्वारमधुना भेदद्वारमाख्यायते—

सचित्ताचित्तोभयदुपयचउप्पय तहेव अपयं च ।
जेण य चोरंकारो विसओऽदत्तंमि सो नेओ ॥ ३९ ॥

सचित्तं च—सचेतनमचित्तं च—अचेतनमुभयं च—मिश्रं सचित्ताचित्तोभयं, किमेतावद्भेदमित्याह—द्विपदं चतुष्पदं च द्विपदचतुष्पदं, वस्त्विति शेषः, समाहारत्वादेकवचनमनुस्वारलोपस्तूभयत्रापि प्राकृतत्वात्, तत्र सचित्तं द्विपदं—जीवन्मनुष्यादि अचित्तम्—अर्हत्प्रतिमादि उभयं—हाराद्यलङ्कृतसीमन्तिन्यादि चतुष्पदं च सचित्तमश्वादि अचित्तमैरावतप्रकृत्यादि उभयं नक्षत्रमालाद्यलङ्कृतगजादि, एतच्च द्विपदादि सचित्तादिरूपं विषयोऽदत्ते ज्ञेय इति तुर्यपादेन सम्बन्धः, किमेतावानेवादत्तविषयः ?, नेत्याह—अपदं च, कथं ?—'तथैव' तेनैव सचित्ताचित्तोभयप्रकारेण, तत्र सचित्तमपदं—सजीवधान्यादि अचित्तं—स्वर्णादि मिश्रं—कम्बलीबद्धमुद्गादि, अनेन च नवभेदमदत्तादानमुक्तम्, अथवा बहुतरभेदत्वमस्याह—'जेण य चोरंकारो विसओऽदत्तंमि सो नेओ' त्ति येन च चौरङ्कारः—

चौरोऽयमिति शब्दप्रत्ययप्रवृत्तेः 'विषयो' गोचरः 'अदत्तस्य' अदत्तादानस्य स 'ज्ञेयः' ज्ञातव्यः, षष्ठीसप्तम्योरर्थं प्रत्यभेदाददत्तस्येति व्याख्यातं, भावार्थस्त्वयं—येन येन द्रव्यादिनाऽपहृतेन चौरोऽयमिति व्यपदिश्यते तत्तद्द्रव्यादिसम्बन्धेन स सोऽदत्तादानभेद इति गाथार्थः ॥ ३८ ॥ उक्तं भेदद्वारमधुना यथा जायत इत्युच्यते—

गुणठाणगंमि तह परिणयंमि जीवस्स कुगइभीयस्स ।
वयगहपरिणामो च्चिय होइ दढं तिव्वसड्ढस्स ॥ ४० ॥

गुणाः—सम्यग्ज्ञानदर्शनचारित्ररूपास्तेषां स्थानं—तिष्ठन्त्यस्मिन्निति स्थानं—शुद्ध्यशुद्धिप्रकर्षापकर्षकृतः स्वरूपभेदो, यथाऽध्यवसायस्थानमिति, तस्मिन् 'तथापरिणते' तेन स्वरूपेण आगमोक्तेन परिणते, कोऽर्थः ?—मिथ्यादृष्टिगुणस्थानकादारभ्य मोहनीयादिकर्मणः स्थितिघातादिक्रमेणोत्तरोत्तरगुणस्थानावाप्तौ, यद्यपि चात्र सामान्येन 'गुणठाणगम्मि' इत्युक्तं तथाऽपि देशविरतिगुणस्थानक इति गम्यते, यतोऽत्र तृतीयाणुव्रतं यथा जायत इति द्वारेण व्याख्यातुमुपक्रान्तम्, एतच्चात्रैव गुणस्थानके संभवि, न शेषेषु, अस्य च तथा परिणामोऽयं—सम्यक्त्वलाभानन्तरं पल्योपमपृथक्त्वप्रमाणस्थितिघाते एतद्भवनं, अस्मिंश्च जाते 'जीवस्य' आत्मनः 'कुग-

॥ ११७ ॥

तिभीतस्य ' दुर्गतित्रस्तस्य अविरतिमूलकर्मबन्धभीरोरितियावत्, व्रतमिह प्रस्तावाददत्तादानविरतिरूपं तस्य ग्रहो-ग्रहणं तत्परिणामः-तदध्यवसायः ' च्चिय ' त्ति पूरणे ' भवति ' जायते ' दृढम् ' अत्यर्थं ' तीव्रश्रद्धस्य ' उत्कटनिजाभिलाषस्य, कोऽर्थः ?-" परिमियमुवसेवंतो अपरिमियमणंतयं परिहरंतो । पावइ परम्मि लोए अपरिमियमणंतयं सोक्खं ॥ १ ॥ " इत्यभिप्रायवत इति गाथार्थः ॥ ३९ ॥ गतं यथा जायत इति द्वारम्, अधुना चतुर्थं दोषद्वारमुच्यते—

जे पुण करेंति विरइं अदिन्नदाणस्स नेह लोहिल्ला ।
ते मंडियविजया इव चोरा पावेंति दुक्खाइं ॥ ४१ ॥

ये पुनः, प्राणिन इति शेषः, ' कुर्वन्ति ' विदधति ' विरतिं ' निवृत्तिं ' अदत्तादानस्य ' अवितीर्णग्रहणस्य चौर्यस्येतियावत् ' ने 'ति निषेधे ' इह ' मनुष्यलोके ' लोहिल्ल 'त्ति, प्राकृतेऽस्त्यर्थे इल्लं, तथा चोक्तम्—'आलं इल्लं चास्त्यर्थे ' ततो लोभवन्त इत्यर्थः, ' ते मंडियविजया इव चोर 'त्ति ' बहुवयणेण दुवयण 'मिति

वचनात् मण्डिकविजयाविव 'चौरौ' तस्करौ 'प्राप्नुवन्ति' लभन्ते 'दुःखानि' शूलारोपणोद्बन्धनादीनीति गाथार्थः ॥ ४० ॥ भावार्थः कथानकगम्यस्तच्चेदम्—

विश्वविश्वम्भराभोगचूडालङ्कारसन्निभा। अवन्तीदेशप्रसरा, श्रीमदुज्जयनी पुरी ॥ १ ॥ यस्यां विपणिवीथीषु, वीक्ष्य रत्नादिसन्ततीः। पानीयमात्रसंशेषं, मन्यन्ते सागरं जनाः ॥ २ ॥ यस्यां च विततोत्तुङ्गरम्यहर्म्यावलीश्रियः। स्वर्गिणामपि चेतांसि, हरन्ति विप्रलोकिताः ॥ ३ ॥ औदार्यदाक्ष्यदाक्षिण्यशौर्यवीर्यादिसद्गुणैः। यन्निवासी जनो भाति, धर्मकर्मनिषण्णधीः ॥ ४ ॥ तस्यामरातिसामन्तमत्तमातङ्गकेशरी। अनीतिकौमुदीभानुर्जितशत्रुर्महीपतिः ॥ ५ ॥ सिक्तोऽप्यरिपुरन्ध्रीणां, सन्ततं नेत्रवारिभिः। प्रतापदहनो यस्य, जाज्वलीति स्म कौतुकम् ॥ ६ ॥ यस्य च–रागः सन्नीतिशास्त्रेषु, विचित्तत्वं कुकर्मसु। निःस्पृहत्वं परस्त्रीषु, लाम्पट्यं गुणसङ्ग्रहे ॥ ७ ॥ तस्य भूमीपतेर्मान्यो, बन्धुकैरवचन्द्रमाः। अचलः सार्थवाहोऽभूदुदग्रनवयौवनः ॥ ८ ॥ अपि च–रूपेण पुष्पधन्वानं, धनेन नरवाहनम्। जिगाय यो महासत्त्वः, सत्त्वेन च युधिष्ठिरम् ॥ ९ ॥ इतश्च–निःशेषकलाकुशला निरुपमलावण्यरूपसौभाग्या। तस्यामभून्नगर्यां विलासिनी देवदत्ताख्या ॥ १० ॥ या च–कन्दर्पसर्पदष्टानां, संजीवनमहौषधी। सम्भोगसुखरत्नानां,

रोहणाचलकाऽश्यपी ॥ ११ ॥ अपिच—अस्पृश्यतैव यद्देहो, मन्ये धात्रा विनिर्मितः । अन्यथा कथमम्लानि, सौकुमार्यं भवेत्तनोः ? ॥ १२ ॥ द्यूतकरचक्रवर्ती तत्रैव बभूव मूलदेवाख्यः । निःशेषकलाकुशलो धूर्त्तपतिर्धीमतां धुर्यः ॥१३॥ तत्र भावानुरक्ता सा, तमेव परिपश्यति । अग्रतः पृष्ठतो द्वारि, मध्ये हट्टे गृहेषु च ॥ १४ ॥ मूलदेवोऽपि तद्रागात्तद्वियोगे न कुत्रचित् । लेभे रतिं दिवा रात्रावासने शयनेऽपि वा ॥ १५ ॥ ततश्च—जीवलोकं सुखं सारमन्योऽन्यमनुरक्तयोः । आसेवमानयोर्जातस्तयोः कालः कियानपि ॥ १६ ॥ अन्यदा च समायातः, स वसन्तमहोत्सवः । यत्रोद्यानगताः पौरा, नानाक्रीडाः प्रचक्रिरे ॥१७॥ अचलः सार्थवाहस्तु, तदोद्यानमुपागतः । ददर्श देवदत्तां तां, मूलदेवसमन्विताम् ॥१८॥ ततोऽसौ चिन्तयामास, धन्यः कोऽप्येष सद्युवा । योऽनया मृगलक्ष्मेव, पौर्णमास्या विराजते ॥ १९ ॥ अहो सौभाग्यसम्पत्तिरहो लावण्यमुत्तमम् । अहो यौवनमेतस्या, यूनामुन्मादहेतुकम् ॥२०॥ अहो नव्यो विषग्रन्थिरियं धात्रा विनिर्मिता । यत्संभोगे जनः सौख्यं, संत्यागे दुःखमश्नुते ॥२१॥ ततः-तत्संजाताभिलाषेण, चिन्तयित्वैवमादिकम् । समीपे प्रेषितस्तस्यास्तेन सङ्गमको नरः ॥ २२ ॥ तेनोदिता च सा गन्तुं, गृहं तेऽद्य समेष्यति । त्वत्सङ्गमाभिलाषेण, सार्थवाहोऽचलाभिधः ॥ २३ ॥ तयोदितं समायातु, तूर्णं स्वागतमाजनम् । धनदं स्वयमायान्तं, गृही को न समीहते ? ॥ २४ ॥ इत्युक्त्वा सा

गता गेहं, सोऽपि सार्थपतेः पुरः । सप्रहर्षं समागत्य, तद्वृत्तान्तं न्यवेदयत् ॥ २५ ॥ ततः प्रदोषकालेऽसौ, कृत्वा स्नानविलेपने । गृहीतालङ्कृतिर्मित्रैः, समेतस्तद्गृहं गतः ॥ २६ ॥ यच्च–रत्नदीपकृतोद्योतं, चित्रकर्मोपशोभितम् । लक्ष्मीकुलगृहं लोकलोचनानन्ददायकम् ॥ २७ ॥ उपविष्टश्च तत्रासौ, स्वयं दत्तासनस्तया । कृताङ्घ्रिक्षालनो वासशय्यायां विनिवेशितः ॥ २८ ॥ उचितप्रतिपत्त्या च, तदीया मित्रमण्डली । प्रस्तुतैर्विदग्धालापैरनुरागविवर्द्धनैः ॥ २९ ॥ स्थित्वा क्षणं गता यावत्स्वस्थानान्यचलस्ततः । सद्भावसारमारेभे, रन्तुमेष तया समम् ॥ ३० ॥ साऽपि नानाविधैर्बन्धप्रयोगकरणैस्तथा । तं ररञ्ज यथाऽन्यासां, स्त्रीणां नामापि नेच्छति ॥ ३१ ॥ तत्प्रभृत्येव तुष्टोऽसौ, वस्त्रालङ्कारभोजनैः । नानाविधोपचारैश्च, सेवते तामहर्निशम् ॥ ३२ ॥ केवलं कुट्टिनीभीता, तमेषा बहु मन्यते । ज्वलदङ्गारकल्पं तु, चेतसा कल्पयत्यलम् ॥ ३३ ॥ मूलदेवो यतस्तस्याश्चित्ताभीष्टोऽचलः पुनः । कुट्टिन्या अर्थलोभिन्या, उपरोधात्प्रवेशितः ॥ ३४ ॥ परं–कृत्रिमेणापि रागेण, तया सोऽप्यनुवर्त्तितः । तथा यथा दिवा रात्रौ, पृष्ठं नैव स मुञ्चति ॥ ३५ ॥ अत एवोक्तम्–" कारिमकयाणुरागाण वित्तमट्ठं परत्तमाणीणं । वेसाण कवड्डीणं वसं गओ को जए चुक्को ? ॥ ३६ ॥" इतश्च–अचलो यत्प्रभृत्यस्य, विवेश भवनं धनी । तत्प्रभृत्येव नायाति,

मूलदेवस्तदालयम् ॥ ३७ ॥ ततोऽसौ तद्वियोगाग्नितीव्रसन्तापतापिता । कुट्टनीमन्यदोवाच, मूलदेवं प्रवेशय ॥ ३८ ॥ प्रसर्पद्दर्पकन्दर्पविषवेगविघूर्णितम् । तं विना मां यतो मातः! कोऽन्यः सुखयितुं क्षमः ? ॥ ३९ ॥ तयोदितं यथा वत्से !, सत्यमेव त्वया कृतम् । यदेतन्नीतिशास्त्रेषु, पण्डितैरनुघुष्यते ॥ ४० ॥ अपात्रे रमते नारी, गिरौ वर्षति माधवः । नीचमाश्रयते लक्ष्मीः, प्राज्ञः प्रायेण निर्द्धनः ॥ ४१ ॥ मुक्त्वाऽचलं यतो मूर्खे !, समस्तगुणसागरम् । निःस्वं द्यूतरतं धूर्तं, मूलदेवं त्वमिच्छसि ॥ ४२ ॥ देवदत्तया भणितम्—मातर्न रूपतारुण्यधनाढ्यत्वादिसद्गुणे । लुब्धाऽहं किन्तु विज्ञानकौशले तत्तु यादृशम् ॥ ४३ ॥ मूलदेवे समस्तेऽहि, तादृशं न सुरेष्वपि । जनन्योक्तं—विज्ञानेनापि नो हीनोऽचलोऽयं मूलदेवतः ॥४४॥ (युग्मम्) तयोदितं यथा मातर्मैवं वोचोऽसमञ्जसम् । अनयोरन्तरं यस्माद्भानुखद्योतयोरिव ॥ ४५ ॥ जनन्योक्तं यथा वत्से !, यद्येवं तत्परीक्ष्यताम् । अनयोः को गुणः कस्य ?, तयोक्तं साधु साध्विदम् ॥ ४६ ॥ गच्छ त्वमम्ब ! तत्पार्श्वे, मद्वचनात्तं न्यवेदय । यथाऽद्य देवदत्तायाः, इक्षुवाञ्छोदयो हि भोः ! ॥४७॥ ततस्तदन्तिकं गत्वा, तदुक्तं सा न्यवेदयत् । सोऽपीक्षुसंभृतां गन्त्रीं, प्रेषयामास तद्गृहम् ॥ ४८ ॥ ततोऽसौ प्राह तां वत्से !, श्रेष्ठिनः सर्वमद्भुतम् । विभवो दानशक्तिश्च, महत्त्वं प्रियभाषिता ॥ ४९ ॥ मुहूर्त्तमिव मौनेन, सविषादं

विलम्ब्य सा । मूलदेवस्य विज्ञानं, स्मरन्ती समभाषत ॥ ५० ॥ मत्ता करेणुकाऽहं किं ?, क्षिप्तो येनैवमग्रतः ।
ममायमिक्षुसंभारः, संस्कारपरिवार्जितः ॥ ५१ ॥ इदानीं गच्छ मातस्त्वं, मूलदेवमिदं वद । येन तस्यापि विज्ञान-
सारासारत्वमीक्ष्यते ॥ ५२ ॥ ततः सा मूलदेवस्य, समीपमागमद् द्रुतम् । संदेशं देवदत्तायाः, अवादीच्च सविस्तरम्
॥ ५३ ॥ सोऽपि तत्कथनस्यान्ते, जगाम द्यूतमण्डपम् । जित्वा द्यूतकरांस्तत्र, लेभे दश कपर्दकान् ॥ ५४ ॥ शराव,
संपुटं द्वाभ्यां, द्वाभ्यां सारेक्षुयष्टिके । चतुर्जातादिकं शेषैः, क्रीत्वा गेहमुपागतः ॥ ५५ ॥ ततोऽसाविक्षुयष्टी ते,
घटित्वा द्व्यङ्गुलान्यथ । चक्रे लघूनि खण्डानि, शूलाग्रैः स बबन्ध च ॥ ५६ ॥ चतुर्जातकसंस्कारं, तेषां कृत्वाऽति-
पेशलम् । शरावसंपुटे पश्चात्, स्थापयामास धूपिते ॥ ५७ ॥ आहूय देवदत्तायाः, दासचेटीं ततोऽर्पयत् । शराव-
संपुटं साऽपि, गत्वा तस्या न्यवेदयत् ॥ ५८ ॥ तदेतन्मूलदेवेन, स्वामिनि! प्रेषितं तव । अम्बामुखेन संदिष्टं, यत्त्वया
तस्य धीमतः ॥ ५९ ॥ ततः सा सादरं पाणी, प्रसार्य प्रतिगृह्य तत् । प्रोवाच जननीमम्ब !, पश्य पश्यान्तरं नृणाम् ॥ ६० ॥
यतः—व्ययित्वाऽपि बहुद्रव्यमिक्षूणां भक्षणार्हताम् । अचलो न तथा चक्रे, मूलदेवो यथा सुधीः ॥ ६१ ॥ गाढमन्युभ-
रावेगवशवर्त्तिन्यसावपि । न ददावुत्तरं किञ्चित्तत्प्रभृत्येव केवलम् ॥ ६२ ॥ छिद्राणि मूलदेवस्य, वीक्षितुं सा प्रच-

क्रमे । दुष्प्रापाणि न चैतानि, विषयासक्तचेतसाम् ॥ ६३ ॥ यदुक्तम्—"कोऽर्थान् प्राप्य न गर्वितो ? विषयिणः कस्यापदोऽस्तं गताः ?, स्त्रीभिः कस्य न खण्डितं भुवि मनः ? को नाम राज्ञां प्रियः ? । कः कालस्य न गोचरान्तरगतः ? कोऽर्थी गतो गौरवं ?, को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ? ॥ ६४ ॥" ततोऽन्येद्युस्तयाऽभाणि, सार्थनाथोऽचलो यथा । त्वमद्य देवदत्ताऽग्रे, स्वस्य ग्रामगमं वद ॥ ६५ ॥ मूलदेवं गृहे येन, सा प्रवेशयति द्रुतम् । ततः प्रदोषवेलायामागत्य निगृहाण तम् ॥ ६६ ॥ एवमुक्तेन तेनापि, सर्वमेतदनुष्ठितम् । देवदत्ता ततो हृष्टा, मूलदेवमथाह्वयत् ॥ ६७ ॥ विज्ञाय तं समायातमचलस्तज्जिघृक्षया । पुरुषैर्वेष्टयामास, सर्वतस्तन्निकेतनम् ॥ ६८ ॥ मूलदेवो भयत्रस्तः, पर्यङ्काधो व्यवस्थितः, । खड्गव्यग्रकरस्तस्मिन्नचलोऽपि समागतः ॥ ६९ ॥ उपविष्टश्च पल्यङ्केऽवगम्य तमधः स्थितम् । देवदत्ता समादिष्टा, स्नानहेतुप्रसिद्धये ॥ ७० ॥ आदेशानन्तरं सर्वं, तस्य निष्पाद्य शासनम् । समस्तस्नानपोतं च, बभाणैतदसावमुम् ॥ ७१ ॥ एतत्त्वद्वचनान्नाथ !, स्नानाय प्रगुणीकृतम् ।

२१ आसनादि तदुत्तिष्ठ, स प्राहात्रैव मज्ज्यताम् ॥ ७२ ॥ पल्यङ्कारूढ एवाहं, यतः स्नास्यामि सुन्दरि ! । तयोदितं भवत्वेवं, किन्तु शय्या विनङ्क्ष्यति ॥ ७३ ॥ सोऽवदच्छोभनामन्यां, कारयिष्याम्यहं प्रिये ! । तस्मादानीयतामेताच्चि-

श्रीनवपदबृहद्वृत्तौ अदत्तादाने

॥ १११ ॥

न्तया किं तवैतया ? ॥ ७४ ॥ ततः सोद्वेगचित्ताऽसौ, तं तत्रैव व्यवस्थितम् । स्नपयितुं समारेभे, शनैर्नात्युष्णवा-
रिणा ॥ ७५ ॥ तद्भावं स तु विज्ञाय, तथा क्षुद्रतया जलम् । चिक्षेपोष्णं यथाऽधःस्थो, दह्यमानः स निर्गतः ॥७६॥
तं निर्यातं स वीक्ष्याह, गृहीत्वा केशसञ्चये । किं करोमि तवेदानीं, प्राप्तक्षुण्णस्य कथ्यताम् ? ॥ ७७ ॥ सोऽब्रवी-
द्रोचते तुभ्यं, यत्तदेव विधीयताम् । ततोऽसौ चिन्तयामास, महात्माऽसावहो ! अयम् ॥ ७८ ॥ मनागपि न
दीनत्वमापन्नव्यसनोऽपि यः । प्रकाशयति यद्वाऽत्र, सतामेतत्कुलव्रतम् ॥ ७९ ॥ यदुक्तम्—"विपदि न यस्य
विषादः सम्पदि हर्षो रणे च धीरत्वम् । तं भुवनतिलककल्पं जनयति जननी सुतं विरलम् ॥ ८० ॥" किञ्च-विरला
एव संसारेऽनवाप्तव्यसना जनाः । अनुपायजीविनः स्थायिसौख्या वाच्यविवर्जिताः ॥ ८१ ॥ उक्तञ्च—"कस्य
वक्तव्यता नास्ति?, सोपायं को न जीवति ? । व्यसनं केन न प्राप्तं?, कस्य सौख्यं निरन्तरम् ? ॥८२॥" विचिन्त्यैवं
ततस्तेन, मामप्येवंविधापदि । विमुञ्चेस्त्वं महाभाग !, गदित्वैवं विसर्जितः ॥ ८३ ॥ पराभवपदापन्नो, मूलदेवो व्यचि-
न्तयत् । स्वमुखं दर्शयिष्यामि, कथं लोकस्य साम्प्रतम् ? ॥ ८४ ॥ यतः—"धनमानविहीनेन, नरेणापुण्यभोगिना । सवासा
यत्र नेष्यन्ते, गन्तव्यं तत्र कुत्रचित् ॥८५॥ इत्येवं चिन्तयित्वाऽसौ, बिन्नातटपुरं प्रति । प्रवृत्तो गन्तुमेकाकी, स्वल्प-

चौरद्वारे मण्डिककथा.

॥ १११ ॥

पाथेयसंयुतः ॥ ८६ ॥ गच्छंश्च दिवसैः कैश्चित्, संप्राप्तोऽसौ महाटवीम् । क्षीणसंबलकस्यास्य, सङ्गतो मिलितस्ततः
॥ ८७ ॥ सक्तुपोट्टलिकाहस्तस्तं वीक्ष्यैष व्यचिन्तयत् । पाथेयेनाहमप्यस्य, लङ्घयिष्ये महाटवीम् ॥ ८८ ॥ ततस्तेन
समं गन्तुं, प्रवृत्तो यावदागतः । मध्याह्नसमयस्तीव्रस्ततो वीक्ष्य सरोवरम् ॥ ८९ ॥ मार्गासन्नतरं सारं, तथा न्यग्रोध-
पादपम् । छायायां तस्य विश्रान्तौ, तौ क्षणं सङ्घटस्ततः ॥ ९० ॥ उत्थाय नीरतीरे च, भूत्वा सक्तूनभक्षयत् ।
दास्यत्येष ममाप्येवं, मूलदेवस्त्वचिन्तयत् ॥ ९१ ॥ आलापमप्यकुर्वाणस्तेन सार्द्धं च सङ्घटः । सक्तुपोट्टलिकां बद्ध्वो,
चचाल कृपणाशयः ॥९२॥ मूलदेवोऽपि मे चिन्तामग्रे क्वापि करिष्यति । एवमालोचयंश्चित्ते, तत्पृष्ठे व्यलगत्पुनः ॥९३॥
दिनत्रयं व्यतिक्रान्तमेवं तस्य तदाशया । महाटवीं व्यवच्छिद्य, ग्रामनैकट्यमागतौ ॥ ९४ ॥ मूलदेवस्ततश्चित्ते,
व्यवस्थापितवानिदम् । एतदाशानुभावेन, लङ्घितेयं महाटवी ॥ ९५ ॥ उपकर्त्तुं तदेतस्य, शक्यते न मयाऽधुना ।
संकल्प्यैवमवादीत्तं, भो भो भद्र ! यदा मम ॥ ९६ ॥ राज्यलाभं विजानीयास्तदाऽऽगच्छेर्ममान्तिकम् । येन प्रत्युप-
कारं ते, यथाशक्ति करोम्यहम् ॥ ९७ ॥ युग्मम् । इत्येवमुक्त्वा मुक्त्वा तं, स्वयं ग्रामं विवेश सः । भिक्षार्थं तत्र लब्धाश्च,
कुल्माषाः पूरिता पुटी ॥ ९८ ॥ व्यावृत्तः संप्रवृत्तश्च, तडागाभिमुखं ततः । भिक्षार्थं ग्राममायान्तं, साधुं मासोपवासिनम्

॥ ९९ ॥ दृष्ट्वा संकल्पयामास, धन्य एष महामुनिः । अहो ! पुण्यैर्ममात्रैवं, दृष्टिमार्गमुपागतः ॥ १०० ॥ कुल्माषांश्च विमुच्येमान्, नापरं देयमस्ति मे । तद्देतद्दानतोऽप्यद्य, करोम्यात्मकृतार्थताम् ॥ १०१ ॥ एवं चिन्तयता तेन, भक्तिनिर्भरचेतसा । साधुराभाषितो नाथ !, कल्पन्ते यद्यमी तव ॥ १०२ ॥ स्वीक्रियन्तामिमे तर्हि, ममानुग्रहकाम्यया । मुनिरप्येवमुक्तस्तानुपयुज्य गृहीतवान् ॥ १०३ ॥ युग्मम् ॥ मुनिकुल्माषदानेन, मूलदेवोऽतितोषितः । सपयःपयोदनादेन, गाथाऽर्द्धमथ गीतवान् ॥ १०४ ॥ "धन्नाणं खु नराणं कुम्मासा हुंति साहुपारणए ।" अत्रान्तरेऽसौ भणितो देवतया—यत्त्वमीहसे वत्स ! याचस्व निर्विशङ्कं तद्गाथापश्चिमार्द्धेन, तेनोक्तं—"गणियं च देवदत्तं दंतिसहस्सं च रज्जं च" ॥ १०५ ॥ ततो देवतयाऽभाणि, याचितं वत्स ! यत्त्वया । भविष्यति चिरात्तत्ते, मुनिदानानुभावतः ॥ ६ ॥ ततो भिक्षाटनं कृत्वोपभुज्य चलितः पुनः । गच्छंश्चैकपुरं प्राप्तस्तत्र दैशिकमण्डपे ॥७॥ प्रसुप्तो रात्रिशेषे च, स्वप्नेऽसौ रविमण्डलम् । मुखे विशन्तमालोक्य, प्रतिबुद्धस्तदैव च ॥ ८ ॥ दृष्टस्तथाविधः स्वप्नो, देशिकेनापरेण च । कथितश्चोत्सुकीभूय, तेन कार्पटिकाग्रतः ॥ ९ ॥ तैरुक्तम्—आदित्यमण्डलाकारं, सर्पिर्गुडसमन्वितम् । स्वप्नानुभावतोऽद्य त्वं, मण्डकं समवाप्स्यसि ॥ १० ॥ ततः प्रहृष्टचित्तः सन्, भिक्षाकाले समागते । भ्राम्यंस्तल्लब्धवानेकं, मण्डकं स यथोदितम् ॥ ११ ॥ मूलदेवोऽपि विज्ञाय,

स्वप्ने तेषामकौशलम् । समुत्थाय शुचिर्भूत्वा, फलपुष्पसमन्वितः ॥ १२ ॥ गतः सुखासनस्थस्योपाध्यायस्य समीपकम् । कृतपूजोपचारश्च, स्वप्नं तस्य न्यवेदयत् ॥ १३ ॥ सोऽपि तस्य तदाकर्ण्य, ग्राहयित्वा स्वपुत्रिकाम् । समादिदेश सप्ताहाभ्यन्तरे राज्यमुत्तमम् ॥ १४ ॥ बिन्नातटपुरं प्राप्तो, मूलदेवः क्रमेण च । नगरारक्षकै रात्रौ, क्षेत्रद्वारे च वीक्षितः ॥ १५ ॥ गृहीतो लोप्त्रहस्तश्च, दण्डाघातैः प्रताडितः । शरावमालिकां कण्ठे, कारितो बाहुबन्धनः ॥ १६ ॥ आरोप्य रासभं नेतुमारब्धो वध्यभूमिकाम् । एवं कष्टदशां प्राप्तश्चिन्तयामास चेतसि ॥ १७ ॥ किमन्यथा वचो देव्याः, उपाध्यायस्य चाधुना । मदीयापुण्यसंभारभाराक्रान्तं भविष्यति ॥ १८ ॥ अत्रान्तरे—अपुत्रो नृपतिस्तत्र, जगाम यममन्दिरम् । पञ्चदिव्याभिषेकोऽभूत्ततस्तानि भ्रमन्ति च ॥ १९ ॥ समायातानि तत्रैव, पथि यत्र स नीयते । वध्यभूमिं ततो हस्ती, विधाय गलगर्जितम् ॥ २० ॥ करेण तं समादाय, निजस्कन्धमरोपयत् । हेषारवं तुरङ्गश्च, चक्रे श्रवणसौख्यदम् ॥ २१ ॥ उद्दण्डपुण्डरीकं चोपरिष्टात् शिरसोऽभवत् । वीजितं तत्क्षणादेव, चञ्चच्चामरयोर्युगम् ॥ २२ ॥ अनाहतोऽपि गम्भीरस्वरं दध्वान दुन्दुभिः । पतिता पुष्पवृष्टिश्च, वृष्टं गन्धोदकं तथा ॥२३॥ सर्वतो बन्दिवृन्दस्योत्तस्थौ जयजयारवः । सान्निध्यतुष्टमनसो, ननृतुश्च पुराङ्गनाः ॥ २४ ॥ एवं महाविभूत्या च,

मूलदेवो नृपोऽजनि । सामन्तादिजनः सर्वस्तदाज्ञां प्रतिपन्नवान् ॥ २५ ॥ दिनेषु केषुचिद्राज्ये, क्रमेण स्थिरतां गते । चिन्तितं किं ममैतेन, राज्यलाभेन यस्य मे ॥२६॥ वियोगो देवदत्तायाः, वर्त्तते दुःखहेतुकः ? । संपत्तिः किं च मे श्लाघ्या, यस्यां न प्रियमेलकः ? ॥ २७ ॥ यतः—“ निवासो यत्र तत्रास्तु, यत्तद्भवतु भोजनम् । य इष्टजनसंयोगस्तद्राज्यं बन्धनं परम् ॥ २८ ॥ ” इष्टा च देवदत्ता मे, जीवितादपि वर्त्तते । तत्तामानाययाम्येवं, विचिन्त्योज्जयिनीं प्रति ॥ २९ ॥ प्रेषितः प्रयतो दूतः, प्रचुरप्राभृतान्वितः । गतोऽसौ दृष्टवांस्तत्र, जितशत्रुमहीपतिम् ॥ ३० ॥ प्रणामपूर्व-मेतस्य, ढौकनीयं समर्प्य सः । प्रोवाच मूलदेवाख्यो, विन्नातटनराधिपः ॥ ३१ ॥ प्रेषयामास मां देवपादान्तं प्रीतमानसः । संग्रहे देवपादानां, देवदत्ता विलासिनी ॥ ३२ ॥ तदर्थमनुमन्यध्वं, तत्र तद्गमनाय ताम् । एवं दूत-वचः श्रुत्वा, हृष्टचित्तोऽवदन्नृपः ॥ ३३ ॥ कियन्मात्रमियं दूत ! त्वत्प्रभोर्येन केनचित् । कार्यमार्य ! समस्तीह, तदन्यदपि कथ्यताम् ॥ ३४ ॥ एतद्राज्यमिमे लोका, इदं द्रव्यमिमे वयम् । स्वाधीनं सर्वमेवेह, त्वत्प्रभोरिति बुध्यताम् ॥ ३५ ॥ एवमुक्त्वाऽथ सन्मान्य, दूतं वस्त्रादिदानतः । तूर्णं प्रस्थापयामास, समं तेनैव तां नृपः ॥ ३६ ॥ 
मूलदेवोऽपि तल्लाभप्रीतचेतस्तया समम् । पराभिश्च वरस्त्रीभिर्भूपलक्ष्म्या विराजितः ॥ ३७ ॥ मुनिदानतरोः पुष्पप्रायं

वैषयिकं सुखम् । इच्छातीतभवत्प्राप्तिर्बुभुजे भुजविक्रमी ॥ ३८ ॥ इतश्च मूलदेवस्य, ज्ञात्वाऽसौ राज्यसम्पदम् । आयातः सद्भटष्टक्को, पृष्टो राज्ञोदितश्च सः ॥ ३९ ॥ यत्र ग्रामे भवानास्ते, स तवैव परं पुनः । नागत्य दर्शनं कार्यमेवमुक्त्वा विसर्जितः ॥ ४० ॥ इतश्चोज्जयनीपुर्यां, सार्थवाहोऽचलाभिधः । अन्यदा चिन्तयामास, यथा किल शरीरिषु ॥ ४१ ॥ स एव श्लाघ्यते कीर्त्तिरासमुद्रान्तगामिनी । यस्य प्रह्लादयत्युर्वीमिन्दोः कान्तिरिवोज्ज्वला ॥ ४२ ॥ सा च दानेन तपसा, पराक्रमबलेन वा । विज्ञानज्ञानसंपत्त्या, जायते यशः(ल्न)शालिनः ॥४३॥ एतेषु च–तपोऽतिष्करं तावद्वणिजः (?) प्रायो न विक्रमः । विज्ञानज्ञानलाभश्चानुपासितगुरोः कुतः ? ॥ ४४ ॥ तद्दानेनैव सत्कीर्त्तिमर्जयामि यथोचिति । तेनापि स्वभुजोपात्तवित्तस्यैषा प्रशस्यते ॥४५॥ अतो देशान्तरं गत्वा, द्रव्यं तावदुपार्जये । ततो दीनादिदानेन, वर्द्धयिष्यामि तामहम् ॥४६॥ एवं च चिन्तयित्वाऽसौ, देशान्तरगमोचितम् । विविधं भाण्डमादाय, कारयित्वा च घोषणाम् ॥४७॥ प्रशस्ततिथिनक्षत्रलग्नवारांशदर्शने । चचाल दीनकीनाशवणिग्वर्गादिभिः सह ॥ ४८ ॥ अपि च-अखण्डखण्डितातङ्कप्रणयार्थिशिखण्डिकः । लोकलोचनदात्यूहानन्दसन्दोहदायकः ॥ ४९ ॥ लसद्दानजलोत्पीलनिर्वापितमहीतलः । अचलो गन्तुमारेभे, प्रावृषेण्य इवाम्बुदः ॥५०॥ अखण्डितप्रयाणैश्च, व्रजन्नेष विवक्षितम् । नगरं संप्राप्तो धीमानाहितक्रयविक्रयः

॥ ५१ ॥ समुपात्तमहालाभोऽचलन्नुज्जयनीं प्रति । मध्ये बिन्नातटं गच्छंस्तत्र भाण्डं प्रवेशयन् ॥ ५२ ॥ अदत्त्वशुल्कं किमपि, गृहीतः शौल्कशालिकैः । नीतो राजसभां दृष्टो, मूलदेवनृपेण सः ॥५३॥ प्रत्यभिज्ञाय भणितो, भो ! भो ! भो ! सार्थनायक ! । किं मां प्रत्यभिजानासि, भीतभीतो बभाण सः ॥ ५४ ॥ के न प्रत्यभिजानाति, देव ! त्वां नरनायकम ?। सुविशुद्धयशोराशिनिरुद्धभुवनोदरम् ॥ ५५ ॥ पुनः प्राह ततो राजा, श्रेष्ठिन्नेवमुदाहर । विशेषप्रत्यभिज्ञानं, यतस्त्वं गृह्यसे मया ॥ ५६ ॥ एवमुक्तो न स श्रेष्ठी, यावत्प्रत्युत्तरं जगौ । स्वकेशकबरीं तावत्प्रदर्श्योदाहरन्नृपः ॥ ५७ ॥ स्वकीयचरितं तस्य, ततोऽसौ लज्जयाऽन्वितः । भीतश्चोक्तो नरेन्द्रेण, लज्जसे किंनिमित्तकम्, ? ॥ ५८ ॥ किं वा बिभेषि भो श्रेष्ठिंस्त्वं मे यदुपकारकः । एवमाश्वास्य सन्मान्य, वस्त्रालङ्कारदानतः ॥ ५९ ॥ विसर्जितो गतः श्रेष्ठी, निजावासं क्रमेण च । पुरीमुज्जयिनीं प्रापदमन्दानन्दनिर्भरः ॥ ६० ॥

इतश्च मूलदेवस्य, राज्यं पालयतोऽन्यदा । उल्ललास महारौद्रस्तस्करोपद्रवः पुरे ॥ ६१ ॥ आत्यागत्य कुर्वन्ति, लोकाः प्रचुरमारवम । अनाथमिव ते देव!, मुष्यते तस्करैः पुरम् ॥६२॥ यत्र यत्र गृहे देव!, द्रव्यसंभावना क्वचित् । सुप्तोत्थितैस्तत्र तत्र, क्षत्रं पतितमीक्ष्यते ॥६३॥ एकं द्वे त्रीणि वा यत्र, क्षत्राणि निपतन्ति नो । न सा विभावरी याति, राजन्नत्र

पुरेऽधुना ॥ ६४ ॥ लोकानामेवमारावं; समाकर्ण्य महीपतिः । जातलज्जः समाहूय, दण्डपाशकमब्रवीत् ॥ ६५ ॥ भो ! भो ! प्रमत्तता किं ते; वर्त्तते निजकर्मणि ? । उद्वेजितं पुरं सर्वं, येनैवं क्षत्रपातकैः ॥ ६६ ॥ स प्राह—देव ! रोषं परित्यज्य, विज्ञप्तिः श्रूयतां मम । नोपलब्धो मया चौरो; गाढयत्नवताऽप्यलम् ॥ ६८ ॥ तथा च भ्रमणं रात्रौ, पुरस्यान्तर्बहिस्तथा । समं पदातिवृन्देन, करोमि प्रतिवासरम् ॥ ६८ ॥ तण्डकः स्वामिनः ( तण्डकांश्चाभितः ) कृत्वा, स्थाने २ चतुष्किकाः । निविष्टाश्च तथा देव !, नोपलब्धस्तथाऽप्यसौ ॥ ६९ ॥ एवं तस्य वचः श्रुत्वा, चिन्तयामास भूपतिः । नूनं धूर्त्ततमः कोऽपि, स यो नैवमपीक्ष्यते ॥ ७० ॥ तदद्य स्वयमेवाहं, यतिष्ये तन्निरीक्षणे । एवं संचिन्त्य संतस्थे, यावदस्तं गतो रविः ॥ ७१ ॥ तमोभरनिरुद्धे च, सर्वतो मण्डले दिशाम् । नीलं पटमपावृत्य, प्रासादान्निर्गतो नृपः ॥ ७२ ॥ चतुष्कचत्वरारामशून्यदेवकुलादिषु । भ्रान्त्वा भ्रान्त्वा स निर्विण्णस्तस्करं न समैक्षत ॥७३॥ ततो रात्रेरतिक्रान्ते, यामयुग्मे नराधिपः । सुप्तो हट्टकुणीकोणमुपश्रित्य श्रमान्वितः ॥ ७४ ॥ अत्रान्तरे समायातस्तस्करो मण्डिकाभिधः । बभाण मूलदेवं सः, कस्त्वं ?, कार्पटिकः प्रभो ! ॥ ७५ ॥ यदि त्वं सत्यमेवेह, प्रभुं मामभिमन्यसे । तदुत्तिष्ठ समागच्छेः, करोमि त्वामपीश्वरम् ॥ ७६ ॥ श्रुत्वैवं मूलदेवोऽपि, स्वचे-

ीनवपदवृ-त्तौ अव-ताराने

॥ ११५ ॥

तस्यकरोदिदम् । सैष संभाव्यते नूनं, यन्निमित्तो मम श्रमः ॥ ७७ ॥ तदुत्तिष्ठामि गच्छामि, पश्याम्येतस्य — दोषद्वारे माण्डक-कथा।
चेष्टितम् । किं करोति क्व वा याति ?, धृष्टोऽयं वीक्ष्यते यतः ॥ ७८ ॥ एवं संचिन्त्य चलितः, समं तेन गतश्च सः । एकं
धनपतेर्गेहं, क्षत्रद्वारेण तत्र च ॥ ७९ ॥ प्रविश्य ह्रीरितं पूर्वं, द्रव्यमादाय निर्गतः । आरोप्य तच्छिरस्यंसकृतोऽसा-
वात्मनः पुनः ॥ ८० ॥ स्वयं च खड्गमादाय, प्रस्थितः पृष्ठतस्ततः । गतो यावत्पुरद्वारं दत्वाऽवस्वापिनीं ततः
॥ ८१ ॥ प्रतोलीद्वारपालानां, द्वारमुद्घाट्य वेगतः । भूमिगृहमनुप्राप्तः, पुरदूरव्यवस्थितम् ॥ ८२ ॥ तत्र
प्रवेशितः पूर्वं, मूलदेवस्ततः स्वयम् । प्रविश्याहितसङ्केतां, भगिनीमादिदेश सः ॥ ८३ ॥ भद्रे ! प्राघूर्णकस्यास्य,
महादरपुरःसरम् । पादधावनमाधेहि, देहि भद्रासनं परम् ॥ ८४ ॥ ततः सा तूर्णमुत्थाय, समागच्छोपविश्यताम् ।
अत्रेति स्थानमेतस्य, ससंभ्रममदर्शयत् ॥ ८५ ॥ अन्धकूपान्तकत्वेन, प्रत्यासन्नीकृतान्तके । मूलदेवोऽप्यजानानो,
निविष्टस्तत्र विष्टरे ॥ ८६ ॥ साऽपि पानीयमादाय, पादं प्रक्षालनच्छलात् । यावदुत्पाटयत्यस्य, कूपप्रक्षेपणोद्यता ॥८७॥
सौकुमार्यगुणाधिक्यनवनीतजयावहम् । तावत्तदंह्रिसंस्पर्शमनुभूय व्यचिन्तयत् ॥ ८८ ॥ यथा पादतलेऽमुष्य, ॥ ११५ ॥
मृदुत्वमनुभूयते । तथा मन्येऽहमेषोऽत्र, कश्चित्सौख्यनिधिर्नृपः ॥ ८९ ॥ किञ्च—रूपलावण्यसौभाग्यभाग्यसम्पत्ति-

सङ्गतः । सदेहः कामदेवोऽयं, नूनं रत्या विवर्जितः ॥ १० ॥ मदीयजीवितेनापि, यदयं जीवितेश्वरः । भूयाद्दीपालिका-कोटीं, यावदक्षतजीवितः ॥ ९१ ॥ एवं संचिन्त्य तं कूपं, प्रदर्श्यानुपलक्षितम् । भ्रात्रानुरक्तया शीघ्रं, पलायस्वेति संज्ञितः ॥ ९२ ॥ तदभिप्रायमागम्य, ततस्तत्र पलायिते । भ्रातृविज्ञापनाहेतोश्चक्रे कोलाहलस्तया ॥ ९३ ॥ भ्रातर्भ्रातः ! समागच्छ, गृहाणैतमसौ गतः । श्रुत्वैवं सोऽपि तद्द्रव्यमसंगोप्यैव निर्गतः ॥ ९४ ॥ करालकरवालं च, करे कृत्वाऽस्य पृष्ठतः । क यासि ? मदग्रे त्वं, वदन्नेवं च धावितः ॥ ९५ ॥ मूलदेवोऽपि तं ज्ञात्वा, वेगान्निकटमागतम् । आश्रित्य चत्वरस्तम्भमेकमन्तरितः स्थितः ॥ ९६ ॥ सोऽपि कङ्ककृपाणेन, तमुद्देशमुपागतः । तमेव स्तम्भमाजघ्ने, तद्बुध्या तीव्ररोषतः ॥ ९७ ॥ यद्वा—अयथावस्थितं वस्तु, कोपाद्यन्तरितेक्षणः । पश्यति प्रायशो लोकस्तथा चोक्तं महात्मभिः ॥ ९८ ॥ "कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः । अभूतानपि पश्यन्ति, पुरतोऽवस्थितानिव ॥ ९९ ॥" हतो मयाऽयमित्येवं, ज्ञातश्चौरो मयेति च । प्रहृष्टौ चौरराजानौ, स्वं स्वं स्थानमथो गतौ ॥ २०० ॥ विभातायां विभावर्यामुद्गते दिननायके । कृतप्रभातकर्त्तव्यो, राजा स्वल्पपरिच्छदः ॥ २०१ ॥ अश्ववाहनिकाव्याजं, कृत्वा चौरदिदृक्षया । हट्टमार्गेण निर्यातः, क्षिपन् दृष्टिमितस्ततः ॥ २०२ ॥ अत्रान्तरे—

हट्टमेकं समाश्रित्य, विदधत्तूर्णनक्रियाम् । विलोचनव्यथाव्याजादर्द्धावच्छादिताननः ॥ ३ ॥ विशीर्णवस्त्रखण्डैश्च, पिनद्धचरणद्वयः । राज्ञो दृष्टिपथं प्रापत्तस्करो मण्डिकाभिधः ॥ ४ ॥ साभिज्ञानेन केनापि, प्रत्यभिज्ञाय तं नृपः । विधाय कमपि व्याजं, चलितः स्वगृहं प्रति ॥ ५ ॥ तस्य चाकारणाहेतोः, प्राहिणोदङ्गरक्षकम् । आहूतस्तेन स त्रस्तोऽचिन्तयन्निजचेतसि ॥ ६ ॥ न स व्यापादितो नूनं, विभावर्यां मया नरः । अकाण्ड एव तेनेदं, राज्ञ आकारणं मम ॥७॥ भाव्यो ह्यन्यायवृक्षस्य, तदिदानीं फलोदयः । क्वचित्सर्पोऽपि यद्वा स्यान्न गोधैव बिले बिले ॥८॥ तद्भवतु किमप्यत्र, यामि तावन्नृपान्तिकम् । अभिन्नमुखरागोऽहं, यदियं सात्त्विकस्थितिः ॥९॥ अलक्षितनिजाकाराः, धीराः स्युः समदर्शिनः । उत्कर्षदैन्यरहिताः, संपत्सु च विपत्सु च ॥१०॥ इत्यादि चिन्तयन्नेव, गतोऽसौ राजमन्दिरम् । अभ्युत्थानादिना राज्ञा, संपूज्योक्तो रहस्यदः ॥११॥ भो ! भवन्तमहं किञ्चिदर्थये चेद्ददासि मे । ग्राह्यतां गृहिणी शस्ता, स्वकीयभगिनी मम ॥१२॥ स उवाच कियन्मात्रं, द्विपदाद्येतद्ग्राह्यकम् । जीवितव्यमपि स्वामिंस्त्वदायत्तं हि मादृशाम् ॥ १३ ॥ गृह्यतां तदियं कन्या, ततो राज्ञा विवाहिता । प्रेमप्रदर्शनेनास्याश्चित्तमेष जहार च ॥ १४ ॥ तदुद्दिष्टधनाद्यस्य, सन्मानादिपुरस्सरम् । जग्राह मण्डिकाद्राजा, ज्ञात्वा तं निर्द्धनं ततः ॥१५॥ निग्राह्योऽयमनाचार, इदानीं येन भूभुजाम् । निर्दिष्टे

दुष्टशिष्टेषु, नीतौ निग्रहपालने ॥ १६ ॥ एवं विचिन्त्य पञ्चत्वं, प्रापितोऽसौ महीभुजा। वेदयित्वा महद् दुःखं, विचित्रैर्यातनाशतैः ॥ १७ ॥ एवं मण्डिकवृत्तान्तः, सङ्क्षेपेण निवेदितः। उत्तराध्ययनवृत्तेर्विस्तरेणावबुध्यताम् ॥ १८ ॥
अदत्तादानदोषेऽत्र, तावदेकं कथानकम्। उक्तं च मण्डिकस्यातो, विजयस्याधुनोच्यते ॥ २१९ ॥

अस्ति रम्यतानिरस्तसमस्तसुरलोकलोचनानन्ददायिस्थान२वीक्ष्यमाणप्रेक्षणकादिविविधविलासविस्तरविस्तरदत्तुच्छसच्छायमहोत्सववितीर्यमाणदीनानाथातिथिप्रभृतिप्रभूतजनकाञ्चनादिपदार्थसार्था सार्थिकवास्तव्यादिभेदभिन्नलोकसङ्घातसंजनितप्रमोदपरिदृश्यमानसदापुष्पितप्रचुरचम्पका चम्पाभिधाना नगरी, तस्यां बन्दीकृताराति-सामन्तसीमन्तिनीसमूहविधीयमानशुद्धान्तवधूविविधचरणपरिचरणोपलक्ष्यमाणप्रौढप्रतापः प्रतापाक्रान्तविक्रान्तभूपालमौलिमालामाल्यमलनदुर्ललितपादपल्लवो लव इव विषमशरशरासनवशीकृतोद्दामरामो जितशत्रुनामा महीपतिरासीत्, तस्य कुलक्रमसमागतासमशेमुष्युपहसितामरमन्त्रिणि मन्त्रिमण्डले निवेशितराज्य-

चिन्ताभारस्य सकलान्तःपुरप्रधानया नयविनयशालिन्या शालीनतादिगुणकलापधारिण्या धारिण्याख्यया प्रवरदेव्या सह सुखं विषयसौख्यं समनुभवतोऽतिचक्राम कियानपि कालः, अन्यदा च तन्नगर्यामविचार्यानार्यचर्यापरोऽत्य-

न्तमकारुण्योपेतोऽवस्वापिन्याद्यनेकचौरविद्याबलावलेपदृप्तहृदयः स्तेयाहितचित्तवृत्तिर्विजयनामा तस्करः तस्करत्वोपार्जितापर्यन्तद्रव्यसञ्चयसमुत् समुत्तस्थौ, तेन चाविज्ञातागमनेन कृतान्तेनेव प्रतिदिनापह्रियमाणप्रधानगृहसारोऽपरं परिरक्षणोपायमात्मनोऽनवलोकयन्निःशेष एव नगरीजनो राजानमुपतस्थौ, बभेष चोपायनार्पणादिपूर्वं—चतुरङ्गवरूथिनीभराक्रमणावनमितवसुमतीभारभुग्नफणिपतिफणाचक्रवाले सत्यपि भवति भूपाले नगरीयमराजिकेव देव! बाढमुपद्रुता तस्करैः, न सा काचिदतिक्रामति रात्रिर्यस्यां द्वित्राणि क्षत्राणीश्वरवेश्मसु न पतन्ति, तदिदमाकर्ण्य देवः प्रमाणं, राजाऽप्यश्रुतपूर्वं तत्तथाविधमुपश्रुत्य नागरिकवचनं महदप्येवंविधोपालम्भभाजनं संवृत्त इति मनाङ् मनस्युपजातखेदस्तूर्णं स्थित्वा क्षणं इतः प्रभृति सर्वं सुन्दरं करिष्यमीति प्रतिपाद्य नगरीजनं व्यसर्जयत्, क्षणाच्चाह्वाय्य नगररक्षकाधिपतिमब्रवीत् —भो! भो! किमयमेवंविधः प्रमादो भवतो यदेवं प्रतिदिवसं मुष्यमाणामपि मोषकैर्नगरीं न स्वयं पालयसि, नापि मम वार्त्तां ज्ञापयसि, तदिदानीमेष एव ते दण्डो यत्पञ्चरात्रमध्ये चौरं लभस्वान्यथा तवैव चौरनिग्रहं करिष्ये, सोऽपि यथाऽऽज्ञापयति देव इत्यभिधाय प्रणामपूर्वकमुत्थाय तत्स्थानात्तत्प्रभृत्येव त्रिकचतुष्कचत्वराराममठविहारशून्यशालापणादिनिलयेषु आकारादिभिस्तदुपलक्षणाक्षणिकचित्तवृत्तिः सपरिवारो दिवसमातिवाहितवान्, अत्रान्तरे सकलजगच्चक्षुरप्यह-

मेतस्यैवं प्रयत्नवतोऽपि न शक्नोमि तं तस्करमुपदर्शयितुमतो धिग् मामित्युत्पन्नगुरुविषादादिवास्तमुपागते गभस्तिमालिनि कियन्मात्रमेष तस्करोऽहमेनमुपदर्शयामीत्युद्दाममत्सरादिव क्षणमात्रं सरागमुल्लस्य तत्सामर्थ्यवन्ध्यताजातवैलक्ष्यादिव विच्छायीभूय क्षयमुपगतायां सन्ध्यायां पश्य मत्साहाय्यान्निपुणमीक्ष्यमाणोऽप्यारक्षिकलोकेनासौ न मनागप्युपलक्षित इत्यद्भुतोद्भूतहर्षप्रकर्षादिव तारतारकनिकरानट्टहासच्छदानिव दर्शयन्त्यां रजन्यां तयैव च तद्गोपायनार्थमिव सर्वतः प्रसारिते नीलपट इव सकललोकलोचनप्रसरहारिणि बहलतिमिरपटले स विजयचौर एकस्मिन्नीश्वरसद्मनि दुरारोहतरे पद्माकारं क्षत्रं पातयित्वा समस्तमपि गृहसारमादाय स्ववासमयासीत्, क्षणमात्रेण विभातायां विभावर्यां क यासि एष गृहीतोऽसीति संभ्रमादिव सर्वतः प्रसारितकरे समुत्थिते सहस्ररश्मौ किमद्यापि सुप्यते युष्माभिरवलोक्यतां क्षत्रमिति वार्त्तां निवेदयितुमिव तद्वारेणैव गृहान्तः प्रविष्टे रश्मिमण्डले क्षत्रावलोकनसंभ्रमाकुलितगृहजनकलकलोन्मिलिते नगरारक्षकादि (ग्रन्थाग्रम् ३५००) लोके स विजयतस्करः कुतोऽपि तथाविधभवितव्यताकालपाशाकृष्टो विहितस्नानविलेपनाशनाद्यलङ्कारशृङ्गारः समं पुत्रेण तत्रैव जनसमाजमध्ये समाजगाम, तत्र चायं तथाविधदुरारोहप्रासादे पद्माकारं लघुद्वारं क्षत्रमालोक्य कथं नु नामैवंविधदुरारोहस्थानमारुह्यासावीदृशमतिचित्रं क्षत्रं

कृतवान् ? कथं चानेनैवान्तः प्रविश्य सकलगृहसारमादाय निर्यात इत्याश्चर्यमेतदित्यादि वदतो जनस्यालापान् श्रुत्वा ननु सत्यमेवैष जना मन्त्रयन्ते कथमहमत्र प्रविष्टो निर्गतो वा कथं वा मयेदमीदृशं कृतमिति विचिन्तयन् स्वसामर्थ्यविज्ञानोपजातविस्मयः स्वयमेव स्वकृतकर्मासम्भावनया क्षणं कपाटपट्टायमाने वक्षसि क्षणं विकटकटीतटे क्षणं पुत्रमुखे क्षणं क्षत्रद्वारे चक्षुरपातयत्, ततश्चासौ तथाविधविशिष्टचेष्टाविष्टतनुतया तत्स्थाननिकटवर्त्तिभिरेवारक्षकैरिङ्गिताकारादिभिरयमेव चौरो नान्य इत्यवबुध्य दण्डाघातताडनापुरःसरं विहितपृष्ठतोमुखबाहुबन्धनो राज्ञः समीपमुपनिन्ये, तेन च विविधविडम्बनापूर्वकं वध्यभूमावुपनाय्य विचित्रयातनाभिर्दशविधप्राणेभ्यः पृथक्कारित इति ॥ अत्र च मण्डकोदाहरणेनादत्तादानदोषद्वारस्य गतत्वाद्विजयोदाहरणं तच्छास्त्रप्रसिद्धैवंविधोदाहरणबाहुल्यख्यापनार्थम्, अनेन च मण्डिकाद्युदाहरणद्वयेनात्रैव जन्मन्यनेकदुःखावसानमदत्तादानमित्येतद्दोषद्वारं निरूपितम्, इदानीमेतत्परिहारे यो गुणस्तदुपदर्शनाय पञ्चमं गुणद्वारमाह—

परदव्वहरणविरया गुणवंता पडिमसंठियसुसीला ॥
इहपरलोए सुहकित्तिभायणं णागदत्तो व्व ॥ ४२ ॥

यच्चदोर्भवन्तीति क्रियायाश्चाध्याहारादेवं योजना—ये 'परद्रव्यहरणविरताः' परेषां द्रव्यं परद्रव्यं तस्य हरणं परद्रव्यहरणं—परद्रव्यापहरणं तस्माद्विरताः, कोऽर्थः ?—अन्यदीयद्रविणचोरणानिवृत्ताः, तथा गुणाः सम्यक्त्वादयस्ते विद्यन्ते येषां ते तथा, असाधारणविशुद्धजीवधर्मोपेताः, किञ्च—प्रतिमा—दर्शनप्रतिमाद्या कायोत्सर्गो वा तत्र संस्थिताः प्रतिमासंस्थिताः, तथा शोभनं शीलं—चारित्रं येषां ते सुशीलाः, प्रतिमासंस्थिताश्च ते सुशीलाश्च ते तथा, कायोत्सर्गास्थिताः सचारित्राश्चेत्यर्थः, इह—अत्र जन्मनि परलोके—अन्यभवे, ते किमित्याह—सुखं च—शर्म कीर्तिश्च—यशःकीर्त्ती तयोर्भाजनं—स्थानं यद्वा शुभा—पुण्या या कीर्त्तिस्तस्या भाजनं, भवन्तीति सम्बन्धः, क इव ?—'नागदत्त इव' नागदत्ताभिधानश्रेष्ठिपुत्र इवेति गाथाऽक्षरार्थः ॥ ४२ ॥ भावार्थस्तु कथानकगम्यस्तच्चेदम्—

वाराणसीपुरीए जियसत्तुनरेसरस्स वरमित्तं । धणयत्तो नामासी सेट्ठी सुविसिट्ठगुणजुत्तो ॥ १ ॥ जिणसासणंमि रत्तो नियगुरुजणचरणसेवणासत्तो । साहम्मियजणभत्तो मयमच्छरदोसपरिचत्तो ॥ २ ॥ मयरद्धउव्व रूवेण तह य थिरयाएँ अमरसेलोव्व । गंभीरयाएँ जलहिव्व जो य धणउव्व रिद्धीए ॥ ३ ॥ तस्सासि हिययदइया सिरिव्व कण्हस्स धणसिरी भज्जा । लायण्णरूवजोव्वणसोहग्गकलाकलावड्ढा ॥ ४ ॥ जम्मंतरसुचरियसलिलसित्तऽर-

श्रीनवपदबृ-
हद्वृत्तौ अव-
सादाने

॥ ११९ ॥

पुण्णपायवफलव्व । विसयसुहमणुहवंताण ताण कालो गओ कोऽवि ॥ ५ ॥ अह अन्नया कयाई रयणीए पच्छिमंमि जामद्धे । पेच्छइ सुहं पसुत्ता वरसुमिणं धणसिरी तुट्ठा ॥ ६ ॥ जह नागदेवयाए हारो ओयारिउं सकंठाओ । खित्तो मह वच्छयले उज्जोइयदसदिसाचक्को ॥७॥ पाहाइयमंगलगेयसद्दमायन्निऊण एत्ताहे । उट्ठेऊण पहट्ठाए साहिओ सो य दइयस्स ॥ ८ ॥ तेणवि भणियं कुलकमसमागया नागदेवया अम्हं । तीए पसाएण पिए ! होही तुह सुंदरो पुत्तो ॥ ९ ॥ तइयच्चिय संभूओ गब्भो तीसे पहाणगुणकलिओ । तस्साणुभावओ च्चिय, जाया सा अहियसोहग्गा ॥ १० ॥ जिणबिंबसंघपूयादोहलेसुं पसत्थरूवेसुं । माणिज्जंतेसु सुहंसुहेण संपुण्णमासेसु ॥ ११ ॥ निम्मलगुणोववेओ समुज्जलो जणियजणमणाणंदो । अण्णंमि दिणे जाओ मुत्ताहारोव्व से पुत्तो ॥ १२ ॥ वद्धाविओ य सेट्ठी चेडीए पियंवयाभिहाणाए । दिण्णं च तेण अह पारिओसियं चिंतियब्भहियं ॥ १३ ॥ तत्तो उट्ठेऊणं सेट्ठी गंतूण सूइभवणंमि । दट्ठूण पुत्तयं तो वद्धावणयं करावेइ ॥१४॥ जयमंगलतूरपसत्थरवं, रवपूरियसव्वदिसाविवरं । वरकामिणिनट्टपहट्ठजणं, जणचित्तविलासपउत्तघणं ॥१५॥ घणकंचणतोसियदीणजणं, नयणु(जणउ)च्छवकारियपत्थय(घ)णं । घणकुंकुमवारिविइण्णछडं, छडिउज्जलतंदुलथालसयं ॥ १६ ॥ सयवत्तुवसोभियपुण्णघडं, घडलक्खपलोट्टियतेल्लवहं ।

गा. वर गुण-
द्वारे नामद-
त्तकथा.

॥ ११९॥

वहमारिनिवारियविस्सयणं, सयणव्व विमोइयगुत्तिजणं ॥ १७ ॥ वित्ते वद्धावणए एक्कारसमंमि आगए दियहे।
पुत्तस्स तओ नामं पइट्ठियं नागदत्तोत्ति ॥ १८ ॥ जं नागदेवयाए दिण्णो हारच्छलेण मे एसो। सुमिणंमि ता इमं
चिय नामं जुत्तंति कलिऊणं ॥ १९ ॥ अह वड्ढिउं पवत्तो, कमेणिमो सेयपक्खचंदव्व। देहोवचएण तहा कला-
कलावेण पवरेणं ॥ २० ॥ वच्चइ पिउणा सद्धिं जिणभवणे मुणिवराण य समीवे। जाओ य भावियप्पा निसुणंतो तत्थ
जिणवयणं ॥ २१ ॥ भणियं च—नवनवसंवेगो खलु नाणावरणक्खओवसमभावी। तत्ताहिगमो य तहा
जिणवयणायण्णणस्स गुणा ॥ २२ ॥ पत्तोऽवि जोव्वणं सो तओ य मयरद्धयस्स कुलभवणं। मण्णइ
विसं व विसए समुज्जओ धम्मकज्जेसु ॥ २३ ॥ जा जाउ इंति कुलबालियाओ लायण्णरूवकलियाओ।
नेच्छइ वीवाहेउं ता ताओ निव्वुईरत्तो ॥ २४ ॥ तो तस्स पिऊहिं वियाणिऊण विसएसु निप्पिवासत्तं। दुल्ललिय-
मित्तगोट्ठीएँ विरइओ नवर पक्खेवो ॥ २५ ॥ मित्तुवरोहेण तओ, अणिच्छमाणोऽवि निययचित्तेणं। वच्चइ आराम-
विहार वाविदेउ(ऊ)लमाईसु ॥ २६ ॥ वच्चंतेसु दिणेसु य, अहऽण्णदियहे पभायसमयंमि। सहसंबवणुज्जाणं गओ
समं मित्तवग्गेणं ॥ २७ ॥ पुण्णफलभारनमिएहिं सउणजणसेविएहिं तुंगेहिं। सप्पुरिसाण व अणुहरइ जं च

जीनवपदक्लु-हट्टुती अव-तावाने

गा. धर गुण द्वार नागद-त्तकथा।

सहयारनिवहेहिं ॥ २८ ॥ जत्थ य सरणागयसीयरक्खणत्थं वसंति सच्छाया । दिंति पत्तेसं तरुणो मणयंपि न
तरणिकिरणाणं ॥ २९ ॥ जं च नवचूयमंजरिकवलणकलकलिरकोइलरवेणं । वीसामत्थं आमंतेइ व पहियाण
॥ १४० ॥ संघायं ॥ ३० ॥ दीसंति विविहसुमणोमणोहरे तंमि नंदणवणे व्व । पेच्छइ मज्जणवाविं कमलुप्पलकुवलयाइण्णं
॥ ३१ ॥ संमज्जिऊण तत्थ य जहिच्छियं मित्तमंडलेण समं । निविडतडसंनिविट्ठं जिणमंदिरमणुपविट्ठो सो
॥ ३२ ॥ जम्मि वरकणयनिम्मियकलसावलिफुरियाकिरणपंतीओ । जिणझाणजलणडज्झंतकामजालाउ व सहंति
॥ ३३ ॥ जं च पवणपहोलिरधयलग्गसग्गिरघग्घरयकिंकिणिरवेण । भणइ व्व मह सरिच्छं, कहेह
जइ अण्ण सुरभुवणं ॥ ३४ ॥ अविय—कुपइट्ठियंपि रम्मं सुरूवयं विगयरूवसोहंपि । अणुवहणय-
पायजंघंपि गमणसत्तीएँ परिचत्तं ॥ ३५ ॥ तंमि य पुव्वपविट्ठा विसिट्ठचेट्ठावरिट्ठगुणचिट्ठा । लायण्णरूव-
लट्ठा, कलाकलावंति पत्तट्ठा ॥ ३६ ॥ जुवईजुवयणमणहारिदेहसोहाएँ विजियसुररमणी । रमणीयअहिणवुब्भिन्न-
जोव्वणा कुवलयदलच्छी ॥ ३७ ॥ सहियायणेण सहिया दिट्ठा जिणबिंबपूयणट्ठाए । वरपत्तच्छेज्जकम्मं विरयंती ॥ १५० ॥
विविहभंगीहिं ॥ ३८ ॥ दट्ठूण तीएँ निरुवमविण्णाणाइसयभावियमणो सो । चिंतइ अहो णु सच्चो एस सिलोओ

जयपसिद्धो ॥ ३९ ॥ दाने तपसि शौर्ये च, विज्ञाने विनये नये । विस्मयो हि न कर्त्तव्यो, बहुरत्ना वसुन्धरा ॥४०॥
एत्थंतरंमि तीयवि समुट्ठियाए जिणिंदपूयत्थं । सव्वविओ सो नियर्यगचंगिमानिज्जियअणंगो ॥ ४१ ॥
तस्सोवरिं अणुराओ संजाओ तीएँ लक्खणच्चेव । अहवा पहाणवत्थुंमि कस्स नहु होइ पडिबंधो ?
॥ ४२ ॥ तह कहवि तीएँ एसो पलोइओ जायमच्छरेणेव । जह पंचसरेणेसा पहया पंचहिवि बाणेहिं ॥ ४३ ॥
मयणसरपेल्लियाइवि इमीएँ लज्जाए ठाविओ अप्पा । कुलबालियाण अहवा एसा अंगुट्ठियाभरणं ॥ ४४ ॥
वरविच्छित्तीए तओ पूयं काउं जिणिंदचंदस्स । नीहरिया जिणभवणा पुणो २ तं पलोयंती ॥४५॥ जिणवंदणकयचित्तो,
सोऽविय काऊण उत्तरासंगं । दाउं पयाहिणातियं जिणनाहं थोउमाढत्तो ॥ ४६ ॥ जय तिहुयणसंतावयमयरद्धयग-
रुयमाणनिम्महणा ! । जय दूसहरोसानलविज्झावणपयंडजलवाह ! ॥ ४७ ॥ जय सुक्कज्झाणामयअवहरियकसाय-
विसमाविसवेग ! । जय उवसग्गपरीसहपिसायअक्खलियसमचित्त ! ॥ ४८ ॥ जय घाइकम्मतमपडलफेडणुल्लसियके-
वलुज्जोय ! । जय चउगइगमणभमंतजंतुसंतापकयताण ! ॥ ४९ ॥ जय नमिरसुरासुरमउडकोडितप्पडणमसिणपा-
वीढ ! । जय सेसकम्मकुलसेलदलणवज्जासणि नमो ते ॥५०॥ एवं थोऊण जिणं पूयाइसयं पलोइऊणं च । आपुच्छइ

नियमिच्चे, कस्सेसा का य वरकन्ना ? ॥५१॥ नियनयकलाकोसल्लं ठाणंमि पयासियं इमं जीए। विरयंतीएँ सहत्थेहिं जिणवरिंदस्स वरपूयं ॥ ५२ ॥ नूणमयं अणुरत्तो एयाए तेण पुच्छए एवं । इय कलिऊणं ताहिवि भणियं किं तं न याणेसि ?॥ ५३ ॥ पियमित्तसत्थवाहो एत्थेव पुरीएँ अत्थि वत्थव्वो। नागसिरी तब्भज्जा नागवसू ताण एस सुया ॥ ५४ ॥ आबालभावउच्चिय एईऍ कलासु आसि कोसल्लं । किं पुण विलासनट्टाइयंमि तारुण्णए दार्णि ?॥५५॥ किञ्च-लायण्णाइगुणेहिं विणिज्जिया लज्जियाओ व न इंति इहं । एईए रंभाई सुरंगणा मणुयलोयंमि ॥ ५६ ॥ एयाए देहसोहावलोयणे विरहमसहमाणव्व । हयहियया देवावि हु अणिमिसनयणत्तणं पत्ता ॥ ५७ ॥ जो जो रूवाइगुणो चिंतिज्जइ कोऽवि एयदेहंमि । सो सो अउव्वभावेण जणइ चित्ते चमक्कारं ॥ ५८ ॥ एक्कोऽत्थि किंतु दोसो इमीए जं नाणुरूववरलाभो । अवलोइयाए तुमए इण्हिं पुण सोऽवि पम्हुट्ठो ॥ ५९ ॥ तो भणइ नागदत्तो निरत्थओ वयणवित्थरो एस । तुब्भेहिं समाढत्तो मह भावमयाणमाणेहिं ॥ ६० ॥ मणयंपि न मज्झ जओ अणुराओ एत्थ पुच्छणे हेऊ । किं तु इमीए विण्णाणकोसल्लं कोउहल्लंति ॥ ६१ ॥ इच्चाइ जंपमाणो निग्गंतूणं जिणिंदभवणाओ । सह मित्तमंडलेणं समागओ नियभवणंमि ॥ ६२ ॥ अह सावि दिव्वकन्ना नागवसू नियसहीहिं परियरिया । संपत्ता नियभवणं हियएणं तं

॥ १३१ ॥

चिय वहंती ॥ ६३ ॥ तत्थ य न सुयइ न हसइ, नाहरणं लेइ नालवेइ जणं । बोल्लावंतीण पुणो पडिवयणं देइ न सहीणं ॥ ६४ ॥ एयावत्थं च तयं नाउं माया समागया भणइ । वच्छे ! कहेसु किं ते देहे पीडानिमित्तंति ? ॥ ६५ ॥ तीए भणियं—अंब ! न याणामि अहं पीडाए कारणं सरीरंमि । किं तु महादाहो मे वियंभिओ सव्वदेहंमि ॥ ६६ ॥ परिहासपेसलाए सहीएँ एत्थंतरंमि संलत्तं । नयणंजलीहि पीओ किं न सलोणो जणो अहियं ॥ ६७ ॥ तो तुण्हिक्का होउं जाव न किंचिवि करेइ पडिवयणं । भणिया सावट्ठंभं ताव इमीएवि तज्जणणी ॥ ६८ ॥ मा अंब ! कुणह तुब्भे एयाएँ कए मणंमि उव्वेयं । अहयं एयसरूवं वियाणिऊणं कहिस्सामि ॥ ६९ ॥ सह परियणेण जणणिं विसज्जिउं भणइ पियसहि ! कहेसु । जं दुक्खकारणं तुह अकहिए नत्थि पडियारो ॥ ७० ॥ लोओऽवि जओ जंपइ एवं थवियाण मोत्तियाणऽत्थ । तीरइ नो काउं जे मुल्लं सुवियक्खणेणावि ॥ ७१ ॥ किञ्च—जहा खारो हारो तुह ससिकरा बाणनियरा, जलं जालाजालं मलयजरसो अग्गिसरिसो । जलद्दा संतावं जणयदि जहा यंगघरिदा, तहा मण्णे नूणं मयणदहणो तावदि तुमं ॥ ७२ ॥ एवं च तुह सरूवं सामण्णेणं वियाणियं चेव । कस्सोवरि तुह चित्तं अणुरत्तं ? कहसु ता मज्झ ॥ ७३ ॥ सोऊण

सहीवयणं, तो तीए चिंतियं नियमणंमि । सच्चमिमीएँ भणियं अक्कहिए जं न पडियारो ॥ ७४ ॥ किं चाभणियं मए वियाणियं मह सरूवमेयाए । लिंगेहि ता किमज्जवि, गोविज्जइ चिंतिउं भणइ ॥ ७५ ॥ सहि ! जाणासि च्चिय तुमं, पहायसमयंमि अज्ज जिणभवणे । पूयं विरयंतीए जिणिंदबिंबस्स सविसेसं ॥ ७६ ॥ तारायणपरियरिओ, ससिव्व नियमित्तमंडलसमेओ । दिट्ठो पहिट्ठचित्तो, सेट्ठिसुओ नागदत्तोत्ति ॥ ७७ ॥ तेण ममं नयणखडक्कियाए पविसित्तु चित्तभवणंमि । अवहरियमविण्णायं, विवेयरयणं अइमहग्घं ॥ ७८ ॥ तप्पभिइं च न याणे, किं वा जंपामि किं च रोयामि । किं वा हसामि किं वा सुयामि इच्चाइ सव्वाइं ॥ ७९ ॥ ताए भणियं पियसहि ! संपइ मा ऊसुया तुमं होसु । अइरा समीहियत्थो जह होइ तहा तुह करेमि ॥ ८० ॥ एवं भणिऊण तओ नागसिरीए सयासमुवगंतुं । जिणभवणगमणमाई कहिओ तव्वइयरो सयलो ॥ ८१ ॥ तीएवि नियय-दइयस्स सोऽवि पडिभणइ अम्ह धूयाए । ठाणेच्चिय अणुराओ, जाओ अहवावि जुत्तमिणं ॥ ८२ ॥ उत्तमकुलप्पसूया उत्तमठाणंमि चेव रज्जंति । मोत्तुं महागयंदं, किं करणी जंबुयं महइ ? ॥ ८३ ॥ ता तह करेमि संपइ जह मज्झ सुयाएँ तेण सह जोगो । संजायइ अणुरूवो रईएँ मयरद्धएणेव ॥ ८४ ॥ एवं भणिउं तत्तो, धणयत्तागि-

हंमि उट्ठिऊण गओ। अब्भुट्ठिओ सविणयं तेणवि कय उचियपडिवत्ती ॥ ८५ ॥ पुट्ठो य किं पओयणमालंबेऊण आगया तुब्भे ? । अपओयणा पवित्ती, न होइ जं बुद्धिमंताणं ॥ ८६ ॥ पियमित्तेणवि भणियं एक्कं तुम्हाण दंसणं चेव। उत्तमजणावलोयणमुत्तमकल्लाणहेउं जं ॥ ८७ ॥ नीईएवि भणियं–"दट्ठव्वा रायसहा, दट्ठव्वा राइपूइया पुरिसा। जइवि न हवंति अत्था तहवि अणत्था खयं जंति ॥८८॥" बीयं पुण मह धूया नागवसू नाम अत्थि विक्खाया। सा अणुरत्ता गाढं, तुह पुत्ते नागदत्तंमि ॥८९॥ तीएँ समप्पणहेउं, समागओ ता करेह तह तुब्भे। एयाए नागदत्तो पाणिग्गहणं जह करेइ ॥९०॥ धणदत्तो तो चिंतइ तं एयं जं जणो भणइ विसमं। एत्तो वग्घो एत्तो य दुत्तडी भीसणायारा ॥९१॥ पच्चक्खं (पव्वज्जं) मज्झ सुओ अहिलसइ इमोऽवि देइ नियधूयं। एवं ववत्थिए ता पडिवयणमिमस्स किं देमि ? ॥९२॥ नियपुत्तस्स सरूवं अहवा साहेमि ताव एयस्स। तो जं उचियं होही पच्छा तं चेव काहामो ॥ ९३ ॥ इय चिंतिऊण कहियं पुत्तसरूवं तओ इमेणावि। पडिभणियं मज्झ सुया, सुमिणेवि न इच्छई अन्नं ॥ ९४ ॥ तीएँ जणणीएँ

२३ जओ जह चिट्ठा तग्गया महं सिट्ठा। ताए जाणामि अहं अवि मरइ न मण्णए अण्णं ॥ ९५ ॥ धणदत्तेणवि भणियं जइ एवं ता भणामि नियपुत्तं। तप्पडिवयणे पुणरवि तुज्झ सरूवं कहिस्सामि ॥ ९६ ॥ वच्च तुमं नियगेहं

एवं भणिउं विसज्जिए तंमि । पुत्तो बहुप्पयारं भणिओ न य मण्णए किंपि ॥ ९७ ॥ इओ य—तत्थेव पुरवरीए वसुदत्तो नाम आसि वणिपुत्तो । जियसत्तुणा नियत्तो जो नगराररक्खियत्तंमि ॥ ९८ ॥ भवियव्वयाएँ एसो, तम्मि य दियहंमि परिभमंतो य । संपत्तो पियमित्तस्स सेट्ठिणो गिहदुवारंमि ॥ ९९ ॥ एत्थंतरंमि केणवि पओयणेणं विणिग्गया दिट्ठा । सा नागवसू तेणं नियगेहदुवारदेसंमि ॥ १०० ॥ दंसणमित्तेणं चिय सो तीएँ उवरि झत्ति अणुरत्तो । अहवा भवाभिनंदीण इत्थिया रायहेऊओ ॥ १ ॥ तो पविसिऊण गेहं पियमित्तो तेण जाइओ कण्णं । तेणवि भणियं एसा दिण्णा धणयत्तपुत्तस्स ॥ २ ॥ अण्णस्स विइण्णाओ अण्णस्स पुणोऽवि नेय दिज्जंति । कुलबालियाओ जम्हा नीईयवि भणियमेयंति ॥३॥ "सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति धार्मिकाः। सकृत्प्रदीयते कन्या, त्रीण्येतानि सकृत्सकृत् ॥ ४ ॥" एवं भणिओऽवि इमो मोहवसेणं पुणोऽवि संलवइ। जत्तियमेत्तं इच्छसि, दव्वं तुह तत्तियं देमि ॥५॥ देसु मह नियधूयं तओ सहासेण सेट्ठिणा वुत्तं। मज्झ गिहंमि महायस ! नो विक्कायंति कण्णाओ ॥६॥ एवं च निसुणिऊणं विलक्खवयणो विणिग्गओ तत्तो । अवलोइउं पयत्तो छिद्दाइं नागदत्तस्स ॥७॥ एयंमि जीवमाणे मह एसा नेय होहिई कण्णा। मारेमि ता इमं लहु मणसा एवं विचिंतंतो ॥ ८ ॥ अण्णंमि दिणे तत्थ य रण्णो आसाण वाहणानिमित्तं। नयरीओ निग्गयस्स

कण्णाओ कुंडलं पडियं ॥९॥ निययावासगएण य नायं रण्णा तओ समाइट्ठो । सो चेव य वसुदत्तो निरिक्खमाणेण तेण तयं ॥१०॥ नयरीएँ बहिपएसे दिट्ठो भवियव्वयानिओएणं । चउरंगपोसहत्थो अट्ठमिपव्वंमि एगागी ॥११॥ उज्जाणे पुव्वुत्ते पडिमं पडिवज्जिउं वियालंमि । वच्चंतो जिणभवणं सेट्ठिसुओ नागदत्तोत्ति ॥ १२ ॥ तओ य–जा कित्तियंपि एसो उवउत्तो जाइ ताव तेण तयं । दिट्ठं कुंडलरयणं उज्जोवियदसदिसायक्कं ॥ १३ ॥ अत्थमणंपिव दट्ठूण अत्तणो गयणमंडलाहिंतो । पडियं भएण तं [ तह ] तरणिमंडलं धरणिवट्टंमि ॥ १४ ॥ तं दट्ठूण नियत्तो लग्गो मग्गंतरेण अण्णेण । तप्पुट्ठीएँ विलग्गो वसुदत्तो सो विचिंतेइ ॥ १५ ॥ किं एस झत्ति वलिओ किं वा मग्गंतरेण लग्गोत्ति । एत्थंतरंमि तेणवि दिट्ठं तं कुंडलं तत्थ ॥ १६ ॥ सो चिंतिउं पयत्तो, वलिओ कुंडलभएण नूणमिमो । ता एयं चिय छिद्दं पत्तं एयस्स मरणाय ॥ १७ ॥ इय चिंतिऊण गहिऊण कुंडलं तयणुमग्गओ लग्गो । ताव गओ जा पत्तो चेइहरं नागदत्तोत्ति ॥१८॥ पडिमागयस्स तत्थ य गलंमि से बंधिऊण तं तेण । आहूया नियपुरिसा पयंसियं कुंडलं तेसिं ॥ १९ ॥ भणियं च एस पावो रण्णो गहिऊण कुंडलं पत्तो । एगंते थवणत्थं ता गहिओ बंधिउं च इमं ॥ २० ॥ उवणेह निवसमीवं तेहिवि संपाडिऊण से आणं । नीओ रायसयासं कहियं च इमं जहा देव !

॥ २२ ॥ तुम्हेस कुंडलं पाविऊण तस्सेव थवणकज्जेणं । एगंतगओ पच्चो संपइ देवो पमाणंति ॥ २२ ॥ तव्वयणायण्णणजायगरुयरोसारुणच्छिजुयलेणं । जुत्ताजुत्तं अवियारिऊण तो राइणा भणियं ॥ २३ ॥ भो ! भो ! रयणिविरामे विगोविऊणं नयरमज्झंमि । आरोविज्जउ एसो सूलाए अणज्जवावारो ॥ २४ ॥ तो वसुदत्तेण इमो धरिओ लहिऊण राइणो वयणं । रयणीएँ बंधिऊणं जाए य पहायसमयंमि ॥ २५ ॥ रत्तकणईरमालोवमालिओ रत्तचंदणविलित्तो । आरोविऊण खंजे खरंमि लुयपुच्छकन्नम्मि ॥ २६ ॥ छित्तरियधरियछत्तो पुरओ वज्जंतडिंडिमो नयरे । भामेउं आढत्तो भणइ य वसुदत्तवयणेणं ॥ २७ ॥ एगो मायंगजुवा वच्चंतो तस्समीवदेसंमि । एएण निवइसंतं अवलत्तं कुंडलं लोय ! ॥ २८ ॥ अवराहेण इमेणं विडंबणाकरणपुव्वमेवमिमो । वज्झवसुहाए निज्जइ परुढनिवइस्स आणाए ॥ २९ ॥ सोऊण तस्स वयणं दारुणमेयं जणो विचिंतेइ । किं एवमिमो जंपइ किमलीयमुयाहु सच्चमिणं ? ॥ ३० ॥ आरुहिऊणं ताहे पासायसिरंमि कोऽवि तं दट्ठुं । भणइ इमं नरवइणा अवियारियमेयमादिट्ठं ॥ ३१ ॥ जम्हा ण एरिसागिईए जुज्जए कम्ममेरिसं कहवि । तत्थत्थो वयइ परो जुज्जइ एयंपि कम्मवसा ॥ ३२ ॥ जओ भणियं—" कम्माइं नूणं घणचिक्कणाइं अइकढिण-

वज्जसाराइं । नाणइयंपि पुरिसं पंथाओ उप्पहं निंति ॥ ३३ ॥ " अन्नत्थ गवक्खत्थां तयवत्थं नियवि काऽवि तं बाला । पलवइ सकामहियया अहो न जुत्तं कयं विहिणा ॥ ३४ ॥ जं गुणरयणनिहीविहु एसो संपाविओ इममवत्थं । अण्णा उ भणइ जीसे एस पई सा हया अज्ज ॥ ३५ ॥ जइ एएणं चिय सह न मरिस्सइ चिंतई तहा अवरा । जीसे दिट्ठिपहं चिय एस गओ सावि इह धन्ना ॥ ३६ ॥ किं पुण कंठविलग्गा इमस्स जा एव-माइ आलावं । निसुणंति नागवसूवि दट्ठुं तं गेहमारूढा ॥ ३७ ॥ पासित्तु रायमग्गेण तं निउत्तेहि नीयमाणं च । हाहा हयम्मि एवं विलवंती मुच्छिया सहसा ॥ ३८ ॥ सा तारिसया तेणं दिट्ठा भवियव्वयानिओएणं । चिंतइ पेच्छ मवत्थं पत्तेयं केरिसमवत्थं ? ॥ ३९ ॥ जइ मज्झ कहवि होही इमाओ वसणाओ मोयणोवाओ । ताऽवस्सं एईए मणोरहे पूरइस्सामि ॥ ४० ॥ इय सो चिंततो च्चिय नीओ नरवइनरेहिं वज्झभुवं । भणिओ य पाव रे इट्ठदेवयं सुमरसु ! इयाणिं ॥ ४१ ॥ तो सरियजिणमयत्थो सिद्धाणालोयणं स दाऊणं । गिण्हइ पच्चक्खाणं सागारं सुद्धपरिणामो ॥ ४२ ॥ इओ य—सा नागवसू किह किहवि चेयणं पाविउं सगिहं एव । जिणपडिमाणा-वासं गंतु पूइत्तु जिणइंदे ॥ ४३ ॥ काउस्सग्गेण ठिया सासणदेवीपसायणट्ठाए । एगग्गमणा एवं काऊणं तीए

विन्नात्तिं ॥ ४४ ॥ सच्चं चिय सन्निज्झं जइ जिणभत्ताण कुणसि तं देवि ! । ता पसिय नागदत्तं मोयसु एयाओ वसणाओ ॥ ४५ ॥ तब्भत्तिपवणिया सा समागया जत्थ नागदत्तो सो । आरोविउमाढत्तो, सूलाएँ तडत्ति सा भग्गा ॥ ४६ ॥ अण्णाएँ चडाविज्जइ जाव इमो ताव सावि दोखंडा । संजाया तइयाविहु एवं तो रायपुरिसेहिं ॥ ४७ ॥ रज्जए उव्विद्धो तुट्टा साऽओ पुणो२ एवं । वाराउ तिण्णि जाए भणइ इमं रुसिय वसुदत्तो ॥ ४८ ॥ खग्गेण लुणह सीसं, इमस्स रे रे ! नरा ! तओ तेहिं । मुक्को असिप्पहारो इमस्स जा कंठदेसंमि ॥ ४९ ॥ तो देवयावसाओ जाओ सो पुप्फमालियारूवो । तं दट्ठुं भीएहिं नरेहिं रण्णो समाइट्ठं ॥ ५० ॥ भणियं रण्णावि झडत्ति मज्झ पासंमि आणह तयंति । इय अच्चब्भुयचरियं पलोइयं जस्स तुज्झेहिं ॥ ५१ ॥ जं आइसई देवोत्ति भणिय तो तेहिं तस्स पासंमि । सो आणीओ भणिओ, रन्ना संमाणिऊण बहुं ॥ ५२ ॥ भो ! भो ! न तुमं कत्ता, इमस्स कज्जस्स चेट्ठिएणेव । तुह संतिएण कहियं, किंतु फुडं साह सब्भावं ॥ ५३ ॥ जस्सेह विलसियमिणं तो सो पडिभणइ सामि ! जइ अभयं । देसि तुमं तस्स तया कहेमि नो इहरहा कहवि ॥ ५४ ॥ एवं हवउत्ति तओ भणिए रण्णा कहेइ जहवत्तं । मूलाओ आरब्भा तो रण्णा हत्थिखंधंमि ॥ ५५ ॥ आरोविओ पुरीए भमाडिओ

अप्पणा सम एसो। वज्जंताउज्जपढंतभट्टगिज्जन्तगेएहिं ॥ ५६ ॥ इयरोऽविहु निव्विसओ आणत्तो हियअसेस-दविणोहो। रण्णा पभणंतेणं वयणमिणं बहुसहामज्झे ॥ ५७ ॥ रे! रे! अण्णज्ज! तुह अज्ज नागदत्तेण रक्खियं जीयं। छुट्टेज्ज कह णु इहरा जीवंतो मह सयासाओ? ॥ ५८ ॥ मुक्को रण्णा नियमं गिहमणुपत्तो स नागदत्तोऽवि। जणयंतो नियजणणीं, जणयाइजणस्स परिओसं ॥ ५९ ॥ पियमित्तसत्थवाहो, समागओ तत्थ तो कुमारस्स। साहइ नागवसए काउस्सग्गाइवुत्तंतं ॥ ६० ॥ तो परितुट्ठो भण्णइ तप्परिगयणाइ तस्स विण्णत्तिं। हिट्ठो इमो य कारइ, सुहदिणे तीएँ परिणयणं ॥ ६१ ॥ वित्ते पाणिग्गहणे महाविभूईएँ नागदत्तो उ। सोहइ नागवसूए जुत्तो रामव्व सीयाए ॥ ६२ ॥ जम्मंतरकयसुकयाणुभावसंपज्जमाणसुहनिवहो। अह सो तीएँ समाणं उवभुंजइ माणुमे भोए ॥ ६३ ॥ अन्नम्मि दिणे पासायवरगओ सह पियाएँ कीलंतो। दट्ठूण पुरवरीए सोहं हासेण भणइ पियं ॥ ६४ ॥ पिहुपायारनियंबा चलग्गरंगंतपरिहसारसणा। सुरभवणसिहरओतुंगचंगघणकलसरमणीया ॥ ६५ ॥ रमणीयवासभवणोवसोहिसुन्दरगवक्खनयणिल्ला। पिच्छविए एस पुरीवि तुज्झ करणिं समुव्वहई ॥ ६६ ॥ सा भणइ किं अमीए नाह! असंबद्धवयणरयणाए। चिट्ठामो खणमेगं, विउसिट्ठेणं विणोएणं ॥ ६७ ॥ पण्हुत्तरगूढचउत्थमाइणा भणइ

नागदत्तो तो । जइ एवं ता सुंदरि ! निसुणसु पण्हुत्तरं एक्कं ॥ ६८ ॥ सह पवणेणं इट्ठा, निदाहदाहदुयाण के
हुंति । पंकयदलच्छि ! का वा गयाण पाणप्पिया कहसु ॥ ६९ ॥ लहिउं पढिज्जमाणंपि तीएँ भणियं करेणुया
( करेऽणुया ) नाह ! । तो विम्हएण पढियं, अन्नं लहु नागदत्तेण ॥ ७० ॥ पुच्छंति थोवलोभा भवसुहहेऊ
जणस्स को सिट्ठो ? । केरिसया वा नगरी, न होइ परचक्कदुल्लंघा ॥ ७१ ॥ अप्पायारा उत्तरमिमस्स कहिऊण
जंपइ तओ सा । गूढचउत्थं किंचिवि, सक्कयभासाएँ पढसु पिय ! ॥ ७२ ॥ प्रसरति मनसिजवायौ लीलालस-
नयनपल्लवविलासा । कं मदवशं न कुरुते, ” पढियं तो नागदत्तेण ॥ ७३ ॥ इयरीयवि सुचिरं चिंतिऊण रंजिय-
मणाएँ भणियमिणं । पिययम ! लद्धामिमंपि हु, यौवनवनकन्दली बाला ॥ ७४ ॥ ता बुद्धिपयरिसं से, अवलोइय
भणइ नागदत्तोऽवि । भणसु पिए ! किंवि तुमंपि जेण अहयं वियाणामि ॥ ७५ ॥ तो पभणइ नागवसू अद्धाबंधेण
विरइयमउव्वं । गूढचउत्थइगूढं पिययम ! सुण एगचित्तो तं ॥ ७६ ॥ मा रातु भावहारक नीतीनां निलयदा
नवर कीर्त्तै । धौतस्वनरपते ता क्षीणार्चिगृहा सुगतकीला ॥ ७७ ॥ सुइरं विचिंतिऊणं लद्धे कहकहवि भणइ तो
एसो । साहु अउव्वं सुंदरि ! पढियं लद्धं व किच्छेणं ॥ ७८ ॥ मालतीहारनीहारक्षीराभा दानवस्तुता । स्वकीयकीर्त्ति-

धौतेव, तुर्यपादोऽस्य तु प्रिये! ॥ ७९ ॥ भारती वरदाऽस्तु ते, भावियचित्तत्तेणं, इमस्स चिंतिय पुणो पुणो चेव। परिवत्तं तस्सेसा बुद्धी सुंदरयरा जाया ॥ ८० ॥ माराणुभावहारगपाएण इमाएँ कामविजयित्तं भणियं गुणाण सारं, तं पुण विरलं जओ आह ॥ ८१ ॥ अद्धाय वह्नौ बहवो विशन्ति, शस्त्रैः स्वदेहानि विदारयन्ति। चित्राणि कृच्छ्राणि समाचरन्ति, मारारिवीरं विरला जयन्ति ॥ ८२ ॥ एयं पुण एयं चिय, कहन्नहाऽहं विवेयजुत्ताऽवि। विसयासत्तो चिट्ठामि एत्थ वीसरिय अत्ताणं ॥ ८३ ॥ एमाइ चिंतयंतो, नागवसूएँ स एवमाभट्ठो। पिय-यम! किमण्णचित्तो व दीससे संपयं कहसु? ॥ ८४ ॥ तो जाव नागदत्तो हिययगयं कहइ तीएँ सब्भावं। आसन्ने ताव घरे अक्कंदरवो समुच्छलिओ ॥ ८५ ॥ अविय—हा पुत्त! पुत्त! पियमाइभत्त! हा नाह! कहिं गओ साह?। हा भायभइणिवच्छल! कह छलिओ हय कयंतेणं? ॥ ८६ ॥ हा सामिय! गुणगणमणिकरंड! एमाइबहलहलबोली। विलवंति माइभज्जाभयणीपणईण सद्देहिं ॥ ८७ ॥ तं सोऊं नागवसू भणइ पियं णाह! किं इमं एवं। अक्कंदंति वराया विलवंता करुणसद्देहिं? ॥८८॥ भणइ पिए! जमदंडो सो अज्ज इमाण निवडिओ गेहे। पेक्खंताणवि जेणं गिहसामी निहणमुवणीओ ॥ ८९ ॥ माया नो भज्जा नो भइणी नो नो य पणइवग्गो

य। नो अत्था सुसमत्था रक्खंति जमेण हीरंतं ॥ ९० ॥ ता अम्हाणवि एसो न पहुप्पइ जा अकज्जपडियारो। अवियाणियआगमणो जमराओ सव्वनासयरो ॥ ९१ ॥ तावुज्जमं करेमो सुंदरि! सव्वन्नुभासिए धम्मे। बहुविह-जम्मणजरमरणरोगसोगाइअंतयरे ॥ ९२ ॥ तीए वुत्तं तुमए जं दिट्ठं विसयनिरभिलासित्तं। तं चिय इमेण वेरग्गहे-उणा पोढयं नीयं ॥ ९३ ॥ जम्हा निमित्तमित्तेण चेव बुज्झंति केवि कयउण्णा। जेसिं जिणिंदधम्मो, सुपरिचिओ पुव्वजम्मंमि ॥ ९४ ॥ ता जुत्तं चिय एवं कीरउ मज्झंपि अणुमयं नाह!। तुज्झाणुमग्गलग्गा लंघिस्समहंपि भवजलहिं ॥ ९५ ॥ एवं च तीएँ वयणं, सोउं संजायबहलरोमंचो। पिइमाइजणं आपुच्छिऊण तेहिंपिऽणुण्णाओ ॥ ९६ ॥ महया विच्छड्डेणं कारावियजिणिंदभवणमहमहिमो। दीणाणाहपयाट्टियदाणो संघस्स कयपूओ ॥ ९७ ॥ सुट्ठियसूरिसमीवे निक्खंतो से पियाऽवि पडिवण्णा। समणत्तं तस्सेव य महत्तराए समीवंमि ॥ ९८ ॥ चरिऊण चिरं कालं कलंकमुक्कं तओ समणधम्मं। आराहियविहिमरणाइं दोऽवि पत्ताइं सुरलोयं ॥ ९९ ॥ एवं जहा सो किर नाग-दत्तो, अदत्तदाणाइ नियत्तचित्तो। इहन्नजम्मे य सुहिक्कठाणं, जाओ तहऽन्ने य भवंतु सत्ता ॥ २०० ॥

॥ १२७ ॥

॥ इति नागदत्ताख्यानकं समाप्तमिति ॥

उक्तं तृतीयाणुव्रतस्य पञ्चमं गुणद्वारमधुना षष्ठं यतनाद्वारमाह—

**उचियकलं जाणिज्जसु धरिमे मेए कलंतराइसु य ।**
**पडियस्स य गहणंमी जयणा सव्वत्थ कायव्वा ॥ ४२ ॥**

उचिता चासौ कला च उचितकला—अष्टगुणलाभादिलक्षणा तां 'जानीयात्' अवगच्छेत् , अदत्तादानव्रतीति शेषः, क केत्याह—'धरिमे' ध्रियते—स्थाप्यते तुलादौ परिमाणावगमाय यत्तद्धरिमं—गुडादि तस्मिन्, तथा मीयते—परिच्छिद्यते असृतिप्रसृतिसेतिकादिमानेन यत्तन्मेयं धान्यादि तत्र, तथा कलान्तरं—वृद्धिप्रयुक्तधनस्य लाभादानं तदादिर्येषां, आदिशब्दादेकदाने द्वयादानादिग्रहः, तानि तेषु कलान्तरादिषु, चशब्द उचितकलाविशेषज्ञापनार्थः, कलान्तरे शतं प्रति द्रम्मपञ्चकाद्यादानलक्षणे उचितकला, तथा पतितस्य—भूम्यादावरतस्यान्यदीयद्रव्यस्य, चः समुच्चये, स च ग्रहणे चेति योज्यः, ग्रहणम्—आदानं तस्मिंश्च, किं बहुना ?, उपदेशसर्वस्वमाह—'यतना' गुरुलाघवालोचनप्रवृत्तिलक्षणा 'सर्वत्र' सर्वस्मिन् क्रयविक्रयादौ कार्ये 'कर्त्तव्या' विधेयेत्यक्षरार्थः, भावार्थस्त्वयम्—गुडादौ धान्यादौ कलान्तरादौ च देशकालाद्यपेक्षमुचितमेव लाभं गृह्णीयात्, पतितादानेऽप्यल्पदोषबहुगुणालोचनया काष्ठलोष्टा-

दिकं उचितं गृह्णीयात्, न हिरण्यादिकं, यदुक्तम्—" अप्पेण बहुमेसेज्जा, एयं पंडियलक्खणं । सव्वासु पडिसेवासु, एयं अत्थपयं विऊ ॥ १ ॥ " इति गाथार्थः ॥ ४४ ॥ गतं यतनाद्वारमधुनाऽतिचारद्वारमाह—

तेनाहडं च तक्कर—पओगकूडतुलकूडमाणं च ।
तप्पडिरूवं च विरुद्धरज्जगमणं च वज्जेज्जा ॥ ४५ ॥

स्तेनाः— चौरास्तैराहृतं—आनीतं कुङ्कुमादि स्तेनाहृतं, ' वज्जेज्ज'त्तिगाथान्तस्य सर्वत्र सम्बन्धात् ' वर्जयेत् ' त्यजेत्, चकारः परस्परापेक्षया समुच्चये, तथा तस्करप्रयोगकूटतुलाकूटमानं चेत्येकं पदमतिचारद्वयप्रतिपादकं, अस्य चार्थः—तस्कराः—मलिम्लुचास्तेषां प्रयोगो—हरणक्रियायां प्रेरणं ' हरत यूय—' मित्यनुज्ञा तस्करप्रयोगः, कूटा—प्रसिद्धस्वभावापेक्षया न्यूनाऽधिका वा तुला कूटतुला, कूटं—न्यूनमधिकं वा मानं कुडवादि कूटमानं कूटतुला च कूटमानं च कूटतुलाकूटमानं तस्करप्रयोगश्च कूटतुलाकूटमानं चेति पुनर्द्वन्द्वः, तच्च वर्जयेत्, अथवा " नीयालोयमभुया य आणिया दीहबिंदुदुब्भावा । " इति लक्षणेनानुस्वारलोपेन तस्करप्रयोगं वर्जयेदिति भिन्न एव सम्बन्धः, कूटतुलेत्यादिस्तु भिन्न एवेति, तथा ' तत्प्रतिरूपं च '

तेन प्रस्तुतेन व्यवह्रियमाणेन घृतादिना वा व्रीह्यादिना वा प्रतिरूपं—सदृशं वसादि पलञ्ज्यादि वा यत्र स तथा तं, व्यवहारमिति शेषः, अथवा तस्य—व्यवह्रियमाणस्वर्णादेः प्रतिरूपं—सदृशं युक्तिस्वर्णादि तत्प्रतिरूपं तेन यो व्यवहारः स तदभेदोपचारात्प्रतिरूपस्तं च वर्जयेत्, तथा विरुद्धः- प्रतिपन्थी, स च प्रस्तावात्स्वराज्यापेक्षया द्रष्टव्यः, तस्य राज्यं—कटकं देशो वा तत्र गमनं विरुद्धराज्यगमनं तच्च वर्जयेत्, अतिचाररूपता चैषामेवं-काणक्रयेण लोभदोषाच्चौराहृतं प्रच्छन्नमाददानश्चौरो भवति, यदुक्तम्—" चौरश्चौरापको मन्त्री, भेदज्ञः काणकक्रयी। अन्नदः स्थानदश्चैव, चौरः सप्तविधः स्मृतः ॥ " इत्यतश्चौर्यकरणाद् व्रतभङ्गो, वाणिज्यमेव मया क्रियते न चौर्यमिति बुद्ध्या च व्रतसापेक्षत्वादभङ्ग इति भङ्गाभङ्गरूपोऽतिचारः स्तेनाहृतं । तस्करप्रयोगस्तु द्विविधत्रिविधेन गृहीतादत्तादानविरतेर्यद्यपि भङ्ग एव, तथाऽपि भवदानीतं मोषमहं निगमयिष्यामि भक्तकादि च भवतामहं दास्यामि, किं भवन्तो निर्व्यापारास्तिष्ठन्तीत्युक्तिभिश्चौरान् प्रेरयतः चोरयत यूयमित्यहं न भणामीत्यभिसन्धिना तद्व्यापारणं
२४ परिहरतो व्रतापेक्षित्वादतिचारः । तथा कूटतुलादितत्प्रतिरूपयोः परवञ्चनारूपत्वात्ताभ्यामदत्तादानविरतेर्भङ्ग एव, केवलं क्षत्रखननाद्येव चौर्यं, कूटतुलादि तत्प्रतिरूपकरणं तु वणिक्कलैवेति स्वकल्पनया व्रतरक्षणोद्यतस्यातिचाराव-

ताविति । विरुद्धराज्यगमनं तु यद्यपि स्वस्वाम्यननुज्ञातपरकटकादिप्रवेशस्य "सामीजीवादत्त" मित्यादिलक्षणयोगेन तत्कारिणां चौर्यदण्डयोगेन चादत्तादानरूपत्वाद्भङ्ग एव, तथाऽपि विरुद्धराज्यगमनं कुर्वता मया वाणिज्यमेव क्रियते न चौर्यमित्यभिसन्धिना व्रतसापेक्षत्वात् लोके च चौरोऽयमिति व्यपदेशाभावाददतिचार इति, अथवाऽनाभोगादिनाऽतिक्रमादिना वा पञ्चानामप्यतिचारत्वं चिन्त्यमिति गाथार्थः ॥ ४५ ॥ भङ्गद्वारमधुनाऽभिधत्ते—

जो चिंतेइ अदिन्नं गेण्हामि पयंपए तहा गिण्हे ।
अइयारेसु य वट्टइ पुणो पुणो तस्स भंगोऽत्थ ॥ ४६ ॥

'यः' प्राणी 'चिन्तयति' वितर्कयति, किमित्याह—'अदत्तं गृह्णामि' अवितीर्णं लामि, अनेन मनोव्यापार उक्तः, वाक्कायव्यापारप्रतिपादनायाह—'पयंपए तहा गिण्हि' त्ति तथाशब्दः समुच्चये द्वयमध्यवर्त्ती चोभयत्रापि योज्यते, ततोऽयमर्थः—यः केवलं चिन्तयति, तथा प्रजल्पति—वक्ति चादत्तं गृह्णामीति, न केवलं जल्पति तथा गृह्णाति—आदत्ते च कायेन तदिति सम्बन्धः, न केवलमेतत् त्रयं करोति, 'अतिचारेषु च' पूर्वोक्तस्तेनाहृ-

तादिषु 'वर्त्तत पुनः पुनः' भूयो भूयस्तेषु प्रवृत्तिं करोति 'तस्य' प्राणिनोऽतिसङ्क्लिष्टस्य 'भङ्गः' विनाशः 'अत्र' अदत्तादानव्रतविषये इति गाथार्थः ॥ ४६ ॥ भणितं भङ्गद्वारमधुना भावनोच्यते—

जे दंतसोहणंपि हु गिण्हंति अदिण्णयं न य मुणिंदा ।
तेसिं नमामि पयओ निरभिस्संगाण गुत्ताणं ॥ ४७ ॥

ये मुनीन्द्रा इति सम्बन्धः, 'दन्तशोधनं' दशनशलाका तदपि, अपिशब्दादास्तां स्वर्णादि, दशनशोधनमपि, अथवाऽपिशब्दः (ब्दात्) भस्मगोमयादि, 'गृह्णन्ति' आददते अदत्तमेव अदत्तकं—अननुज्ञातं स्वामिनेति भावः 'नच' नैव, मन्यते जगतस्त्रिकालावस्थामिति मुनयस्तेषामिन्द्रा इवेन्द्रा मुनीन्द्राः, प्रधानयतय इति हृदयं, 'तेसिं' "छट्ठिविभत्तीएँ भण्णइ चउत्थी" ति लक्षणेन 'तेभ्यो' मुनीन्द्रेभ्यः 'नमामि' प्रणिपतामि 'प्रयतः' आदृतः 'निराभिष्वङ्गेभ्यः' द्रव्यादिप्रतिबन्धरहितेभ्यः वीतरागेभ्य इतियावत्, पुनः किंविशिष्टेभ्यः ?-गुप्तयो मनोवाक्काय-निरोधरूपा विद्यन्ते येषां ते गुप्तास्तेभ्यः, अर्शआदित्वान्मत्वर्थीयात्प्रत्यये रूपम्, अनेन च गाथासूत्रेणैवंविधसाधु-नमस्कारद्वारोपात्तादत्तादानविरतिगुणबहुमानरूपा भावना सूचितेति गाथार्थः ॥ ४७ ॥

भणितं भावनाद्वारं, तद्भणनाच्च तृतीयाणुव्रतमुक्तं, सम्प्रति चतुर्थस्यावसरः, तदपि याद्दशादिनत्द्वारम्, अतः क्रमप्राप्तं प्रथमद्वारेण चतुर्थव्रतं निरूपयन्नाह—

अट्ठारसहा बंभं नवगुत्तीपंचभावणासहियं ।
कामचउवीसरहियं दसहा वा अट्ठहा वावि ॥ ४८ ॥

कीद्दशं ब्रह्मचर्यमिति स्वरूपाजिज्ञासायां शिष्यस्योच्यते—'अष्टादशधा ब्रह्मे'ति ब्रह्मशब्देन ब्रह्मचर्यमभिधीयते, 'पदैकदेशे पदसमुदायोपचारात्'तच्च अष्टादशभिः प्रकारैरष्टादशधा त्रिविधं त्रिविधेन वैक्रियादौदारिकाच्च निवृत्तेः, यदुक्तं वाचकमुख्येन—"दिव्यात्कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम् । औदारिकादपि तथा तद्ब्रह्माष्टादशविकल्पम् ॥ १ ॥" पुनः कथम्भूतमित्याह—'नवगुप्तिपञ्चभावनासहितं' नव गुप्तयो—ब्रह्मचर्यरक्षणप्रकाराः स्त्र्यादिसंसक्तवसतिविसर्जनादयो यत्र तत् नवगुप्ति, भावनाभिः सहितं, कियत्यो भावनाः? इत्याह—पञ्च, यदिवा नव च ता गुप्तयश्च नवगुप्तयः पञ्च च ता भावनाश्च पञ्चभावनाः, नवगुप्तयश्च पञ्चभावनाश्च ताभिः सहितं, तत्र नव गुप्तयो यथा—"वसहि १ कह २ निसिज्जि ३ दिय ४ कुड्डुंतर ५ पुव्वकीलिय ६ पणीए ७ । अइमायाहार ८ विभूसणा ९ य नव बंभगुत्तीओ ॥ १ ॥" भावनाः पञ्च इमाः—

“ आहारगुत्ती १ अविभूसियप्पा २, इत्थिं न निज्झाइ ३ न संथवेज्जा ४। बुद्धे मुणी खुद्दकहं न कुज्जा ५, धम्माणुप्पेही संधए बंभचेरं ॥ १ ॥” भूयः किंविशिष्टं ?, उच्यते–‘ कामचतुर्विंशतिरहितं ’ काम्यन्ते–अभिलष्यन्ते ये ते कामास्तेषां चतुर्भिरधिका विंशतिश्चतुर्विंशतिः, सा चैवं–संप्राप्तासंप्राप्तभेदाद्द्विविधः कामः, तत्र संप्राप्तश्चतुर्दशविधो दृष्टिसम्पातदृष्टसेवादिलक्षणः, तदुक्तं दशवैकालिकानिर्युक्तौ–“ दिट्ठीए संपाओ १ दिट्ठीसेवा २ य संभासो ३ ॥ १ ॥ हसिय ४ ललियो ५ वगूहिय ६ दंत ७ नहनिवाह ८ चुंबणं चेव ९। आलिंगण १० आयाणं ११ कर १२ सेवण १३ ऽणंगकीडा य १४ ॥ २ ॥” तत्र च दृष्टिसम्पातः—स्त्रीणां कुचाद्यवलोकनं १ दृष्टिसेवा च भावसारं तद्दृष्टेर्दृष्टिमीलनं २ संभाषः–संभाषणमुचितकाले स्मरकथाभिर्जल्पः ३ हासितं वक्रोक्तिगर्भं प्रतीतं ४ ललितं पाशकादिक्रीडा ५ उपगूहितं-परिष्वक्तं ६ दन्तनिपातो-दशनच्छेदविधिः ७ नखनिपातो–नखरदनजातिः ८ चुम्बनं-वक्त्रसंयोगः ९ आलिङ्गनं-गात्रसंश्लेषः १ आदानं-कुत्रापि ग्रहणं ११ ‘करसेवणं’ति प्राकृतशैल्या करणासेवने तत्र करणं-नागरकादिप्रारम्भयन्त्रं १२ आसेवनं—मैथुनक्रिया १३ अनङ्गक्रीडा च अस्यादावर्थक्रियेति १४। अयं प्रथमपादद्वयोनगाथाद्वयोक्तः सम्प्राप्तकामश्चतुर्दशधा, असम्प्राप्तकामश्च दशधैवम्–“प्रथमे जायते चिन्ता, द्वितीये द्रष्टुमिच्छति। तृतीये दीर्घनिः-

श्वासश्चतुर्थे ज्वरमादिशेत् ॥१॥ पञ्चमे दह्यते गात्रं, षष्ठे भक्तं न रोचते। सप्तमे तु भवेत्कम्पः, उन्मादश्चाष्टमे तथा ॥ २ ॥ नवमे प्राणसन्देहो, दशमे जीवितं त्यजेत् ॥" अथवा दशवैकालिकनिर्युक्त्यनुसारेणैवमसम्प्राप्तकामो दशविधः–तथा च तदुक्तम्–" तत्थ असंपत्तोऽत्था १ चिंता २ तह सद्ध ३ संभरणमेव ४। विक्कवय ५ लज्जनासो ६ पमाय ७ उम्माय ८ तब्भावे ९ ॥ १ ॥ मरणं च १० होइ दसमं"ति, अस्या अर्थः–तत्रासंप्राप्तकामोऽयं 'अर्थे'ति अर्थनमर्थः–अदृष्टेऽपि विलयादौ श्रुतेस्तदभिप्रायमात्रमित्यर्थः १ तत्रैवाहो रूपादिगुणा इत्यभिनिवेशेन चिन्तनं चिन्ता २ तथा श्रद्धा–तत्सङ्गमाभिलाषः ३ स्मरणं–कल्पिततद्रूपस्यालेख्यादिविनोदः ४ विक्लवता–तच्छोकातिरेकेणाहारादिष्वपि निरपेक्षता ५ लज्जानाशो–गुर्वादिसमक्षमपि तद्गुणोत्कीर्त्तनं ६ प्रमादः–तदर्थमेव सर्वारम्भेष्वप्रवर्त्तनं ७ उन्मादो–नष्टचित्ततया आलजालभाषणं ८ तद्भावः–स्तम्भादीनामपि तद्बुद्ध्याऽऽलिङ्गनादिचेष्टा ९ मरणं च–शोकाद्यतिरेकेण प्राणत्यागः १० इत्थमसंप्राप्तकामो दशविधः। दश चतुर्दश च मीलिताश्चतुर्विंशतिस्तया रहितं–त्यक्तम्। अन्यथा वा ब्रह्मचर्यस्वरूपमभिधीयते–दशधा वाऽष्टधा वा, अपिवाशब्दावथवार्थौ, ततोऽथवा दशधा ब्रह्माथवाऽष्टधेति, तत्र दशधा गन्धहस्त्युक्तदशविधमैथुनादिरूपकामप्रत्येकवर्जनया, तथा च तदुक्तम्–" मैथुना १ नुस्मृति २–

संस्कार ३ स्पृहे ४ न्द्रियालोक ५ वृष्यरस ६ विषया ७ विकथा ८ सत्कृति ९ संसक्तसेवा १० भेदाद्दशविधाद्-ब्रह्मणो निवृत्तिरिति । अष्टधा त्वेवम्-" स्मरणं १ कीर्त्तनं २ केलिः ३, प्रेक्षणं ४ गुह्यभाषणम् ५ । सङ्कल्पो ६ ऽध्यवसायश्च ७, क्रियानिवृत्तिरेव ८ च ॥ १ ॥ एतन्मैथुनमष्टाङ्गं, प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥ २ ॥ " इति, अपिशब्दस्त्वेतदाह-एवमाद्यनेकप्रकारं ब्रह्मव्रतस्वरूपं विज्ञाय विवेकिना यथौचित्यं व्रतग्रहणं विधेयमिति गाथार्थः ॥ ४८ ॥ व्याख्यातं याद्दशद्वारेण चतुर्थाणुव्रतम्, अधुना यावद्भेदद्वारस्यावसरः, ततो यावन्तो भेदा अस्य संभवन्ति तदुपदर्शनायाह—

ओरालियं च दिव्वं तिरियं माणुस्सयं पुणो दुविहं ।
माणुस्स सदाराईकाए सयकारणाईहिं ॥ ४९ ॥

अत्र च विषयविषयिणोरभेदोपचाराद् यावद्भेदं मैथुनं तावद्भेदैव तद्विरतिरित्यभिसन्धिना 'ओरालियं चे-' त्यादि गाथासूत्रमुक्तम्, अस्य चैवं व्याख्या-द्विविधं मैथुनं, तदाह-औदारिकं च दिव्यं चेति उदारैरुरालैर्वा वैक्रियाद्यपेक्षया स्फारैरघनैश्च पुद्गलैर्निर्वृत्तमौदारिकं औरालिकं वा शरीरं तद्विषयं तत्सम्बन्धि वा मैथुनमप्यभेदोप-

चारादौदारिकं, तिर्यङ्मनुष्यसम्बन्धीतियावत्, अत एवाह सूत्रकृत्-'तिरियं माणुस्सयं पुणो दुविहं' ति पुनः-शब्दस्य विशेषणार्थत्वादौदारिकमिति विशिनष्टि, तत्किमित्याह-'द्विविधं' द्विभेदं, कथम्?, उच्यते-तिरश्चामिदं तैरश्चं, मनुष्याणामिदं मानुष्यकं, तिर्यक्सम्बन्धि नरसम्बन्धि चेत्यर्थः, चकारः समुच्चये, स च भिन्नक्रमस्तेन दिव्यं चेति योज्यते, दिवि भवं दिव्यं-देवलोकसम्बन्धि, वैक्रियमितियावत्, इदं च यद्यपि करणादिभेदेन सर्वमप्यनेकविधं तथाऽपि रूपलक्षणभेदत्वात्तद्द्वारेणैव शेषावगतेश्च मानुष्यमेवानेकविधमुपदिदर्शयिषुरुत्तरार्द्धमाह-'माणुस्स' त्यादि, प्राकृतशैल्याऽत्रानुस्वारलोपात् मानुष्यं मैथुनं 'स्वदारादिकाये' स्वकलत्रपरकलत्रवेश्यादिशरीरविषये 'स्वककारणादिभिः' स्वकेन-स्वकरणेन कारणानुमतिभ्यां च विचिन्त्यमानमनेकविधं, भवतीति गम्यत इति गाथार्थः ॥ ४९ ॥

उक्तं यावद्भेदद्वारम्, अधुना यथा जायत इत्युच्यते, तत्र मैथुनव्रतं येन प्रकारेण जायते तदाह—

दुविहं तिविहेण विउव्वियं तु एगविहतिविह तिरियंमि '
मणुयं चरिमे भंगे पच्चक्खाणं चउत्थवए ॥ ५० ॥

॥ १४२ ॥

अत्र प्रत्याख्यानं 'चतुर्थव्रते' इति तुर्यपादेन सर्वत्र सम्बन्धः, ततश्च द्विविधंत्रिविधेन—न करोमि न कारयामि मनोवाक्कायैरेवंविधभङ्गकलक्षणेन वैक्रियमैथुनविषयं प्रत्याख्यानं जायते इति शेषः चतुर्थाणुव्रते, भावार्थश्चायम्—श्रावकस्यानुमतेः सर्वत्राप्रतिषेधात् सामान्येन वैक्रियदेव्यादिसत्कं द्विविधत्रिविधभङ्गकेन मैथुनविरमणं भवति, तिर्यङ्मनुष्यमैथुनविरतिः केन २ भङ्गेनेति चेदुच्यते—'एगविहतिविह तिरियंमि मणुयं चरिमभंगे' त्ति, अत्र सूत्रत्वात्तृतीयाविभक्तिलोपेन एकविधत्रिविधेन न करोमि मनोवाक्कायैरेवंविधभङ्गकेन तिरश्चि—तिर्यग्विषयं प्रत्याख्यानं, मनुजं च—मनुष्यविषयं पुनर्विषयविषयिणोरभेदोपचारात् 'चरिमे भंगे' त्ति चरमेण भङ्गेन—एकविधैकविधलक्षणेन, न करोमि कायेनेत्येवंरूपेणेत्यर्थः, सप्तम्यास्तृतीयार्थत्वात्, तात्पर्यार्थश्चायं—गवादीनां वृषभादिसंयोजनप्रकारेण तिर्यग्विषयमैथुनकारणानुमत्योः प्रायशः श्रावकेण निषेद्धुमशक्यत्वात् तैरश्चमैथुनप्रत्याख्याने एकविधत्रिविधलक्षणो भङ्ग उक्तः, मानुषे स्वस्वापत्यविवाहादौ कारणानुमतिभावाद्बलवद्व्यापारतया मनोवचननिरोधस्य च दुःशक्यत्वादेकविधैकविधेनेत्युक्तं, मनोवशत्वादिस्वयोग्यतापरस्य तु परेणापि प्रकारेण प्रत्याख्यानग्रहणसम्भवात् शेषा अप्यष्टौ भङ्गाः पदत्रयेऽप्यनिषिद्धा एष्टव्या इति गाथार्थः ॥ ५० ॥

उक्तं यथा जायत इति द्वारम्, अस्य सम्प्रति दोषद्वारावसरः, दोषाश्चैहिकाः पारत्रिकाश्च, तत्रैहिका मातृभगिनीगमनादयः, पारत्रिका नपुंसकत्वादयः, तान् द्वेधाऽप्येकगाथया प्राह—

गिरिनयरे तिन्नि वयंसियाउ वादो जमलगा वणिसुया य।
परलोए नपुंसत्तं दोहग्गं चेव दोसा य ॥ ५१ ॥

'गिरिनगरे' गिरिनगराभिधानपत्तने 'तिस्रो वयस्याः' त्रिसंख्या मित्रभावमापन्नाः स्त्रियो द्वौ 'यमलजौ' युग्मभ्रातरौ 'वणिक्सुता च' वाणिजकपुत्री, मैथुनानिवृत्तेरैहिकदोषभाजनं संवृत्ता इति गम्यते, परभवे 'नपुंसकत्वं' षण्ढत्वं 'दौर्भाग्यं' दुर्भगत्वं च 'दोषाः' दूषणानि, चकारादन्येऽपि, तदुक्तं-"मेहुणवयभंगंमी आसे पोसे तहेव करकम्मे। विहवा वंझा तिंदू जोणीसूलं रुहिरवाहो ॥ १ ॥" त्ति, इत्यादयोऽपि द्रष्टव्याः, इति गाथाऽक्षरार्थः ॥ ५१ ॥ भावार्थः कथानकेभ्योऽवसेयः, तेषु च प्रथमं तावदिदम्—

इहैव जम्बूद्वीपे भारतवर्षमध्यखण्डालङ्कारभूतसौराष्ट्रविषये गिरिनगरं नाम पत्तनं, तत्र तिस्र इभ्यदुहितरः परस्परप्रीतिभावापन्ना उदग्रयौवनवर्त्तिन्यो जिनमतिप्रियङ्करीधनश्रीनामधेयाः, जिनदत्तप्रियमित्रधनदत्ताभिधैर्महाश्रेष्ठि-

पुत्रैः परिणीताः, तासु च जिनमतेर्भर्त्ता जिनदत्तो गृहीताणुव्रतः श्रावकः, तत्सङ्गत्या जिनमतिरपि श्राविका, केवलं प्रियङ्करीधनश्रीमैत्र्या नात्यन्तं जिनधर्मेस्थिरमतिः, जातश्चैकैकस्तासां पुत्रः, अन्यदा च तिस्रोऽप्युज्जयन्तगिरिं नेमिनाथवन्दनाय गताः, तस्य च रम्यरम्यतरप्रदेशावलोकनेनोत्पन्नाधिककौतुका अपरापरप्रदेशादिदृक्षया विचरन्त्यः प्राप्ताश्चौरैर्गृहीता नीताश्च पारसकूलं, विक्रीता वेश्यानां हस्ते, ताभिश्च शिक्षितो वेश्याजनोचितो वैशिककलाकलापः, जाता अत्यन्तप्रसिद्धा वेश्याः। इतश्च तत्पुत्रा अपि स्वपितृभिरेकोपाध्यायसमीप एव पाठिताः कालक्रमेणोपारूढा यौवनं, समानशीलतया चान्योऽन्यं सख्यवंतः, कारिताः पितृभिर्दारसङ्ग्रहं, जिनदत्तपुत्रश्च पितृसंसर्गादेव श्रावकत्वमनुपालयति, इतरौ च न तथा, अन्यदा चालोचितवन्तस्ते-किमनेन प्रभूतेनापि पितृपर्यायागतेन धनेन ?, नातस्त्यागभोगाभ्यामपि कश्चित्पुरुषस्य श्लाघा, प्रत्युत इतरजनोपालम्भ एवात्र, तथा च लोकप्रसिद्धो दोहकः-" पियारि विढत्तइ दव्वइ, ठिट्ठिरिका न करेइ। सइं विढवा सइ विलसणा, विरला जणणि जणेइ ॥ १ ॥ " तस्माद्वयमपि किमपि देशान्तरं गत्वा निजभुजाभ्यामुपार्ज्य वित्तमुचितत्यागभोगैः सफलयामो मनुष्यजन्मेति परिभाव्य स्वपितुराज्ञया गृहीतदेशान्तरगामिभाण्डा महत्या सामग्र्या नावा समुत्तीर्य समुद्रं

गताः पारसकूलं, दर्शितवन्तस्तत्रत्यस्य लोकस्य स्वभाण्डानि, अत्रान्तरे समागतास्तास्तिस्रोऽपि तत्समीपमुपात्तो- दात्तवेषालङ्कारा वेश्याः, कथितं तदग्रे पार्श्ववर्त्तिना लोकेन-यथैतासां स्वयमत्रत्यनृपतिना प्रसाददानमीदृशं कृतमास्ते-ये केचिदत्रोपागच्छन्ति व्यवहारगत्या तैरेतासां षोडशोत्तरं २ शतं दत्त्वैताभिरेव सह विषयसुखमनुभवनीयं, ततो वणिक्पुत्रैः एवमस्त्वित्यभिधायोचितताम्बूलादिदानपूर्वकं तद्गृहाणि विज्ञाय प्रेषितास्ताः स्वगृहाणि, स्वयं च भाण्डप्रतिभाण्डक्रयविक्रयादिव्यापारेण दिवसमतिवाह्यास्तं गते चक्रवाकबान्धवे गभस्तिमा- लिनि प्रवृत्तेऽभिसारिकासार्थपरमानन्दजनके सन्ध्यासमये मन्दमन्दमुन्मिषत्सु परिदृश्यमानेषु तारतारकेषु क्रमेण तिमिरनिकरापूर्यमाणासु समस्ताशासु धृत्वा स्वस्थाने रक्षपालान् षोडशोत्तरं २ शतं द्रम्माणामादाय तासां गृहाणि जग्मुः, ताभिश्च तदागमनप्रतीक्षणाक्षणिकचेतोवृत्तिभिरवलोक्य तान् आगतांश्चक्रेऽभ्युत्थानासनदानाद्युपचारः, स्थिताश्च कियच्चिरमपि परिहासादिविनोदेन, नीताश्च क्रमेण स्वशयनीयस्थानानि, तेषु च जिनदत्तपुत्रः श्रावकः संपुटकं च खटिकां च गृहीत्वा समायातः, स च क्षणमात्रं जिनमत्या सह संभाषणादि विधाय प्रदीपान्तिकवर्त्त्येव संपुटकमुच्छोटय लेखकं गणितुमुपचक्रमे, साऽपि तदग्र एवोपविष्टा, कियत्याऽपि वेलयाऽवादीत्-आर्यपुत्र! कुतः

स्वागतं ?, प्रष्टव्योऽसि, तेनोदितं-गिरिनगरात्, ततः सा स्वनगरनामग्रहणादानन्दिता विशेषेणोज्जयन्तादिवार्त्तामापृ
च्छ्य निजगाद—सन्ति तत्र जिनदत्तप्रियमित्रधनदत्ता महाश्रेष्ठिपुत्राः सपुत्रकाः क्षेमेण?, तेनोदितं—सन्ति, किं तु किं विशे-
षेण तद्वार्त्ता पृच्छयते ?, तयोदितं—वयं तिस्रोऽपि तैर्विवाहिता अभूवन्, एकैकपुत्रकं च प्रसूतवत्यः, ततश्चौरैरिहानीय
वेश्याहस्ते विक्रीताः, तेनोक्तं—वयं ते त्रयोऽपि युष्मत्पुत्राः, अहं तावज्जिनदत्तपुत्रो जिनवल्लभः, इतरौ तु प्रियमित्र-
धनदत्तपुत्रौ प्रियावहधनावहनामकाविति, अन्ये त्वाहुः, यथा कुलदेवतया जिनवल्लभस्यार्द्धपथे सवत्सगोरूपमुपदर्शितं,
गोसमीपोपविष्टवत्सपृष्ठे च तेन भवितव्यतावशादमेध्यखरण्टितांह्रेः प्रोञ्छनं कृतं, ततो वत्सेन स्वमातुः कथितं, तया
च मानुषभाषयोदितं—वत्स ! कियदेतदस्य दुश्चेष्टितं ?, अयं हि पापकर्मा निजमात्रा सममद्य भोगान् भोक्तुमुद्यतो
विद्यते, ततस्तद्वचनश्रवणोपजातशङ्को जिनमातिगृहं प्रविष्टः, स एव सर्वोदन्तं पृष्टवान्, ततस्तया कथिते
स्ववृत्तान्ते मम माता सा त्वमितरे तु मम मित्रयोर्मातरावित्यवोचत, ततः सा साध्वसेनोत्थाय तस्य ग्रीवायां
१५ विलग्य रोदितुं प्रवृत्ता, सोऽपि तथैव, ततः परस्परं सुखदुःखप्रच्छनेन क्षणमात्रं स्थित्वा जिनवल्लभे-
नोक्तम्—अम्ब ! मया तावन्मनागकार्यं नाचरितं, ताभ्यां तु मम सुहृद्भ्यां स्वस्वजननीपार्श्वंगताभ्यां किमपि कृतं

श्रीनवपदवृत्तौ अदत्तादाने ॥ १४५ ॥

वयस्यात्रिकदृष्टान्तः

भविष्यतीति न वेद्मि, तद् यामि तज्ज्ञापनायेत्यभिधाय यावद्गतस्तावदुपभुक्ते ते ताभ्यां, तत आहूय द्वावप्येकत्र भणितमनेन—यथैतास्ता अस्मन्मातरस्तिस्रो याश्चौरैस्तदाऽपहृताः, ततोऽतिदूरं विषादमुपगतावेतौ, संबोधितौ जिनवल्लभेन यथा भवत्येवंविधमनिवृत्तविषयाभिलाषाणां प्राणिनां, तस्मात्कार्यनिष्ठा भवामः, किं विषादेन ?, ततो मोचिताः सर्वैरेव प्रभूतवित्तवितरणेन स्वमातरः, आगन्तुं प्रवृत्ताः स्वदेशाभिमुखम्, अन्तरा च पर्यालोचितं स्वजननीभ्यां सह प्रियमित्रधनदत्तपुत्राभ्यां—स्वनगरमनुप्राप्तौ स्वजनवर्गस्य किमुत्तरं दास्यावः ?, तन्न युक्तं स्वदेशगमनमावयोः, ततोऽन्यतोमुखमाहितं प्रवहणं, तन्मातृभ्यां च परमविषादमागताभ्यामतिवाहित आत्मा समुद्रमध्ये, मुक्ते च कलङ्कभीतेनेव जीवितेन, जिनवल्लभस्तु स्वमातरं गृहीत्वा समायातः स्वनगरं, तन्मुखादेव ज्ञातवृत्तान्तैर्बहुभिर्लोकैर्गृहीतान्यणुव्रतानि, सोऽपि तथाविधस्थविरान्तिके मात्रा सह प्रव्रज्यामादाय विधिना परिपाल्य गतः सुरलोकम्, अन्ये तु वदन्ति—सर्व एव सजननीकाः प्राप्ताः स्वनगरं विशिष्टसंवेगागतमानसा बभूवुः पञ्चाणुव्रतधारिणः परमश्रावकाः, एवं विज्ञायान्येनापि न कार्योऽतिप्रसङ्गो मैथुने, किन्तु विरतिः कार्येति ॥ द्वितीयकथानकम्— ॥ १४५ ॥

सूरसेनाविषये मथुरा नगरी, तस्यामसाधारणरूपलावण्यादिगुणगणालङ्कारधारिणी समस्तकलाकलापकुशला

कुबेरसेना नाम गणिका, तस्याश्चान्यदा कथञ्चिद्गर्भसम्भवे महती शरीरबाधोदपादि, कथितं वैद्यस्याग्रे, तेन चादिष्टं—यथा युग्मगर्भदोषोऽयं, न तु रोगदोषः, ततस्तदम्बयोदितं--हे वत्से ! प्रसवसमये महती ते बाधा भविष्यत्यत औषधादिना गालय गर्भमेनं, तयोक्तं—को हि नाम जानान एवंविधमतिदारुणं पातकमङ्गीकरोति ?, तस्मादस्तु इत्थमेवायं गर्भो, यद्भवति तद्भवतु, ततश्च कालक्रमेण प्रसूता दारकदारिके, जनन्योक्तं—परित्यजैते, कुबेरसेनाऽब्रवीद्—अम्ब ! दशरात्रमनुपाल्य त्यक्ष्यामि, एवमस्त्विति प्रतिपन्ने कुबेरदत्तकुबेरदत्तानामाङ्के मुद्रिके घटयित्वा तयोरेव कण्ठे बद्ध्वा दिव्यमञ्जूषां च सुयन्त्रितां कारयित्वा तन्मध्ये ते गर्भरूपे प्रक्षिप्य दशमदिवसे यमुनायां प्रवाहिते, प्रभातसमये च सौर्यपुरवास्तव्यकाभ्यां महेश्वरदत्तयक्षदत्तनामकाभ्यां श्रेष्ठिकाभ्यां शरीरचिन्तां विधाय यमुनातट एव शौचमाचरद्भ्यां ददृशे सा लोलकल्लोलमालयोह्यमानाऽऽगच्छन्ती मञ्जूषा तटनिकटम्, आगता च गृहीत्वोद्घाटिता यावत्तावदवलोकितं मध्येमञ्जूषं बालकयुग्ममेकं, तयोरनुपमरूपधारको दारकोऽपरा च दारिकेति, ततो महेश्वरदत्तेनाभाणि—भो यक्षदत्त ! सुरूपमेतद्युग्मकं कस्यचित्, केवलमित्थमेवमुक्तं व्यसनपरम्परां मरणं वा प्राप्स्यति अतः संगोप्यतामेतत्, ततो यक्षदत्तेनोक्तं—यद्येवं पुत्रो ममाप्यतां पुत्रिका स्वयमेवोर-

तीनवपवब्ब्र-हचतुर्थे-व्रते.

॥ १४६ ॥

कुबेरसेना-दृष्टान्तः

रीक्रियतां, महेश्वरदत्तेन त्वेवमस्त्वित्यभिधाय कुबेरदत्तां स्वयं गृहीत्वा कुबेरदत्तं च तस्यार्पयित्वा स्वगृहमाययौ, कालेन च ते तद्गृहयोः सुखंसुखेन वृद्धिमुपगते, यथौचित्यमेकोपाध्यायसमीपे एव कलाग्रहणं कारिते, जातश्च तयोः परस्परं स्नेहः, क्रमेण चोपारूढौ यौवनं, उचितसमये च श्रेष्ठिभ्यां को ह्यनयोरतिस्नेहवतोर्वियोगं करिष्यतीति पर्यालोच्य कारितं परस्परमेव पाणिग्रहणम्, अन्यदा च द्यूतविनोदेन तिष्ठतोस्तयोः संचारिता ग्रहणके स्वनामाङ्कमुद्रा कुबेरदत्तया, कुबेरदत्तोऽपि तामालोक्य स्वमुद्रया सहैकघटनामचिन्तयत्—कथमेतन्मुद्राद्वयमेकघटनं समाननामन्यासं चिरन्तनमावयोः ?, एकोदरोद्भूतापत्यतयैवावां क्वापि नाभूव; न च ममास्या उपरि कदाचिद्भार्याबुद्धि—[ ग्रन्थाग्रम् ४००० ]—स्तद्गत्वा पितरावापृच्छामि, देवगुरुशपथदानपूर्वं च पृष्टौ तौ यथावत्कथितवन्तौ मञ्जूषालाभवृत्तान्तं, हा ! न सुन्दरमाचरितमित्यभिधाय कुबेरदत्तायास्तं वृत्तान्तं प्रकथ्य पितृगृहं च तां प्रस्थाप्य स्वयं मथुरायां व्यवहारबुद्ध्या गतः, तत्र च भवितव्यतावशेन तस्या एव निजमातुः कुबेरसेनायाः कथञ्चिद्गृहं गतः, दृष्टा सा, जातानुरागो भाटीप्रदानपूर्वं तयैव सह विषयसुखमनुभूतवान्, क्रमेण च सैव स्वपरिगृहे धृता, पुत्रश्च जातः। इतश्च कुबेरदत्ता तदैव वैराग्यमूरीकृत्य, सुव्रतागणिनीसमीपे सविस्तरां धर्मदेशनामाकर्ण्य संजातचरणपरिणामा

॥ १४६ ॥

पप्रच्छ—भगवति ! यन्मया निजभ्रातरि भर्तृबुद्धया चेष्टमानया पातकमुपार्जितं तच्छोधनोपायो भवदीयप्रव्रज्या भवति न वा ?, गणिन्योक्तं—भद्रे ! भवति, यत उक्तमस्मदागमे-"सव्वावि य पव्वज्जा, पायच्छित्तं भवंतरकडाणं । पावाणं कम्माणं तो एत्थं नत्थि दोसोत्ति ॥ १ ॥" तत इदमाकर्ण्य प्रवर्द्धमानशुभाध्यवसायया तयोक्तं-यद्येवमविलम्बितं प्रयच्छ मे भगवति ! स्वकीयदीक्षां, तयाऽपि तद्योग्यतामवगम्य दीक्षिता सा, गृहीतद्विविधशिक्षा कालेन षष्ठाष्टमदशमद्वादशादितपोविशेषशोषितशरीरा ब्रह्मचर्यभावनाः पञ्चापि विशेषेण पुनः पुनरावर्त्तयन्ती विशुद्धनवब्रह्मगुप्तिपरिपालनपरा प्रशस्ताध्यवसायस्थानकारोहणक्रमेण संजातावधिज्ञानावरणकर्मक्षयोपशमाऽवधिज्ञानमन्ववापत, तेन ज्ञातः कुबेरदत्तो मात्रा सह विषयाननुसेवमानः, ततस्तत्प्रतिबोधनार्थं गणिनीमापृच्छ्य जगाम मथुरापुरीं, तत्रैहैकदेश एवानुज्ञाप्यावग्रहं स्थितवती, पित्रोः समक्षं च कदाचित्तं बालकमादाय—वत्स ! त्वं मे पुत्रोऽसि भ्राताऽसि भ्रातृजोऽसि देवरोऽसि, त्वत्पिता मे भ्राता पिता भर्त्ता श्वशुरश्च, तव जनन्यपि मम माता श्वश्रूः सपत्नी भ्रातृभार्या चेति विरुद्धवचोभिरुल्लापयन्ती क्रीडयति स्म, ततः कुबेरदत्तो बभाण—आर्ये ! किमेवमसमञ्जसं जल्पसि ?, साध्वी प्रोवाच—महानुभाव ! नासमञ्जसं, यदि कौतुकमाभाति तदा शृणु क्षणमात्रमव-

धाय, ततः कथितः सर्वोऽपि जन्मप्रभृति वृत्तान्तः, ततश्चाहो ! दारुणमज्ञानं यद्वशेन मयेदमकृत्यमाचरितामिति परमसंवेगागतहृदयो निर्विण्णकामभोगः प्रव्राजितः, कुबेरसेनाऽपि तत्प्रभृति ब्रह्मचर्यरक्षणपरा विशिष्टश्राविकाऽभूत् । इत्यनिवृत्तिदोषान् विज्ञाय निवृत्तौ यतितव्यमिति ॥ समाप्तं द्वितीयं कथानकम् ॥ अधुना वणिक्सुतोदाहरणं तृतीयमुच्यते—



हस्तिनागपुरे रम्ये, सार्थवाहो महेश्वरः । तत्पत्नी वसुमत्याख्या, गर्भिणी साऽन्यदाऽभवत् ॥ १ ॥ तत्रैव तामसौ मुक्त्वा, स्वयं देशान्तरं गतः । वाणिज्यार्थं क्रमेणैषा, प्रसूता पुत्रिकां ततः ॥ ९ ॥ वृद्धिं गता च दिवसैर्न चायातश्च तत्पिता । ज्ञापितं वसुमत्याऽस्य, त्वत्पुत्र्युद्वहनोचिता ॥ ३ ॥ संदिष्टममुनाऽमुष्यै, कन्यां त्वं परिणाययेः । लगिष्यन्ति यतोऽत्रैव, मे दिनानि कियन्त्यपि ॥ ४ ॥ तयाऽपि मथुरापुर्यां, पुत्री सा परिणायिता । आगतः सोऽपि कालेन, तत्र भाव्यनियोगतः ॥ ५ ॥ जामातृगृह एवास्थान्न सम्बन्धं विवेद सः । प्रावृट्कालश्च तत्रास्य, समेतस्तिष्ठतस्तथा ॥ ६ ॥ जातश्च दिवसैः कैश्चित्तस्यालापादिपूर्वकः । दुहित्रा सह सम्बन्धः; परदारानिवृत्ततः ॥ ७ ॥ वर्षावृत्तौ स्वकं धाम, जगामावसरे प्रियाम् । अपृच्छत् क त्वया पुत्री, प्रदत्ता ? साऽपि साऽऽख्यत् ॥ ८ ॥ अत्रोच-

न्मथुरापुर्यां, तत आनायि तामसौ । स्वभुक्तां यावदद्राक्षीद्गतस्तावद्विलक्षताम् ॥ ९ ॥ साऽपि तं पितरं ज्ञात्वा, लज्जयाऽन्तः प्रविश्य च । शीघ्रमुद्बन्धनं कृत्वा, प्राणत्यागमथाचरत् ॥ १० ॥ गाढानुपातज्वलनज्वालाऽऽलीलीढमानसः । सूरीणामन्तिके दीक्षां, सद्यो जग्राह तत्पिता ॥ ११ ॥ अन्यद्वा वणिक्सुतोदाहरणमुपदर्श्यते—

एकस्मिन् ग्रामे देवानन्दनामा वणिक् प्रतिवसति स्म, तस्य पत्नी गुणवत्यभिधाना, तत्पुत्री सुन्दरी, सा च ग्रामान्तरवास्तव्येन यशोनन्दनामधेयेन कुलपुत्रकेण परिणीता, क्रमेण चास्या उदपादि नन्दाभिधः पुत्रो, गतो वृद्धिमुपारूढो यौवनं च परिणायितः पितृभ्याम्, अन्यदा च मरणपर्यवसानतया जीवलोकस्य मृतस्तत्पिता यशोनन्दः, सा च सुन्दरी तन्माता जाता दुश्चारिणी, ज्ञाता च नन्दपत्न्या, कथितं च नन्दस्य यथा त्वन्माता न शोभना, न चासौ तद्वचनमनुमन्यते, अन्यदा च रजन्यामेकदेवकुले सा सुन्दरी केनचिद्विटेन सह दत्तसङ्केता तस्यैवागमनं प्रतीक्षमाणा यावत्तिष्ठति स्म तावत्तत्पुत्रो नन्दोऽपि केषाञ्चित्खिड्गप्रायाणां पुरुषाणां मिलितस्तस्यैव देवकुलस्य द्वारभूमिमाजगाम, ते च पुरुषाः कथञ्चित्तन्मध्यप्रविष्टास्तामेकाकिनीं विलोक्य ताम्बूलादिदानपूर्वं प्रार्थितवन्तः, क्रमेण तया सह सर्वेऽपि रमित्वा कियत्याऽपि वेलया बहिर्निर्गत्य तमेव नन्दं प्रवेशितवन्तः, सोऽपि

घोरान्धकारे तामजानानश्चिरं रन्त्वा कथञ्चिदात्मीयवस्त्रबुद्ध्या तदीयाम्बरमेव परिधाय ततो निर्गत्य च स्वगृहमाययौ, प्रभातप्रायायां च रजन्यां स्वजननीवस्त्रसंवीतशरीरः स्वभार्यया पृष्ट उपालब्धश्च—पाप ! किमेतदाचरितं ?, जनन्यैव सह क्वापि नोषितो रात्रौ ?, न ह्यन्यथा वस्त्रपरावृत्तिसंभवः, ततः सोऽपि दत्तोपयोगः सत्यमिदमिति विज्ञाय गाढपश्चात्तापदहनदह्यमानमानसो निर्विण्णकामभोगस्तथाविधाचार्यसमीपे प्रवव्राज । परदारानिवृत्तवृत्तीनां सत्त्वानामेवमिहलोक एव दोषान् विभाव्य विवेकिभिस्तन्निवृत्तैरेवासितव्यमित्युपदेशपरः सर्वकथानकभावार्थ इति गाथार्थः ॥ ५१ ॥ व्याख्यातं दोषद्वारम्, अधुनाऽवसरागतं गुणद्वारमुच्यते—

**परपुरिसवज्जणाओ, इह परलोए य लहइ कल्लाणं ।**
**एत्थ सुभद्दा सीया महासई दोण्णि दिट्ठंता ॥ ५२ ॥**

परपुरुषः—स्वभर्त्तुरन्यस्तस्य वर्जनं—रागबुद्ध्या त्यागस्तस्मात्स्त्रीति गम्यते, किमित्याह—'इह' अत्र भवे 'परलोक च' अन्यजन्मनि 'लभते' प्राप्नोति 'कल्याणं' शिवं, 'अत्र' अस्मिन्नर्थे सुभद्रा शीता च द्वे अपि, कथम्भते ? इत्याह—'महासइ' त्ति महासत्यौ 'दोण्णि' त्ति द्वौ 'दिट्ठंत' त्ति दृष्टान्तौ निदर्शने इति गाथाऽक्षरार्थः ॥ भावार्थस्तु कथानकाभ्यामवसेयस्ते चेमे—

इहैव भारते क्षेत्रे दक्षिणार्द्धमध्यमखण्डालङ्कारभूतोऽस्त्यङ्गा नाम जनपदः, तत्र चम्पा नाम नगरी जितशत्रुनराधिपस्य राजधानी, तस्यां चोपलब्धजिनाभिहितनिखिलजीवादितत्त्वोऽस्थिमज्जाप्रेमानुरागरक्ततया देवादिभिरपि जिनशासनाक्षोभ्यसत्त्वो दीनानाथादिदानोपभोगयोग्योपार्जितप्रचुरवित्तो जिनदत्तो नाम श्रावकः प्रतिवसति स्म, तस्य चानुरूपादिगुणसमुदया दयादानादिविशिष्टधर्मानुष्ठानानुशालिनी जिनदासी नाम भार्या, तयोश्च जन्मान्तरोपात्तपुण्योदयानुरूपमिहलौकिकं पञ्चप्रकारं विषयसुखमनाबाधितधर्ममार्गमनुभवतोः कालक्रमेणोदपादि सन्निहितसकलग्रामिभद्रा सुभद्रा नाम कन्या, सा च शुक्लपक्षप्रतिपच्चन्द्रलेखेव प्रतिदिवसोपचीयमाननिखिलदेहावयवा समुपात्तोदात्तकलाकलापा च प्रथमे वयसि वर्त्तमाना कदाचिदवलोकिता तत्रैव प्रयोजनवशादागतेन शाक्यभिक्षूपासकपुत्रेण बुद्धदासेन, विस्मयस्मेरचक्षुश्च चिरं निरीक्ष्य तस्यां संजातगाढानुरागो गृहं गत्वा तद्वरणबुद्ध्या जिनदत्तपार्श्वे निजकपुरुषान् प्रेषयामास, जिनदत्तोऽपि तानुचितप्रतिपत्त्या सन्मान्याप्राक्षीदागमनकार्यं, तेऽपि च कथितवन्तः सर्वं, ततो जिनदत्तोऽवादीत्-उचितमेवेदं, केवलमन्यधार्मिको ह्ययमतो न ददाम्यहमात्मपुत्रिकाममुष्य, ततो गत्वा तैः कथितं श्रेष्ठिवचनं बुद्धदासस्य, सोऽपि तदनुरागविह्वलितमानसो व्यचिन्तयत्-कथं पुनरेषा मया लभ्या?, हुं

ज्ञातं-करोमि कपटश्रावकत्वं, शिक्षयामि तेषां सामाचारीमिति परिभाव्य गतः साधुसमीपम्, अभिवन्द्य च भणितवान्—भोः! भोः साधवः! अहं भवभयत्रस्तो भवतस्त्राणमाश्रितः स्वधर्मरक्षया यूयं तन्मां रक्षत रक्षत, तैरपि तद्भावमपरिज्ञायोपदिष्टो यतिधर्मः, तेनोक्तं—नाहमेनं कर्तुं समर्थो, गृहस्थावस्थोचितमेव मे किमपि धर्मस्वरूपं वदत, ततस्तैः श्रावकधर्म उपदिष्टो, गृहीतस्तेनापि पूर्वं कपटवृत्त्या पश्चादनवरतश्रवणेन भावसारं, कथितं च गुरुपुरतो यथा—कन्यानिमित्तमेवायं, मया धर्मोऽनुशीलितः। साम्प्रतं भावतोऽप्येष, प्रतिपन्नो यथोदितः॥ १॥ ततः पञ्चाणुव्रतसप्तशिक्षाव्रतरूपं धर्ममङ्गीकृत्य गुरुमूले जातो विशिष्टश्रावकः, कारयामास सततं जिनभवनेषु स्नात्रयात्राद्युत्सवपरम्परां, प्रतिलाभितवान् प्राशुकैषणीयाहारादिना जैनसाधुवर्गं, प्रस्तावानुरूपं प्रवर्त्तते स्मान्येष्वपि साधर्मिकवात्सल्यादिकृत्येषु, ततो जिनदत्तोऽपि कालक्रमेण तं तथापरिणतश्रावकधर्मं विज्ञाय दत्तवान् स्वदुहितरं तस्मै, महाविभूत्या च विशिष्टलग्नादौ कारितवान् पाणिग्रहणं, क्रमेण चासौ कतिचिद्दिनानि तत्रैव तया सह सद्भावसारं कामभोगसुखमनुभवन्नासाञ्चक्रे, अन्यदा च भणितो रहसि श्वशुरको जामात्रा—तात! मुच्यतामियमात्मपुत्री येनागच्छति श्वशुरकुलं, जिनदत्त उवाच—पुत्र! युक्तमेवैतत्कुलस्त्रीणां यत् श्वशुरकुले नित्र-

सनं, केवलमतिप्रबलो मिथ्यात्वविषयविकारः प्राणिनां, अनेन हृत्पूरकेणेवाघूर्णिता न चेतयन्ति कृत्याकृत्यविभागं न विदन्ति भाष्याभाष्यस्वरूपं न पर्यालोचयन्ति स्वपरयोर्गुणदोषानिमित्तं, ततश्च यथा कथञ्चित्प्रवर्त्तन्ते परपरिवादेषु कुर्वन्त्यलीकालजालप्रदानानि प्रच्छादयन्ति प्रकटानपि सतः सुशीलतादिगुणविस्तरान्, एवं च स्थिते गाढमिथ्यात्वावष्टब्धस्वभावभवत्पित्रादिजनमध्ये दुःखमवस्थानमाकलयामि स्वपुत्र्याः, तेनोक्तं—तात ! पृथकस्थाने सुखेन धारयिष्यामीति मा विचित्तो भूः, ततः श्वशुरेणोदितं-यद्येवं कुरु यथासमीहितं, किन्त्वाऽऽत्मा रक्षणीयो दुष्ट-कषायवेतालेभ्यः, पालनीयं महाप्रयत्नेन जिनधर्मप्रातिधनं कुबोधचरटेभ्यो, यतो दुष्प्रापमेतदतीव संसारे, तथाहि—प्राप्यन्ते पुत्र ! अनेकशो महाजनपूज्याः सौराज्यसम्पदो लभ्यन्ते यथाऽभिलषितपरिपूरिताशा वैमानिकादि-देवावकाशाः, न पुनरासाद्यते विशिष्टस्वर्गापवर्गसंसर्गहेतुरयं जिनपतिप्रतिपादितो महाधर्म इत्येवमनुशिष्यैनं स्वपुत्रीं चाहूय-पुत्रि ! गन्तव्यमिदानीं भवत्याः श्वशुरकुले, तत्र च मिथ्यात्वबहलः खलु त्वदीयः श्वशुरकुललोकः, ततश्च तथा २ चेष्टितव्यं यथा नायाति प्रवचनमालिन्यं नोपहास्यतामुपैति जिनधर्मो नाङ्गीकरोति मिथ्यात्वमेष ते भर्त्ते-त्यादि शिक्षयित्वा द्वयमप्युचितप्रतिपत्तिकरणपूर्वं व्यसर्जयत्, गतेन च स्वस्थानं बुद्धदासेन पृथगावासेन स्थापिता

सुभद्रा, सा चानुदिवसं जिनभवनगमनपूजाचैत्यवन्दनयत्युपासनप्रतिलाभनास्वाध्यायकरणधर्मध्यानासेवनादि-
सद्धर्मव्यापारपरायणा ' भर्तृदेवताः कुलस्त्रिय ' इति नीतिवाक्यमनुस्मरन्ती च परमान्तःप्रीत्या सर्वस्थानेषु तच्चित्त-
मनुवर्त्तमाना यावत् दिनानि कानिचिदनैषीत् तावत्तदीयश्वश्रूभ्रातृजायादिवर्गो वैधर्म्यमत्सरेण तद्भर्तुः पुरतो
भणितुं प्रवृत्तो–यथेयं न सुशीला त्वन्महिला, यतो देववन्दनव्याजेन जिनालयेषु गत्वा तिष्ठति श्वेतभिक्षुभिः
सहालापादिपरा चिरं कालं, तेऽपि चागच्छन्त्यनवरतमस्या वेश्मनि भिक्षादिव्याजेन तिष्ठन्ति महतीं वेलां, न चायमतिसं-
घर्षो विमलशीलशालिनामुचितः, त्वमपि मूढो यो निजकुलक्रमसमागतं बुद्धधर्ममुत्सृज्य भार्याऽनुवृत्त्या श्वेताम्बरधर्ममाश्रि-
तः, ततः स तद्वचनमलीकं मन्यमानोऽभ्यधात्, "अपि चलति मेरुचूला ज्वलति ज्वलनो जलेऽप्यविश्रान्तम्। न त्वस्याः
संभाव्यः, शीलभ्रंशो महासत्याः ॥ १ ॥ येऽपि च महाव्रतं धारयन्ति सितवाससोऽतिभवभीताः। तेषामपि यदि
शीलं न भवेत् कस्यापरस्य स्यात् ? ॥ २ ॥ देवगृहे यच्च चिरं तिष्ठत्येषा न सोऽप्युपालम्भः। यतयस्तत्र व्याख्यां
कुर्वन्ति शृणोति सा च यतः ॥ ३ ॥ आयान्ति यद्गृहममी भिक्षादिनिमित्तमस्तपापचयाः। स्वानुग्रहेच्छया तन्मयैव
ते नित्यमाहूताः ॥ ४ ॥ जिनधर्ममपि न भार्यानुवृत्त्याऽहं स्वीकृतवान्, किन्तु तापच्छेदकषशुद्धतामस्यावलोक्ये-

त्यादिवचनैर्निर्लोठितो विलक्षीभूय स्थितः, केवलं तच्छिद्रान्वेषणपरो बभूव, अन्यदा च मासक्षमणपारणके समायात एकस्तपस्वी तद्गृहं, तदक्षिणि च पवनप्रेरितः प्रविष्टस्तृणावयवो, न चाप्रतिकर्मशरीरतया तमसावपनीतवान्, सुभद्रा च महाभक्त्या तद्भिक्षादानायोत्थिताऽवलोक्य जलप्लवप्लावितमेकं तदक्षि सूक्ष्मेक्षिकया पश्यन्त्यद्राक्षीन्नयनैकप्रदेशावलग्नं तत्तृणं, मा भून्निष्प्रतिकर्मतनोर्मुनेरेतदक्षिविघातायेति चिन्तयन्त्येव जिह्वाग्रेण यावदपनीतवती तत्तावत्तदीयललाटतिलकः संक्रान्तः साधुभालतले, अनाभोगयोगतश्च न लक्षितस्तया निर्गतश्च साधुः दृष्टस्तदीयस्वस्रा ननन्द्रा च तिलकभूषितललाटपट्टः, तत आहूय बुद्धदासं संदर्श्य च तं मुनिं भणितवत्यौ–किमिदानीमुत्तरं करोषि ?, ततोऽसावचिन्तयत्–किमेतदसंभाव्यमालोक्यते ?, अथवा तत् नास्ति संविधानं यत्संसारे न संभवति, अत एव च नीतावुक्तम्-

"मात्रा स्वस्रा दुहित्रा वा, न विविक्तासनो भवेत् । बलवानिन्द्रियग्रामः, पण्डितोऽप्यत्र मुह्यति" ॥ १ ॥ तस्मात्किमसंभाव्यमिति प्रतनुरागस्तदुपरि जातो विपरिणतश्च मनाग् धर्मात्, ज्ञातश्चायमर्थः कथञ्चित्सुभद्रया, चिन्तितं

२६ च–न सुन्दरमापतितमेतद् यन्मन्निमित्तेन भगवच्छासनस्य मालिन्यमजनि, तत्कथमपनेतव्यमिदं?, न चानपनीतेऽस्मिन्नाजन्म मम धृतिर्भविष्यति, तत्करोमि साकारानशनेन शासनदेवताप्रसादनाय कायोत्सर्गमितिविचिन्त्य विधायोपवासं

सन्ध्यासमये रचितविशिष्टजिनप्रतिमापूजा स्थिता शासनदेवताऽऽराधनाय कायोत्सर्गेण, गृहीतवती च चेतस्यभिग्रहं—यदि ममायमभिलषितार्थो न सेत्स्यति तदा न पारणीयः कायोत्सर्गः, अङ्गीकृतोऽयमेव च मया चरमोऽनशनविधिः, एवं च कृतनिश्चया यावत्कियतीमपि रात्रिं निर्गमितवती तावत्तदीयदृढसत्त्वताऽऽकम्पिता स्वशरीरप्रभाजालेन दशापि दिशः समुद्योतयन्ती समायाता शासनदेवता—श्राविके ! किं ते प्रियं करोमीति वदन्ती, ततोऽसावपि समुत्सारितकायोत्सर्गा व्यजिज्ञपत्—जिनशासनापवादो यथाऽयमपयात्यकारणायातः । कुरु मे तथा प्रसादं सत्यं यदि जिनमते भक्ता ॥ १ ॥ देवता बभाषे—श्राविके ! अत्रार्थे चित्तखेदं मा कार्षीः, तथा करोमि यथा प्रातरेव शासनोन्नतिर्भवति, अद्य रजन्यवसाने चम्पापुर्याश्चतस्रोऽपि प्रतोल्यस्तावन्नोद्घटिष्यन्ति यावत्त्वया चालनीव्यवस्थापितोदकच्छटाभिर्नाच्छोटिताः, न च त्वया यावदन्याः स्त्रियो न गतास्तावत्तत्र गन्तव्यमित्युक्त्वा तिरोदधे देवता, सुभद्राऽपि स्वाध्यायविनोदेन यावद्रात्रिशेषमतिवाहयन्त्यास्ते स्म तावदुचितसमये समुत्थाय प्रतोलीद्वारपालैरुद्घाटयितुमारब्धाः प्रतोल्यो, नोद्घटिताः, मिलितः प्रचुरो लोकः, परम्परया व्यज्ञायि जितशत्रुनरपतिना, समागतः स्वयं, तेनापि न कथञ्चित्पारिता उद्घाटयितुं, ततो धूपकडुच्छुकहस्तः सर्वतः सुगन्धिपुष्पफलविलेपनादिमिश्रं बलिं प्रक्षेप्य समं सकललोकेनोद्घो-

षणां चक्रे—योऽत्र कश्चिद्देवो दानवो वा स सकललोकस्यैवमाद्दतप्रणामपरस्य भूत्वा प्रसादपरस्तथा करोतु यथोद्घटन्ते प्रतोल्यो, विचरति स्वेच्छया द्विपदचतुष्पदादिवर्गः, ततो गगनमण्डलमध्यवर्त्तिनी शासनदेवता नगर्या उपरि व्यत्र-स्थिताऽब्रवीद्—यथा यदि महासती काचिच्चालनीव्यवस्थापितोदकेन वारत्रयमाच्छोटयिष्यति तदोद्घटिष्यन्ते प्रतोल्यः, ततः सर्वोऽपि लोकः स्वस्वमहेला व्यापारितवान्, न कस्याश्चिच्चालिन्यामुदकमतिष्ठत्, ततश्च बह्वीषु तत्र हलबोले त्रिगुप्तासु स्त्रीषु सुभद्रा श्वशुरादिलोकमवदत्, यथा—यदि युष्मदनुमतिर्भवति तदाऽहमप्यात्मानं परीक्षयामि, ततः श्वश्रूननन्द्रादिभिरभिहितं—तूष्णीं तिष्ठ, दृष्टं महासतीत्वं त्वदीयं, बुद्धदासेनोक्तम्—को दोषा ?, यद्यपि नोद्घाटयिष्यति तथाऽप्यन्याभिः समा भविष्यति, ततो भर्त्तुरनुमत्या तिस्रो वाराः कृतार्हन्नमस्कारपाठा करे धृत्वा चालनीमुदकं प्रक्षेपितवती, स्थितं च तत्तस्यां, ततः पुरतो वाद्यमानघनातोद्यविस्तरा सकलनगरीलोकेन परिवारिता परमानन्दनिर्भरेण समेता निजकभर्त्रा गता पूर्वप्रतोलीम्, अत्रान्तरे विलोक्यासंभाव्यजलपरिपूर्णचालनीहस्तां महासतीं राजा स्वयमभ्युत्थितः, सम्मुखीभूय विरचिताञ्जलिपुटोऽवदत्—एह्येहि महासति ! विधेहि लोकस्यास्य बन्धमोक्षम्, उद्घाटय प्रतोलीं, साऽपि पञ्चनमस्कारोच्चारणपूर्वं तिस्रो वारा आच्छोटच्य चालन्युदकेन कपाटे चीत्काररवबधिरितदिगन्तरे झगित्येत्रो-

द्घाटितवती, कौतुकागतसिद्धगान्धर्वादिलोकनिवहेन मुमुचे तदुपरि पञ्चवर्णकुसुमवृष्टिः, उद्घुष्टं च गगनाङ्गणवर्त्तिना देवनिवहेन–अहो ! महासत्याः शीलमाहात्म्यं, जयतु च सर्वज्ञशासनं यत्र स्थितानामबलानामप्येवं विस्मापितसुरासुरनरसमूहं चरितम्, आनन्दितश्च सकलनगरीजनसमन्वितो राजा, चिन्तितवांश्च–धन्योऽहं सर्वथा यस्य पुर्यामेवंविधा महासत्यः, तुष्टेन च प्रदाय सर्वाङ्गीणाभरणवस्त्राणि नीता दक्षिणां प्रतोलीं, तामुद्घाट्य पुनः पश्चिमप्रतोलीं, पश्चादुत्तरप्रतोलीं, तस्यां च याऽन्या महासती मया समा सा इमामुद्घाटयिष्यतीत्यभिधाय स्थिता, अद्यापि चोत्तरप्रतोली तथैव पिहिता वर्तते चम्पायामिति जनप्रवादः, ततोऽनुगम्यमाना नागरिकजनप्रवादसमन्वितेन राज्ञा वर्ण्यमाना स्वजनपरिजनाद्यैः पठ्यमाना भट्टादिभिर्गीयमाना नारीजनमङ्गलगीतैर्गता जिनभवनं, कृतवती भावसारं तत्र जिनबिम्बपूजां, याता गुरुसमीपं, विहितवती विनयप्रतिपत्तिं द्वादशावर्त्तवन्दनेन तेषां, तत्रैव चाभिवन्द्य समस्तसङ्घं दीनादिभ्यः प्रयच्छन्ती महादानं जिनशासनमाहात्म्यमेतदिति ख्यापयन्ती पदे २ समाययौ स्वगृहं, प्रणम्य तच्चरणयुगलं गताः स्वस्थानानि नरपतिप्रभृतयो हृष्टतुष्टाः, केवलं मषीकूर्चक एव दत्तः श्वश्रूननन्द्रादिमुखेषु, तद्भर्त्ताप्यागत्योक्तवान्–असहिष्णुजनवचोभिः परिभूता यन्महासति! मया त्वम्। मनसाऽपि क्षमणीयं तत्सर्वं सुरनराराध्ये! ॥ १ ॥

सम्यक्त्वगुणो यादृक् तवोज्ज्वलो विमलशीलसंपन्नः । तादृक्कुतोऽन्यनारीजनस्य ? सत्यं सुभद्राऽसि ॥ २ ॥ सुविशुद्धशीलशालिनि ! न केवलं शासनोन्नतिर्विहिता । एवं त्वया ममापि स्थिरत्वमापादितं धर्मे ॥ ३ ॥ इत्यभिधाय स्थितंवत्यस्मिन्नूचे सुभद्रया—कान्त ! । मत्पित्रा यद्भणितं तत्स्मर मा तरलहृदयो भूः ॥ ४ ॥ एवं तं स्थिरचित्तं विधाय लोकस्य सम्यगाराध्या । बुभुजे सह निजभर्त्रा धर्मपरा सोत्तमान् भोगान् ॥ ५ ॥ परलोके च स्वर्गं जगाम तस्मिंश्च दिव्यदेवर्द्धिम् । अनुभूय चिरं यास्यति, सिद्धिपुरीं सा परम्परया ॥ ६ ॥ इति समाप्तं सुभद्राऽऽख्यानकम् ॥

सम्प्रति सीताकथाया अवसरः, सा च विस्तरेण पद्मचरितादिभ्य एवावसेया, स्थानाशून्यार्थं प्रकृतोपयोगि किञ्चिल्लिख्यते—

यदा किलाऽयोध्याराजधान्यां दशरथो राजा स्वयं व्रतजिघृक्षया प्राग्वितीर्णवरकेकयीवचनेन लघुपुत्रस्य भरतस्य राज्यं दातुकामो रामं समं लक्ष्मणसीताभ्यां वनं विससर्ज तदा लक्ष्मणस्तत्र स्वेच्छया विचरन् अज्ञातचर्ययैव विंशत्युत्तरशतसङ्ख्यवंशजालीमध्यवर्त्तिनः सूर्यहासाभिधानखड्गविद्यासाधनप्रवृत्तस्य खरदूषणखचरराजतनयस्य

श्रीनवपदवृ-
ह चतुर्थेऽ-
णुव्रते.

॥ १५२ ॥

शम्बूकस्य शिरश्छेदं, तदीयजननी च चन्द्रनखा रावणभगिनी समतिक्रान्तानि मदीयपुत्रस्य विद्यां साधयतो द्वादश वर्षाणि सिद्धप्राया सेदानीं भविष्यति तत यामि तद्योग्यं किमपि पानभोजनाद्यादाय तत्पार्श्वमिति चिन्तयन्ती तथैव तं प्रदेशमागता, ददर्श भूमौ लुठन्तं शम्बूकमस्तकं, हा ! केन मम पुत्रस्यैवं विलसितमिति चितयन्ती मुमूर्छ क्षणं, लब्धचेतना च प्रलप्य बहुप्रकारं येन मम पुत्रस्येयमवस्था विहिता तं यदीह परिभ्रमन्ती पश्यामि तदा तत्पिशितेन वितरामि कालबलिमिति प्रतिपादयन्ती गगनतलमुत्पतिता ददर्श रामलक्ष्मणौ सीतासमन्वितौ, तद्रूपावलोकनाक्षिप्तचित्ता च विसस्मार पुत्रशोकं, विद्याबलविहितदिव्यकन्यारूपा च समागत्य तदन्तिकमनेकप्रकारचाटुकर्मभिर्युवयोर्मध्यादेकः कोऽपि मामुद्वहत्विति पुनः २ प्रार्थयन्ती ताभ्यां गुर्वेदत्तां कन्यामावां नेच्छाव इति प्रतिपादयद्भ्यामस्वीकृता तयोरुपरि गाढप्रद्वेषमुपागता, तद्दृष्टिमार्गाद्दीनवदना तथैवापसृत्याऽऽत्मानं विलिख्य कक्षोरुस्तनादिदेशेषु कररुहैर्गता रुदन्ती स्वभर्तृसमीपं, कथितवती, यथा-विनाश्य मम पुत्रं केनचिदरण्यवर्त्तिना पुरुषद्वयेनैकरामासहायेन पापकर्मणा गृहीतं तत्सिद्धप्रायं सूर्यहासखड्गरत्नं, मां च रुदन्तीमेकाकिनीमवलोक्यानिच्छन्तीमपि बलान्निजोत्सङ्गे विनिवेश्यानेकविधसकामोक्तिभिः प्रार्थितवन्तौ, तथाऽपि यावन्नेष्टौ मया

सीताह-
ष्टान्तः

॥ १५२ ॥

तावदहं दशनखक्षतैः प्रापितेदमवस्थान्तरं ताभ्यां, ततो रुष्टः खरदूषणो रावणस्य दूतमनुप्रेष्य सबलवाहनस्तन्मारणार्थमनुप्राप्तो दण्डकारण्यं, दृष्ट्वा च तत्सैन्यमागच्छन्नभसा भयभीतया सीतया कथितं रामलक्ष्मणयोः, रामेणापि लक्ष्मण ! सैष कन्याव्यतिकर इति प्रजल्पता निवेशिता कालपृष्ठधनुषि करालदृष्टिः, लक्ष्मणस्त्वाह—भ्रातः ! किमस्योपरि भवतः समरसंरम्भेण ?, तिष्ठत्वं सीतां रक्षन्, अहमेव त्वत्प्रसादेन निर्जित्यैतत्सैन्यमागच्छामि, केवलं प्रचुरवैरिवेष्टितो यद्यहं सिंहनादं विदध्यां तदा शीघ्रं भवता समागन्तव्यमित्यभिधाय गतो लक्ष्मणकुमारः, कालपृष्ठधनुर्दण्डमारोप्य प्रवृत्तस्तेन सह योद्धुं, अत्रान्तरे खरदूषणप्रहितदूतेनोत्साहितो रावणोऽपि पुष्पकविमानारूढः समागच्छन् भवितव्यतानियोगेन ददर्श सीतां, जातानुरागश्च विद्याबलावलोकितसिंहनादसङ्केतादिश्चकार रामव्यामोहनाय पञ्चाननशब्दं, तच्छ्रवणोपजातगाढकोपश्च रामदेवः—सुन्दरि ! त्वया तावदिहैव जटायुपक्षिद्वितीयया स्थेयं यावदहं प्रतिपक्षसैन्यमपाकृत्यागच्छमीति संस्थाप्य वैदेहीं चचाल तदभिमुखं, रावणस्तु विज्ञाय तं गतं वेगेनागत्यारोपयामास पुष्पकविमाने करुणस्वरं क्रन्दन्तीं, प्रस्थितश्च गगनमार्गेण, सीता तु हा राम ! रक्ष रक्ष मामपह्रिय-

माणामनेन केनापि, लक्ष्मण ! समागच्छ २ शीघ्रं, पश्चादागतोऽपि किं करिष्यसि दूरदेशनीतायां मयि ?, जटायो ! त्वं च किमुपेक्षसे माममेन नीयमानां ?, स्वामिना विपक्षविजयाय गच्छता त्वं द्वितीयो मम दर्शित इत्यादि प्रलपन्ती यावत्कियन्तमपि देशविभागं निनाय तावदुत्थाय जटायुपक्षिणा गाढं चञ्चुप्रहारैः प्रहर्त्तुमारेभे रावणः, तेन कुपितेन चन्द्रहासखड्गप्रहारेण विलूनपक्षद्वयः पातितः पृथिव्यामसौ, स्वयं च स्वीकृत्य जनकतनयां पुष्पकविमानेन गतो लङ्कापुर्यां, इतश्च रामो यावल्लक्ष्मणसमीपं गतस्तावत्तेनोक्तं—सीतामेकाकिनीं मुक्त्वा किंनिमित्तं समागतः ?, स आह—सिंहनादं ते श्रुत्वा साहाय्यहेतवे, लक्ष्मणेनोक्तं—हा भ्रातः ! छलितस्त्वं केनापि, नूनमपहृता वैदेही, तद्गच्छ तूर्णम्, इत्यभिहितो यावद्व्यावृत्त्य गतस्तं प्रदेशं तावत्तं सीताशून्यमालोक्य कतिचित्पदान्यग्रतो गत्वा कण्ठगतप्राणं जटायुं दृष्ट्वा नूनमस्मद्वैरेण केनाचिदमुं हत्वा नीता सीतेति विचिन्त्य तस्य नमस्कारप्रत्याख्यानप्रदानपुरस्सरं निर्यामणां कृत्वा सीतामन्वेष्टुं प्रवृत्तः, जटायुश्च तद्दत्तनमस्काराद्यनुभावेन माहेन्द्रकल्पे प्रधानदेवो जातो, रामदेवश्च प्रयत्नविहिततदन्वेषणोऽपि न यावत्तामीक्षांचक्रे तावत्क्षणं मुमूर्च्छ क्षणं विललाप क्षणं विचचार क्षणं वनदेवता उपालेभे, अत्रान्तरे समागतो विनाश्य खरदूषणं लक्ष्मणो विराधिताभिधानखचरद्वि-

तीयस्तं प्रदेशं, ददर्शोन्मत्तमिवेतस्ततो विचरन्तं रामं, बभाण च--भ्रातः! किमेवमितरलोकेनेव चेष्टितुमारब्धं भवता ?, योषिज्जनोचितमपहाय शोकं कार्यसारैर्भूयतां, ततस्तद्वचनाश्वासितो मनाग् विगतशोको विराधितमुखं निरीक्ष्य कोऽयमित्यपृच्छत्,--लक्ष्मणेनोक्तं--तात! चन्द्रोदरखचरसुतो विराधिताख्यः समागतोऽयं मे। साहाय्यार्थं खरदूषणेन सह समरसंरम्भे ॥ १ ॥ खरदूषणे च निहते हतविप्रहतीकृते च तत्सैन्ये। त्वद्दर्शनार्थमागमदयं मया सार्द्धमतिभक्तः ॥ २ ॥ ततो रामेण सीतापहारे जटायुमरणे च निवेदिते लक्ष्मणस्य विराधितेनोक्तं--ममैव दीयतामादेशो येनाहमेव करोमि सीतावार्त्तोपलम्भं, केवलमिदानीं खरदूषणे विनाशिते यदि तदीयराजधानी पाताललङ्कापुरी समधिष्ठीयते ततः सुन्दरं भवति, तद्गम्यतां तावत्तत्र, तदनन्तरं गताः सर्वे नभसा तत्र, गृहीता सा नगरी, त्रासितस्तदधिपतिः खरदूषणपुत्रः सुन्दनामा गतो रावणसमीपम्, इतश्च किंकिन्ध्यभिधानपुरे साहसगतिनामकः खचर एकः सुग्रीवरूपधारी कामयते तत्प्रियां तारां, सा च न जानाति तयोर्विशेषमिति मन्त्रिमण्डलस्याग्रे कथयति, तेन द्वावपि किंकिन्धिपुराद्बहिः क्षिप्तौ, सत्यसुग्रीवश्च युद्धेन न तं जेतुं शक्नोति, ततः कदाचित्कुतोऽप्यवगम्य खरदूषणादिमरणवार्त्तां समं निजमन्त्रिणा जम्बवन्तेन समाजगाम रामसमीपं, तत्र कृता प्रतिज्ञा--यदि मद्भार्यां तारामलीकसुग्रीवान्मोचयसि

श्रीनवपदवृ-
त्त. चतुर्थे<br>श्रीपालचरित्रे.

॥ १५५ ॥

तदाऽहं त्वत्प्रियायाः सीतायाः सप्ताहाभ्यन्तरे वार्त्तामानयामि, यदि चैतन्न करोमि तदा ज्वालाकलापदुरालोके ज्वलने प्रविशामि, तच्चाकर्ण्य रामदेव एवमस्त्विति प्रतिपाद्य समं लक्ष्मणेन किंकिन्धिपुरे गत्वा बो(यो)धयामास सह साहसगतिना सुग्रीवं न चालक्षि तयोर्युध्यमानयो रामदेवेन कश्चित्साहसगतिः कश्चित्सुग्रीवः, ततस्तस्य पश्यत एव विच्छायितः सुग्रीवोऽनेन कथं कथमपि, ततश्च्युतः समागतो रामान्तिकं, रामेणापि द्वितीयवारं योधयित्वा त्रासिता तस्यालीकसुग्रीवस्य तन्निबन्धनभूता वैतालिनी विद्या, तदपगमे च स्वाभाविकरूपोऽसौ विद्धो बाणेन प्रापितो निधनं, आदेशिनः स्थाने आदेश इव निवेशितस्तत्पदे सुग्रीवः, तदनु रामदेवो गतः स्वस्थानं, सुग्रीवः स्वार्थसिद्धावन्तःपुरप्रविष्टो विस्मृत्य रामोपकारं भोगसुखासक्तचित्तो न चकार सीतावर्त्तोपलम्भाय यत्नम्, अन्येद्युश्च समागत्य सौमित्रिणा रूक्षवचनैरुपालब्धः विलक्षवदनः प्रवृत्तः सर्वतः सीतामन्वेष्टुं, कम्बुद्वीपोपलब्धप्रहारविधुररत्नजटिनः सकाशाद्विज्ञातकियद्व्यतिकरश्च तत्सहित एव समागत्य ददर्श रामस्य रत्नजटिनं, बभाण च—यथाऽयं रत्नजटी सुन्दरपुरस्वामी सीतावार्त्ताभिज्ञो देवपादान्तमानीतो मया तदेनं पृच्छतु देवः, ततो रामदेवेन सहर्षमाभाष्य भणितोऽसौ, यथा--कथय भोः ! सीतावृत्तान्तं, तेनोदितं—श्रूयतां, रावणेन नीयमाना लवणसमुद्रस्योपरिभागवर्त्तिना नभसा नानाविधान् करुणप्रलापान् कुर्वन्ती सीता मया दृष्टा.

सीताद-<br>ष्टान्तः

॥ १५५ ॥

युष्मन्नामग्रहणपूर्वकप्रलापैः प्रत्यभिज्ञाता च, तेन सह सङ्ग्रामाङ्गीकरणेनारब्धा मोचयितुं, रावणेन च मम विहितो विद्याप्रहारः, अपरव्यतिकरं च नाहं जानामि, रामेणोक्तम्--इतः परमहमेव ज्ञास्यामि, केवलं नयत मां तत्र यत्र क्वापि रावणः, ततो जम्बवन्तेनोक्तं--यद्येवं तर्हि समुत्क्षिप्यतां प्रथममस्मत्प्रत्ययनिमित्तं कोटिशिला, यतः पुराऽनन्तवीर्यसाधुनाऽतिशायिज्ञानिनेदं कथितमासीत्--य इमामुत्पाटयिष्यति स रावणं हनिष्यति, ततो लक्ष्मणेनोक्तं--दर्शय मे तां, तदनु दर्शिता सा तस्य, उत्क्षिप्ता चानेन जानुनी यावद्देशा, समुद्घुष्टं च देवादिभिर्यथा जयति २ अष्टमो वासुदेवः, ततः सर्वेऽपि गताः किष्किन्धिपुरं, विहितकर्त्तव्यनिश्चयाश्चाऽऽनाय्य हनूमन्तं श्रीपुरनगराद्भणितवन्तो रामदेवं--स्वामिन् ! प्रेष्यतामयं सीताप्रवृत्त्युपलम्भाय लङ्कापुरीं प्रति, ततः समर्प्य सीताप्रत्ययनिमित्तं स्वाङ्गुलीयकं रामः प्रेषयामासैनं, प्राप्तश्चानेकवृत्तान्तान् मार्गे एव कुर्वन् क्रमेणासौ सपरिकरस्तां पुरीं, तद्बहिस्ताच्च साल्यभिधानाया अङ्गारकजनन्या विद्याकृतप्राकारेण स्खलितबलस्तं पातयित्वा पार्ष्णिप्रहारेण रणोद्यतां च सालीं विनाश्य मुखात्प्रभृतिसकलशरीरद्विधाकरणेन तदीयस्य पत्युर्वज्रमुखस्य छित्त्वा सङ्ग्रामे शीर्षं प्रविवेश लङ्कापुरीं, तन्मध्येप्रविष्टः प्रथमं गतो बिभीषणगृहं,

भाणितवांश्च तन्मुखेन रावणं--विमुञ्च वैदेहीमन्यथा न ते रामाज्जीवितमस्तीति, स्वयं च जगाम रावणोद्यानं, ददर्श तत्र विषवल्लीभिरिव महौषधीं दशास्यनियुक्तात्रिजटाप्रभृतिराक्षसीभिः परिवारितां सीतां, कृतप्रणामः समर्पयामास तस्या रामनामाङ्कं मुद्रारत्नं, ततः संस्थाप्य कथंकथमपि रुदतीमेनां निर्वाप्य प्रियसंदेशैः पूर्णप्रतिज्ञां भोजयित्वा कथञ्चिद्भाणासौ—समागच्छ महासति ! इदानीं नयामि त्वां निजस्कन्धारोपितां रामसमीपं, सीतयोदितं--वत्स ! नाहं परपुरुषाङ्गस्पर्शमपीच्छामि किं पुनः स्कन्धाधिरोहणं, तद्व्रज त्वं शीघ्रं, किंच--यदि त्वामत्रागतं राक्षसेश्वरो ज्ञास्यति तदाऽपरं किमपि विघ्नं करिष्यति, तस्मादिदं मदीयचूडारत्नमादाय मद्दयितप्रत्यायनार्थं त्वरितमपसरेतः स्थानात्, ततोऽसावङ्गीकृत्य तच्चूडारत्नं श्रुत्वा च तत्संदेशकानुत्थाय ततः स्थानाद्गतः पद्माभिधं दशवदनस्य प्रधानमुद्यानम्, अत्रान्तरे बिभीषणेन विज्ञप्तो रावणः--भ्रातः ! मुच्यतां परकलत्रमियं वैदेही, न खलु परदारपरिग्रहेण राज्ञां काचित्प्रतापवृद्धिः, केवलमयशःकलङ्क एव, किंच—अत्र पवनञ्जयसूनुर्हनुमानागतो विद्यते तेन चैवं भाणितमित्यादि यावदाचष्टे बिभीषणस्तावदागत्य मन्दोदर्या कथितो हनूमद्व्यतिकरः, ततो रुष्टेन रावणेन तद्वधार्थं प्रेषितं निजबलं, तदवलोक्य समागच्छद् उन्मूलयामास तद्वननाथ हनूमानुद्यानतरून्, निराचकार च तत्प्र-

हारविधुरं राक्षससैन्यं, तदनु भञ्जन् प्रतोलीकपाटानि टालयन् प्राकाराट्टालकान् वित्रासयन्ननेकप्रकारान् स्थाने
२ राक्षसभटान् उपद्रवन् समस्तामेव नगरीं समागतः पवननन्दनो दशवदनास्थानभूमिं, दृष्ट्वा चैनं रावणो
बभाण स्वभटान्—रे रे ! मारयतैनं वानराधमं, तत इन्द्रजिन्मेघवाहनाभ्यां तत्पुत्राभ्यां प्रहर्तुमारेभेऽसौ, हस्तला-
घवेन छलित्वा बद्धश्च कथञ्चित् नागपाशैः समर्पितश्चानीय स्वपितुः, तेनादिष्टं—सर्वस्यां नगर्यामित्थं बद्ध एव गृहा-
द्गृहं भ्रमयित्वा श्मशानभूमौ विनाश्यतामेषः, हनुमतोक्तं—किमहं त्वत्पुत्राभ्यां बद्धो येनैवमादिश्यते त्वया ?,
त्वत्पित्राऽपि न बद्धुं शक्योऽहं यतः किं पुनः पुत्राभ्यां ? केवलं त्वत्परीक्षार्थमेव मयाऽऽत्मा बन्धितः, स च त्वं परीक्षि-
तो रूक्षभणनैः, इदानीं पश्य मामाकाशमार्गेण व्रजन्तमित्याभिदधदेव त्रोटयित्वा बृहत्त्रटत्कारेण नागपाशमुत्पति-
तस्तमालदलश्यामलं नभस्तलं, भग्नं गाढतरचरणप्रहारेण स्तम्भसहस्रसंकुलं विचित्रमणिभूमिकारमणीयं रावणभवनं,
प्रकम्प्य पातिता समस्तनगरी पश्यत एव राक्षससमूहस्य, क्षणान्तरेणादृश्यीभूतः संप्राप्तः सपरिवारो हनुमान् किंकि-
२७ न्धिपुरं, तत्र सुग्रीवेण सादरमुत्थायालिङ्गितः, आत्मना सह नीतो रामसमीपं, विहितप्रणामो रामदर्शितासने निविश्य
समर्प्य चूडारत्नं निवेदयामास समस्तमेव सीतोदन्तं रावणादिविलसितं च, रामस्तु सलक्ष्मणस्तच्छ्रुत्वा सुग्रीवादि-

संमतेनाकालविलम्बं चचाल लङ्कापुरीं प्रति हनूमन्नलादिवानरसैन्यसमन्वितः, प्राप्तः क्षणान्तरेण वेलन्धरगिरिशिखरवर्तिवेलन्धरनगरं, तत्र जित्वा समुद्रराजं विधाय तमेवाग्रे गतो लङ्कासन्नत्रिकूटाचलशिखरवर्त्तिहंसद्वीपं, तत्र हंसरथराजं समरे निराकृत्य स्थितः सबलवाहनस्त्वयं, तत्स्थानवर्त्तिनं च विज्ञाय रावणः समं राक्षससैन्येन सङ्ग्रामनिमित्तं प्रस्थितो लङ्कापुरीतः, अत्रान्तरे पादयोर्न्निपत्य नीतिपक्षपातिना भणितं बिभीषणेन—त्यजस्व कोपं कुलकीर्तिनाशनं, भजस्व धर्मं कुलकीर्तिवर्द्धनम् । प्रसीद जीवेम सबान्धवा वयं, प्रदीयतां दाशरथाय मैथिली ॥१॥ तत इन्द्रजितोक्तं—बिभीषण ! त्वं वैरिपक्षं समर्थयसे, बिभीषणेनोक्तं—मैवं वोचो, नीतिरेव पुरस्करणीया महापुरुषैः, ततस्तच्छ्रुत्वा समाकृष्य चन्द्रहासखड्गं दशवदनो हन्तुमारब्धो बिभीषणं, सोऽप्यसहनतया समुत्पाट्य स्तम्भमेकं तं गति हन्तुं प्रवृत्तः, तत इन्द्रजित्कुम्भकर्णादिभिः कथञ्चित् धृतौ प्रेषितौ स्वं स्वं स्थानं, तदनु बिभीषणोऽभिमानेन निर्गत्य लङ्कापुर्या गतो रामान्तिकं, सन्मानपूर्वं संवर्गितो रामेण, पश्चादष्ट दिवसान् यावद्विधाय तत्र द्वीपे भामण्डलादिसकलसैन्यमीलकं रामदेवः समं लक्ष्मणकुमारेण विजययात्राप्रशस्तमुहुर्त्तेषु सुग्रीवभामण्डलहनूमदादिसैन्यपरिवारितश्चचाल लङ्काभिमुखं, राक्षसनाथोऽपि विज्ञाय तमागच्छन्तं रणरभसजानितगमनोत्साहो

निर्जगाम स्वबलकलितो लङ्कापुर्याः, अर्द्धपथे द्वयोरपि सैन्ययोरापतितं युद्धं तावद्यावन्महता समरसङ्घट्टेन भामण्डलो मेघवाहनेन सुग्रीव इन्द्रजिता हनूमान् कुम्भकर्णेन पन्नगविद्यया नागपाशैर्बद्धः, तदुन्मोचनार्थं च रामेण भणितो लक्ष्मणः-स्मर्यतां सुलोचनो देवः, ततो लक्ष्मणेन स्मृतमात्रोऽसौ समागत्य सिंहनादविद्यां गारुडविद्यां विद्युद्वदनाभिधानं गजं च लक्ष्मीधरस्य ददौ, रामदेवस्य त्वमोघे दिव्यहलमुशलप्रहरणे, तद्द्वयोश्च दिव्यशस्त्रपरिपूर्णौ द्वौ रथौ, पावनवारुणाग्नेयशस्त्राणि च युद्धजयहेतूनि समर्पयामास, स्वयं च तदनुमत्या गतः सुरः स्वस्थानं, रामलक्ष्मणौ तु तावेव रथावारुह्याजग्मतुः सङ्ग्रामभूमिं, दृष्ट्वा च गारुडविद्यापरिकरितं गारुडरथं लक्ष्मणस्य नष्टेन्द्रजिदादिनियुक्ता पन्नगविद्या सुग्रीवादीनां, मुत्कलीभूताः समागता रामशिबिरं, पुनश्च तैः प्रारब्धेऽनेकप्रकारं दारुणे महासमरे निराक्रियमाणेषु मार्यमाणेषु च मेघवाहनादिषु राक्षसभटेषु बिभीषणेन सह संलग्ने महारणे रावणस्य तद्वधाय मुक्तायां रावणेन शक्तौ अन्तरा निपत्याङ्गीकृतायां लक्ष्मणेनामोघप्रहरणतया प्रविष्टायां तस्यां तद्वक्षःस्थलं तत्प्रहारगाढवेदनाविधुरशरीरे पतिते लक्ष्मणे स्वभ्रातृताडनावलोकनोपजातकोपेन रामदेवेन निरन्तरशरनिकरवृष्ट्या निरस्त्ररथे नाशयित्वा प्रवेशिते लङ्कापुरीं रावणे पुनर्निश्चेष्टानुजावलोकनसं-

जातशोकाच्च क्षणं मूर्छति क्षणं प्रलपति क्षणं वैकल्यमनुभवति रामदेवे तस्यामेव रात्रावेकविद्याधरे-णागत्य रामदेवस्य कथितं—यदि लक्ष्मणस्य जीवितेन प्रयोजनं तदा शीघ्रं साकेतपुरं कमपि गमयित्वा भरतमातुलस्य द्रोणमेघराजस्य पुत्र्या विशल्यायाः स्नानोदकमानाय्याभिषिच्यतामेष येन झगित्येव प्रगुणो जायते, ततस्तत्काल एव हनूमान् भामण्डलादिसहायः प्रेषितस्तत्र, तेन गत्वा भरतनरपतेः संक्षेपेण कथयित्वा तं व्यतिकरं समं तेनैव गत्वा द्रोणमेघगृहं विमोच्य पितुः सकाशाद्विशल्यां कन्यासहस्रपरिवारितां निवेश्य भामण्डलविमाने समानीता शीघ्रं, तत्करस्पर्शे विशल्यीभूतस्तत्क्षणाल्लक्ष्मणः, ततो गोशीर्षचन्दनविलिप्ताङ्गो विशल्यया स्वहस्तेन तत्कालमेव रूढव्रणः सुप्तविबुद्ध इवोत्थितो लक्ष्मणकुमारः समालिङ्गितः सतोषेण रामदेवेन, परिणायितश्च तत्रैव महाविभूत्या विशल्यां, रावणस्तु चरपुरुषेभ्यो विज्ञाय प्रत्युज्जीवितं लक्ष्मणं क्षुभितचित्तोऽनेकधा भण्यमानोऽपि सीतार्पणकार्ये मन्त्रिजनेन प्रसाध्य बहुरूपिणीं विद्यां निवार्यमाणोऽपि मन्दोदर्या समं त्रिजटया निषिध्यमानोऽपि शकुनैः पुनः संग्रामाय समाजगाम रामसैन्यं, रामोऽपि समं सौमित्रिणा सुग्रीवभामण्डलादिसैन्यसंवृतेन सम्मुखो बभूव, पुनरापतितं द्वयोरपि बलयोर्महायुद्धं, ततो लक्ष्मणेन निरन्तरबाणवृष्ट्या सर्वतो हतप्रसरो विहितो रावणः,

तेन च बहुरूपिणीं विद्यां संस्मृत्य कर्त्तुमारब्धान्यनेकरूपाणि, तेषु च खण्ड्यमानेषु अत्यन्तपीडितेन लक्ष्मणवधाय मुक्तं चक्ररत्नं, तच्च देवतापरिगृहीतं त्रिः प्रदक्षिणीकृत्य लक्ष्मणस्य दक्षिणकरे समारूढं, लक्ष्मणेन चोपारूढकोपेन क्षिप्त्वा तत्समुखं तदेव चक्रं छिन्नं रावणस्य शिरः, अत्रान्तरे निशाचरानीकं कान्दिशीकं पलायमानमालोक्य सुग्रीवबिभीषणौ संस्थापयामासतुर्नारायणपद्मशरणसमाश्रयणेन, रामलक्ष्मणौ च प्रविश्य लङ्कापुरीं पुष्पगिरिशिखरवर्त्तिपद्मोद्यानस्थितां विलोक्य सीतां परमानन्दनिर्भरौ स्थित्वा तत्र क्षणं गतौ रावणभवनं, तत्र सन्मान्य राक्षसलोकं निवेश्य यथोचितस्थानेषु परिणीयानेकराजपुत्रिकाः सीताविशल्याप्रमुखस्वस्वान्तःपुरेण समं विचित्रसुखान्यनुभवतोस्तयोरतिक्रान्तानि षट् संवत्सराणि ।

अत्र चान्तरे साकेतपुरवरादपराजितासुमित्राभ्यां चिरकालपुत्रवियोगसंतप्यमानसाभ्यां निजदुःखनिवेदनापूर्वं प्रेषितो नारदः समाजगाम तत्र, तेन च निवेदिते जननीवृत्तान्ते समं बिभीषणसुग्रीवादिभिः पुष्पकविमानाधिरूढौ सीताविशल्याप्रमुखनिजानिजावरोधजनसमन्वितौ प्रचुरविद्याधरसैन्यानुगम्यमानौ रामलक्ष्मणौ समाजग्मतुः साकेतपुरं, तदागमनमवगत्य निर्गतस्तत्संमुखो भरतराजः, परस्परसङ्गमे च सातिशयसमाश्लेषादि-

॥ १५९ ॥



स्नेहकृत्यावसाने प्रविष्टाः सर्वे परमानन्दनिर्भरा नगरीम्, आनन्दितोऽपराजितासुमित्रादिजननीजनः, कारितं भरतराजेनातिसन्तोषतो महावर्द्धनकं, स्थित्वा च कतिचिद्दिनानि रामलक्ष्मणसमर्पितराज्यो देशभूषणकेवलिसमीपे निष्क्रान्तोऽनेकसामन्तपरिकरितो भरतराजः, पालितानिष्कलङ्कव्रतश्च गतो मोक्षम् ।

इतश्च भरतप्रव्रज्यानन्तरमेव भणितो राज्याभिषेकनिमित्तं विद्याधरादिलोकेन रामदेवो ददर्श लक्ष्मणं, ततस्तथेति प्रतिपद्य रामवचनं तत्सहितेनानेनाभिषिक्तो महाविभूत्या लक्ष्मणकुमारो राज्ये, जातो नारायणाभिधा-नोऽष्टमवासुदेवो, विशल्या च तस्य पट्टमहादेवीति, तदनन्तरं च सर्वैरेवाभिषिक्तो रामः पद्मनाभाष्टमो बलदेवः सीता च तन्महादेवीति । एवं कृताभिषेकौ द्वावप्यास्थानमण्डपनिविष्टौ सूर्याचन्द्रमसाविव नृपगणपरिवारितौ भातः, ततश्च बिभीषणादीनां प्रदाय राक्षसद्वीपादिस्वस्वस्थानाधिपत्यं विसृज्य तान्निजानिजदेशेषु विहितराज्यसौस्थ्यौ यावन्निगमयतो रामलक्ष्मणौ कियन्तमपि कालं तावदन्यदा रजन्यवसाने दिव्यभवनवर्त्तिन्यां शय्यायामृतुसमयस्नाता सुखप्रसुप्ता सीतादेवी स्वप्ने द्वौ शरभपोतौ भास्वरवदनोद्भासितावत्यन्तरमणीयाकृती सुखेनोदरमनुविशन्तावद्राक्षीत्, आत्मानं च ताभ्यां सहितं विमानात्पतितमपश्यत्, ततो हर्षविषादाभ्यां सममेव स्वीकृता, स्वयमेव विबुद्धा गत्वा रामसमीप- ॥ १५९ ॥

मकथयत्स्वप्नं, तेन चादिष्टं प्रधानपुत्रयुगलजन्म, केवलं विमानाद्यत्पतिताऽसि प्रिये ! तन्न सुन्दरमतोऽस्यार्थस्य प्रतिघातार्थं विधीयतां शान्तिकर्मण्यभियोगः, तयोदितं—यथाऽऽदिशति प्राणनाथः, इतश्च तत्समय एव बभूवापन्नसत्त्वा सा, रामस्य च सीताया उपरि गाढं प्रेम समालोक्य शेषदेव्यो गुरुमत्सराध्मातान्तःकरणा सीताछिद्रान्वेषणपरायणा एकस्मिन् दिने कस्यांचिद्गोष्ठ्यामुपविष्टां सीतां बभणुः—यथा कीदृशं रावणस्य रूपमासीत् ?, वैदेह्योक्तं—न मया कदाचित्तद्रूपं निरूपितं, केवलं यदा मम समीपमागमदसौ तदाऽधोमुखी तच्चरणयुगलमहमालोकितवती, शेषदेवीभिर्भणितं—यद्येवं तदंघ्रियुग्ममेवालिख्योपदर्श्यतां, तदनुसारणेवै शेषतद्रूपमुपलक्षयिष्यामः, ततः सीतया तच्चित्तदुष्टतामजानन्त्या मुग्धतयैवालेखि वरवर्णकानादाय तत्क्रमद्वयं, गतायां च तस्यां तत्क्षणादेव प्रयोजनागतस्य रामदेवस्य शेषदेवीभिरुपदर्श्य सीतालिखितं तत्क्रमयुग्मं भणितं रामसंमुखंदेव ! तव वल्लभायाः सीताया अद्याप्येवं रावणे पक्षपातो येन तच्चरणयुगलमालिख्यैवमाराधयति, रामदेवस्तु गाम्भीर्यान्न किञ्चित्तासामुत्तरमकृत, न च सीतायास्तमभिप्रायं प्रकाशितवान्, अन्यदा च समागते वसन्तसमये क्रीडानिमित्तं महेन्द्रोदयोद्यानमनुप्राप्तो रामदेवः सीतामाललाप प्रिये ! कस्मात्त्वं किञ्चिदलसा विलोक्यसे ?, तयोदितं-

गर्भानुभावोपजातदोहदवशात्, रामेणावाचि-कीदृशो दोहदः ?, तयाऽवाचि सर्वत्र जिनबिम्बपूजाविषयः, ततस्तत्कालमेवादिष्टो राघवेण प्रतिहारी-मदादेशात् कारय सर्वजिनायतनेषु विशेषपूजा, तया (तेन) तु तथेति प्रतिपद्य तद्वचः कारिते तदादेशे महेन्द्रोदयोद्यानवर्त्तिनो नगरीजनस्य सीतालक्ष्मणसमन्वितेन (रामदेवेन) विलोक्य चिरं विविधक्रीडाः पूजाविशेषदर्शनार्थं यावदागतं जिनमन्दिरे तावदावेदितं निजदक्षिणाक्षिस्पन्दनं सीतया रामदेवस्य, सोऽवोचत्-न प्रिये ! सुन्दरमिदं, सीतयाऽवादि-स्वामिन् ! प्रतिकूलवर्त्ती विधिः किमद्यापि पुनर्जनयिष्यति प्रियविरहदुःखं ?, न तुष्ट एतावता राक्षसद्वीपप्रापणादिदुःखदानेन, रामेणोक्तम्-यद् येन यदा किञ्चिच्छुभमशुभं वा प्रिये ! किल प्राप्यम्। तत्तेन तदाऽवश्यं संप्राप्यत इह न सन्देहः ॥ १ ॥ तन्मा भूः सविषादा, देवि ! त्वमिदं विभाव्य किन्त्वधुना । सविशेषं कुरु धर्मे, समुद्यमं देवपूजादौ ॥ २ ॥ व्रज निजगृहं प्रवर्त्तय दीनाय जनाय दानमनवरतम् । येनानिमित्तमेतत् तव देवि ! निहन्यते सद्यः ॥ ३ ॥ एवमुदिता सखीपरिवृता गता स्वगृहं, कृतो विशेषेण जिनायतनेषु पूजादिनिरोपः, दापयितुमारब्धं दीनादिलोकेभ्यो यथौचित्येन प्रचुरदानं घोषणापूर्वं, कारितः शान्तिनिमित्तं स्वदेवदेवीनां पूजोद्यमं निःशेषो नगरीलोकः, रामदेवस्तु तथा सीतां भणित्वा लक्ष्मणनरेन्द्रादिलोकं स्वस्थानमनुप्रेष्य जनचेष्टाचर-

लोकनाद्यर्थमेकाक्येव लोकालक्षितस्तस्थौ तत्रैवोद्याने, अत्रान्तरे गते सकल एव राजलोके निराकुलो लोकः परदोषग्रहणलम्पटः प्रवृत्तः परस्परं प्रतिपादयितुं—पश्यत रामेणैषा सीता नीताऽपि राक्षसेन्द्रेण । पुनरप्यत्रानीता, गुणदोषविचारमविधाय ॥ १ ॥ अपहृत्य यतो नीता, प्रेमासक्तेन राक्षसेन्द्रेण । निजगेहं न च भुक्ता, प्रत्येतु क एवमिह विज्ञः ? ॥ २ ॥ यो यदनुरक्तचित्तो यद्वाऽसौ तस्य दोषमप्युच्चैः । गुणमेव समाकलयति, सीताया रामदेव इव ॥ ३ ॥ एतच्चाकर्ण्य चिन्तितं रामदेवेन—यस्याः कृते समुद्रं तीर्त्वा क्लेशेन दशमुखो निहतः । पश्यत तस्याः कीदृग् जनेन संभावना विहिता ? ॥ ४ ॥ अथवा—युक्तमिदं वदति जनो, या पुरपुरुषेण सानुरागेण । नीता निजमावासं, सा केन न हेतुना भुक्ता ? ॥ ५ ॥ चिन्तयित्वा चैवं नियुज्य चरपुरुषं जानकीशीलविषये जनविचारश्रवणार्थं गतमात्मना निजगृहं, तत्र समाहूय लक्ष्मणनरेन्द्रादीन् समागतेषु तत्स्थानं हेरिकेषु भणितं रामदेवेन-भो भोः ! पुरुषाः ! कथयत राजसमक्षं सीताविषयं लोकवृत्तान्तं, तैरुक्तं—वक्ति जनो निःशङ्कं—सीता किल रावणेन निजनगरीम् । नीत्वा नो भुक्तेति प्रत्येतु क एतदिह विज्ञः ? ॥ १ ॥ श्रुत्वा चैतद् य एवमाचष्टे—तस्य जिह्वां स्वहस्तेन लुनामीति प्रतिपादयन्नाकृष्य क्षुरिकामतिकुपितः समुत्थितः सौमित्रिः, ततो रामदेवो मा गमस्त्वं कोपामित्थम्, एवं

निर्विचारा न शोभते सतां प्रवृत्तिरित्यभिधाय पुनस्तं गृहीत्वा करे न्यवीविशदासने, भणितवांश्च—प्राणप्रियामपीमां वैदेहीं नात्र धर्तुमिच्छामि । इत्थं जनसंभावितशीलकलङ्कामिह भ्रातः! ॥ १ ॥ लक्ष्मीधर उवाच—लोकः कुटिलप्रकृति, पिशुनो गुणमत्सरी भषणशीलः। एतदपवादमात्रान्मा मुञ्च महासतीं सीताम् ॥ २॥ रामो बभाण सत्यं यत्त्वं ब्रूषे परं महानेषः । अयशःकलङ्कपङ्कः सोढुमशक्यो जनविरुद्धः ॥ ३ ॥ ततो निवार्यमाणोऽपि लक्ष्मणादिभिः समाहूय कृतान्तवदनाभिधसेनाधिपतिमादिदेश रामो——गर्भद्वितीयां सीतां नीत्वा परित्यजारण्ये, अत्रान्तरे लक्ष्मीधरो रामदेवस्योपरि रोषमाधाय समुत्थितस्ततः स्थानात् गतो निजमावासं, कृतान्तवदनस्तु यथाऽऽदिशति स्वामी तथा करोमीति प्रतिपाद्य प्रणामपूर्वं रामस्योत्थाय तत्स्थानाद् यानाशालायां रथं प्रगुणीकृत्य पुनः समाजगाम राम-समीपं, रामेणोक्तं—व्रज शीघ्रं, सर्वचैत्यवन्दनाविषयदोहदपूरणव्याजेन नीत्वा सीतामरण्ये मुञ्च, तदादेशानन्तरं कृत-प्रणामो गतो जानकीसकाशं, भणितवांश्च—देवि ! समारुह्यतां वेगेनायं रथो येन वन्दयामि त्वां रामादेशेन समग्र-चैत्यानि, ततोऽसौ तस्य कुटिलस्वभावमजानती परं प्रमोदमुद्वहमाना समारूढा रथं, नेतुमारब्धा निवार्यमाणाऽपि दुर्निमित्तशतैस्तावद्यावद्गङ्गासागरं समुत्तार्य प्रापिता महाटवीं, धृतस्तेन तत्र रथः, समुत्तार्य मुक्त्वा भूमौ सीतापाद-

योर्निपत्य शोकभरनिरुद्धगलसरणिविनिर्यद्गद्गदाक्षरेण कथितो यथाऽवस्थितो रामवृत्तान्तः, तमाकर्ण्य सावष्टम्भमानसया निवेदितं सीतया—भोः कृतान्तवदन ! मद्वचनात् वाच्यो मत्प्राणनाथो यथा—एकपद एव यद्यपि मुक्तस्नेहो ममोपरि त्वमभः । तदपि परीक्षा स्वामिन् !, शुद्धिकृते किं न मे विहिता ? ॥ १ ॥ भणित्वैवं विसर्जितः सरथो, गतोऽसौ निजनगराभिमुखं, सा त्वेकाकिनी महारण्ये तस्मिन्नालापमात्रसहायमप्यपरमपश्यन्ती पपात क्षणं मूर्छया धरणीतले, शीतलवनवातलब्धचेतना च—हा नाथ ! हा वल्लभ ! हा गुणाढ्य !, हा राम ! निर्व्याजदयानिधान ! स्वामिन् ! प्रयच्छाशु कृपां विधाय, स्वदर्शनं मे भयपीडितायाः ॥ १ ॥ इत्यादि प्रलपन्ती दृष्टा पुण्डरीकपुराद्गजबन्धनगतेन राज्ञा वज्रजङ्घेन, सुबहुप्रकारं कोमलवचनैराश्वास्य पृष्टा कथितनिजवृत्तान्ता साधर्मिकत्वेन भागिनीति प्रतिपद्य नीता स्वपुरीम् । इतश्च कृतान्तवदनो महाकष्टेन प्राप्तः साकेतपुरं, कथयामास नारायणादिसमेतस्य रामस्य सीताव्यतिकरं, स तु तमाकर्ण्य महता शोकवेगेन स्वीकृतो मुमूर्च्छ क्षणं, लब्धचेतनश्च—हा निर्घृणेन कथमिह, मया प्रिया पिशुनलोकवचनेन ! निष्कास्य निरपराधाऽपि वनचराणां कृता भक्ष्यम् ? ॥ १ ॥ इत्यादि प्रलपन् भणितो नारायणेन-किमेतेन बालजनोचितेन भ्रातः ! शोकेन ?, यद्यस्ति जीवन्ती वैदेही तत्राद्यापि तदा गत्वा समानीयतामत्र,

पश्चाद् यत्तुभ्यं रोचते तत्कुर्याः, ततो गतास्तमेव कृतान्तवदनं पुरस्कृत्य सर्वे गगनमार्गेण तं प्रदेशं, न च तां तत्रावलोकितवन्तः, प्रतिपादितवन्तश्चान्योऽन्यं—भक्षिता सा सिंहेन व्याघ्रेण वा, विलक्षवदनाः समागताः स्वपुरं, कृतवन्तस्तत्र सीतामृतकृत्यं, नगरजनस्तु सीताया रूपादिगुणनिकरमनुस्मरन् प्रवृत्तो रामं निन्दितुं, तथाहि—

एवंविधं न युक्तं शत्रोरपि निर्घृणं समाचरितुम् । यदकृत सीतादेव्यां रामो निर्व्याजभक्तायाम् ॥ १ ॥ जननयनमनोहारि व्यगणि न रूपं न निर्मलं शीलम् । न च वनवासे समसुखदुःखावस्थानमेतस्याः ॥ २ ॥ केवलपररक्तमनाः स्त्रीहत्यां गर्भघातितां चैव । अङ्गीकृत्याऽत्याक्षीदिमामहो निष्कृपो रामः ॥ ३ ॥

सीता तु पुण्डरीकपुरमनुप्राप्ता सुखेन वज्रजङ्घगृहे निवसन्ती क्रमेणासूत पुत्रयुगलं कारितं तज्जन्मनि वज्रजङ्घेन महावर्द्धनकं, उचितसमये द्वयोरप्यनङ्गलवणो मदनाङ्कुश इति कृते नाम्नी, संपद्यमानसमग्रोचितकर्त्तव्ययोश्च प्रवर्द्धमानयोर्यावदजनि कलाग्रहणयोग्यता तयोस्तावत्समागतस्तत्र सकलकलाकलापपारगोऽनवद्यविद्याबलो नभस्तलमार्गेण सिद्धार्थनामा चेल्लकः, अवतीर्णश्च भिक्षानिमित्तं जानकीभवनं, ससंभ्रमोत्थितयाऽभिवन्द्य सीतया प्रतिलाभितः स्वहस्तेनोचितभक्तपानकैः, भुक्तोऽसौ तद्गृह एवैकदेशमनुज्ञाप्य, तदनु सुखासीन-

॥ १६१ ॥

समागत्य जनकतनयया पृष्टः सुखविहारः, कथयित्वाऽसौ पप्रच्छ तद्वृत्तान्तं, सा च रुदन्ती निवेदितवती पुत्र-
जन्मपर्यन्तं निजोदन्तं, ततस्तत्सिद्धार्थेन निरीक्ष्य तौ तत्पुत्रकौ मा रोदस्त्वं महासति ! ते सर्वं सुन्दरं भविष्यति, यतः
सल्लक्षणयुक्तावेतौ ते पुत्रकौ, समाश्वासिता चैवमसौ धृतवती तं तत्रैव चेल्लकं कतिचिद्दिनानि, स्तोककालेनैव ग्राह-
यामासासौ सकलकलाकलापं तौ कुमारकौ, समुचितोदात्तपूजापुरस्सरं गन्तुमिच्छुर्विमुक्तः सिद्धार्थः, कामिनीजनमनो-
हारि समारूढौ प्रौढतारुण्यं कुमारौ, विज्ञाय वज्रजङ्घोऽनङ्गलवणस्य पाणिग्रहणार्थं च स्वभार्याया लक्ष्मीमत्या दुहितरं शशि-
चूलां समं द्वात्रिंशत्कन्याभिर्वृतवान्, परिणायितवांश्च प्रशस्तदिवसे, मदनाङ्कुशस्य च योग्यां पृथुराजतनयां कनकमाला-
मनुस्मृत्य तद्याचनाय पृथुराजस्य दूतं व्यसर्जयत्, गत्वा दूतेन कथिते प्रयोजने भणितं पृथुराजेन—यस्य कुलं न
ज्ञायते तस्य कथं निजपुत्रीं प्रयच्छामि ?, ततो दूतेन गत्वा प्रतिपादिते वज्रजङ्घस्य तदुपरि समरसंरम्भं विज्ञाय
कुमाराभ्यां विज्ञाप्य वज्रजङ्घं स्वयमेवागत्य पृथुराजं निगृह्य संग्रामे तत्पुत्री कनकमाला गृहीता परिणीता च पृथुराज-
दत्ता मदनाङ्कुशेन, तत्प्रभृत्यन्येऽपि स्वपराक्रमाक्रान्ताः कुमाराभ्यां सेवां ग्राहिता बहवो राजानः, समतिक्रान्तेषु
१८
केषुचिद्दिनेषु पृष्टा सीता कुमाराभ्यां—कोऽस्मत्पिता ? इति, ततोऽनुस्मृतप्राचीनव्यतिकरा रुदती जनकतनया निवेदया-

मासः मूलत एवारभ्य यथा रामस्य पित्रादेशेन वनगमनं यथा तत्रात्मनोऽपहारो यथा तेन निमित्तेन रावणमारणं यथा पुनः साकेतपुरागमनं यथा च युवयोर्गर्भगतयोर्दोहदपूरणव्याजेनारण्ये मम त्याजनं तथा सर्वमकथयत्, ततो निजमातुर्निष्कारणपराभवकरणकुपितौ गतौ वज्रजङ्घं विज्ञाप्य तेन सह सर्वबलसमन्वितौ रामलक्ष्मणयोरुपरि, समारब्धो महासङ्ग्रामः, क्षणेन च निरस्त्रीकृतौ रामलक्ष्मणौ, ततो हलमुशलप्रहरणव्यग्रहस्तो रामोऽनङ्गलवणस्योपरि लक्ष्मणोऽपि चक्रपाणिर्मदनाङ्कुशस्य धावितः, तानि चामोघान्यपि प्रहरणानि स्वगोत्रे न प्रभवन्तीति ताभ्यां क्षिप्तान्यपि तयोर्नापकारं मनागपि कृतवन्ति, केवलं कुमरप्रदक्षिणाकरणपूर्वं रामलक्ष्मणकरगोचराण्ये–[ ग्रं० ४५०० ] वाभूवन्, ततो विलक्षवदनौ तौ चिन्तितवन्तौ–किं न भवाव आवां बलदेववासुदेवौ ?, अत्रान्तरे कुतोऽप्यवग-ततदीयसङ्गरव्यतिकरः सह नारदेन समागतस्तयोरेव कुमारयोरध्यापकः सिद्धार्थनामा चेल्लकः, ततः कथितमे-ताभ्यां रामदेवस्य–त्वत्पुत्रावेवैतौ तावनङ्गलवणमदनाङ्कुशनामानौ ययोर्गर्भगतयोर्भवता वैदेही महारण्ये त्याजिता, यानि चैतान्यमोघप्रहरणानि भवदीयान्येतयोर्नापकारं कृतवन्ति तत्र 'स्वगोत्रे न प्रभवन्त्येतानी'ति न्याय इति सोन्मनीभूः, केवलं लक्ष्मणमप्यमुमर्थं बोधयित्वा परित्यक्तसङ्ग्रामः संभाषस्व कुमारौ, तथा सीताऽपि नारदादवगतवृत्तान्तेन प्रथममेव कुमारयोः

समरसंरम्भमवलोक्य भामण्डलेन पुण्डरीकपुराद्त्रानीता कुमारशिबिरवर्तिनी तिष्ठति, तस्मात्सर्वमिदं शीघ्रमात्मीक्रियतामिति, ततो रामदेव एवमुक्तो भूत्वा लक्ष्मणस्य निकटवर्त्ती निवेद्य च तस्य तं वृत्तान्तं समं तेनैव समकालं स्वीकृत आनन्दखेदाभ्यां बाष्पजलक्षालितकपोतलः सुतसमीपमागन्तुं प्रवृत्तः, तौ त्वागच्छन्तौ पितृपितृव्यावालोक्य परित्यक्तरथौ स्नेहनिर्भरं झगित्यागत्य पतितौ तत्पादयोः, रामदेवस्तु गाढमाश्लिष्य तनुजौ रुदित्वा क्षणं विलपितुमारेभे—हा पुत्र ! अकार्यमाचरितं मया यद्गर्भगताभ्यां युवाभ्यां सह त्यक्ता त्वन्माता, हा प्रिये ! कथं जीविताऽसि तदा क्षुद्रसत्त्वसङ्कुले मुक्ताऽरण्ये, ? ततो लक्ष्मण उवाच-भ्रातः ! किमेवं शोच्यते ?, न श्रुतं किं त्वया ?-रणे वने शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥ १ ॥ तन्मुक्त्वा शोकं समागम्यतामितः प्रविश्यतां सम कुमारलोकेन निजनगर्यां, एतच्चावगम्य सीता प्रवरविमानारूढा गता पुण्डरीकपुरं, रामस्तु लक्ष्मणवचनमुपश्रुत्य वज्रजङ्घं करे गृहीत्वा त्वमेव मे परमबान्धवो यद्गृहे वैदेही स्थिता वृद्धिं गतौ चैतौ मत्पुत्रावित्यभिदधत् कुमारौ च वामदक्षिणपार्श्वयोरात्मनः कृत्वा समं लक्ष्मणप्रमुखसमस्तराजलोकेन महाविभूत्या पुष्पकविमानारूढः प्रविवेश नगरीम् । अत्रान्तरे विज्ञप्तं विभीषणादिभिः-स्वामिन् ! आनाय्यतां जनकपुत्री, दुःखमास्ते खलु सा

विदेशवर्त्तिनी, ततो रामदेवो मन्युभरनिरुद्धगलसरणिरवदत्-को नेच्छति वैदेह्या आगमनं?, केवलं विषमस्वभावो लोकः, तं यदि सा कथञ्चित्प्रत्याययितुं शक्नोति तदा तया सह ममैकत्रावस्थानं नान्यथेति, तत एवमस्त्विति प्रतिपन्ने बिभीषणादिभिर्मीलितः सकलो लोको नगरीबहिःप्रदेशे, प्रेषितः सीतानयनाय पुष्पकविमानेन पुण्डरीकपुरं सुग्रीवो, गतः क्षणमात्रेण आनीता तेन स्थिता साकेतपुरबहिर्वर्त्तिनि महेन्द्रोद्याने, अत्रान्तरे समागत्य नारायणेन स्वयं विहितप्रणामेनार्घोत्क्षेपपूर्वमाभाषिता सीता-देवि ! विधाय प्रसादमभ्युपगम्यतां नगरीप्रवेशः, तयोदितं-यावल्लक्ष्मण ! मया नात्मा शोधितस्तावन्नेच्छामि पुरीं प्रवेष्टुं, ततस्तन्निर्बन्धमवबुध्य कथितं रामस्य, समागतः स्वयं तत्र, भणिता च विरचितप्रणातिः सुखासनोपविष्टा प्रियाऽनेन—दयिते ! शक्नोषि कथञ्चित् स्वकलङ्कमपनेतुं ?, साऽब्रवीत्—पञ्च दिव्यानि लोके—तुलारोहणं १ ज्वलनप्रवेशो २ विषकवलनं ३ फालग्रहणं ४ शस्त्रधारास्वापश्च ५, तदेतेषु कतमेनात्मानं शोधयामि ?, राम उवाच—ज्वलनेन, ततः प्रतिपन्ने तया खानिता हस्तत्रिशतप्रमाणा समचतुरस्रा महावापी राघवेण, पूरिता खदिरकाष्ठानां, ज्वलितो ज्वालाकलापदुरालोको ज्वलनः, आहूता सीता, भणिता च—खललोकसंभावितकलङ्कपङ्ककलुषं सुवर्णमिव शोधयात्मानमस्मिन् ज्वलितहुतभुजि, साऽपि यथाऽऽदिशति स्वामी तथा करोमीत्यभि-

धाय चलिता विकसितकमलवदना ज्वलनाभिमुखं तुष्टमानसा, ततः समस्तोऽपि लोको हाहारवपुरस्सरं भणितुं प्रवृत्तः—भो भो ! न सुन्दरमिदं रामदेवेन कर्तुमारब्धम्, अतिनिर्घृणं कर्म समादिष्ट सीतायाः, न खल्वस्या मनागपि शीलखण्डनां संभावयामो, मुखराग एव प्रकटयति प्राणिनां मालिनशीलतां, न चास्याः किमपि कुशीलितालक्षणमालोक्यते, अत्रान्तरे भणितं सिद्धार्थेन—रामदेव !—यदि मेरुः पातालं प्रविशति शुष्यति च लवणजलराशिः । तदपि न शीलभ्रंशः संभाव्यो जनकतनयायाः॥ १ ॥ किंवा प्रविष्टयैव हुताशने शोधित एवात्माऽनया, प्राप्तो यतो लोकमध्ये साधुवादः, निवार्यतामिदानीं, रामेणोक्तं—सिद्धार्थ ! दुर्जनप्रकृतिरेष लोकः, क्षणेन विसंवदति क्षणेन संवदति, तद्यावन्न हुतभुजि निर्वर्टितोऽस्याः शीलकनकगुणस्तावन्न निवर्त्तयामि, सीताऽपि गत्वा ज्वलनान्तिकं बभाणार्हत्सिद्धादिनमस्कारपूर्वं—भो भो लोकपालाः !—रामं मुक्त्वाऽन्यनरो मनसाऽपि हि यदि मया समभिलषितः । तद्दहताद्दहनो मां हिमकणशीतोऽन्यथा भवतु॥ १ ॥ इत्यभिधाय यावत्तत्र दत्तवती झम्पां तावदत्रान्तरे जगद्भूषणमुनेः केवलोत्पत्तौ महिमां कर्तुमागतेन शक्रेणादिष्टो हरिणकवेषः—कुरु महासत्यः सीतायाः सान्निध्यं, ततोऽसौ विमलजलापूर्णं कमलकुमुदकुवलयकह्लारशतपत्रसहस्रपत्रोपशोभितां वापीं विधायैकस्मिन् सहस्र-पत्रपद्मे समुपावेशयत् सीतां, मुमुचुः सुरसिद्धगान्धर्वादयो गगनगतास्तदुपरि कुसुमवृष्टिं, जुघुषुश्च—अहो ! महा-

सत्याः शीलमाहात्म्यं, प्रहताश्चानेकशः प्रतिशब्दापूरितभुवनाविवरा देवैर्दुन्दुभयः, किं बहुना ?, परितुष्टः सकलो लोकः, पतितावागत्य सीतायाः पादयोर्लवणाङ्कुशौ, अत्रान्तरे प्रलयकालक्षुभिताम्भोराशिगुरुलहरीसमूहमिव निखिललोकप्लावनसमर्थं वापीसमुच्छलज्जलपूरमवलोक्य हा देवि ! महासति ! जनकतनये ! रक्ष रक्षानेनोन्मार्गे प्रवृत्तेन वापीपानीयेन ह्रियमाणममुमशेषलोकमिति जनस्य करुणप्रलापमाकर्ण्य समुपजातदयापरिणतिः सीता देवी शीघ्रमुत्तीर्य द्वाभ्यामपि कराभ्यां पश्चान्मुखं प्रेरयित्वा सलिलं वापीप्रमाणमेव चकार, स्वयं च पुनस्तस्मिन्नेव पद्मासने समुपाविशत्, ततः स्वस्थीभूतो लोकः सीताऽग्रत एव विमलशीलप्रशंसां कुर्वाणो नर्त्तितुमारेभे, रामस्तु–कमलनिषण्णां श्रियमिव विलोक्य सीतां महासतीं तत्र । भणति स्मैकं विप्रियममुं क्षमेथा जनकतनये ! ॥१॥

सीता तु–किं विप्रियं तव प्रिय ! पूर्वार्जितकर्मपरिणतिरियं तु । यन्निर्मलशीलायाः अप्ययशःपङ्क एवं मे ॥ १ ॥

इति भणन्ती समुत्थाय पद्मासनान्निर्गत्य वाप्याः पादयोर्निपत्य रामस्य गता जिनमन्दिरं, वन्दितजिनाबिम्बा च तदेव निमित्तमूरीकृत्य सञ्जातवैराग्यसमच्छलितचरणपरिणामा क्षमयित्वा सकललोकं चकार पञ्चमुष्टिकं लोचं जगाम चार्यिकाप्रतिश्रयं, याचितवती तत्समीपे प्रणामकरणपूर्वं भगवदर्हत्प्रणीतां दीक्षां, तपस्विनीभिस्तु नीता सा जगद्गु-

षणकेवलिसमीपं, दीक्षिता च विधिना रजोहरणादिवेषसमर्पणापुरस्सरं सा तेन, ततस्तमर्थमवगम्य रामदेवः शोकापूर्णहृदयोऽनेकविधासमञ्जसप्रलापान् कुर्वाणस्तत्रैवानीतो लक्ष्मणेन, ददर्श व्रतिनीं सीताम्, अभिवन्द्य केवलिनं वन्दिता भावसारं समं लक्ष्मणादिभिः, कृतां च केवलिना धर्मदेशनामाकर्ण्य प्रतनुशोकाः सवृत्ता राघवादयः, पुनरभिवन्द्य गताः स्वस्थानं, निष्कलङ्कश्रामण्यमनुशील्य शीताऽनशनविधिना मृत्वा जाताऽच्युतेन्द्रत्वेन। अन्यभवे तु सीता मृणालकुन्दाभिधाननगरवास्तव्यपुरोहितपुत्रस्य श्रीभूतिनाम्नः सरस्वतीभार्यायाः पुत्रिका वेगवती नामिका बभूव, तया च कदाचिद्यौवनमदमत्तया बहिः कायोत्सर्गेऽवस्थितं साधुं सुदर्शनाभिधानं लोकेन वन्द्यमानमालोक्यालीकमेव लोकस्याग्रे भणितं—भो भो लाकाः! अयमत्र मया महेलया सह दृष्टस्तत्किमेनमेवं वन्दध्वं?, ततस्तदाकर्ण्य लोको विपरिणतस्तं साधुं निन्दितुमारेभे, तपस्वी तु तच्छ्रुत्वा मनसैवाभिग्रहं जग्राह—यावन्ममैष कलङ्को नापगतस्तावन्न मया पारणीयः कायोत्सर्गः, अत्रान्तरे च यथासन्निहितदेवतया मुनिपक्षपातेन वेगवत्या उच्छूनीकृतं वदनं, पित्रा च श्रीभूतिना विज्ञातसाधुव्यतिकरेण संतर्जिता परुषवचनैर्गृहं गता वेगवती, ततोऽसौ समागत्य साधुसमी[प]ं गाढजातानुतापा बभाषे सकललोकप्रत्यक्षं—भगवन्! निर्दोषस्त्वं, केवलं मया दुस्तुण्डया तवालीकमेवाऽऽलप्रदानं कृतं, तत्क्षमणीयो ममा-

यमेकोऽपराधो भवता, लोकोऽप्येवमेव प्रत्यागतसंवेगया तया प्रत्यायितः, ततः परितुष्टमानसो जनः पुनः सुदर्शनमुनेः पूजापरो बभूव, तत्प्रभृति चैषा सुश्राविका समजनि, कालान्तरे च स्वयंभूनाम्ना नृपेण श्रीभूतिं मारयित्वा बलात्कारेण भुक्ता सा चकार निदानम्—अन्यजन्मनि तव वधायाहं भवेयं, ततोऽनेन भीतेन मुक्ता साध्व्या अरिकन्याख्यायाः समीपे गृहीतपालितव्रता ब्रह्मविमाने देवीत्वेनोत्पद्य स्वायुःक्षये ततश्च्युता निजनिदानानुभावेन हिण्डितसंसारा रावणमरणनिमित्तमेषा सीता समुत्पन्ना, स्वयम्भूजीवश्च रावण इति, प्रसङ्गागतं चैतदुक्तं, प्रकृतं त्वेतावदेव यद् वेगवतीभवे सीतया साधोरालप्रदानं कृतं तेन कर्मविपाकेनायं कलङ्क एवमवाप, ततः पश्चात्तापवशेन यल्लोकसमक्षमात्मनिन्दापूर्वं तपस्विनः पुनर्दोषं निराचकार मं च प्रतिपेदे तेन शुद्धशीलताबलेन शुद्धिं च लेभे । इत्येवं च सुभद्रायाः सीतायाश्चेह परत्र च कल्याणप्राप्तिमवगम्य चतुर्थव्रते यत्नः कार्यः इत्युपदेशपरो गाथाभावार्थः ॥ व्याख्यातं गुणद्वारम्, अधुना यतनोच्यते—

छण्णंगदंसणे फासणे य गोमुत्तगहणकुस्सुमिणे ।
जयणा सव्वत्थ करे इंदियअवलोयणे च तहा ॥ ५३ ॥

छन्नं—अप्रकटं तच्च तदङ्गं च—शरीरावयवस्तस्य दर्शनम्—अवलोकनं छन्नाङ्गदर्शनं तस्मिन्, तथा स्पर्शनं-छुतिश्छन्नाङ्गस्यैव तस्मिन्, 'च' समुच्चये, तथा गवां मूत्रं गोमूत्रं—सुरभिप्रश्रवणं तस्य ग्रहणम्-उपादानं तच्च कुत्सितः स्वप्नः कुस्वप्नश्च-दुःस्वप्नस्तत्तथा तस्मिन्, समाहारत्वादेकवचने, गोमत्रग्रहणे कुस्वप्ने, एतस्मिंश्चतुष्टयेऽपि किमित्याह—' जयणा सव्वत्थ करे गत्ति ' यतनां ' गुरुलाघवालोचनप्रवृत्तिरूपां ' सर्वत्र ' सर्वस्मिन् ' कुर्यात् ' विदध्यात्, एतदुक्तं भवति—पुरुषेण गृहीतचतुर्थाणुव्रतेन स्त्रीणां स्त्रीभिश्च पुरुषाणामङ्गोपाङ्गानि नोपेत्यकरणेन द्रष्टव्यानि स्पृष्टव्यानि वा, दृष्टस्पृष्टेषु च कथञ्चित्त तेषु रागबुद्धिः कार्या, यच्च गोमूत्रग्रहणं तदपि गोयोनिमर्दनेन न कर्त्तव्यमेव, किन्तु यदा स्वभावेनैव मूत्रयति गौस्तदा तद्ग्राह्यं, आत्यन्तिककार्ये तु गोयोनिमर्दनेऽपि तत्कोमलस्पर्श-सुखाभिषङ्गो न विधेयः, कुस्वप्ने तु स्त्रीसेवादिलक्षणे एवं यतना—प्रथममेव धर्मध्यानपरेण पञ्चनमस्कारमङ्गलपाठपूर्वं ' आदावत्यभ्युदया मध्येशृंगारहास्यदीप्तरसाः । निकषे विषया बैभत्स्यकरुणलज्जाभयप्रायाः ॥ १ ॥ यद्यपि निषेव्यमाना मनसः परितुष्टिकारका विषयाः । किम्पाकफलादनवद्भवन्ति पश्चाददतिदुरन्ताः ॥ २ ॥ इत्यादिभावना-जनितवैराग्येण जन्तुना स्वप्तव्यं येन तथाविधकुस्वप्नलाभ एव न भवति, अथ कथञ्चिन्निद्रापारवश्ये मोहोद्रेका-

कुर्वति तदा तत्कालमेवोत्थाय ईर्यापथिकीप्रतिक्रमणपूर्वमष्टोत्तरशतोच्छ्वासप्रमाणः कायोत्सर्गः कार्य इति, न केवल-मेषु सर्वेषु यतनां कुर्याद्, 'इन्द्रियावलोकने च तथा' इन्द्रियाणां-स्पर्शनादिकरणानामवलोकनं-दर्शनमिन्द्रियाव-लोकनं तस्मिंश्च, तथा प्राग्वदेव यतनां कुर्यादिति सम्बन्धः, उक्तं चैतच्छय्यम्भवादिभिः-'अंगपच्चंगसंठाणं, चारु-ल्लवियपेहियं । इत्थीणं तं न निज्झाए, कामरागविवड्ढणं ॥ १ ॥ गुज्झोरुवयणकक्खोरुअंतरे तह थणंतरे दट्ठुं । साहरइ तओ दिट्ठिं नय बंधइ दिट्ठिए दिट्ठिं ॥२॥" इति गाथार्थः ॥५३॥ गतं यतनाद्वारम्, अतिचारद्वारमस्यैवाह—

परदारवज्जिणो पंच हुंति तिण्णि उ सदारसंतुट्ठे ।
इत्थीए तिण्णि पंच व भंगविगप्पेहिं अइयारा ॥ ५४ ॥

इह व्रते पञ्चातिचारा इत्वरपरिगृहीतागमनापरिगृहीतागमनानङ्गक्रीडापरवीवाहकरणकामभोगतीव्राभिला-षाख्याः, एतद्व्रतप्रतिपत्ता द्विविधः—एकः परदारवर्जकोऽपरः स्वदारसन्तोषी, अथवा नरः स्त्री वा, अनयोश्चैतद-तिचारकृतो यो विशेषस्तं दर्शयति—'परदारवर्जिनः' अन्यकलत्रत्यजनशीलस्य पञ्चातिचारा इति चरमपादान्तात् संबध्यते 'भवन्ति' जायन्ते, 'त्रयः' त्रिसङ्ख्या एव तोरेवार्थत्वात् 'स्वदारसन्तुष्टे' निजकलत्रसन्तोषिणि,

कथमिति चेद्ब्रूमः परदारवर्जी स एव भण्यते यः परदारा मया न भोक्तव्या इति नियमयति, तस्य चेत्वरकालपरप- रिगृहीतवेश्यायां गमनमाचरतः कथञ्चित्तस्याः परदारत्वात्स्वबुद्ध्या च तेन वेश्येयमिति पर्यालोचनाद् भङ्गाभङ्गरूप- त्वेनेत्वरं—स्तोककालं परिगृहीता-स्वीकृता भाटीप्रदानेन नियतकालं सा तथा, वेश्येत्यर्थः, तस्यां गमनमतिचारः १ तथा अपरिगृहीता—अनाथकुलाङ्गना तस्यां गमनं यत्तदपि तस्या लोके परदारत्वेन रूढत्वात्कामुकाभिप्रायेण च भर्त्राद्य- भावेनापरदारत्वाद्भङ्गाभङ्गरूपतया तस्यातिचारः २ स्वदारसन्तुष्टस्य तु स्वकलत्रं मुक्त्वाऽन्यस्य वर्जितत्वादेतास्मिन् द्वयेऽपि भङ्ग एवेति भाव्यम्, अग्रेतनास्तु त्रयो द्वयोरपि तुल्या एव, तथाहि-अनङ्गक्रीडा तावन्निष्पन्नप्रयोजनस्या- हार्यैश्चर्मादिघटितप्रजननैर्योषितामवाच्यदेशासेवनं कुचकक्षोरुवदनादिषु रमणं वाऽभिधीयते, सा च यद्यपि स्वदारसन्तुष्टेन स्वकलत्रे परदारवर्जिना तु वेश्यास्वकलत्रयोः परकलत्र इव न प्रतिषिद्धा तथाऽपि ताभ्यामत्यन्तपा- पभीरुतया ब्रह्मचर्यमादातुकामाभ्यामपि वेदोदयासहिष्णुतया यापनामात्रार्थं स्वदारसन्तोषपरदारवर्जने प्रतिपन्ने, तन्मैथुनमात्रेणैव च यापनायाः संभवादर्थतोऽनंगक्रीडाऽपि परिहृतैव ३, एवं परेषां-स्वापत्यव्यतिरिक्तजनानां स्नेह- सम्बन्धादिना परिणयनविधानं परविवाहकरणम् ४ तथा काम्येते—अभिलष्येते यौ तौ कामौ—शब्दरूपलक्षणौ भुज्यन्त

इति भोगाः गन्धरसस्पर्शास्तेषु तीव्राभिलाषः-अत्यन्ततदध्यवसायित्वं वाजीकरणादिनाऽनवरतसुरतसुखार्थं मदनोद्दीपनमितियावत्, ॥ एतावपि परमार्थतः प्रत्याख्यातौ एव, अतः कथञ्चित्प्रत्याख्यानप्रवृत्तेर्भङ्गाभङ्गरूपत्वेनातिचारत्वमेषां त्रयाणामपि सिद्धम् । अन्ये त्वनङ्गक्रीडामेवं भावयन्ति–तौ हि स्वदारसन्तोषिपरदारवर्जकौ निधुवनमेव व्रतविषय इति स्वकीयकल्पनया तत्परिहरन्तौ यदा वेश्यादौ परदारेषु च यथाक्रममालिङ्गनादिरूपामनङ्गक्रीडां कुरुतस्तदा व्रतसापेक्षत्वात्तयोरतिचारोऽनङ्गक्रीडा, तथा स्वदारसन्तोषिणा स्वकलत्रादितरेण च स्वकलत्रवेश्याभ्यामन्यत्र मनोवाक्कायैर्मैथुनं न कार्यं न च कारणीयमित्येवं यदा प्रतिपन्नं व्रतं भवति तदा परविवाहकरणस्तत्कारणमर्थतोऽनुष्ठितं भवति, तद्व-तीच मन्यते विवाह एवायं मया विधीयते, न मैथुनमिति, ततो व्रतसापेक्षत्वाददतिचार इति शेषः, प्रश्नोत्तरविचारः प्रथमपञ्चाशकवृत्तितोऽवसेयः, 'इत्थीए तिन्नि पंच वे' ति स्त्रियास्त्रयः पञ्च वा अतिचारा इत्यत्रापि सम्बन्धः, तत्र त्रयस्तावदेवं–स्वपुरुषसन्तोषपरपुरुषवर्जनयोः स्त्रिया विशेषाभावात् स्वपुरुषव्यतिरेकेणान्येषां सर्वेषामपि परपुरुषत्वेनेष्टत्वादनङ्गक्रीडादयः स्वदारसन्तोषिण इव स्वभार्यायां स्वपुरुषविषयास्त्रय एवातिचाराः, आद्यस्तु यदा स्वकीयपतिः स्वपत्न्या वारकदिने परिगृहीतो भवति तदा सपत्नीवारकमतिक्रम्य तं परिभुञ्जानायां

अतिचारः, द्वितीयस्त्वतिक्रमादिना परपुरुषमभिसरन्त्याः समवसेयो ' भङ्गविकल्पैः ' अतिक्रमादिभङ्गनानात्वैः, प्राग्व्याख्यातानेकविधव्याख्याभङ्गैर्वाऽतिचाराः अतिक्रमा इति गाथार्थः ॥ ५४ ॥ उक्तमतिचारद्वारमधुना भङ्ग-द्वारमष्टममस्याभिधीयते—

इत्थी पुरिसेण समं, विसयपसंगं करेइ दप्पेण ।
तइया भंगो जायइ अइयारो अन्नहा होइ ॥ ५५ ॥

' स्त्री ' ललना ' पुरुषेण ' नरेण ' समं ' सार्द्धं ' विषयप्रसङ्गं ' मैथुनासेवनं ' करोति ' विदधाति ' दर्पेण ' मदेन व्रतातिचाराभीतत्वेन यदेति यत्तदोर्नित्याभिसम्बन्धाल्लभ्यते ' तदा' तस्मिन् काले ' भङ्गः ' विनाशः चतुर्थ-व्रतस्येति शेषः 'जायते' उत्पद्यते, 'अतीचारः' उक्तस्वरूपः 'अन्यथा' अनाभोगादिना सशूकस्य 'भवति' संपद्यत इति गाथार्थः ॥ ५५ ॥ गतं भङ्गद्वारमधुना भावनोच्यते—

२९ अट्ठारसहा बंभं जे समणा धारयंति गुत्तिजुयं ।
बहुसावज्जं नाउं तेसि पणमामिऽहं निच्चं ॥ ५६ ॥

अष्टादशभिः प्रकारैः पूर्वोक्तैरेवाष्टादशधा 'बम्भ' ब्रह्मचर्यं ये 'श्रमणाः' साधवो 'धारयंति' बिभ्रति गुत्तिभिः उक्तस्वरूपनवब्रह्मगुप्तिभिर्युतं-सहितं गुप्तियुतं 'बहुसावद्यं' बहु-प्रभूतं यथा भवत्येवं सावद्यं-सपापं विषयप्रसङ्गमिति सामर्थ्याद्गम्यते 'ज्ञात्वा' अवबुध्य, तथा चोक्तं हरिभद्रसूरिणा-"प्राणिनां बाधकं चैतच्छास्त्रे गीतं महर्षिभिः। नलिकातप्तकणकप्रवेशज्ञाततस्तथा ॥ १ ॥" आगमेऽप्युक्तम्-"मूलमेयमहम्मस्स, महादोससमुस्सयं। तम्हा मेहुणसंसग्गिं, निग्गंथा वज्जयंति णं ॥ २ ॥" ति 'तेसिं' ति, तेभ्यः 'प्रणमामि' प्रणिपताम्यहं 'नित्यं' सदेति गाथार्थः ॥ ५६ ॥ उक्तं भावनाद्वारं, तद्भणनाच्च नवभिरपि द्वारैः समर्थितं चतुर्थाणुव्रतं, अधुना पञ्चमस्यावसरः, तदपि यादृशादिभिर्नवभिर्द्वारैर्व्याख्येयमतो 'यथोद्देशं निर्देश' इतिन्यायात्प्रथमं यादृशद्वारेणाह—

मुच्छा परिग्गहो इह अइरित्त असुद्ध तह ममत्तेणं।
एयस्सउ जाविरई सरूवमेयं तु नायव्वं ॥ ५७ ॥

मूर्च्छा-गार्ध्यं परिग्रहणं परिग्रहः-स्वीकार उक्त इति शेषः, क?-'इह' जिनप्रवचने, तथा चोक्तम्-"जंपि वत्थं व पायं वा, कम्बलं पायपुंछणं। तंपि संजमलज्जट्ठा, धारिंती परिहरंति य॥ १ ॥ न सो परिग्गहो वुत्तो, नायपुत्तेण

ताइणा । मुच्छा परिग्गहो वुत्तो, इइ वुत्तं महेसिणा ॥ २ ॥ "स च परिग्रहोऽतिरिक्ते—प्रमाणाधिके वस्तुनि, अयमर्थः-प्रभूतवित्तोपार्जनायामप्यसन्तुष्टतायां, 'असुद्ध'त्ति प्राकृतसूत्रशैल्या 'अशुद्धेन' आधाकर्मादिना परिग्रहः, इदमुक्तं भवति—उपेत्य करणकारणादिनाऽशुद्धोपायेन गृहाद्युत्पादयतः परिग्रहः, 'तथे' ति समुच्चये ममत्वेन धनधान्यादेः परिग्रहः, अयमभिप्रायः—निजसत्तया धृतस्य धनधान्यादेरुपरि यन्मम भावो ममत्वं-ममेदमिति परिणतिस्तेनापि परिग्रहः, एतस्य परिग्रहस्य 'तुः' विशेषणे प्रोक्तरूपस्येति विशेषयति, या 'विरतिः' निवृत्तिः 'स्वरूप' स्वभावः, एतत्तु-एतदेव 'ज्ञातव्यं' बोध्यमिति गाथार्थः ॥ ५७ ॥ उक्तं प्रथमद्वारेणेदम्, अधुना भेदद्वारेण वाच्यं, तच्च यद्यपि निर्भेदं तथाऽपि विषयद्वारेण भेदवद्, अतस्तन्मुखेनैवास्य भेदानभिधातुमाह—

खेत्तंवत्थुहिरण्णंसुवण्णधणधन्नकुवियपरिमाणं ।
दुपयं चउप्पयंपिय नवहा तु इमं वयं भणियं ॥ ५८ ॥

नवभिः प्रकारैः नवधा 'तुः' एवार्थे नवधैवेदं—परिग्रहपरिमाणलक्षणं पञ्चमं व्रतं 'भणितं' प्रतिपादितं, तीर्थकरादिभिरिति शेषः, इयं गाथाचतुर्थपादव्याख्या, कथं पुनर्नवधेति चेदत्राह—'क्षेत्रं' सेतुकेतुसेतुकेतुरूपं,

तत्र यन्नद्यादिजलेन पादावर्त्तारघट्टादिभिः सिच्यते तत्सेतु, यत्तु वर्षाकालजलेनैव तत्केतु, यत्तूभयसेकं तत्सेतुकेतु, तद्विषयं परिमाणमपि क्षेत्रमित्येको भेदः, तथा वास्तु खातमुच्छ्रितं खातोच्छ्रितं च, तत्र खातं—भूमिगृहं उच्छ्रितं-धवलगृहं खातोच्छ्रितं-भूमिगृहोपेतमेव धवलगहं तद्विषयं परिमाणमपि वास्तु द्वितीयो भेदः, हिरण्यं-घटितकनकं तद्विषयं व्रतमपि हिरण्यं तृतीयो भेदः, तथा सुवर्णं च धनं च धान्यं च कुप्यं चेति द्वन्द्वस्तेषां परिमाणं—परिमितिः, परिमाणशब्दस्य प्रत्येक सम्बन्धात् सुवर्णपरिमाणं धनपरिमाणमित्यादि द्रष्टव्यम्, एते चत्वारो भेदाः पूर्वैस्त्रिभिः सह सप्त, यथा क्षेत्रं हिरण्यमिति अनुस्वारोऽलाक्षणिक एव, ततश्च क्षेत्रं च वास्तु चेत्यादिद्वन्द्वे एतेषां परिमाणमिति षष्ठीतत्पुरुषे च परिमाणशब्दस्य प्रत्येकं सम्बन्धात्क्षेत्रपरिमाणमित्यादयः सप्त भेदाः, 'द्विपदं चतुष्पदमपि चे' ति भेदद्वयसहिता नव, एवं नवधैवेदं भणितं, भावना तु सर्वत्र पूर्ववद् दृश्या, सुवर्णं च घटितसुवर्णं, धनं च गणिमधरिममेयपारिच्छेद्यभेदाच्चतुर्विधं, तत्र गणिमं पूगनालिकेरादि गण्यत इतिकृत्वा, धरिमं खण्डगुडादि, तुलाया ध्रियत इतिकृत्वा, मेयं घृतादि मीयते कर्षादिभिरितिकृत्वा, पारीक्ष्यं द्रम्मादि 'परीक्ष्य' परिच्छिद्य गृह्यत इति त्वा, धान्यं च गोधूमशाल्यादि, कुप्यं सुवर्णराजताभ्यामन्यत्ताम्रपात्रादिगृहोपस्करः, द्विपदं दासदास्यादि, च-

तुष्पदं—गवाश्वादीति, 'अपिः' समुच्चये, चः स्वगतानेकभेदसूचकोऽवगन्तव्य इति गाथार्थः ॥ ५८ ॥ उक्तं भेदद्वारमस्याधुना यथा जायत इदं तथोच्यते—

अत्थं अणत्थविसयं संतोसविवज्जियं कुगइमूलं ।
नाउं तप्परिमाणं कुणंति संसारभयभीया ॥ ५९ ॥

'अर्थं' वित्तं 'ज्ञात्वा' विदित्वेति सम्बन्धः, कीदृशम् ?—'अनर्थविषयं' व्यसनगोचरं, किंविशिष्टं पुनः ? इत्याह—सन्तोषः—उत्तरोत्तराभिलाषनिवृत्तिः सन्तुष्टतेतियावत् तेन विशेषेण वर्जितं—रहितं सन्तोषविवर्जितं, भूयः कथम्भूतं ?—कुत्सिता गतयः कुगतयो—नारकतिर्यगाद्यास्तासां मूलं—कारणं कुगतिमूलं, एवंविधमर्थमवगम्य किमित्याह—कुर्वन्ति—विदधति, के ? इत्याह—'संसारभयभीता' भवत्रासत्रस्ताः, किं कुर्वन्तीत्याह—तस्यअर्थस्य परिमितिः—परिमाणं तत्परिमाणं—तदियत्तामतो नवधा परिग्रहपरिमाणमित्थं जायत इति सूचितमिति गाथाक्षरार्थः ॥ अत्र च संसारभयभीताः संतोषविवार्जितमर्थं कुगतिमूलमनर्थविषयं च ज्ञात्वा तत्परिमाणं कुर्वन्तीत्युक्तम्, कथं चैषोऽनर्थविषयः कुगतिमूलं चेत्येतद्दृष्टान्तद्वारेणाभिधीयते—

इहैव जम्बूद्वीपे भारतवर्षमध्यमखण्डमध्ये कोशवर्द्धनं नाम नगरं, तत्र भीमो नाम ब्राह्मणः, तत्पुत्रौ देव-देवशर्मनामानौ बभूवतुः, तौ च जन्मप्रभृत्येव महादारिद्र्यपीडितौ कथंकथमपि पित्रा यौवनमनुप्रापितौ, तौ चान्यदा चिन्तितवन्तौ—यथाऽत्रावयोस्तावद्भोजनमात्रमपि न संपद्यते, तद्यामः किमपि स्थानान्तरं यत्र किञ्चिन्निर्वाहमात्रं संजायते, ततो गतौ तौ पितरमापृच्छ्य कौशाम्बीं, तदा च तस्यां राजपुत्र्याः सौभाग्यसन्दीपनं नामोत्सवनं कृतं, तदुद्यमनके च समवयोविद्यागुणाय समायाताभिनवातिथये ब्राह्मणद्वयाय प्रच्छन्नं मौक्तिकसुवर्णरत्नादि देयम्, उद्यमनकदिने च भवितव्यतायोगेन तस्या नियुक्तपुरुषैस्तदेव ब्राह्मणद्वयं समानवयोरूपादिगुणं विलोकयोद्धूलितजङ्घं राजकुले समानीय विहितोचितकृत्यविस्तरं दर्शितं राजपुत्र्याः, तया च राजतकच्चोलके मौक्तिकादिपदार्थान् गुप्तान् प्रक्षिप्योपरि करसूपादि परिवेश्य प्रत्येकं ताभ्यां दत्ते, ताभ्यां तु ते आदाय गतं तडागपाल्यां, गृहीत्वा जलं कृत्वा चरणशौचं विधाय चात्मीयप्रक्रियामुपस्पर्शनादिकां भोक्तुमारब्धं यावत्तावद् दृष्टं मौक्तिकसुवर्णादि, ततोऽनादिभवाभ्यस्तलोभसञ्ज्ञोद्भूतगाढतन्मूर्छापरिणामयोरुभयोरपि प्रवर्द्धते मारणाभिलाषः, देवेन चिन्तितं—देवशर्माणं यदि व्यापादये तदेदं मम सर्वं द्रव्यं संपद्यते, देवशर्मणाऽप्येवं, ततो देवेनाभ्यधायि—यथेदं मौक्तिक- ॥ १७१॥

सुवर्णादि यद्यनावृत्तमेवात्मपार्श्वे धारयिष्यावस्तदा चौरादिः प्रतिग्रहीष्यति, तस्मादिदं निधानीकृत्य क्वचित्प्रदेशेऽन्यत्र तिष्ठावः, ततः प्रतिपन्ने देवशर्मणा तथैव तन्निधानीकृत्य यावच्चलितावन्योऽन्यवधविहिताभिप्रायावन्यप्रदेशाभिमुखौ तावत्तत्रान्तरे दृष्ट एको जीर्णकूपो देवेन, भणितश्च देवशर्मा—वत्से ! निरीक्ष्यतामेष कूपः कियदत्रोदकं ?, ततोऽसौ यावन्निरीक्षितुमारेभे तावत्प्रणुन्नः कूपमध्ये, तेन च पतता गृहीतः सोऽपि शरीरदेशे, निरालम्बनतया पतितौ द्वावपि, मृत्वा जातौ सर्पत्वेन, क्रमेण च परिभ्रमन्तौ समागतौ निधानप्रदेशं, तत्प्रदेशोत्पन्नमूर्च्छौ चारब्धौ योद्धुमुपारूढप्रबलकोपौ च परस्परं युध्यमानावेव प्राप्तौ निधनमुपपन्नौ मूषकत्वेन, तथैव तत्प्रदेशागमनोपारूढ-गाढमूर्छावन्योऽन्यभक्षितसमस्तशरीरदेशौ महावेदनाभिभूतौ मृत्वा समुत्पन्नौ कमलत्वेन, तथैव च कालान्तरेण तत्प्रदे-शमागतौ यूथसहितौ परस्परमारब्धौ योद्धुं, तीव्रकोपतया कथञ्चिन्नोपरमेते यावत्तावत्समायातस्तत्र धनुर्दण्डमारोप्याकर्णा-न्ताकृष्टशरो व्याधः, तं दृष्ट्वा पलायितं दिशोदिशमशेषयूथं, तौ च तीव्रयुद्धाभिनिवेशविवशावलक्षिततदागमनौ हता-वेकशरनिपातेन तेन, मरणसमयसमुपजातमनुष्यभवनिर्वर्तनायोग्यतथाविधाध्यवसायमाहात्म्येन चोत्पन्नौ तस्यामेव कौशाम्ब्यां माधवाभिधानब्राह्मणस्य वसन्तिनीभार्यायां युगलपुत्रौ, कृतमुचितसमये नयोर्नामैकस्य हृष्टोऽपरस्य महेश्वरः,

क्रमेण जातावष्टवार्षिकौ, अन्यदा च माधवेनैव सह तत्सिंधानासन्नप्रदेशवर्त्ति स्वक्षेत्रं व्रजन्तौ–दृष्ट्वा तमेव भूभागं, जातमूर्च्छावुभावपि । प्रागभ्यासवशेनैव, काचपिच्यपुरस्सरम् ॥ १ ॥ यावद् युद्धेन संलग्नौ, तावत्पित्रा निवारितौ । नीतौ च स्वगृहं प्रीत्या, तिष्ठतः पूर्ववत्पुनः ॥ २ ॥ तं प्रदेशं समायातौ, युद्ध्येते च तथैव तौ एवमुद्वेजितस्ताभ्यां, पिता नित्यमिहान्तरे ॥ ३ ॥ तस्यामेव पुर्यां मनोरमाभिधानोद्याने समवसृतः समुत्पन्नातिशायिज्ञानो विमलयशो-नाम सूरिः, तद्वन्दनाय गतो राजा सपौरपरिजनजानपदादिः, प्रस्तुता धर्मकथा भगवता, प्रस्तावे च पृष्टमशोक-दत्तश्रेष्ठिना–भगवान् ! अस्ति ममाशोकश्रीनाम्नीकैका पुत्रिका, सा च रमणीययौवनमनुप्राप्ताऽपि संजातरूपलावण्य-कलाकौशलादिगुणसमुदायाऽपि विचित्राभरणनेपथ्यालङ्कारालङ्कृताऽपि प्राग्जन्मनोपार्जिताऽतिकटुकदौर्भाग्यकर्मोदयतो न कस्मैचिद्रोचते न कोऽपि तामालापयति, तत्किं तया पूर्वजन्मनि कृतं यन्माहात्म्येन सैवंविधा संपन्ना; ?, सूरि-णोक्तं–भद्र ! शृणु-प्रतिष्ठाने नगरे बभव विमलो नाम महाधनः श्रेष्ठिपुत्रः, तस्य धनश्रीनाम भार्या, सा च प्रकृत्यैव नयविनयविराजिता जितकषायोदया दयादानप्रवृत्तिशालिनी शालीनतादिविशिष्टगुणमन्दिरमत्यन्तभक्ता भर्त्तुः प्राणप्रिया च, केवलं वन्ध्या, ततो भर्त्राऽन्यदा पर्यालोचिता सा–प्रिये ! तवोपरि नाहं परिणिनीषुस्तावत् केवलमि-

दमस्मद्द्रव्यं यदि मम कदाचित्किञ्चित्प्रतिकूलं भविष्यति तदा राजकुलं प्रवेक्ष्यति तदस्ति कश्चनापायो द्रविणपरिरक्षणे, ? तयोक्तं—प्रिय ! नापरोऽपरस्त्रीपरिणयनं परित्यज्य, तदिदानीमस्मदुपरोधेनाप्यङ्गीक्रियतामिदं, अहमेव त्वद्योग्यां काञ्चित्कन्यामवलोकयिष्ये, ततस्तदुपरोधेनाभ्युपगते तदीयवचने श्रीप्रभाभिधानां परिणायितोऽसावन्यतरश्रेष्ठिकन्यां, कालेन धनश्रिया मारणोपायांश्चिन्तयन्ती ददर्श सा स्वगृहमेव भिक्षानिमित्तमागतामेकां परिव्राजिकां, दानसन्मानगृहीतां च तामुवाच—' भगवति ! मदीयभर्त्ता विद्वेषपरो धनश्रियं स्वगृहात् । निष्काशयति यथाऽयं तथाऽचिरात्त्वं विधत्स्वेति ॥ १ ॥ एवं करोमीति प्रतिपन्ने तयाऽन्यदा विमलस्य गच्छतः समासन्नीभूय यथैष शृणोति तथा पूर्वसङ्केतितनार्योः संमुखमवदत्—भद्रेऽहमुत्सुका यामि, तस्याः पार्श्वे धनश्रियाः । स युवा तत्र दुःखेन, तद्वियोगे च तिष्ठते ॥ १ ॥ विमलोऽपि समाकर्ण्य तद्वचनं नूनं दुष्टशीला धनश्रीस्तत्किं तयेति वितर्क्य गृहं गतो बभाण तां—भद्रे ! करोषि मद्वचनमेकम् !, तयोदितम्—' आर्यपुत्र ! किमीदृक्षं, त्वयेदं मम कथ्यते ? । मज्जीवितं त्वदायत्तमुक्तमात्रे तु का कथा ? ॥ १ ॥ तेनोक्तं—गच्छ पैतृकगृहं, ततोऽसौ मुद्गरेणैव, तद्वचनेनेव ताडिता । पतित्वा पादयोस्तस्य, रुदन्ती समभाषत ॥ २ ॥ नाथ ! दुश्चरितं किञ्चित्त्वया संभावितं मम । अप्रस्तावेऽपि येनैवमादेशो दत्त ईदृशः ॥ २ ॥

विमलेनापि रहस्यभेदो मा भूदिति चिन्तयता समुत्थाप्य भणिता-धीरा भव, अयमपि ममादेशः कृतो भविष्यति तद्व्रज तावत्, ततो धनश्रिया न युक्तमिदं कर्तुं तथाऽप्यलङ्घ्यवचनो भर्त्ता मया च प्रतिपन्नपूर्वमिदमतो यद्भवति तद्भवत्विति चिन्तयन्त्या प्रतिपन्नं तद्वचः, ततो यदाऽहमानयामि तदाऽऽगन्तव्यमित्यभिधाय विसर्जिता तेन सा, दत्ता आप्तस्वपुरुषास्तत्सहायाश्च, भणिताश्च स्वपुरुषाः-यथा धनश्रियं पैत्रिकस्थाने विमुच्य शीघ्रमधौतपादैरेव ततो निवर्त्तितव्यं, ततस्ते प्रतिपन्नतद्वचना धनश्रियं गृहीत्वा गतास्तत्पितृगृहं, मुक्त्वाऽसौ तत्र, निवृत्तास्तथैव ते, पृष्टा च धनश्रीपितृभ्यां-वत्से ! किमेवं ?, साऽवोचत्-न जानामि, निरपराधैव निष्काशिता भर्त्रा, पितृभ्यामुक्तं-नेदमुचितं, परं यावत्सम्यग्वार्त्तामुपलभावहे तावत्तिष्ठ त्वं, ततोऽसौ तेन वचनेन मुद्गरेणेव ताडिता रोदितुं प्रवृत्ता, चिन्तितवती च--अपरीक्ष्यैव यदहं, प्रियेणाप्रियकारिणा । त्यक्ता सीतेव रामेण, हा किं तस्योचितं तु तत् ? ॥ १ ॥ तदेवं-किं करोमि क्व वा यामि, कस्याग्रे कथयामि वा ? । वल्लभादुदिते दुःखे, जातं शरणतो भयम् ॥ २ ॥ अङ्गिनां धर्महीनानां, यद्वा सुप्रापमीदृशम् । संसारेऽनिष्टसंयोगाभीष्टहानिसमाकुले ॥ ३ ॥ स्वकर्म्मपरिपाकोऽयं, मया सर्वोऽनुभूयते । तदस्योन्मूलनाहेतोर्धर्म एव ममोचितः॥ ४ ॥ इति संचिन्त्य सा नित्यं, धर्मानुष्ठानसङ्गता । आसाञ्चक्रे क्रमागतसुखदुः

खसमास्थितिः ॥ ५ ॥ अन्यदा च समायातस्तत्र सिद्धादेशनामा नैमित्तिकः, पृष्टस्तत्पित्रा-किमियं धनश्री-दुष्टशीला सुशीला वा ?, शीलवत्यपि श्वशुरकुलं यास्यति न वा ?, तेनोक्तं—शीलवती श्वशुरकुलं च यास्यति, अत्रार्थे चायं प्रत्ययः—कतिपयदिनोपरि भर्त्ता चास्या आनयनायाऽऽयास्यति, ततस्तुष्टेन तत्पित्रा दत्तं पारितोषिकं सिद्धादेशाय, विसृष्टश्चासौ, भणिता च धनश्रीः--पुत्रि ! तिष्ठ सुखेन धर्मपरा, मा चोन्मनीभूः आयास्यति तत्रानयनाय स्वभर्त्ता, ततस्तेनाश्वासिता यथाऽऽदिशति तातस्तथा करोमीत्यभिधाय विशेषधर्मपरा कानिचिद्दिनानि तत्रैवातिष्ठत् । इतश्च--धनश्रीर्निर्गता गेहाद्विमलस्य यदैव हि । अत्युग्रव्याधिना ग्रस्ता, तदैव श्रीप्रभा ततः ॥ १ ॥ विचित्रैर्मन्त्रिभिर्मन्त्रैर्वैद्यैर्नानाविधौषधैः । प्रयत्नवद्भिरप्यस्या, व्याधेर्नोपशमः कृतः ॥ २ ॥ तत्र प्रकर्षमायातेऽनुतापगतया तया । धनश्रीविषयः सर्वो, वृत्तान्तः स्वो निवेदितः ॥ ३ ॥ समित्रबन्धुवर्गाय, विमलाय सविस्तरः । पश्चात्तापपरीतात्मा, ततः सोऽपि व्यचिन्तयत् ॥ ४ ॥ असमीक्षितकारित्वं, ममाहो ? असमञ्जसम् । येनाविचार्य संत्यक्ता, निर्दोषाऽपि प्रिया मया ॥ ५ ॥ हा प्रिये ! विप्रियं दृष्ट्वा, ममैव मतिदारुणम् । कथमाहूयमानाऽपि, त्वमेष्यसि मदन्तिकम् ? ॥ ६ ॥ भुजङ्गीनामिव स्त्रीणामहो कौटिल्यवर्त्तिता ।

अहो ! रोषप्रकृष्टत्वमहो ! ईर्ष्याऽतिदारुणा ॥ ७ ॥ अथवा भद्रिकैवेषा, या मृत्युसमयेऽपि मे । स्वकर्म कथयाना-सानुतापगतमानसा ॥ ८ ॥ अत्रान्तरे समायातः, सिद्धादेशो निमित्तवित् । तेन नीरोगताऽमुष्या, आदिष्टा स्वल्पकालिकी ॥ ९ ॥ एतच्च नैमित्तिकवचनमाकर्ण्य तत्पार्श्ववर्त्ती वैद्यस्तदीयमातरमादिष्टवान्--यथा बलाच्चैलमादायाभ्यज्यतां जङ्घै-कदेशोऽस्याः, आमवातज्वरोऽयं, तया च तथैव विहिते वैद्यवचसि सद्य एव संपन्नो मनाक् तत्र स्थाने गुणः, ततोऽवबुद्धतद्रोगेण वैद्येनोपचर्य विविधोपचारैः स्वल्पदिनैरेव नीरोगीकृतायां श्रीप्रभायामुचितपूजया विधिवत्स-न्मान्य नैमित्तिकवैद्यौ विमलो राजकुलादभियाच्य दिनद्वयेन पञ्चाशद्योजनगामिनीं चरिकामारुह्य स्वयं गतः श्वशुरगृहं, दृष्टा च तत्र विचित्रतपश्चरणशोषितशरीरा धनश्री, लज्जाभरमन्थरः स्ववदनं दर्शयितुमशक्नुवन्नभिवाद्य श्वशुरं भणितवांश्च-क्षमणीयो ममैकोऽयमपराधः, पुनर्न करिष्याम्यहमेवं, मुच्यतां चेयं धनश्रीर्येन गृहीत्वैनां व्रजामि स्वभवनं, किञ्चिदुपालम्भसारमाभाषित एष तेन-भो भो जामातृक ! न युक्तमेवमपर्यालोचितकारित्वं भवतो, यतः-"मा होह सुयग्गाही, मा पत्तिय जं न दिट्ठपच्चक्खं । पच्चक्खेऽविहु दिट्ठे जुत्ताजुत्तं वियारेह ॥ १ ॥" किञ्च सुशीलता-दिगुणकलापमालोक्यास्या लोकोऽप्येवमुदाहरति--कुदृष्टं कुपरिज्ञातं, कुश्रुतं कुपरीक्षितम् । पुरुषेण न कर्त्तव्यं

विमलेन यथा कृतम् ॥ १ ॥ ” इति तन्न प्रेषणयोग्येयं, किन्तु भर्तृदेवता नार्योऽतस्त्वयि स्वयमेतद्ग्रहणायायाते न शक्नुमो वयं निराकर्त्तुमिति प्रतिपाद्य उचितप्रतिपत्तिपूर्वं दिनपञ्चकं धृत्वा विसृष्टोऽसौ धनश्रिया सह समाजगाम स्वनगरं, राजकुल एव समर्पिता चरिका, कारितो धनश्रीसमानयनतुष्टचित्तेन महानुत्सवः, स्वगृहान्निष्काशितुमारब्धा च श्रीप्रभा, निवारितो धनश्रिया, मम स्वसेयं नास्या अपराधगन्धोऽस्ति, ममैव पूर्वकृतकर्म्मविलसितमेतत्, यदुक्तम्–“ सर्वः पूर्वकृतानां, प्राप्नोति हि कर्मणां फलविपाकम् । अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥१॥ ” इति, मोचितश्चात्मा प्रव्रज्यार्थं, न मुक्ता भर्त्रा, भणिता च–तिष्ठ वर्षसप्तकं, भुङ्क्ष्व मयाऽनुरक्तेन सह तावदुदारभोगान्, पश्चात्त्वं चाहं च ग्रहीष्यावश्चरमवयसि प्रव्रज्यां, ततोऽसौ भर्त्तुरनुरोधेन स्थिता गृहवास एव, गतेषु केषुचिद्दिवसेषु भणित्वा भर्त्तारं प्रचुरद्रव्यव्ययेन कारयामास महदेकं जिनायतनं, तत्रानवरतं महाप्रबन्धेन पूजास्नात्रयात्रादिकरणकारणपरायणाया व्यतिक्रान्तानि सप्त वर्षाणि, भूयोऽपि विज्ञप्तो भर्त्ता प्रव्रज्यार्थं,
३० ततोऽसौ जिनभवनाष्टाह्निकामहोत्सवकारणपूर्वकं प्रतिमायोग्याभरणसमकलादिषु प्रभूतद्रविणजातं वितीर्य समं धनश्रिया श्रीप्रभया च जीवानन्दाचार्यसमीपे सर्वविरतिदीक्षां समुपात्तवान्, कालान्तरे च क्षपितप्रभूतक्लिष्ट-

कर्माऽन्त्यसमयसमाराधितपञ्चनमस्कारस्मरणादिविधिर्मरणे विमलो धनश्रीश्च पञ्चमदेवलोकं ब्रह्मलोकनामकमगमत्, श्रीप्रभा तु सौधर्मदेवलोके ललिताङ्गविमान एवोत्पेदे, सावशेषतत्कर्मणा च ततश्च्युता भो अशोकदत्तश्रेष्ठिन्! भवत एवाशोकश्रीनामिका पुत्रिका जाता, सेयं तत्कर्मविपाकेन दौर्भाग्यमनुभवति, एतच्च श्रुत्वा सा जातिस्मरणोपलब्धपूर्वभवस्ववृत्तान्ता अश्रुपातं कुर्वन्ती विमलयशःसूरेः पादयोर्निपत्य--भगवन्! स्वदीक्षादानेन ममानुग्रहः क्रियतामिति वदन्ती आचार्येण बभाषे--भद्रे! तव नाद्यापि व्रतयोग्यताऽस्ति, यतो वर्षपञ्चकादूर्ध्वमपयास्यति तवेदं दौर्भाग्यनिबन्धनं कर्म, भविष्यति प्रबलो भोगफलकर्मोदयः, ततो मुक्तभोगा कियताऽपि कालेन प्राप्स्यसि व्रतयोग्यतामितरथा व्रतभङ्ग एव तवास्मिन् प्रस्तावे, ततोऽसौ यथाऽऽदिशति भगवांस्तथा करोमीत्यभिधाय स्थिता, अत्रान्तरे माधवब्राह्मणोऽपि क्षमातलमिलन्मौलिः प्रणिपत्य विमलयशःसूरेः पादद्वन्द्वं पप्रच्छ--भगवन्! मदीयपुत्रयो रुद्रमहेश्वरयोः स्वक्षेत्रप्रदेशगतयोरनवरतमेव वैरभाववर्त्तने अन्यत्र तु प्रीत्यवस्थाने किं कारणं?, ततो भगवांश्चातुर्भाविकमरणकारणमेतयोर्निधानादिवृत्तान्तं सविस्तरमचीकथत, तं च श्रुत्वा तावपि तत्क्षणादेव संजातजातिस्मरणौ स्वपूर्वभवालोकनेन स्वयमेव विस्मितमानसावाचार्यस्य पादयोर्निपत्य पित्रादिलोकप्रत्यायनार्थं निधानं निरूप्य सुस्थानाविनियोगेन

तन्नियोज्य पितरमापृच्छय तस्यैवाचार्यस्य समीपे व्रतमङ्गीकृतवन्तौ, विधिना परिपाल्य समाधिमरणेन माहेन्द्रकल्पे देवावुत्पन्नाविति । अतोऽर्थोऽनर्थविषयः सन्तोषविवर्जितः कुगतिमूलश्चेति सिद्धम् । एतत्कथाविस्तरश्च भगिनीवत्सलवदवगन्तव्यः, सन्तोषसमान्वितस्तु दानोपभोगप्रधानोऽर्थः कर्मक्षयहेतुर्यशोहेतुश्चानन्दादिश्रावकाणामिवेति ।

गतं यथा जायत इति द्वारमधुनाऽस्यैव दोषद्वारमाह—

अणियत्ता उण पुरिसा लहंति दुक्खाइं णेगरूवाइं ।
जह चारुदत्तसङ्घो, पब्भट्ठो माउलाहिंतो ॥ ६० ॥

निवर्त्तनं निवृत्तं न विद्यते निवृत्तं-परिहारो येषां ते 'अनिवृत्ताः' अकृतनिवृत्तय इत्यर्थः, पुनःशब्दो विशेषणार्थः, किं विशिनष्टि ?, परिग्रहादिति, 'पुरुषाः' नराः 'लभन्ते' प्राप्नुवन्ति 'दुःखानि' असातोदयान् 'अनेकरूपाणि' विचित्रस्वभावानि नरकतिर्यक्षु छेदनादीनि मनुष्येषु तु स्नेहनाशप्रभृतीनि, यदुक्तम्—"जणयसुयाणं च जए जणणीसुण्हाण भाउयाणं च । चडुलस्स धणस्स कए नासइ नेहो खणद्धेणं ॥ १ ॥ अडइ बहुं वहइ भरं सहइ छुहं पावमायरइ धिट्ठो । कुलसीलजाइपच्चयठिइं च लोभद्दुओ चयइ ॥ २ ॥ धावेइ रोहणं तरइ सायरं वसइ गिरिनिउंजेसु ।

बंधवजणं च मारइ पुरिसो जो होइ धणलुद्धो ॥ ३ ॥" तथाऽन्येनाप्युक्तम्--" द्वेषस्यायतनं धृतेरपचयः क्षान्तेः प्रतीपो विधिर्व्याक्षेपस्य सुहृन्मदस्य भवनं ध्यानस्य कष्टो रिपुः । दुःखस्य प्रभवः सुखस्य निधनं पापस्य वासो निजः, प्राज्ञस्यापि परिग्रहो ग्रह इव क्लेशाय नाशाय च ॥ १ ॥" को यथा दुःखानि लब्धवान् इत्याह—यथा 'चारुदत्तश्राद्धः' चारुदत्ताभिधानः श्रावकः, किंविशिष्टः ?—'प्रभ्रष्टः' च्युतः 'मातुलात्' मामकादिति गाथाऽक्षरार्थः ॥ ६० ॥ भावार्थः कथानकगम्यः, तच्चेदम्——

आसीच्चम्पाभिधानायां, नगर्यां श्रेष्ठिसत्तमः । भानुर्नाम गुणैर्ख्यातः, सुशीलविनयादिभिः ॥ १ ॥ तस्य प्राणप्रिया भार्या, सुभद्रेति गुणान्विता । बभूव स्वचरित्रेण, पवित्रा पुत्रकाङ्क्षिणी ॥ २ ॥ प्रत्यहं चार्हतां पूजां, कुर्वाणौ स्वजिनालये । चारणश्रमणं श्रेष्ठं, कदाचिच्चावपश्यताम् ॥ ३ ॥ नमस्कृत्याऽतिभक्त्या तं, पुत्रकामावपृच्छताम् । श्रावकाविति संचिन्त्य, तौ मुनिः प्रत्यभाषत ॥ ४ ॥ अल्पीयसैव कालेन, भविता युवयोः सुतः । श्रेष्ठो नैगमवंशस्य, भणित्वैवं तिरोऽदधत ॥ ५ ॥ दिवसेष्वथ गच्छत्सु, तयोः पुत्रोऽभवत्प्रियः । चारुदत्तकृताभिख्यः, कलाकौशलकोविदः ॥ ६ ॥ हरिसिंहादिसन्मित्रैः, समेतः सोऽन्यदा गतः । अङ्गोदरगिरेरन्ते, निम्नगां रत्नवालि-

काम् ॥ ७ ॥ क्रीडन्तस्तत्र ते दृष्ट्वा, स्त्रीपुंसपदपद्धतिम् । सकलत्रो युवा कश्चिदास्तेऽमुत्रेत्यचिन्तयत् ॥ ८ ॥ ततस्त-
दनुसारेण, यावत्किञ्चिदिमे गताः । तावद्धेमन्तधामेव, शैत्येन कदलीगृहम् ॥ ९ ॥ अपश्यंस्तत्प्रविष्टाश्च, पुष्पशय्यां
मनोरमाम् । सकोशं खड्गरत्नं च, तददूरे द्रुमेण च ॥ १० ॥ समं लोहमयैः कीलैः, कीलितं ददृशुर्नरम् । सर्वाङ्ग-
सुन्दरं नव्ये, वर्त्तमानं वयोगुणे ॥ ११ ॥ चारुदत्तोऽथ तानाह, तं विलोक्य तथास्थितम् । भो वयस्याः सजीवोऽयमद्यापि
किल लक्ष्यते ॥१२॥ तदेष मोचनीयः स्यात्, केनोपायेन ? कथ्यताम् । ऊचुस्ते देशकालज्ञः, त्वमेव यदि वेत्सि तम् ॥१३॥
पश्यन्नितस्ततोऽमावप्यौषधीवलयत्रयम् । नामाङ्कं खड्गरत्नस्य, तस्य कोशे व्यलोकत ॥१४॥ गृहीत्वा निजबुद्ध्यैव, तेषामे-
केन मोचितः । अपरेण च संरूढव्रणोऽसौ तत्क्षणात्कृतः ॥१५॥ संजीवनीयनाम्ना च, तृतीयवलयेन सः । नष्टनिःशेषसञ्ज्ञोऽपि,
प्रत्यानीतोऽथ चेतनाम् ॥१६॥ ततो निमेषमात्रेण, वक्तुं तेनोपचक्रमे । ममोपकारिणो यूयं, भोः ! तच्छृणुत मे कथाम् ॥१७॥
वैताढ्यदक्षिणश्रेण्यां, नगरं शिवमन्दिरम् । महेन्द्रविक्रमो राजा, तत्र विद्याधराधिपः ॥ १८ ॥ तस्यामितगतिः
पुत्रो, जातोऽहं मे वयस्यकौ । बभूवतुः प्रियौ गौरिमुण्डधूमशिखाभिधौ ॥ १९ ॥ कदाचित्सहितस्ताभ्यां, ह्रीमन्तं
नगमागतः । हिरण्यरोमनामा च, मातुलो मम तापसः ॥ २० ॥ तत्रास्ते तस्य पुत्री च, नवोपारूढयौवना ।

लेखेव शशिनः सौम्या, सञ्ज्ञया सुकुमालिका ॥ २१ ॥ विलोक्य तामहं प्राप्तः, कामबाणशरव्यताम् । संलक्षितो वयस्याभ्यां, नीतः स्वनगरं प्रति ॥ २२ ॥ मत्पितुर्ज्ञापितं चेदं, ताभ्यां तेनापि मत्कृते । वृताऽसौ पाणिसंग्राहं, कारितोऽहं शुभेऽहनि ॥ २३ ॥ ततोऽनुभवतः सार्द्धं, तया भोगसुखं मम । देवलोके सुरस्येव, गतः कालः कियानपि ॥ २४ ॥ सुकुमालिकया सार्द्धं, दृष्टो धूमशिखोऽन्यदा । अकृत्यनिरतो दृष्टो, न चेष्टोऽसौ विरूपकृत् ॥ २५ ॥ प्रमत्तभावतश्चाहं, विचरामि यथा पुरा । सर्वत्राशङ्कितस्तेन, चाद्य बद्धोऽहमत्रगः ॥ २६ ॥ गतं चादाय तां यावत्तावद् यूयं समागताः । मोचितो भवद्भिरतो, भवन्तो मम बान्धवाः ॥ २७ ॥ इत्युक्त्वा चारुदत्तस्य, मित्राण्यापृच्छय साञ्जसम् । नामान्वयादि विज्ञाय, यथाऽऽयातमयादसौ ॥ २८ ॥ समित्रश्चारुदत्तस्तु, समायातो निजां पुरीम् । यौवनं समनुप्राप्तो, लीलाया वासमन्दिरम् ॥ २९ ॥ सर्वार्थो मातुलस्तस्य, तत्पुत्री नवयौवना । नाम्ना मित्रवती तस्याः, पितृभ्यां ग्राहितः करम् ॥ ३० ॥ कलास्वासक्तचित्तोऽभून्न भोगसुखसंमुखः । प्रवेशितस्ततो गोष्ठीं, गुरुभ्यां ललितामसौ ॥ ३१ ॥ यथेष्टं विचरन्नेष, तया सममुदारधीः । सुतां कलिङ्गसेनाया, रूपयौवनशालिनीम् ॥ ३२ ॥ वेश्यां वसन्तसेनाख्यां, प्रत्यक्षां कमलामिव । दृष्ट्वा कामवशं यातो, वर्षैर्द्वादशभिस्ततः ॥ ३३ ॥

तया समं विशालाख्या, कोटी स्वर्णस्य षोडश । अज्ञाता एव कालेन, कामासक्तेन नाशिताः ॥ ३४ ॥ यावत्तेन ततोऽन्येद्युर्मदिरापानघूर्णितः । कलिङ्गसेनयोत्सृष्टो, विनष्टगृहविस्तरः ॥ ३५ ॥ कथञ्चित्स्वगृहं प्राप्तोऽभ्युत्थितो निजभार्यया । पितुर्मृत्युं शुचं मातुरवबुद्ध्यातिदुःखितः ॥ ३६ ॥ गृहीत्वा पत्न्यलङ्कारं, गतो वाणिज्यतृष्णया । उसीरावर्त्तनगरं, साकं मातुलकेन सः ॥ ३७ ॥ तत्र प्रभूतकर्पासं, जग्राह विहिताग्रहः । धनार्जने पुनस्तामालिप्तिमागच्छतः पथि ॥ ३८ ॥ दग्धो दवानलेनाशु, कर्पासस्तस्य पश्यतः । ततोऽश्वेन गतः प्राचीं, दिशमुत्सृज्य मातुलम् ॥ ३९ ॥ विनष्टं तमपि त्यक्त्वा, पद्भ्यामेव प्रयातवान् । पिपासापीडितोऽन्येद्युरुदिते रविमण्डले ॥ ४० ॥ प्रियङ्गुपत्तनं प्राप्तः, पोतवाणिजिकाकुलम् । दृष्टः सुरेन्द्रदत्तेन, तस्मिन् पितृसखेन सः ॥ ४१ ॥ पुत्रवत्प्रतिपन्नश्च, भोजनाच्छादनैस्तदा । वार्यमाणोऽन्यदाऽम्भोधिमवतीर्णो धनाशया ॥ ४२ ॥ संप्राप्तो यवनद्वीपं, भ्राम्यंस्तन्नगरेषु च । अष्टौ कोटीर्धनस्याशु, समुपार्जितवानसौ ॥ ४३ ॥ स्वपुराभिमुखो भूयश्चालात्रान्तरेऽस्य च । स्फुटितं यानपात्रेण, दूरीभूतं धनेन च ॥ ४४ ॥ जीवितव्यावशेषेण, फलकं प्राप्य कथं च तत् ( प्राप्तवांस्ततः ) । सप्तरात्रेण तीर्णोऽब्धिः, प्राप्तं राजपुरस्य च ॥ ४५ ॥ बहिस्तादाश्रमस्थानं, तत्र दृष्टश्च मस्करी । कुशलो रसविद्यासु, नाम्ना

दिनकरप्रभः ॥ ४६ ॥ लग्नस्तत्पृष्ठ एवासौ, स्वीकृतस्तेन पुत्रवत् । कस्याचिद्रसलोभेन, नीतः कमपि पर्वतम् ॥ ४७ ॥ तन्नितम्बैकदेशे च, कूटयन्त्रार्गलावृतम् । कृतान्तवदनाकारं, मन्त्रयोगप्रकाशितम् ॥ ४८ ॥ प्रदर्श्य विवरं घोरं, सहात्मना प्रवेश्य च । दर्शयामास तन्मध्ये, कूपं स नरकाकृतिम् ॥ ४९ ॥ पूतिगन्धि चतुर्हस्तं, घनान्धतमसाऽन्वितम् । समं दैर्घ्यपृथुत्वाभ्यां, त्रिदण्डी तमुवाच च ॥ ५० ॥ पुत्रकावतरामुत्र, येनैकं ते ददाम्यहम् । तुम्बकं रससम्पूर्णं, सोऽपि तृष्णान्धमानसः ॥ ५१ ॥ कृत्वाऽलाबु करे रज्ज्वा, चतुर्नरमितां भुवम् । गतो यावदधोलग्नो, रसादित्साप्रणुन्नधीः ॥ ५२ ॥ आधस्त्यमेखलां तावत्तमोदुर्लक्ष्यमूर्त्तिना । मानुष्यभाषयाऽधस्तान्मा विश इति वारितः॥५३॥ केनचिच्चारुदत्तोऽपि, को वारयति मामिह । परिव्राजो गिरायातमित्युवाच भयोज्झितः ॥ ५४ ॥ तेनोचे वाणिगस्म्यब्धौ, भिन्नपोतस्त्रिदण्डिना । धनेच्छानुगतः क्षिप्तः, स्वार्थनिष्ठेन पापिना ॥ ५५ ॥ कृत्वा पशूपहारं मां, रसाय स गतः स्वयम् । अधोभागो मम प्रायो, रसेन प्रापितः क्षयम् ॥ ५६ ॥ तदेवमुदधिं तीर्त्वा, यथाऽहमिह दुःस्थितः । चारुदत्त ! गतो नाशं, तथा त्वमपि मा गमः ॥५७॥ समर्पय ममालाबु, येन ते रसपूरितम् । प्रत्यर्पयामि मा स्पृष्टो, रसेन त्वं विनङ्क्ष्यसि ॥ ५८ ॥ ततस्तदर्पितालाबु, कारुण्यात् प्रतिपूर्य सः । प्रायच्छच्चारुदत्तोऽपि, रज्जुं चलितवां-

स्ततः ॥ ५९ ॥ परिव्राजोपरिस्थेनाकृष्यानीतस्तटान्तिकम् । याचितो दुग्धिकं नासावर्पयामास मर्मवित् ॥ ६० ॥
क्रूराभिप्रायतां तस्य, परिव्राजोऽवबुध्य च । चिक्षेप कूप एवैतद्, दुग्धिकं रसपूरितम् ॥ ६१ ॥ परिव्राडपि तं ज्ञात्वा,
मुक्त्वाऽलाबुं सरज्जुकम् । तथोत्ससर्ज पतितो, मेखलायामसौ यथा ॥ ६२ ॥ ततो मृत्युभयत्रस्तो, ललाटघटि-
ताञ्जलिः । तीर्थकृद्भ्यो नमस्कृत्य, सागारं व्रतमाददे ॥६३॥ हिंसानृत(वितथ)चौर्येभ्यो, मैथुनात् सपरिग्रहात् । सर्वात्मना
निवृत्तोऽस्मि, मनोवाक्कायसंयतः ॥ ६४ ॥ नमस्तेभ्यो महात्मभ्यो, यैस्त्यक्त्वा भोगसम्पदः । कृतो जिनेन्द्रनिर्दिष्टः,
सद्धर्मो धर्मवत्सलैः ॥ ६५ ॥ लोभमोहकलिग्रस्ता, निमग्ना दुःखसागरे । अस्मद्विधास्तु यान्त्येवं, विनाशं धन-
काङ्क्षिणः ॥ ६६ ॥ शोचन्तं तं विलोक्यैवं, सोऽधःपतितनैगमः । उवाच मा विषण्णो भूस्त्वमेवमतिदुर्मनाः ॥६७॥
येन यादृग्प्रकारेण, कृतानि भवसन्ततौ । शुभाशुभानि कर्माणि, स तानि लभतेतराम् ॥ ६८ ॥ यद्यप्येवं तथा-
ऽप्येक, उपायस्तव निर्गमे । समस्ति यदि शक्नोषि, कर्त्तुमत्रस्तमानसः ॥ ६९ ॥ आगच्छति रसं पातुमिह गोधा
दिने दिने । तत्पुच्छदेशसंलग्नो, यदि यासि गतस्तदा ॥ ७० ॥ नो चेत्त्वमपि मन्न्यायात्समासन्नान्तिमक्षणः ।
श्रुत्वेदं स्वस्थचित्तोऽभूत्तुल्यरात्रिदिवास्थितिः ॥७१॥ इतरोऽपि रसप्रौढिदग्धावयवसंहतिः । परलोकं गतस्तीव्रवेदनादून-

मानसः ॥७२॥ तं विज्ञाय मृतं चारुदत्तोऽपि परमेष्ठिनाम्। नमस्कारपरस्तस्थावश्रौषीदन्यदा ध्वनिम् ॥७३॥ कस्याप्यागच्छतो भीतस्ततश्चिन्ताकुलोऽभवत्। किमेतद्धंत हुं गोधा, समेत्येषा रसार्थिनी ॥७४॥ तच्छब्दोऽयमिति ज्ञात्वा, प्रणिपत्य जिनोत्तमान्। अप्रमत्ततया तस्थौ, तावत्सा यावदागता॥ ७५॥ निर्गच्छन्ती रसं पीत्वा, गृहीताऽत्रान्तरे दृढम्। कराभ्यां पुच्छदेशेऽसौ, तया चाकृष्य सङ्कटात्॥७६॥ विवरात्स बहिर्देशं, जनन्या वोपलम्भितः। कराभ्यां मुमुचे गोधा, ततो मूर्छामुपागतः ॥७७॥ पुनः प्रत्यागतप्राणः, परिभ्राम्यन्नितस्ततः। अरण्यमहिषत्रस्त, आरूढो विपुलां शिलाम्॥७८॥ रोषात्तमेत्य महिषः, प्रदेशं तज्जिघांसया। शृङ्गाभ्यां ताडयामास, तां शिलां यावदाहतः॥७९॥ कुतोऽपि तावदागत्य, गृहीतोऽजगरेण सः। तयोर्भण्डनमालक्ष्य, समुत्तीर्य शनैस्ततः ॥ ८० ॥ गच्छन्नरण्यमार्गेण, प्रत्यन्तग्राममागतः। वाणिज्याय समेतेन, रुद्रदत्तेन तत्र च ॥ ८१ ॥ स मातुलसखेनाशु, ददृशे पालितस्तथा। भूयः पुनर्नवो जात., स्वर्णभूमौ चचाल च ॥ ८२ ॥ समं तेनैव लाक्षादि, गृहीत्वा तुच्छभाण्डकम्। इषुवेगवतीं नाम्ना, नदीं गत्वा ततार ताम् ॥ ८३ ॥ गिरिकूटं समुल्लङ्घ्य, प्राप्तौ वेत्रवनं ततः। टङ्कणं विषयं यातौ, संगतौ धनतृष्णया ॥ ८४ ॥ संगृह्याजद्वयं तत्र, तदारूढौ प्रजग्मतुः। कृतान्तवदनाकारमजमाग क्रमेण तौ ॥ ८५ ॥ उल्लङ्घिते च भूभागे, रुद्रदत्तः कियत्यपि। शिरस्यञ्जलिमाधायोदित-

वानिदमञ्जसा ॥ ८६ ॥ न शक्यममुतो देशादहो ! गन्तुं पदात् पदम्। तस्मात्कुर्वो निहत्याजौ, भस्त्रिके मध्यरोमिके ॥ ८७ ॥ तौ तन्मध्यप्रविष्टौ चोत्क्षिप्तावामिषबुद्धिना । भारुण्डद्वितयेनावां, यावः स्वर्णभुवं सुखम् ॥ ८८ ॥ चारुदत्तोऽभ्यधादेवं, हा न युक्तमिदं यतः । आभ्यामुत्तारितावावां, दुर्गकान्तारतोऽमुतः ॥ ८९ ॥ तदेतन्निर्घृणं कर्म, कृतज्ञत्वं विहाय कः । कुर्यात् ? किंचेह हिंसातो, योऽर्थो मा भूत्स नः कुले ॥ ९० ॥ विहस्योवाच रुद्रस्तु, न त्वदीयावजाविमौ । यन्मह्यं रोचते किंचित्तत्त्वयोः करवाण्यहम् ॥ ९१ ॥ इत्युदित्वा झगित्येव, जघान निजवाहनम् । द्वितीयश्चारुदत्तस्य, चकितो मुखमैक्षत ॥ ९२ ॥ ततोऽसौ तमुवाचैवमहो वत्स ! त्वया पुरा । हिंसा प्रवर्त्तिता क्वापि, त्वं तेन प्राप्स्यसे वधम् ॥ ९३ ॥ मनोवाक्काययोगैर्यो, जीवः कर्माकरोत्पुरा । शुभाशुभं भवेत्तेन, तद्भोग्यं नात्र संशयः ॥ ९४ ॥ तदेवं न समर्थोऽस्मि, त्रातुं त्वां किन्तु मद्वचः । शृणु भावेन यद् दुःखी, पुनस्त्वं न भवे भवेः ॥ ९५ ॥ मृत्युदुःखार्त्तजन्तूनां, मनोवाक्कायचेष्टितैः । पीडा मया न कार्येति, गृहाण प्रथमं व्रतम् ॥ ९६ ॥ उत्पद्यते वधो यस्माज्जीवानां जीवितैषिणाम् । पीडा वा तन्न वक्तव्यं, ममेत्यस्त्वपरं व्रतम् ॥ ९७ ॥ न हर्त्तव्यं परं द्रव्यं, सचित्ताचित्तमिश्रभित् । मयेति प्रतिपद्यस्व, त्वं तृतीयमपि व्रतम् ॥ ९८ ॥ नरतिर्यक्सुरस्त्रीणां, मनोवाक्काययन्त्रितः ।

ोनवपदवृ- ः चतुर्थेऽ- णुव्रते.

॥ १८० ॥

चारुदत्तवृत्तं

मैथुनाद्विरतोऽस्मीति, चतुर्थं व्रतमाचर ॥ ९९ ॥ अभ्यन्तरस्तथा बाह्यो, न कर्त्तव्यः परिग्रहः । त्रिविधेन मयेत्येवं,
पञ्चमं स्वीकुरु व्रतम् ॥ १०० ॥ इत्थं व्रतानि पञ्चापि, त्वं चेत्सम्यक् करिष्यसि । जिनोदितानि दिव्यर्द्धीर्लप्स्य-
सेऽन्यभवे तदा ॥ १०१ ॥ नच मां रुद्रदत्तोऽयं, हन्तीतिमनसा कुरु । स्वकृतान्येव कर्माणि, निघ्नन्तीति विचि-
न्तय ॥ १०२ ॥ अन्यच्छरीरमन्योऽहं, भोक्ता स्वकृतकर्मणः । नित्योऽहमिदमध्रौव्यं, प्रतिपद्यस्व भावतः
॥ १०३ ॥ कौधादिभावचौराणां, भङ्क्त्वा प्रसरमादरात् । ज्ञानादिरत्नसङ्घातं, परिपालय सन्ततम् ॥ १०४ ॥
अर्हदादिनमस्कारं, परावर्त्तय चेतसि । इत्युक्तः प्रणतो भूत्वा, सर्वमङ्गीचकार सः ॥ १०५ ॥ अत्रान्तरे समा-
गत्य, रुद्रदत्तो जघान तम् । सकृपं चारुदत्तेन, वार्यमाणोऽपि सत्वरम् ॥ १०६ ॥ तत्कृत्ती भस्त्रिके कृत्वा:
चारुदत्तं सशस्त्रिकम् । एकस्यां संप्रवेश्याशु, परस्यां प्राविशत् स्वयम् ॥ ७ ॥ ततो भारण्डपक्षिभ्यां, कुतोऽप्यामि-
षवाञ्छया । विनिपत्य समुत्क्षिप्तौ, तत्क्षणात् व्योममण्डले ॥ ८ ॥ चारुदत्तो धृतो येन, समं तस्यान्यपक्षिणा । ॥ १८० ॥
आकाशे युध्यमानस्यापतद्भस्त्री सरोजले ॥ ९ ॥ शस्त्रया विपाट्य तां सोऽपि, गर्भादिव विनिर्गतः । उत्तीर्णः सरसोऽ-
पश्यद्द्वीपं रत्नविराजितम् ॥ १० ॥ तत्राविशङ्कितो भ्राम्यन्मन्दमारुतकम्पितम् । ददर्श गिरिकूटाग्रे, वीरं चन्द्रकरो-

ज्ज्वलम् ॥ ११ ॥ चारणश्रमणस्येदमिति संभाव्य वन्दितुम् । तं साधुमगमत्तूर्णमारुरोह च तं गिरिम् ॥ १२ ॥
आतापयन्तमद्राक्षीदूर्ध्वबाहुं महौजसम् । चारणश्रमणं तत्र, ज्वलन्तमिव पावकम् ॥ १३ ॥ विनयेन तमभ्येत्य,
मुनीन्द्रं परया मुदा । ववन्दे पारितोत्सर्गो, धर्मलाभं मुनिर्ददौ ॥ १४ ॥ बभाषे च कुतस्त्वं भो !, चारुदत्त ! समागतः ? ।
चम्पायां यस्त्वया बद्धो, मोचितः खचरोऽस्मि सः ॥ १५ ॥ तत्काल एव संप्राप्तस्वकान्तोऽष्टापदं प्रति । प्रणष्टे प्रतिशत्रौ
मे, गतोऽहं स्वं पुरं ततः ॥ १६ ॥ कियताऽप्यत्र कालेन, व्रतादानाभिलाषिणा । स्वराज्ये स्थापितः पित्रा, स्वयं च जगृहे
व्रतम् ॥ १७ ॥ हिरण्यस्वर्णकुम्भाख्यचारणश्रमणान्तिके । अभ्युद्यतविहारी चोपात्तशिक्षो बभूव सः ॥१८॥ राज्यं पालयतः
स्थित्या, सर्वान्तःपुरशोभने । जाते भार्ये च मे वर्ये, जयसेनामनोरमे ॥ १९ ॥ मनोरमायामुत्पन्नं, तदा पुत्रद्वयं मम ।
एकः सिंहयशोनामा, वराहग्रीवकोऽपरः ॥ २० ॥ पुत्री गन्धर्वसेना च, गान्धर्वेऽतिविचक्षणा । जज्ञे विजयसेनायाः,
सौभाग्यादिगुणोत्तरा ॥ २१ ॥ अन्यदा सह विद्याभिर्दत्त्वा राज्यं स्वपुत्रयोः । चारणव्रतिनोरन्तेऽहं तयोराददे व्रतम् ॥२२॥
द्वीपोऽयं कुम्भकण्ठाख्यो, लवणाम्भोधिमध्यगः । कर्कोटको गिरिश्चात्र, यस्मिन्नातापयाम्यहम् ॥ २३ ॥ देवविद्या
धरान् मुक्त्वा, चारणश्रमणांस्तथा । नान्योऽत्र शक्त आगन्तुं, कथं त्वं तु समागतः ? ॥ २४ ॥ इत्युक्त्वा विरते साधौ,

चारुदत्तोऽपि मूलतः । स्वां कथां कथयामास, तत्रागमननिष्ठिताम् ॥ २५ ॥ अत्रान्तरे समायातौ, विद्याधरनरो-
त्तमौ । रूपेण सदृशं साधोर्द्योतयन्तौ नभोऽङ्गणम् ॥ २६ ॥ चारुदत्तेन तौ दृष्ट्वा, वन्दमानौ मुनीश्वरम् । अस्या-
मितगतेः पुत्राविति चेतसि चिन्तितम् ॥ २७ ॥ कुलप्रसूतिसंसिद्ध विनयेन तमप्ययम् । वन्दित्वोचितभूभागे,
उपविष्टौ मुनिर्जगौ ॥ २८ ॥ भो ! भो ! स चारुदत्तोऽयमित्युक्तावादरेण तौ । ऊचतुः स्वागतं तेन, पितुर्जी-
वितदायिनः ॥ २९ ॥ इतश्च नभसाऽऽयान्तं, विमानं मुनिसंनिधौ । ददृशुः सर्वे एवामी, दिव्यसङ्गीतनिस्वनम्
॥ ३० ॥ ततोऽवतीर्य दिव्यात्मा, व्यालोलमणिकुण्डलः । सुपर्वा चारुदत्तस्य, ववन्दे चरणद्वयम् ॥ ३१ ॥
साधुं तदनु वन्दित्वा, चारुदत्तस्य सम्मुखः । उपविष्ट उपालब्धः, खचराभ्यामेवमञ्जसा ॥ ३२ ॥
देवेभ्यो विधयः सर्वे, प्रवर्त्तन्तेऽत्र निश्चितम् । तत्किं साधुं व्यतिक्रम्य, वन्दितः श्रावकस्त्वया ? ॥ ३३ ॥
सोऽभ्यधादयमस्माकं, धर्माचार्यो यतोऽमुतः । धर्मं धर्मफलं देवं, गुरुं च ज्ञातवानहम् ॥ ३४ ॥ कथमेवमिति
प्रोक्ते, खचराभ्यां सुरोऽवदत् । वाराणस्यां पुराऽभूतां, सुभद्रासुलसाभिधे ॥ ३५ ॥ द्वे परिव्राजके वेदवेदाङ्गादि- 
विशारदे । अन्यदा याज्ञवल्क्येन, विवादे सुलसा जिता ॥ ३६ ॥ तत्प्रभृत्येव सा तस्य, शुश्रूषानिरताऽभवत् ।

अत्यन्तसंस्तवाच्चैषा [ ग्रन्थाग्रम्–५००० ] नैकान्तेऽपि निवार्यते ॥ ३७ ॥ कालो गच्छति चान्योऽन्यं, तयोः कामातुरत्वतः । संजातमैथुनासक्तिस्तारुण्यमदमत्तयोः ॥ ३८ ॥ नगरादतिदूरे च, क्रीडतोराश्रमास्पदे । जातः पुत्रोऽन्यदा तं च, छायायां पिप्पलस्य तौ ॥३९॥ परित्यज्य ततो नष्टौ, स च पिप्पलपिप्पकम् । कथञ्चित्पतितं वक्त्रे, भक्षयन्नवलोकितः ॥ ४० ॥ भद्रया सुलसास्वस्रा, ज्ञातवृत्तान्तया तया । चित्तखेदं विधायोच्चैर्नीतो बालः स्वमन्दिरम् ॥ ४१ ॥ नामप्रदानकाले च, कालाद्यौचित्यविज्ञया । यथार्थं नाम चक्रेऽस्य, पिप्पलाद इति स्फुटम् ॥ ४२ ॥ तस्याः प्रतिश्रये तेन, पेठे सर्वकलान्वितः । षडङ्गसहितो वेदो, जातो वादी महानसौ ॥ ४३ ॥ सुलसायाज्ञवल्क्याभ्यां, समं वादोऽन्यदाऽजनि । तस्य तौ विजितौ तेन, बहुलोकस्य पश्यतः ॥ ४४ ॥ भद्रया कथितं चास्य, यथा पुत्रस्त्वमेतयोः । पितृ ( नृ ) मेधादिमहायज्ञान्, प्रदिष्टः प्रणिनाय सः ॥ ४५ ॥ ततोऽसौ पितृमेधेन, मातृमेधेन चावधीत् । पितरौ तस्य शिष्यश्च, वाग्बलिर्नाम विश्रुतः ॥ ४६ ॥ स तेन तस्य कृत्वाऽसौ, पशूनां सततं वधम् । जगाम नरकं घोरमुद्धृतः स ततः पुनः ॥ ४७ ॥ मिथिलायामजत्वेनोदपादि पशुमेधतः । पञ्चकृत्वः क्षयं नीतो, ब्राह्मणैर्जनकाध्वरे ॥ ४८ ॥ ततोऽपि षष्ठवेलायां, छगलष्टङ्कनेष्वभूत् । वाहार्थं चारुदत्तस्य, रुद्रदत्तोऽगृहीदमुम् ॥ ४९ ॥ अन्ये-

घुर्मार्यमाणस्य, रुद्रेणास्य कृपापरः । चारुदत्तोऽवदद्धर्मं, प्रतिपेदे स भावतः ॥ १५० ॥ ततस्तदनुभावेन, नमस्का-
रादिभावितः । सौधर्मे त्रिदशो जातः, संत्यज्य पशुतामसौ ॥ १५१ ॥ योऽसौ वाग्वलिजीवोऽभूट्टङ्कनेषु महानजः ।
प्रसादाच्चारुदत्तस्य, सोऽहं देवत्वमागतः ॥ ५२ ॥ अतो धर्मगुरुर्मेऽसौ, वन्दितः प्रथमं मुनेः । इत्युक्त्वा तौ
सुरस्तस्थौ, तावप्येवं तमूचतुः ॥ ५३ ॥ सत्यमेवोपकार्येष, यस्मादस्माकमप्ययम् । पितुर्बन्धविमोक्षेण, कुलस्या-
प्युपकारकः ॥ ५४ ॥ चारुदत्तमवादीच्च, पुनर्देवः कृताञ्जलिः । कार्यं यत्तव तद्ब्रूहि, येन संसाधये प्रभो ! ॥ ५५ ॥
स्मरिष्यामि यदाऽहं त्वामागन्तव्यं तदा त्वया । इत्युक्ते तेन देवोऽसावेवमस्त्वित्यमन्यत ॥ ५६ ॥ भूयः प्रणम्य तं देवो,
मुनिं चादृश्यतां गतः । खचरौ च यतिं नत्वा, निन्यतुस्तं निजं पुरम् ॥ ५७ ॥ विद्याधराङ्गनास्तत्र, प्रमोदभरनिर्भराः ।
जजल्पुरागतः सोऽयं, यः स्वामिप्राणदायकः ॥ ५८ ॥ यथाभिलषितस्थानशयनासनभोजनैः । अतिष्ठत् स सुखं
तत्र, देववद्दिविवालये ॥ ५९ ॥ मुक्तो विद्याधराभ्यां च, निन्ये चम्पापुरीमसौ । कदाचित्तेन देवने,
प्रदाय प्रचुरं धनम् ॥ ६० ॥ मिलितो मातुलस्तत्र, सर्वार्थो जननी तथा । भार्या मित्रवती लोकः, सर्वोऽपि सुहृदा-
दिकः ॥ ६१ ॥ तद्वियोगदिनादेव, वेणीबन्धेन या स्थिता । गणिका वसन्तसेना, सा च भर्तृव्रतस्थिता ॥ ६२ ॥

ततः सुखेन तैः सार्द्धं, भूयः शुभविपाकतः । त्रिवर्गाभिरतस्यास्य, कालशेषोऽप्यगच्छत ॥ ६३ ॥ तदेवं चारुदत्तोऽयं, च्युतः सर्वार्थमातुलात् । परिग्रहानिवृत्तात्मा, लेभे दुःखं यथा घनम् ॥ ६४ ॥ असन्तुष्टास्तथाऽन्येऽपि, लभन्ते दुःखमङ्गिनः । परिग्रहाग्रहस्त्याज्यो, विदित्वैवं विवेकिभिः ॥ ६५ ॥ समाप्तं चारुदत्ताख्यानकम् । भणितं दोषद्वारमधुनाऽस्यैव गुणद्वारमाह—

जे इह परिमाणकडा, संतोसपरा दढवया धीरा ।
ते जिणदासो व सया हवंति सुहभाइणो लोए ॥ ५९ ॥

'ये' इत्यनिर्दिष्टनामानः, अनेन च प्राग्गाथातः पुरुषा अभिसंबध्यन्ते, 'इह' अस्मिन् लोके 'परिमाणकड' त्ति कृतपरिमाणाः प्रस्तावाद्विहितपरिग्रहपरिमितयः सन्तोषः-इच्छानिरोधः स परः-प्रकृष्टो येषां तस्मिन् वा पराः-तन्निष्ठाः सन्तोषपराः, दृढं व्रतं येषां ते दृढव्रताः-यथावस्थितगृहीतनियमपालकाः, कुतो हेतोः ? इत्याशङ्कायां विशेषणद्वारेण हेतुमाह—'धीराः' सात्त्विका यत इति शेषः, ते किमित्याह—जिनदास इव 'सदा' सर्वदा 'भवन्ति' जायन्ते 'सुखभागिनः' शर्मभाजः 'लोके' जगति, न चेदं स्वमनीषिकयोच्यते, यत उक्तमन्यैरपि—"सर्वाः संपत्तय-

स्तस्य, सन्तुष्टं यस्य मानसम् । उपानद्गूढपादस्य, ननु चर्मावृतैव भूः ॥ १ ॥ जह २ अप्पो लोभो जह २ अप्पो परिग्गहारंभो । तह तह सुहं पवड्ढइ धम्मस्स य होइ संसिद्धी ॥ २ ॥ ” इति गाथाऽक्षरार्थः ॥ भावार्थः कथानकेनोच्यते---

पाटलिपुत्रे नगरे जिनदासः श्रावकोऽभवत् ख्यातः । सम्यग्दृष्टिः पञ्चाणुव्रतधारी गुणसमृद्धः ॥१॥ तस्यान्यदा च हट्टे तडागखनने नृपेण विनियुक्तैः । कर्मकरैरानीताः स्वर्णमया लोहसदृशकुशाः ॥ २ ॥ परिमाणस्यातिक्रमभयेन जगृहे न तेन ते विदुषा । उपनीतास्तदनु च तैर्विपणौ खलु लोभनन्दस्य ॥ ३ ॥ तेनापि लोहमूल्येन गृहीताः स्वर्णलोभतो भूयः । भणिता अन्येऽप्येवंप्राया अत्रैव विक्रेयाः ॥ ४ ॥ अज्ञानदोषतस्ते हेममयानपि च लोहमूल्येन । विक्रीणान्ति प्रतिदिनमितरो लोभेन गृह्णाति ॥ ५ ॥ अन्येद्युस्तत्सुहृदः प्रकरणमभवद्गृहे किमपि तेन । आकार्य बलान्नीतोऽनिच्छन्नपि भोजनार्थमसौ ॥ ६ ॥ भणितः पुत्रो व्रजता स्वीकर्त्तव्या अनेन मूल्येन । यद्यायान्ति कुशास्ते न च मर्म प्रकटितं तस्य ॥ ७ ॥ लोहमया इति बुद्ध्या न च तन्मूल्येन तेन त उपात्ताः । मुग्धतया कर्मकरैर्नीता अन्येषु हट्टेषु ॥ ८ ॥ भवितव्यतावशेन च तेष्वेको निपतितः कथञ्चिदपि । पाषाणोपरि दृष्टो व्यपगतकिट्टः सुवर्णमयः ॥ ९ ॥ तन्निकटवर्त्तिभिर्दण्डपाशकैस्ते नरास्ततो भणिताः । क्वैते लब्धाः क धृताः कस्य वितीर्णाः कियन्तो

वा ? ॥ १० ॥ एवं पृष्टाः कथयामासुस्ते सरासि खन्यमानेऽमी । लब्धा मृदा विलिप्ता लोहधिया रहसि विधृताश्च ॥ ११ ॥ जिनदासस्य च हट्टेऽवतारिताः स्वीकृता न तेनैते । क्रीताश्च लोहमूल्येन लोभनन्देन ते केऽपि ॥ १२ ॥ सविशेष-मूल्यतोषितहृदया अनुदिवसमेव तद्विपणौ । विक्रीणीमः शेषा अद्यापि च केऽपि तिष्ठन्ति ॥ १३ ॥ श्रुत्वैवं तैः कथितं नृपतेराह्वायितश्च तेनासौ । जिनदास एव पूर्वं पृष्टः किं स्वीकृता नैते ? ॥ १४ ॥ तेनोदितं परिग्रहपरिमाणं मम समस्ति तद्भङ्गः । मा भूदिति न गृहीताः कनकमया इति विदित्वाऽपि ॥ १५ ॥ तुष्टेन ततो राज्ञा संपूज्य प्रेषितः स्वभवनं सः । पश्चाच्च लोभनन्दानयनाय प्रेषिताः पुरुषाः ॥ १६ ॥ इतश्च—कृत्वा भोजनमेषोऽप्यायातो यावदुत्सुकः स्वगृहम् । व्यज्ञासीदगृहीतास्तांस्ततश्चिन्तयामास ॥ १७ ॥ अभविष्यतां ममांह्री यदि नैतौ वैरिणौ तदा-ऽयास्यम् । मित्रगृहं कथमेतद्विचिन्त्य पादौ निजौ तेन ॥ १८ ॥ आहत्य कुठारेण छिन्नावत्रान्तरे नृपतिपुरुषाः । आगत्य ग्रीवायां प्रगृह्य निन्युर्नृपतिपार्श्वम् ॥ १९ ॥ राज्ञाऽप्यपहृत्य धनं निःशेषं चौरनिग्रहेणैषः । निग्रहितस्तदेवं ज्ञात्वा लोभं समुत्सृजत ॥ २० ॥ त्यक्तलोभस्तु जिनदासवत्पूज्यो भवतीति गुणं विज्ञाय परिग्रहपरिमाणे यतितव्यमिति गुणद्वारोपदर्शकगाथाभावार्थः ॥ यतनाद्वारमिदानीमभिधीयते—

संभरइ वारवारं, मुक्कलतरगं व गेण्हइस्सामि ।
एवं वयं पुणोऽविय मणेण नय चिंतए एवं ॥ ६० ॥

गृहीतपरिग्रहपरिमाणस्य श्रावकस्येयं यतना—यदुत 'संस्मरति' चिन्तयति 'वारं २' भूयो भूयः एतावन्मात्रं परिग्रहपरिमाणमेतावन्तं कालं यावन्मया गृहीतमित्येवं, तथा कथञ्चित्संक्षिप्ते गृहीते चतुर्मासादिनियमे न प्रचुरव्यवहाराद्याकाङ्क्षया 'मुत्कलतरकं' प्रचुरतरकमेव वाशब्दस्यैवकारार्थत्वाद् 'ग्रहीष्यामि' उपादास्ये, एतत्समाप्त्युत्तरकालमिति शेषः, 'एतत्' परिग्रहपरिमाणलक्षणं 'व्रतं' नियमं 'पुनः' भूयोऽपि चशब्दो यतनाप्रकारान्तरसमुच्चये 'मनसा' चेतसा 'न च' नैव 'चिन्तयेत्' ध्यायेत 'एवं' अमुना प्रकारेणेति गाथार्थः ॥ व्याख्यातं यतनाद्वारमधुनाऽतिचारद्वारमस्यैवोच्यते—

खेत्ताइहिरण्णाईधणाइदुपयाइकुप्पमाणकमे ।
जोयणपयाणबंधणकारणभावेहि नो कुणइ ॥ ६१ ॥



क्षेत्रादिहिरण्यादिधनादिद्विपदादिकुप्यमानक्रमानिति, क्षेत्रमादिर्यस्येत्येवं सर्वपदेष्वात्मीयादिशब्देन बहु-

व्रीहिं कृत्वा सर्वपदानां कुप्यान्तानां द्वन्द्वे संति मानक्रमशब्देन षष्ठीसमासे च प्रत्येकं सम्बन्धो विधेयो, यथा क्षेत्रादेर्मानक्रमो हिरण्यादेर्मानक्रम इत्यादि, मानक्रमश्च प्रमाणातिक्रमो भण्यते,' तं नो करोती'ति चरमपादान्ते क्रिया, गृहीतक्षेत्रादिपरिमाणः श्रावक इति सामर्थ्याद् गम्यं, कैर्न करोतीत्याह—योजनप्रदानबन्धनकारणभावैः, अत्र योजनादिपदानि पञ्च कृतद्वन्द्वानि तृतीयान्तानि, यथासङ्ख्येन चैषां सम्बन्धः, तेन क्षेत्रादिप्रमाणातिक्रमं योजनेन 'नो करोति' न विधत्ते इत्याद्यवगम्यमिति गाथासमुदायार्थः। अवयवार्थश्चायं—क्षेत्रं—सस्योत्पत्तिभूमिः तच्च सेतुकेतूभयभेदात्त्रिधा पूर्वोक्तम्, आदिशब्दाद्वास्तुग्रहो, वास्तु च-अगारं ग्रामनगरादि च तत्रागारं त्रिप्रकारं प्रागुदितमेव, एतयोश्च क्षेत्रवास्तुनोः प्रमाणस्य योजनेन—क्षेत्रान्तरादिमीलनेनातिक्रमोऽतिचारो भवति, तथाहि-किलैकमेव क्षेत्रं वास्तु वेत्यभिग्रहवतोऽधिकतरतदभिलाषे सति व्रतभङ्गभयात्प्राक्तनक्षेत्रादिप्रत्यासन्नं तद् गृहीत्वा पूर्वेण सह तस्यैकत्वकरणार्थं वृत्त्याद्यपनयनेन तत्तत्र योजयतो व्रतसापेक्षत्वात्कथञ्चिद्विरतिबाधनाच्चातिचार इति, तथा हिरण्यं-रजतमादिशब्दात्सुवर्णं तत्परिमाणस्य प्रदानेन—वितरणेनातिक्रमो भवति, यथा केनापि चतुर्मासाद्यवधिना हिरण्यादिपरिमाणं विहितं, तत्र च तेन तुष्टराजादेः सकाशात्तदधिकं तल्लब्धं, तच्चान्यस्मै व्रत-

भङ्गभयात्प्रददाति, पूर्णेऽवाधे ग्रहीष्यामीति भावनयेति व्रतसापेक्षत्वादतिचारः, तथा धनं—गणिमधरिममेयपरिच्छेद्य-भेदाच्चतुर्विधं पूर्वं व्याख्यातमेव, आदिशब्दात् धान्यं-व्रीह्यादि एतत्प्रमाणस्य बन्धनतोऽतिक्रमो भवति, तथाहि-किल कृतधनादिपरिमाणस्य कोऽपि लभ्यमन्यद्वा धनादि ददाति, तच्च व्रतभङ्गभयाच्चतुर्मासादिपरतो गृहगतधना-दिविक्रये वा कृते ग्रहीष्यामीति भावनया बन्धनेन—नियन्त्रणेन रज्ज्वादिसंयमनेन सत्यङ्कारदानादिरूपेण वा स्वी-कृत्य तद्गेह एव तत्स्थापयतोऽतिचारः, तथा द्विपदं—पुत्रकलत्रदासीदासकर्मकरशुकसारिकादिरूपम्, आदिशब्दा-द्गवादिचतुष्पदपरिग्रहः, तेषां यत्परिमाणं तस्य कारणेन—गर्भाधानविधापनेनातिक्रमोऽतिचारो भवति, यथा किल केनापि संवत्सराद्यवधिना द्विपदचतुष्पदानां परिमाणं कृतं, तेषां च संवत्सरमध्य एव प्रसवेऽधिकद्विपदादिभावाद् व्रतभङ्गः स्यादिति तद्भयात्कियत्यपि काले गते गर्भग्रहणं कारयतो गर्भस्थद्विपदादिभावेन बहिर्गततदभावेन च कथञ्चिद् व्रतभङ्गादतिचारः, तथा कुप्यम्—आसनशयनादिगृहोपस्करस्तस्य यन्मानं तस्य भावेन—तत्पर्यायान्तररूपे-णातिक्रमो भवति, यथा किल केनापि दश करोटकानीति कुप्यस्य परिमाणं कृतं, ततस्तेषां कथञ्चिद् द्विगुणत्वे सति व्रतभङ्गभयात्तेषां द्वयेन द्वयेनैकैकं महत्तरं कारयतः पर्यायान्तरकरणे सङ्ख्यापूरणात् स्वाभा-

॥ १८५ ॥

विकसंख्याबाधनाच्चातिचारः, अन्ये त्वाहुः—भावेन—तदर्थित्वलक्षणेन विवक्षितकालावधेः परतोऽहमेतद्ग्रहीष्यामीत्यतो नान्यस्मै देयमिति पराप्रदेयतया व्यवस्थापयत इति, एते चातिचारा मूलसूत्र एवमभिधीयन्ते 'खेत्तवत्थुपमाणाइक्कमे हिरण्णसुवण्णपरिमाणाइक्कमे' इत्यादि, यथाश्रुतत्वेन चैषामभ्युपगमे भङ्गातिचारयोर्न विशेषः स्यादिति तद्विशेषोपदर्शनार्थमाचार्येण योजनप्रदानेत्यादिभावना दर्शिता, एतद्भावनोपदर्शनादेवान्येषां सहसाभ्याख्यानादीनामतिचाराणामनुपदर्शितभावनानामपि भावनोत्प्रेक्षणीया, सा च यथाबोधं केषाञ्चिद्दर्शितैवास्माभिः, यच्च क्षेत्रादिपरिग्रहस्य नवविधत्वेन तत्सङ्ख्यातिचारप्राप्तौ पञ्चसङ्ख्यत्वमुक्तं तत्सजातीयत्वेन शेषभेदानामत्रैवान्तर्भावात्, शिष्यहितत्वेन च प्रायः सर्वत्र मध्यगतेर्विवक्षितत्वात्पञ्चकसङ्ख्ययैवातिचारपरिगणनमतश्चतुःषडादिसङ्ख्याऽतिचाराणां गणनमुपपन्नमिति गाथार्थः ॥ ६१ ॥ गतमतिचारद्वारमधुना भङ्गद्वारमुच्यते—

जइ जाणंतो गेण्हइ अहियं घण्णाइ तो भवे भंगो।
अइसंकिलिट्ठचित्तस्स तस्स परिणामविरहाओ ॥ ६२ ॥

'यदि' चेत् 'जानानः' अवबुध्यमानः 'गृह्णाति' आदत्ते 'अधिकं' अर्गलम्, भङ्गीकृतपरिमाणा-

दिति गम्यते, किं तत् ? इत्याह—धन्यादि—धान्यधनद्विपदादि 'ततः' तस्मात्, किं ?—' भवेत् ' जायेत ' भङ्गः ' सर्वाभावरूपः, कस्य ? इत्याह—'तस्य' आभोगेन स्वीकृतपरिमाणातिरिक्तग्राहिणः, इदं चानन्तरपदादुपरिवर्त्त्यपि अत्र योज्यते अर्थानुगुण्यात्, किंविशिष्टस्येत्याह—अतिशयेन सङ्क्लिष्टं चित्तं यस्य स तथा तस्य—अतिरौद्राध्यवसायिचेतसः, कस्मात् ?—' परिणामविरहात् ' व्रतपरिणत्यभावादिति गाथार्थः ॥ ६२ ॥ भावनाद्वारमधुना—

चत्तकलत्तपुत्तसुहिसयणसबंधवमित्तवग्गया, खेत्तसुवण्णदविणधणधण्णविवज्जियसयलसंगया ।
देहाहारवत्थपत्ताइसु दूरुज्झियममत्तया; चिंतसु सुविहियावि तं सावय ! मोक्खपहंमि पत्तया ॥६३॥

शृणोति—आकर्णयति संप्राप्तदर्शनादिगुणो यतिभ्यः सकाशात्सामाचारीमिति श्रावकस्तस्य सम्बोधनं हे श्रावक—हे श्राद्ध ! 'त्वं' भवान् 'चिन्तयस्व' परिभावय, कान् ?-'सुविहितान्' शोभनं विहितं येषां ते तथा तान्, सदनुष्ठानान् यतीनित्यर्थः, किंभूतान् ?—मोक्षस्य पन्था मोक्षपथस्तस्मिन् मोक्षपथे ' प्राप्तान् ' लग्नान्, सम्यग्ज्ञानदर्शनचारित्ररूपमुक्तिमार्गे समासक्तानिति भावना, पुनः किंविशिष्टान् ? इत्याह—त्यक्तकलत्रपुत्रसुहृत्स्वजनसबान्धवमित्रवर्गान् ' अत्र सह बान्धवैःबन्धुभिर्वर्त्तन्ते इति सबान्धवः स चासौ मित्रवर्गश्चेति कर्मधारयं कृत्वा कलत्रादिपदानां

सर्वेषामपि द्वन्द्वः कार्यः, पश्चाच्च त्यक्तशब्देनान्यपदार्थो बहुव्रीहिः, एषां चायं विशेषः—कलत्रं—भार्या पुत्रः—तनयः सुहृत्—स्नेहविषयपात्रे प्रतिकूलकारिण्यपि न दौर्मनस्यकारी स्वजनः—एकजात्यादिसम्बद्धः प्रतिपन्नको वा बान्धवो—भ्रात्रादिः मित्रं—सहपांशुक्रीडितादिः, अनेन सचित्तद्विपदस्वरूपपरिग्रहपरित्यागोऽभिहितो, न चैतावतैव क्षेत्रादिसद्भावे निष्परिग्रहत्वमुपजायत इत्युपदर्शनाय विशेषणान्तरमाह—' क्षेत्रसुवर्णद्रविणधनधान्यविवर्जितसकलसङ्गान् ' क्षेत्रं—सस्योत्पत्तिस्थानं सुवर्णं—हेम द्रविणं—द्रम्मरूपकादि द्रव्यं धनं—गवादि धान्यं—शाल्यादि एतेषां द्वन्द्वे एतान्येव विवर्जितः—त्यक्तः सकलः—सर्वसङ्गहेतुत्वात् सङ्गः—अभिष्वङ्गहेतुर्यैस्ते तथा तान्, एतेन त्वपदचतुष्पदपरिहारः प्रतिपादितः, सत्यपि च कलत्रक्षेत्राद्यभावे देहादौ मूर्छासद्भावात् सपरिग्रह एवेत्यतो विशेषणान्तरमाह-' देहाहारवस्त्रपात्रादिषु दूरोज्झितममत्वान् ' देहः—शरीरं आहारो—भोजनं वस्त्रं-वासः पात्रं—भाजनम् आदिशब्दात्कम्बलपादप्रोञ्छनदण्डकादिनिःशेषधर्मोपकरणग्रहः, ' सुविहियावि ' त्ति अपिशब्दोऽत्र योज्यते तत आस्तामन्येष्वधिकरणेषु गृहादिकेष्वपि धर्मोपकरणेषु दूरम्—अतिशयेनोज्झितं—त्यक्तं ममत्वं—न मे इति बुद्धिर्यैस्ते तथा तान्, एवं-

३१ विधान् सुविहितान् ' चिन्तयस्व ' त्यनुमन्यस्व, अनुमत्या चैतत्सूचितं—यद्यपि श्रावको विषयसुखपिपासाद्या-

कुलितचित्तवृत्तिः सकलसङ्कपरित्यागं कर्तुमसमर्थस्तथाऽप्येवंविधसाधुपरिभावनया जनिततद्बहुमानातिशयोच्छलितजीववीर्यः कुर्यादपीलापुत्रन्यायेनेति द्विपद्यर्थः । भणितं भावनाद्वारं, तद्भणनाच्च समाप्तं नवभिरपि द्वारैः पञ्चमाणुव्रतं, तत्समाप्तौ गतानि पञ्चाणुव्रतानि ॥ अधुना गुणव्रतानामवसरः, तानि च त्रीण्यपि प्रत्येकमेतैरेव नवद्वारैर्व्याख्येयानि, अत आदौ प्रथमं दिग्व्रतनामकं गुणव्रतमाद्यद्वारेणाह—

तत्तायगोलकप्पो, अप्पा अणिवारिओ वहं कुणइ ।
इइ जा दिसासु विरई, गुणव्वयं तमिह नायव्वं ॥ ६६ ॥

'तप्तायोगोलकल्पः' वह्निप्रतप्तलोहपिण्डतुल्यः 'आत्मा' जीवः 'अनिवारितः' अप्रतिषिद्धः, दिशापरिमाणेनानियन्त्रितदिग्विभाग इत्यर्थः 'वधं' विनाशं जीवानामिति गम्यते 'करोति' विदधाति, तप्तायोगोलकल्पत्वं च जीवस्य प्रमत्ततया यथा तथा हिंसाहेतुत्वाद् अनिवृत्तिरेव प्रवृत्तिरितिवचनाद्वा, यदुक्तं—"तो बंधमणिच्छंतो कुज्जा सावज्जजोगविणिवित्तिं । अविसयअणिवित्तीएऽसुहभावा दढयरं स भवे ॥ १ ॥" ततः कर्मबन्धमनिच्छन् कुर्यात् सावद्ययोगविनिवृत्तिम्, अविषयः—स्वयम्भूरमणादिस्तस्मिन्नप्यनिवृत्त्या—विरत्यकरणेनाशुभभावात्—क्लिष्टाध्यवसायाद्

दृढतरं स बन्धो भवेद्, अतोऽनिवृत्तिरेव प्रवृत्तिरिति सिद्धं, इतिहेतोः, यद्वा इत्येवं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया या दिशासु—आशासु विरतिः—गमनं प्रति विरमणं गुणव्रतमाद्यमिति शेषः, तदिह ज्ञातव्यमिति, कोऽर्थः?—दिग्व्रतनामकमाद्यगुणव्रतमत्र व्रतविचारेऽवगन्तव्यं स्वरूपेणेति गाथार्थः ॥ भेदद्वारमधुना—

पुव्वावरउत्तरदाहिणेण उड्ढं अहे य परिमाणं ।
छच्चेव तस्स भेया गुणवयस्सेह नायव्वा ॥ ६७ ॥

इह दिग्व्रताभिधानगुणव्रतस्य दिक्षट्कसम्बन्धेन षड् भेदा उच्यन्ते, तथा चाह—पूर्वापरोत्तरदक्षिणेनोर्ध्वमधश्च परिमाणं, तत्र प्राग्दिग्भागः पूर्वः, पश्चिमदिग्भागोऽपरः, उदग्दिग्भाग उत्तरो, याम्यदिग्भागो दक्षिणः, समाहारद्वन्द्वश्चात्र, ततः पूर्वादिदिग्भागेनैतावन्मया गन्तव्यं, एवं यत्परिमाणं तच्चतुर्दिगपेक्षया चतुर्विधं जातं, न केवलं पूर्वादिदिग्भागेन परिमाणं, तथोर्ध्वमधश्च—उपर्यधस्ताच्च 'परिमाणं' परिमितिः, अनेन च द्वयेन सह षोढा, नामग्राहं चैते भेदा एवं वाच्याः—पूर्वदिक्परिमाणं अपरदिक्परिमाणं उत्तरदिक्परिमाणं दक्षिणदिक्परिमाणं ऊर्ध्वदिक्परिमाणमधोदिक्परिमाणमिति, अत एवाह—'षट् चैव तस्य भेदाः' षडिति सङ्ख्या चशब्दोऽनुक्तसमुच्चयार्थः

तेनान्यचतुर्विदिक्प्रक्षेपेण दश वा भेदास्तस्य, कस्येत्याह–'गुणव्रतस्य' गुणाय व्रतं गुणव्रतं, प्राणातिपाताणुव्रतादिपालनाय वृत्तिकल्पं तस्य 'इह' अत्र भेदप्रक्रमे 'ज्ञातव्याः' बोद्धव्या इति गाथार्थः ॥ यथा जायत इदं तथाऽधुनोच्यते—

परिमियखेत्ताउ बहिं जीवाणं अभयदाणबुद्धीए ।
दिसिवयगहपरिणामो उप्पज्जइ तिव्वसङ्घस्स ॥ ६८ ॥

परिमितक्षेत्रात्–पूर्वादिदिक्षु दशस्वपि प्रत्येकमेतावन्ति योजनानि मया गन्तव्यमित्येवं परिच्छिन्नभूदेशलक्षणाद् 'बहिः' बाह्यस्थाने 'जीवानां' जन्तूनां 'अभयप्रदानबुद्ध्या' जीवितरक्षावितरणधिया 'दिग्व्रतग्रहपरिणामः' पूर्वादिदिग्गमनविरत्यादानपरिणतिः 'उत्पद्यते' जायते 'तीव्रश्रद्धस्य' उत्कटप्रधानभावस्येति गाथार्थः ॥ दोषद्वारमधुना प्रतिपाद्यते—

दिसि परिमाणं न कुणंति कहवि मोहेण मोहिया पावा ।
तिमिसगुहाए जह कोणिओ हु निहणं नरा जंति ॥ ६९ ॥

॥ १८८ ॥

दिशि—दिशाविषये परिमाणं—परिमितत्वं 'न कुर्वन्ति' नो विदधति 'कथमपि' केनापि प्रकारेण, कीदृशाः सन्तः? इत्याह—'मोहेन' अज्ञानेन 'मोहिताः' मूढीकृताः, पुनः कथम्भूताः? —'पापाः' गुरुकर्माणः 'तिमिसगुहायां' तिमिसाभिधानवैताढ्यकन्दरायां 'यथा कोणिकः' अशोकचन्द्र इवेत्यर्थः, 'हुः' अवधारणे स चाग्रे योक्ष्यते, 'निधनं' विनाशं 'नराः' पुरुषाः 'यान्त्येव' व्रजन्त्येवेत्यक्षरार्थः ॥ समुदायार्थयोजना तु यत्तच्छ्लेषेणेत्थं कार्या—ये नरा मोहमोहिताः पापाः दिक्परिमाणं न कुर्वन्ति ते तिमिसगुहायां कोणिकवन्निधनं यान्तीति गाथासङ्क्षेपार्थः। व्यासार्थस्तु कथानकगम्यः, तच्चेदम्—

चम्पानगर्यां श्रेणिकराजपुत्रोऽशोकचन्द्रापरनामा कोणिकनरपतिर्बभूव, स च यथा श्रेणिकराजे प्राग्भवाबद्धवैरस्तद्भार्याया एव चेल्लणायाः सुतत्वेनोत्पेदे, यथा च प्रवर्द्धमानो वैमात्रिककालादिकुमारदशकं प्रत्येकं राज्यैकादशांशैष(शार्प)णेन सहायीकृत्य स्वपितरं श्रेणिकं बद्धा राज्यं स्वीकृतवान्, यथा च विषभक्षणेन पितर्युपरते तच्छोकेनैव राजगृहनगरं परित्यज्य चम्पापुरीं राजधानीं चकार, यथा च स्वसहोदरहल्लविहल्लव्यतिकरात् सम स्वमातामहचेटकराजेन सङ्ग्राममङ्गीकृत्य कालादिषूपरतेषु संगृहीतसमस्ततद्बलो बहोः कालात् महाकष्टेन वैशालीं नगरीं जग्राह, यथा च चेट-

कराजस्य देवलोकगमने सर्वत्राप्रतिस्खलिताज्ञैश्वर्यो महाराजो भूत्वा भूयश्चम्पानगर्यामाजगाम, तथा सविस्तरं सप्रसङ्गं च मूलावश्यकटीकादितोऽवसेयं, इह तु प्रस्तुतगाथार्थघटनाय किञ्चिदेव कथ्यते, तस्य महामहीपतेरसाधारणपराक्रमाक्रान्तसमस्तसामन्तचक्रस्य चक्रस्वस्तिकादिसल्लक्षणक्षूणपाणिपादाद्यवयवस्य प्राग्भवोपात्तप्रधानपुण्योदयसम्पाद्यमानासमानसकलराज्याङ्गस्य समं पद्मावतीप्रमुखान्तःपुरेण जीवलोकसारं पञ्चप्रकारं विषयसुखमनुभवतोऽतिचक्रमुः कियन्तोऽपि वत्सराः, अन्येद्युश्च द्युसदःशतसहस्रकोटिसंततोपसेव्यमानपादपङ्कजः पादपङ्कजसंस्पर्शपवित्रितसकलेलातलः सकलेलातलप्रतीतबालकालप्रभृतिमेरुपृष्ठकम्पाद्यनेकाकारचारुचरितः चारुचरितवर्णनासमयशक्रसमुदाहृतयदीयसत्त्वाधिकत्वगुणश्रवणसमुत्पन्नरोषातिरेकसङ्गमकविरचितविचित्रषाण्मासिकोपसर्गवर्गाप्रतिहतप्रवृद्धनिरर्गलशुभध्यानानलनिर्दग्धकर्मेन्धनः तस्यामेव चम्पापुर्यां श्रीमन्महावीरतीर्थकरः समवसृतः, उद्यानपालकादिविदिततदागमनवृत्तान्तः कोणिको निश्चक्राम महाविभूत्या वन्दनार्थं, प्राप्तः समवसरणदेशं, परित्यक्तच्छत्रचामरादिराज्यालङ्कारः प्रदक्षिणात्रयविधानपूर्वं भक्तिभरावनम्रमस्तको विधिवदभिवन्द्य भगवत्पादारविन्दद्वन्द्वं उचितभूप्रदेशे समुपविवेश, प्रारब्धायां च भगवता धर्मदेशनायामुपदर्शिते धर्माधर्मफलविभागे प्रस्तावोचितं पप्रच्छ कोणिकः-भगवन्! यत्त्वया

धर्मफलमुपवर्णयता देवादिवर्णनं कृतं, तत्र चक्रिणोऽपि धर्ममाहात्म्येन भवन्तीति कथितं, ते चानिवृत्तकामभोगा एव यदि म्रियन्ते तदा क्वोत्पद्यन्ते ?, भगवानुवाच—सप्तमनरकपृथिव्यां, कोणिको जगाद—अहं क यास्यामि ?, परमेश्वरोऽब्रवीत्—त्वं षष्ठपृथिव्यां, राजा बभाण—किमिति ?, तीर्थकरो बभाषे—त्वं चक्रवर्त्ती न भवसि, नृपतिनाऽभ्यधायि—ननु कोऽयंऽ नियमः ?, किं चक्रवर्त्तिन एव सप्तमपृथिव्यामुत्पद्यन्ते अथवा चक्रवर्त्तिनः सप्तमपृथिव्यामेव जायन्ते ? यद्वा चक्रिणस्तस्यां भवन्त्येव ?, तीर्थाधिपतिरुवाच—अमुक्तकामा अमी सप्तमीमेव गच्छन्ति, मुक्तकामास्तु देवलोकं मोक्षं चेति नियमः, पृथ्वीपतिरवोचत्—अहं कथं न चक्री ?, स्वाम्यभिदधौ—य एवोत्पन्नचतुर्दशमहारत्नः पूर्वादिदिग्विजयक्रमेण प्रसाधितषट्खण्डभरतक्षेत्रः स एव चक्री, त्वं तु न तथा, ततस्तत्प्रभृत्येव स्वकल्पनया कृत्रिमरत्नान्युत्पाद्य कथञ्चिद्वैताढ्यादर्वाग्वर्त्ति खण्डत्रयं वशीकृत्य परभागवर्त्तिखण्डत्रितयविजयाय तिमिसगुहामयासीत्, तस्यां च किरिमालकं गुहापालकमादिदेश—यथा भो ! भो ! किरिमालक ! अहमशोकचन्द्रनामा चक्रवर्त्ती वैताढ्यपरभागवर्त्तिखण्डत्रयाजिगीषया तिमिसगुहामुद्घाटयामि तदुद्घाटयेमामिति आदिष्टोऽसावभाणीत्—भो ! भो ! अस्यामवसर्पिण्यां द्वादश चक्रिणो भरताद्या ब्रह्मदत्तपर्यन्ताः, ते च

सर्वेऽप्यतिक्रान्ताः, ततः कोणिकोऽभणत्—अहं त्रयोदशश्चक्री, किरिमालिकः प्राह—भो ! भो ! मा विनाशभाग् भूः, गच्छ स्वस्थानं, किमनेनाशक्यानुष्ठानेन भवतः प्रयोजनं ?, ततोऽसौ निवार्यमाणोऽप्येवं किरमालकेन यावद्भूयो भूयः स्वाग्रहं न मुमोच तावत्कुपितेनानेनाहत्य चपेटया कपोलदेशे नीतः पञ्चत्वं, गतः षष्ठपृथ्वीं तमःप्रभाख्यां, एवं चाकृतदिक्परिमाणानां विज्ञायेहलोक एव दोषं तत्परिमाणकरण एव बुधैर्यत्नो विधेय इति गाथाभावार्थः ॥

गुणद्वारस्येदानीमवसरोऽतस्तन्निगद्यते—

जह चंडकोसिओ खलु निरुद्धदिट्ठीमणोवईकाओ ।
तह अन्नोऽवि सउन्नो सव्वसुहाणं इहाभागी ॥ ७० ॥

'यथा' येन प्रकारेण 'चण्डकोशिकः' चण्डकोशिकाभिधानतापसजीवसर्पः 'खलु' निश्चये वाक्यालङ्कारे वा निरुद्धा—निवारिता दृष्टिमनोवचःकायाः—नयनमानसवचनदेहा अवलोकनचिन्तनभणनाहिण्डनानि प्रतीत्य येन स निरुद्धदृष्टिमनोवचःकायः, अत्र च प्राकृतलक्षणेन 'दिट्ठी' त्ति दीर्घत्वं, यद्वा 'निरुद्धदिट्ठी'-त्येतदेव विशेषणपदं, मनोवचःकाय इति च प्राकृतत्वेन विभक्तिवचनव्यत्ययाभ्यां मनोवचःकायैः सुखभाक् ॥ १९० ॥

संवृत्त इति साध्याहारं योज्यं, 'तथा' तेन प्रकारेण 'अन्योऽपि' अपरोऽपि 'सपुण्यः' पुण्योदयवान् 'सर्व-सुखानां समस्तसौख्यानामिह—जगति आभागी--भागी भाजनं भवति, गृहीतदिक्परिमाणः श्रावक इति गम्यते, इति गाथाक्षरार्थः, समुदायार्थस्त्वेवं—यथा चण्डकौशिको निरुद्धदृष्टिमनोवचःकायो यद्वा निरुद्धदृष्टिर्मनोवचःकायैः सर्वसुखानां भागीभूतस्तथाऽन्योऽपि सपुण्य इति गाथासङ्क्षेपार्थः, विस्तरार्थस्तु कथानकज्ञेयस्तच्चेदम्—

एकस्मिन् गच्छे क्षपको वर्षाकाले मासोपवासपारणकदिवसे क्षुल्लकेन सह भिक्षाचर्यायां प्रविष्टः कथञ्चिद-नुपयोगतो मण्डूकिकां पादेनाक्रान्तमात्रां प्राणेभ्यः पृथक्कृतवान्, ततः क्षुल्लकेनोदितः—क्षपकर्षे ! त्वया मण्डूकिका व्यापादिता, क्षपक इतस्ततस्तत्स्थानवर्तिनीरन्या अपि मतमण्डूकिकास्तस्योपदर्श्य रे रे दुष्टशैक्ष ! किमेता अपि मया व्यापादिताः ? इति जजल्प, क्षुल्लकस्तु क्षुत्क्षाम एषः नायं समयोऽस्य प्रतिप्रेरणायां, प्रस्तावान्तरे स्मरयिष्यामीति विचिन्त्य तदा मौनमेवशिश्रियद्, इतरस्तु भिक्षामादाय स्वोपाश्रये गुर्वालोचनादिपूर्वं भोजनादिव्यापारावसाने सायंतनावश्यकवेलायां यावदालोच्योपवेष्टुमारेभे तावत् काल एष स्मरणाया इति विचिन्त्य क्षुल्लकः—क्षपक ! मण्डूकि-

कामालोचयेति स्मरयामास, सोऽप्यहं मध्येसाधूपहसितोऽनेन तद्दर्शयाम्यमुष्य दुर्विनयफलमिति संक्रुद्धमानसः समादाय स्वोपवेशनपीठं प्रधावितो यावत्तस्योपरि तावदन्तराल एवापतितः स्तम्भे मृतो मर्माघातेनोदपादि विराधितश्रामण्यो ज्योतिष्केषु, स्वायुःक्षये ततश्च्युतोऽत्रैव भरतक्षेत्रे कनकखलाभिधानतापसाश्रमे पञ्चशतसङ्ख्यतापसाधिपतिभार्यायास्तापस्या उदरे उत्पेदे, जातश्चोचितसमये, गतो वृद्धिं कालक्रमेण, स्वभावतश्चण्डः कौशिककुलश्चेति चण्डकौशिकनामा लोके प्रसिद्धिमगमत्, अन्यदा च परलोकान्तरिते पितरि स एव कुलपतिः संवृत्तो, वनखण्डमूर्छया न ददाति तापसवर्गस्य फलपुष्पकन्दाद्यादातुं, ततो गतोऽन्यवनमसौ, अपरेद्युश्च नातिदूरे श्वेतव्या नगर्या राजकुमारकाश्चण्डकौशिकस्य प्रयोजनान्तरेणाटवीं गतस्य समागत्याश्रमं भङ्क्त्वा वनखण्डं बीजपूरकादिफलानि गृहीतवन्तः, ततो गोपालदारकैः कथिते चण्डकोशिकोऽतिरोषपूरितः परशुहस्तः प्रधावितस्तद्वधाय, सर्वेऽपि प्रपलायिता दिशोदिशम्, एषोऽपि वेगेनागच्छन् प्रस्खलितः कथञ्चित् पपात भूमौ तेनैव कुठारेण विदारितमस्तको जगाम यममदिरं, जज्ञे तत्रैव दृष्टिविषसर्पत्वेन, तापसा अपि तं मृतमाकर्ण्य भूयोऽपि समाजग्मुस्तमेवाश्रमं, सर्पस्तु कतिपयदिनैरुपरूढप्रौढविषशक्तिः पूर्वाभ्यासेन तत्रैव वने गाढं मोहमुपगतः परिभ्रमन् सर्वतो यत् किमपि चटककपोतादि पश्यति

तद्विषपूर्णलोचनाभ्यामवलोक्य भस्मसात्करोति, ततस्ते तापसाः केचित्तेन दग्धाः केचिद्वनं दृष्ट्वा(च्च नंष्ट्वा)गताः, इत्थं चासौ द्वादशयोजनप्रमाणं क्षेत्रमुद्वास्य प्रतिदिनमुभयसन्ध्यं पर्यट्य उटजमण्डपिकाबिले तिष्ठन् सुखमास्ते स्म, इतश्च—भगवान् महावीरश्छद्मस्थकाले प्रथमं वर्षाकालं शूलपाणियक्षायतने विधाय लोकेन निवार्यमाणोऽपि तमाश्रममुपेत्य समीपे तदीयमण्डपिकायाः कायोत्सर्गेण तस्थौ, तद्गन्धेन निर्गतो बिलाद्बहिः, दृष्ट्वा भगवन्तं मदीयमण्डपिकाऽभ्यर्णवर्त्त्येष कश्चिन्निर्भयस्तिष्ठतीति चिन्तयन्नत्यन्तं क्रुद्धस्तद्दिधक्षया विलोक्य सूर्यं यथा २ निभालयामास भगवत्संमुखं तथाऽनिर्विषीभूते विलोचने, ततो दंष्ट्राभिर्दष्ट्वा विषवेगविघूर्णितो मा ममैवोपरि पतिष्यतीति बुद्ध्या दूरमपसृत्य यावद्वीक्षाञ्चक्रे तावद्दंशस्थाने गोक्षीरधवलमाकलय्य रुधिरपूरमाकर्ण्य च भगवदुक्तम् 'उपशाम्य भो चण्डकौशिक ! उपशाम्ये'ति वचनमीहापोहामार्गणतः समुद्भूतजातिस्मरणः क्षपकभवाद्यनुभूतकोपफलं परिभाव्य भगवत्समीपे विरचितानशनप्रतिपत्तिर्बिलप्रक्षिप्तवदनः सकलसत्त्वक्षामणाध्यवसायी विहितकषायजयोऽर्द्धमासं तस्थौ, भगवानपि मा कश्चिदेनमुपद्रोष्यतीतिबुद्ध्या तत्रैव तथैवासाञ्चक्रे, लोकोऽपि स्वामिनः सुखदुःखवार्त्तानिरूपणार्थं वृक्षाद्यन्तरितो यावत्तथैव तच्चेष्टामैक्षिष्ट तावदेवमकृत चेतसि—ननमेष लोचनविषो दंद-

शूकः कथञ्चित्तेनैवोपशमं ग्राहितः, कथमन्यथाऽक्षतमूर्तिरेवमेषोऽत्र संतिष्ठते ?, ततो निकटीभूतो विषधरं तथास्थितं वीक्ष्य काष्ठलेष्ट्वादिप्रक्षेपैः परीक्ष्यैकान्तोपशान्तं दुग्धघृतादिभिरभ्यर्चयामास, तद्गन्धेन च कीटिकादिभिरनिशमेव भक्ष्यमाणः सम्यगधिषह्य तां वेदनां पञ्चदशे दिने मृतः सहस्रारकल्पे महर्धिकसुरत्वेन समुत्पन्नः, तदेवमसौ दृग्विषो भुजङ्गमो निरुद्धदृष्टिमनोवाक्कायो यथेह लोके पूजायाः परत्र च देवलोकसुखानामाभागी संपन्नः, एवं प्रतिपन्नदिक्परिमाणः श्रावकोऽपि निरुद्धात्मा सकलसुखभागी जायत इति मत्वाऽत्र यतितव्यमित्युपदेशगर्भो गाथाभावार्थः ॥ यतनेदानीं प्रक्रम्यते—



फलसंपत्तीवि धुवा जीवाणं तहवि जत्थ उवघाओ ।
पंचिंदियमाईणं तत्थ न गच्छंति ते कहवि ॥ ७१ ॥

'फलसम्प्राप्तिः' कार्यनिष्पत्तिः अपिः संभावने 'ध्रुवा' निश्चिता, ध्रुवमिति वा पाठः, 'जीवानां' प्राणिनां प्रक्रमात्स्वीकृतदिक्परिमाणानां यद्यपीति गम्यते, अथवा 'जीवानां' पञ्चेन्द्रियादीनामित्यत्र संबध्यते, 'तथाऽपि' एवमपि 'यत्र' क्षेत्रे 'उपघातः' उपपीडा पञ्चेन्द्रियादीनां मकारोऽलाक्षणिकः पञ्चेद्रियाद्येकेन्द्रियान्तानां पश्चानु-

पूर्व्या ' तत्र ' तस्मिन् परिमितक्षेत्राभ्यन्तरेऽपीति भावः ' न गच्छन्ति ' नो यान्ति जीवाः ' कथमपि ' केनापि प्रकारेणेत्यवयवार्थः, समुदायार्थस्त्वेवम्—यद्यपि विहितदिक्परिमाणानां जीवानां परिमितक्षेत्राभ्यन्तरेऽपि क्वचिदभिलषितफलप्राप्तिरवश्यंभाविनी संभाव्यते तथाऽपि यत्रोपघातः पञ्चेन्द्रियादीनां तत्र ते व्रतातिक्रमाभावेऽपि न गच्छन्तीति यतना, यथा मण्डूकिकाटोलकीटिकाद्याकुलमार्गे, अन्यथा दिक्परिमाणकरणस्य किं फलं स्याद्?, जीवोपमर्दस्य तन्मध्येऽपि भावादिति तात्पर्यं, पञ्चेन्द्रियादीनामित्यत्र चादौ पञ्चेन्द्रियग्रहणं पञ्चेन्द्रियातिपातस्य प्रभूतप्रायश्चित्तविषयत्वेन महादोषख्यापनार्थम्, अन्यथैकेन्द्रियादीनामिति पूर्वानुपूर्व्यैव निर्दिशेदिति गाथार्थः ॥ अतिचारद्वारमितः प्रस्तूयते—

उड्ढं अहे य तिरियं अतिक्कमं तहय खेत्तवुड्ढिं च ।
सइअंतरद्धमेत्थं वज्जेज्जा पंच अइयारे ॥ ७२ ॥

' ऊर्ध्वं ' पर्वतशिखरादौ ' अधः ' कूपादौ ' चः ' समुच्चये ' तिर्यक् ' पूर्वादौ ' अतिक्रमं ' उल्लङ्घ-
३३ नम्, अङ्गीकृतयोजनादिपरिमाणस्येति गम्यते, वर्जयेदिति पश्चिमपादात्क्रियाऽभिसंबध्यते, तथा क्षेत्रस्य—प्राच्यादिदिग्गृहीतयोजनादिलक्षणस्य वृद्धिः—वर्द्धनमपरदिग्गृहीतक्षेत्रप्रमाणप्रक्षेपेण दीर्घीकरणं क्षेत्रवृद्धिस्तां च वर्जयेत्,

अत्र तथाशब्दः प्रकारे, तस्य चैवं भावना—यथोर्ध्वाधस्तिर्यगतिक्रममतिचारतया प्रतीतं वर्जयेत् तथा क्षेत्रवृद्धिं च, चः प्राक्तनपदापेक्षया समुच्चये, तथा चेति चकारोऽग्रे योज्यः, स्मरणं स्मृतिः—उपयोगस्तस्या अन्तर्द्धानमन्तर्द्धा-भ्रंशः स्मृत्यन्तर्द्धा तां च 'अत्र' अस्मिन्नतिचारप्रक्रमे 'वर्जयेत्' त्यजेत् 'पञ्चातिचारान्' पञ्चसङ्ख्यदिग्व्रतातिक्रमभेदान्, एतेषां चाद्यत्रयस्यातिक्रमादिभिरतिचारत्वमन्यथाप्रवृत्तौ तु भङ्ग-रूपतैव, क्षेत्रवृद्धिस्तु केनचिच्छ्रावकेण पूर्वापरदिशोः प्रत्येकं योजनशतं गमनपरिमाणं कृतं, स चोत्पन्नप्रयोजन एकस्यां दिशि नवतिं व्यवस्थाप्यान्यस्यां तु दशोत्तरं योजनशतं करोति, तदभिप्रायेण द्विधाऽपि योजनशतद्वय-परिमाणस्याव्याहतत्वात्, एवमेकत्र क्षेत्रं वर्द्धयतो व्रतसापेक्षत्वादतिचारः, स्मृत्यन्तर्द्धा च केनचित्किल पूर्वस्यां दिशि योजनशतरूपं परिमाणं कृतमासीद्, गमनकाले च कथञ्चिद्व्याकुलत्वप्रमादित्वमत्यपाटवादिना न स्पष्टतया स्मरति—किं शतं परिमाणं कृतमुत पञ्चाशत्?, तस्य चैवं पञ्चाशतमतिक्रामतोऽतिचारः शतमतिक्रमतो भङ्गः, सापेक्षत्वान्निरपेक्षत्वाच्चेति गाथार्थः ॥ वृद्धसम्प्रदायश्चायम्—ऊर्ध्वं यत्परिमाणं कृतं तस्योपरि गिरिशिखरे तरु-शिखरे वा मर्कटः पक्षी वा वस्त्रमाभरणं वा गृहीत्वा व्रजेत्तत्र तस्य न कल्पते गन्तुं, यदा तु तत्ततः स्वयमेव पति-

तमन्येन वाऽऽनीतं तदा कल्पते ग्रहीतुं, एतत्पुनः उज्जयन्तादिषु भवेद्, एवमधः कूपादिषु विभाषा, तथा यत्तिर्यक्परिमाणं गृहीतं तत्त्रिविधेन करणेन नातिक्रमितव्यं, क्षेत्रवृद्धिश्च न कार्या, कथम् ?, असौ पूर्वेण भाण्डं गृहीत्वा गतो यावत्तत्परिमाणं, ततः परतो भाण्डमर्घं लभते इतिकृत्वाऽपरेण यानि योजनानि तानि पूर्वदिक्-परिमाणे प्रक्षिपति, यद्यनाभोगात्परिमाणमतिक्रान्तो भवेत्तदा निवर्त्तितव्यं, ज्ञाते वा न गन्तव्यमन्यो वा न विसर्जनीयः, अनाज्ञया कोऽपि गतो भवेत्तदा यत्तेन लब्धं स्वयं विस्मृत्य वा गतेन यत् तन्न गृह्यत इति ॥ उक्तम-तिचारद्वारं, सम्प्रति भङ्गद्वारमावेद्यते—

दुविहं तिविहेण गुणव्वयं तु घेत्तूण पेसए अन्नं ।
तल्लाभं वा गेण्हइ तस्स धुवं होइ इह भंगो ॥ ७२ ॥

'द्विविधं' योजनविंशतेः परतः स्वयं न गच्छामि नान्यं प्रेषयामीत्येवं 'त्रिविधेन' मनसा वाचा कायेन 'गुणव्रतं' प्रस्तावाद् दिक्परिमाणं 'गृहीत्वा' आदाय 'प्रेषयति, प्रस्थापयति 'अन्यं' अपरं, प्रयोजनोत्पत्ता-विति गम्यते, प्रेक्षावतां निष्फलवृत्तेरसंभवात्, न केवलमन्यं प्रेषयति 'तल्लाभं वा गृह्णाति' तस्मिन्-दिक्-

परिमाणातिक्रमे लाभस्तल्लाभस्तं, वाशब्दः पक्षान्तरसमुच्चये, 'गृह्णाति' आदत्ते, जानान उपेत्यकरणेन 'तस्य' गृहीतदिक्परिमाणस्य 'ध्रुवं' निश्चितं 'भवति' संपद्यते 'इह' प्रस्तुतव्रते लोके वा 'भङ्गः' सर्वविनाशरूप इति गाथार्थः ॥ भावनाद्वारमेतर्हि कथ्यते—

इरियासमियाएँ परिब्भमंति भूमण्डलं निरारंभा ।
सव्वजगज्जीवहिया ते धन्ना साहुणो निच्चं ॥ ७४ ॥

ईरणमीर्या तस्यां सम्यगयनं समितिरीर्यासमितिः—अव्याक्षिप्तचेतसो युगमात्रान्तरन्यस्तलोचनस्य निरवद्यमार्गेण गमनं तयेर्यासमित्या, समिता इति गम्यते, 'ये परिभ्रमन्ति' यत्तदोर्नित्याभिसम्बन्धाद् ये पर्यटन्ति, किं तत् ? इत्याह—'भूमण्डलं' महीवलयं, कीदृशाः ?—'निरारम्भाः' आरम्भेभ्यो निर्गताः निरारम्भाः—आरम्भविवर्जिताः, यत एवैवमत एव 'सर्वजगज्जीवहिताः' सर्वे च ते जगज्जीवाश्च सर्वजगज्जीवास्तेभ्यो हिताः, निःशेषचतुर्दशरज्ज्वात्मकलोकवर्त्तिप्राणिवत्सलाः 'ते' एवंगुणयुक्ताः 'धन्याः' धर्मधनलब्धृत्वात्पुण्यभाजः 'साधवः' तपस्विनः 'नित्यं' सदेति गाथार्थः ॥ भणितं प्रथमगुणव्रतमिदानीं द्वितीयं नवभेदमभिधातव्यं, तत्रापि प्रथमद्वारेण तावदाह—

। नमो नमः श्रीगुरुप्रेमसूरये ।

कम्ममसंखिज्जभवं । खवेइ अणुसमयमेव आउत्तो ॥
अन्नयरंमि वि जोगे । सज्झायंमि विसेसेण ॥

જિનશાસનના કોઈપણુ યોગમાં પ્રવૃત્તિ કરનાર અસંખ્યભવના બાંધેલા કર્મોને ખપાવે છે. પરંતુ સ્વાધ્યાયમાં પ્રવૃત્ત આત્મા વિશેષપણે કર્મ ખપાવે છે.

— મલ્લધારી હેમચંદ્રસૂરિ–પુષ્પમાળા

શ્રી જિનશાસન આરાધના ટ્રસ્ટ

૭, ત્રીજો ભોઇવાડો, ભુલેશ્વર, મુંબઈ–૨.